।। श्रीशंकरभगवत्पादाः विजयन्ते ।।

श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिः - ग्रन्थाङ्कः - १

श्रीमदप्पय्यदीक्षितेन्द्रविरचिताः
द्वादश ग्रन्थाः

JACL-KRC
025291

२०१०

1

[illegible]

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

25291

वर्गीकरण सं.....................

पुस्तक सं......................... दिनाङ्क ....

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

जयपुर

12.2 I

15.5.2

[illegible]

[illegible]

SV-2024

Sri Gurubhyō Namah

Srimad Appayya Deekshithendra Granthavali Series - 9

SIVARCHANACHANDRIKA
MADHVATANTRAMUKHAMARDANAM
PANINITANTRA VADANAKSHATRAMALA
MANASOLLASA
SIVADHYANAPADDHATI
ARYA SATAKAM &
STOTRAS

OF

SRIMAD APPAYYA DEEKSHITHENDRA

Editor:

Mahamahopadhyaya - Vedantasagara
Dr. Pullela Sri Ramachandrudu
M.A., Ph.D.,

215
16-10-12
25291

Srimad Appayya Deekshithendra
Granthavali Prakasana Samithi
HYDERABAD

First Edition : 2010

Copies : 250

All Rights Reserved by
S.A.D.G.P. Samithi (Regd.)

Price : Rs.250/-

Copies can be had from :

Dr. S.Raghavan
H.No.9-32/1,
Ravindra Nagar Colony,
Hyderabad - 500007
Ph: +91 -040 - 27173445
E-mail : ragamang@gmail.com

JACL-KRC
025291

Printed at:

Nandini Art Printers
29-1369/A, Deendayal Nagar,
Neredmet, Secunderabad-56
Ph: +91 - 9704092820.

।। श्रीशंकरभगवत्पादाः विजयन्ते ।।

श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिः - ग्रन्थाङ्कः - ९

श्रीमदप्पय्यदीक्षितेन्द्रकृतयः

शिवार्चनचन्द्रिका
मध्वतन्त्रमुखमर्दनम्
पाणिनितन्त्रवादनक्षत्रमाला
मानसोल्लासः
शिवध्यानपद्धतिः, आर्याशतकम्, स्तोत्राणि च

सम्पादकः

महामहोपाध्यायः - वेदान्तसागरः

डा.पुल्लेल श्रीरामचन्द्रः

M.A., Ph.D.,

श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थावलिप्रकाशनसमितिः

हैदराबाद्

विषयसूची

१.	श्रीमुखम्	*v*
२.	***Preface***	***ix***
३.	***Introduction***	***xi***
४.	शिवार्चनचन्द्रिका ***Sivarchanachandrika***	१ - १०१ ***1 - 101***
५.	मध्वतन्त्रमुखमर्दनम् ***Madhvatantramukhamardanam***	१०३ - १९८ ***103 - 198***
६.	पाणिनितन्त्रवादनक्षत्रमाला ***Paninitantravadanakshatramala***	१९९ - २९७ ***199 - 297***
७.	मानसोल्लासः ***Manasollasa***	२९९ - ३१८ ***299 - 318***
८.	शिवध्यानपद्धतिः ***Sivadhyanapaddhati***	३१९ - ३३५ ***319 - 335***
९.	आर्याशतकम् ***Aaryasatakam***	३३७ - ३४८ ***337 - 348***
१०.	स्तोत्राणि *(श्री गङ्गाधराष्टकम्, निग्रहाष्टकम्, श्रीमार्गबन्धु पञ्चरत्नमाला, श्री मार्गसहायलिङ्गस्तुतिः, अपीतकुचाम्बास्तवः, श्री हरिहराभेदस्तुतिः)* ***Stotras*** ***(Sri Gangadharashtakam, Nigrahashtakam, Sri Margabandhu Pancharatnamala, Sri Margasahayalinga Stutihi, Apitakuchamba Stava, Sri Hariharaabeda Stutihi)***	३४९ - ३५८ ***349 - 358***

श्रीरामजयम्

Phone : 044-2722115
Fax : 27224305 Email : skmkanci@md3.vsnl.net.in

Sri Chandramouleeswaraya Namaha:
Sri Sankara Bhaghavatpadacharya Paramparagatha
Moolamnaya Sarvagnapeeta:
His Holiness Sri Kanchi Kamakoti Peetadhipathi
JAGADGURU SRI SANKARACHARYA SWAMIGAL
Srimatam Samsthanam
1, Salai St, Kanchipuram - 631502

Date : 16-01-2010

मुद्रा

स्वस्ति श्रीमदखिल भूमण्डलालंकार, त्रयस्त्रिंशत्कोटिदेवतासेवित, श्री कामाक्षीदेवीसनाथ, श्रीमदेकाम्रनाथ, श्रीमहादेवीसनाथ, श्रीहस्तिगिरिनाथ, साक्षात्कार, परमाधिष्ठान, सत्यव्रत नामांकित, काँचीदिव्यक्षेत्रे, शारदामठसुस्थितानां, अतुलित सुधारसमाधुर्य, कमलासनकामिनी, धम्मिल संफुल्ल, मल्लिका मालिका निष्यन्द मकरन्दझरी, सौवस्तिक, वाङ्निगुम्भ-विजृंभणानन्द, तुन्दिलित मनीषि मण्डलानां, अनवरताद्वैत, विद्याविनोद रसिकानां, निरंतरालंकृतीकृतशान्तिदान्तिभूम्नां, सकल भुवन चक्रप्रतिष्ठापक श्रीचक्रप्रतिष्ठा विख्यातयशोलंकृतानां, निखिल पाषण्ड षण्ड कण्टकोद्घाटनेन विशदीकृत वेदवेदान्तमार्ग षण्मत प्रतिष्ठापकाचार्याणां, श्रीमत्परमहंस परिव्राजकाचार्यवर्य जगद्गुरु श्री मच्छंकर भगवत्पादाचार्याणां, अधिष्ठाने सिंहासनाभिषिक्त श्रीमच्चन्द्रशेखरेन्द्र सरस्वती संयमीन्द्राणां, अन्तेवासिवर्य - जगद्गुरु श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः Dr.पुल्लेल श्रीरामचन्द्रमहोदयस्य कृते क्रियते नारायणस्मृतिः।

येषामास्यसरोजनिःसृतसुधामाधुर्यलेशादियम्
पृथ्वी मोदभरा विभाति सुतरां ग्रन्थैकभूषान्विता ।
तेषामप्पयदीक्षितेन्द्रविदुषां ग्रन्थप्रकाशे रताः
राजन्तां शशिशेखरस्य कृपया लब्ध्वैहिकामुष्मिकम् ।।

समस्तजगतुद्भवस्थितिसंहारकारणं घोरतरसंसारगदनिवारणनिदानञ्च ब्रह्म भवदवशिखातापपापच्यमानान्विलोक्य करुणया दृशा आत्मनोऽवतार- विशेषैः सन्तारयज्जयति । तादृशाः श्रीराम-कृष्ण-श्रीमदादिशङ्करभगवत्पाद- प्रभृतयोऽवताराः स्वीयवैभवविलासैः जनान्तारयन्तः वाग्भिः जीवनसरणिभिश्च आबालपण्डितं बोधयन्ति। तादृशेष्वतारविशेषेषु शैल-निभ-घोर-कलिकाल-बल-लीला-लोल-विलुलितायां शील-कुल-विलुप्त-खल-जाल-मल-मलिनायां भुवि सर्वलोकशङ्करः भक्तवशङ्करः भगवान् शङ्करः मखशत-परिपूते श्रुतिरवधृतिगीते महति कुले श्रीमदप्पयदीक्षितेन्द्रनाम्ना समजनि । स्वावतारलक्ष्यं चिकीर्षुभिस्तैः आबाल्याच्छास्त्रामृत-प्रसारणैः विविधनय-प्रमाणप्रदर्शनैश्च अद्वैत-शिवाद्वैत-विशिष्टाद्वैत-द्वैतदर्शनानां प्रकरणग्रन्थरचनैः जनेषु भेदबुद्धिं तिरस्कृत्य निरवधिकसुखैकरूपं अखण्डं अभिन्नञ्च ब्रह्म प्रत्यपादि ।

तत्करारविन्दलिखिताः कृतयः तेषां शास्त्राम्बुधावतलस्पर्शित्वं साहित्यर-सामृतास्वादन पटुत्वञ्च द्योतयन्ति । देववाणीवाङ्मयपरिसरे दार्शनिकसाहित्यविलास-परिपाकपरिपूर्णाः अङ्गुलीगण्या एवेत्येषां कीर्तिः नितरां राराजते । तादृशानां महनीयानां सर्वतन्त्रस्वतन्त्राणां पदवाक्य-प्रमाणपारावारपारीणानानां समादृतवाजपेयादिमहाध्वर-विशेषसमुल्लसितदीक्षा-विशेषाणां साक्षात्कृताद्वैतपरतत्त्वानां शिवभक्तशिखामणीनां मीमांसक-मूर्धन्यानाञ्च श्रीमदप्पय्यदीक्षितेन्द्राणां कृतिसौरभं दिक्षु प्रसारयितुं च बद्धदीक्षा अस्मद्गुरुवर्यैः श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीसंयमीन्द्रैः परिपूर्णाशीर्भिः

संवर्धिता च श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थप्रकाशनसमितिः अष्टसम्पुटानि सम्पाद्य इदानीं नवमे सम्पुटे शिवार्चनाचन्द्रिका, सव्याख्यं मध्वतन्त्रमुखमर्दनम्, पाणिनितन्त्र-वादनक्षत्रमाला, श्रीशिवानन्दयतिरचितव्याख्यातसंयुतं मानसोल्लासः, शिवध्यानपद्धतिः, आर्याशतकम्, गङ्गाधराष्टकादिस्तोत्राणि चति सप्तभिः ग्रन्थमणिभिः खचितां जाज्वल्यमानां मालिकां विरचय्य देववाणीमातुः कण्ठे सश्रद्धमातनोतीति ज्ञात्वा नितरां मोमुद्यते चेतो नः ।

इमे च ग्रन्थाः श्रीमदप्पय्यदीक्षितेन्द्राणां समस्तशास्त्राम्बुध्यगाधज्ञानं करामलकमिव प्रदर्शयन्ति । प्रथमं शिवाराधनया समारभ्यमाणेयं ग्रन्थ-मालिका हरिहराभेदस्तुतौ समाप्तिमेतीति अद्वैतसाम्राज्यस्यैव अलङ्कार-तोरणमिव विभाति। तथा हि अद्वैतानुयायिनः वैदिककर्मसु श्रीपरमेश्वरप्रीत्यर्थमिति समारभ्य हरिहररूपिणि ब्रह्मणि अर्पणं वितन्वन्ति ।

एनां ग्रन्थमालिकां विरचय्य लोकोपकारं वितन्वन् महामहोपाध्याय, वेदान्तसागरादिबिरुदावलिभिरलङ्कृतः डा.पुल्लेल श्रीरामचन्द्रुडुमहाभागः सभक्तिश्रद्धं सर्वात्मना यतमानः महाध्वरिमिव ग्रन्थप्रकाशनं समातनोति । सोऽयं धीरः श्रीमहात्रिपुरसुन्दर्यम्बासमेतश्रीचन्द्रमौलीश्वरकृपया ऐहि-कामुष्मिकश्रेयांस्यदिगच्छत्विति, अस्य सहायकाः समितेः कार्यकर्तारश्च समस्तमङ्गलावाप्त्या भगवत्कटाक्ष-सुधामधिगच्छन्त्विति, समितिश्च एवमेव ग्रन्थरत्नानि तन्वाना नितरां विलसतुतमामिति चाशास्महे ।।

नारायणस्मृतिः

PREFACE

Srimad Appayya Deekshithendra Granthavali Prakasana Samithi takes pleasure in placing in the hands of Sanskrit Scholars and Sanskrit lovers the ninth volume in the Granthavali Series. The volume has been successfully brought out with the benign blessings of Their Holiness Sri Jayendra Saraswathi Swamigal and Sri Sankara Vijayendra Saraswathi Swamigal of Sri Kanchi Kamakoti Peetham

This volume contains the following works of Sri Deekshitar

1. **Sivarchanachandrika**
2. **Madhvatantramukhamardanam**
3. **Paninitantravadanakshatramala**
4. **Manasollasa**
5. **Sivadhyanapaddhati**
6. **Aaryasatakam**
7. **Stotras**
   (Sri Gangadharashtakam, Nigrahashtakam,
   Sri Margabandhu Pancharatnamala,
   Sri Margasahayalinga Stutihi,
   Apitakuchamba Stava, Sri Hariharaabeda Stutihi)

The book has been edited by Mahamahopadhyaya - Vedanta Sagara Dr.Pullela Sri Ramachandrudu. The Samithi is thankful to him for his painstaking efforts.

The Samithi is grateful to Sri R.Venkatrama Ghanapathigal, Managing Trustee, Sri Sankara Gurukula Veda Pathasala, Hyderabad for arranging the paper for the book and for the help he has been rendering to the Samithi in all its activities.

The composing of the text in DTP was done by Sri Rajaranganathan & Smt. S. Lakshmi guided by Dr. Pullela Sri Ramachandrudu. The Samithi thanks them for the commendable job.

The Samithi earnestly hopes that the book will be a welcome addition to the works already published by the Samithi and will be useful to the scholars and students.

S.Raghavan
Hony.Secretary
SADGP Samithi



श्रीः
ॐ स्वस्ति श्रीगणेशाय नमः

INTRODUCTION

1. *Sivarchanachandrika*

In this work all the rules which are to be meticulously followed by a person, who for his own benefit, is engaged in the daily worship of the Lord Siva with Devi (आत्मार्थपूजा) are given following the tradition of Siddhantagama. It deals with 38 topics connected with the शिवार्चना. This is a very important manual for those who lead pious lives being engaged in the शिवार्चना every day and on special occasions.

2. Madhvatantramukhamardana:

This is a work with 60 verses with an elaborate commentary by the author himself called Madhvamatavidhvamsana. In this work Sri Appayya Dikshita severely criticises the commentary of Sri Madhvacarya on the first five Adhikaranas of Brahmasutra and his farfetched interpretation of the sutras in the course of which he (Madhvacarya) quotes many Sruti Vakyas, which are not to be found in any Upanishad. While criticising the five Adhikaranas he brings in many other topics also from different places of Madhvacharya's Bhasya and other works and shows how the whole doctrine propagated by him is against the spirit of the Upanishads and the Brahmasutra.

Madhvatantramukhamardana is perhaps so named because it makes a frontal attack on Dvaita System demolishing its arguments against Advaita and in support of Dvaita in the very first five Adhikaranas (मुख).

This work was first published in Grantha script about 120 years ago in Tamil Nadu and in Varanasi, in Nagari script, in the year 1941 A.D.

It is interesting to note that the great grammarian Bhattoji Dikshita who is said to have studied Vedanta with Sri Appayya Dikshita wrote a work तत्त्वकौस्तुभ, which runs into 120 pages, severely criticising the whole Sutrabhashya of Sri Madhvacharya,. It criticises not only the Dvaita Siddhanta but also the customs and practices preached by Sri Madhvacharya to his followers.

3. Paninitantravadanakshatramala:

The महाभाष्य of Patanjali is an exhaustive and critical commentary on Panini's अष्टाध्यायी and the वार्तिक there on, by Katyayana. There are many important discussions in the महाभाष्य involving many grammatical principles. Apart from the many परिभाषा's (special interpretative rules) found in the अष्टाध्यायी, Patanjali introduced many more परिभाषा's on the basis of indications found in the Sutras.

Sri Appayya Dikshita had perhaps planned to discuss 27 topics connected with the grammar of Panini and named the work Paninitantravadanakshatramala. He could deal with only a few topics (5 or 6) with the last one dealing with इको गुणवृद्धी incomplete with many lacunae even in the printed book.

Though we come across brief discussions on subjects connected with grammar in the पदमञ्जरी of Haradatta, the commentator on Kasika, the credit of introducing long and intricate discussions involving number of Sutras goes to Sri Appayya Diskhita which has later on been pursued by writers like Bhattoji Dikshita, Nagesa Bhatta and others.

This work was first edited and published by Sri Rayampettai Krishnamacharya in 1910 from Sri Krishna Vilasa Press, Tanjore.

4. Manasollasa:

Manasollasa is a poem of 18 verses in which the poet addresses his own mind and exhorts it to shun all the worldly activities and be attached to the Lord Siva. The style is lucid and its appeal to the mind of the reader is direct. Each verse contains an idea, which makes the reader ponder over for a few moments producing a strong sense of detatchment to the worldly pursuits and making him develop a sense of devotion to the Lord Siva.

It is published with a commentary by Sri Sivananda Yati of Varanasi. The Samithi is grateful to Dr.V.Kameswari, Director of The Kuppuswami Sastri Research Institute, Chennai, for the xerox copy of the poem with the commentary.

5. Sivadhyanapaddhati:

This is a small work of 150 verses in Anushtubh Metre in which Sri Appayya Dikshita explains the method in which the Lord Siva is to be contemplated in different forms by the devotees. This is based on the book published in 1888, in Grantha script, from the Brahma Vidya Press, Chidambaram. The Samithi is grateful to Dr T. Ganesan of the French Institute, Pondicherry for providing the material for this work.

6. Aryasatakam:

This is a century of verses in Arya metre composed in praise of the Lord Siva. As a great devotee Sri Appayya Dikshita takes liberty with the Lord and demands that it is his obligatory duty to pardon him for all his shortcomings and give him protection.

Hyderabad — P. Sri Ramachandrudu
08.03.2010

श्रीः

श्रीगणेशाय नमः

।। शिवार्चनाचन्द्रिका ।।

यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय नारायणीसहचराय नमश्शिवाय ।।

अवश्यकार्यं शैवानामात्मार्थशिवपूजनम् । तच्च वैदिकमिश्राभ्या मेतेषां शैवमुत्तमम् ।। तदप्यशक्तिकाच्छुद्धात् मिश्रात्सौरादिकादपि । सशक्ति केवलं श्लाघ्यं संक्षिप्तं भुक्तिमुक्तिदम् ।। तस्मादात्मार्थयजनं शम्भो रंबिकया सह । संगृह्य दर्शयिष्यामि सर्वदिव्यागमोद्धृतम् ।। दिव्यागमार्थसाङ्कर्यमैकतन्त्र्यान्न दोषकृत् । वि न्तु पाशुपतार्थं च साङ्कर्यं तेषु दोषकृत् ।। तेष्वप्येकं समाश्रित्य ग्राह्यमन्यदपेक्षिते । इत्येतन्मानुषे लिङ्गे नतु स्वायंभुवादिषु ।। एकागमावलंबेऽपि प्रविहाय तदीरितम् । प्रशस्तमन्यतो ग्राह्यमित्युपादिशदीश्वरः ।। प्राशस्त्यस्योभयोस्साम्येऽप्यर्चनाङ्गमपेक्षितम् ।। तत्रोक्त मन्यतन्त्रोक्तं सममित्यप्युपादिशत् ।। तस्माद्दिव्यागमेभ्योऽसौ अखिलेभ्यस्समुद्धृतैः । अपेक्षितांशैः क्रियते श्रीशिवार्चनचन्द्रिका ।।

आचम्य भस्मरुद्राक्षविभूषितकळेबरः । सकळीकृत्य संस्कुर्यात्सामान्यार्घ्यं यथाविधि ।। शुद्धविद्यात्मकं ध्यात्वा शिवपूजानिकेतनम् । तद्द्वारेऽनुत्तरे कुर्यात् द्वारपालार्चनं क्रमात् ।। विघ्नत्रयं समुत्सार्य प्रविश्यास्त्रादिपूजनम् । कृत्वा पूजोपकरणं सकलं सन्निधापयेत् ।। देवस्य दक्षिणे भागे पावकस्योत्तरामुखम् । विहितासनमास्थाय पञ्चशुद्धिं समाचरेत् ।। आदित्यस्योदयात्पूर्वं मुहूर्तद्वितये स्थिते। उत्थाय धौतांघ्रिकरः कृतभस्मावकुण्ठनः ।। हृदि सामान्यसमयी चिन्तयेत्परमेश्वरम्। विशिष्टसमयी बिन्दौ मूर्ध्नि निर्वाणदीक्षितः ।। आचार्यबोधकश्चैनं द्वादशान्ते विचिन्तयेत् । नामानि चास्य हृद्यानि चरित्राणि च कीर्तयेत् ।। विण्मूत्रोत्सर्जनं कुर्यात् गत्वा देशं यथोचितम् ।। उदङ्मुखोऽहस्सन्ध्यासु रजन्यां दक्षिणामुखः । प्राक्प्रत्यग्वदनो यद्वा दिनपूर्वापरार्धयोः। उदङ्मुखस्तु मध्याह्ने रजन्यां दक्षिणामुखः । नभो-

विण्मूत्रादिक्चन्द्र सूर्यतराग्निदर्शनम् ।। देवगोमुनिविप्रस्त्रीसम्मुखं च विवर्जयेत् । तृणैःपायु मयज्ञार्हे रिज्याद्यनुपयोगिभिः।। लोष्टाद्यैर्वा न सत्पुष्पपर्णकाष्ठफलादिभिः। अधोदृष्टिः प्रजननं गृह्णन्वामेन पाणिना । जलाभ्याशमुपागम्य शौचं कुर्वीत मृज्जलैः। एका लिङ्गे गुदे पञ्चदश वामकरे मृदः।षष्ठं च पृष्ठे चाग्रे च करयोस्सप्त मृत्तिकाः।। वल्मीके वृक्षमूले च गृहे मार्गे जलान्तरे । ऊषरे मूषिकोत्खाते गोव्रजे देवतालये।। वापीकूपतटाकादिमूले च सिकतास्थले ।। वीथ्यां श्मशाने कीटास्थितुषाङ्गारादि-दूषिते । पांसुले परशौचार्धशिष्टमृत्कीर्णभूतले।। हलोत्खाते च जंबाले शर्करे नाहरे-न्मृदम् ।। शुद्धभूमौ च मृत्ग्राह्या व्यपोह्योपरि मृत्तिकाम् । यथा स्यात् शौचपर्याप्ता नावशिष्येत वा यथा ।। प्रथमं पायुशौचं स्यादर्धप्रसृतिमानतः । तदर्धमानतः पश्चा-त्तदर्धे न ततः परम् ।। आर्द्रामलकमानं स्यान्मूत्रशौचेतु मृत्तिका । द्विगुणं मृत्तिका-शुद्ध्ये त्रिगुणं दारसङ्गतौ ।। एतच्छौचं गृहस्थस्य भावशुद्ध्यै ततोऽधिकम् । ब्रह्म-चार्यादिकानां तु क्रमात्द्वित्रिचतुर्गुणम् । यस्य यावद्दिवा शोचं तदर्धं निशि तस्य तत् । तदर्धमातुरे चोक्त मातुराधं वनाध्वनि।। आगुल्फं चरणौ मृद्भिः करावा-मणिबन्धकौ । संक्षाल्य क्षाळयेत्पश्चा दाजान्वाकूर्परं जलैः ।। धाराशौचं च कर्तव्यं शौचशुद्धिमभीप्सता । चुळकैरेव कर्तव्यं हस्तौ शुद्धिविधानतः । शौचे मृज्जलदा-नार्थं कर्तव्यौ परिचारकौ । सव्यहस्तगृहीता च क्षेप्या मृद्वामहस्तके ।। कुर्याद्द्वा-दश गण्डूषान् पुरीषोत्सर्जने कृते । कुर्वीत चतुरो मूत्रे भोजनान्ते तु षोडश।। प्राङ्मुखः क्षाळयेत्पादौ हस्तौ वक्त्रमुदङ्मुखः । उदङ्मुखः प्राङ्मुखो वा ततस्त्वाचमनं चरेत् ।।

।। दन्तधावनविधिः ।।

हन्मन्त्रेण ततो ग्राह्यं दन्तकाष्ठं त्वगन्वितम् । अपर्वाग्रसमच्छेदमाद्यमग्रे च कूर्चितम् ।। कनिष्ठिकासमस्थौल्यं सूक्ष्मं वा दन्तसौक्ष्म्यतः ।। अष्टांगुळं नैष्ठिकानां भोगिनां द्वादशांगुळम् । वर्णानां दशकं चाष्टसप्तांगुळिकमेवच ।। षडङ्गुळं प्रहीणानां नारीणां चतुरङ्गुळम् । जम्ब्वाम्लककुभाशोककपित्थवकुलोद्भवम् ।। प्लक्षौदुम्बरफु-ल्लांघ्रीजाजीचम्पकशंखजम् । अतिमुक्तकदंबोत्थमपामार्गं च भोगिनाम् । ग्राह्यमेतच्च शैरीषचिरिबिल्वकरञ्चकम् । श्रीपर्णदारुनिर्गुण्डी सारसं खादिरायते ।। अक्षक्षीरिध-

वैरण्डवाश्वत्थाग्रशिग्रुजम् । अकुलीशेलुवानीरधात्री चोदुम्बरोद्भवम्।। खर्जूरना-ळिकेरोत्थं पालाशं तालवंशजम् । तृणपर्णपिशाचोत्थमिष्टकाङ्गारभस्मजम्। अङ्गुली च विवर्ज्यानि सुवर्णादिकृतं तथा ।। प्रतिपन्नवमीषष्ठी द्वादशी पञ्चपर्वकम्। उपवा-सदिनं जन्मत्रयं च शनिवासरम् ।। भानुवारं व्यतीपातं ग्रहणश्राद्धवासरम् । सूर्यो-दयानन्तरं च विवर्ज्यं दन्तधावनम् ।। अलाभे दन्तकाष्ठानां निषिद्धदिवशेषु च। गण्डूषैर्द्वादशावृत्तैर्दलैर्वा शोधयेद्रदान् ।। जिह्वानिर्लेहनं कुर्याज्जिह्वामलविशोधनैः।। फालाक्षिश्रोत्रनासास्यरेतोविण्मूत्रगात्रजम् ।। करपादगतं यद्वच्छोद्ध्यं तत्सकलं मलम् ।। नासिकाश्रोत्रनेत्रादिक्षालनेन विशुध्यति ।। एवं मलानि संशोध्य वारुण-स्नानमाचरेत् । अशेषमालिन्यहरं दुःस्वप्नादिविनाशनम् ।।

।। अथ स्नानविधिः ।।

विधिवदाचान्तः कृतकरन्यासः प्राणानायम्य दर्भान्धारयन् ।। अमुकस्थे रवौ मासि तिथौ वारे सरिद्वरे । स्नानं देव करिष्यामि त्वत्पूजार्थं प्रसीद मे ।। इति वि-ज्ञाप्य शुद्धभूमि मष्टांगुलपर्यतं हुंफडन्तास्त्रेण खात्वा तेनैव मन्त्रेण मृदमुद्धृत्य तद्व-स्तुनि मृदं मूलमन्त्रेण नमोन्तहृदयेनवाऽऽदाय नमोन्तहृदयेन प्रथममुद्धृतया मृदा खातमापूर्य नमोन्तशिरसा सरित्सरस्तटाकादितीरे विशुद्धे निक्षिपेत् । सरिदादीनां दक्षिणतीरं स्नानार्थ मतिप्रशस्तम् । ततो हुंफडन्तास्त्रेण मृदमभ्युक्ष्य नमोन्तशिरसा मृदमस्त्रेण मूलादीन्युद्धृत्य नमोन्तकवचेन तां त्रिधा विभज्य नाभ्यादिपादान्त मेकां-शेन प्रक्षाल्य द्वितीयमंशं सप्तवार मस्त्रमन्त्रजप्तमस्त्ररश्मिसम्पर्कोद्दीप्तं विभाव्य सर्वमङ्गं तेनालिप्य जलं प्रविश्य जलमस्त्रेणालोड्याङ्गुष्ठाभ्यां कर्णौ तर्जनीभ्यामक्षिणी मध्य-माभ्यां नासिकेच दृढं पिधाय प्रणवं मूलसहितं वा जपन् हृदये ज्वलदस्त्रं देहं त-त्तेजःपुञ्जपिञ्जरच्छविं विभावयन् जले निमग्नो यावच्छक्ति अवतिष्ठेत । अथवा मृदं द्वेधा विभज्य अस्त्रजप्तेन एकेन भागेन सर्वमङ्गमालिप्य स्नायात् । तदेतन्मलस्नानम्। यद्वा-वक्ष्यमाणविधिस्नानार्थमेव मृदाहरणम् । मलस्नानं तु हरिद्रामलकादिपिष्टैरेव कार्यम् । अत्र रेतोविण्मूत्रनासिकामुखचक्षुश्रोत्रनखपादमलरूपाणां शरीरमलानां शौचादिमलस्नानान्तकर्मान्तर्गतैःमृद्दन्तकाष्ठहरिद्रामलकादिघर्षणैरुदकसेचनैश्च शुद्धिः। वाचिकमलस्नानं स्नानकालिकैः प्रणवादिजपैः । मलस्नानमस्त्रमन्त्रस्नानादिभिः। ततो

जलादुत्थाय आदित्यं निरीक्ष्य अस्त्रेण मूर्ध्नि निक्षिप्य जलादुत्तीर्याचम्याविरक्तो द्विजश्चेद्वैदिकसन्ध्या मुपास्य संक्षेपतः शैवीमपि सन्ध्यामुपासीत । विरक्तो द्विजश्चतुर्थश्च शैवीमेवोपासीत ।।

।। संक्षिप्तशैवसन्ध्याप्रकारः ।।

अस्त्रमन्त्रेण शिरसि त्रिवारमङ्गुल्यग्रगतैर्जलबिन्दुभिः प्रोक्ष्य 'शिवास्त्राय विद्महे कालानलाय धीमहि। तन्नश्शस्त्रः प्रचोदयात्' इत्यस्त्रगायत्र्या सूर्यमण्डलस्थाय अस्त्राय त्रिवारमर्घ्यं दत्वा यथाशक्त्यस्त्रगायत्रीं जपेत् । यद्वा अस्त्रसन्ध्यास्थाने हृदये ज्वलन्तमस्त्रमन्त्रं ध्यायेत् । ततो विधिस्नानार्थं बिन्दुस्थानाद्गङ्गादितीर्थानां मध्ये एकतमं तीर्थं अङ्कुशमुद्रया वौषडन्तहृदयेनाकृष्य उद्भवमुद्रया नमोन्तहृदयेन पुरतस्संस्थाप्य तेनापूरितं सरित्तटाकादिकं सञ्चिन्तयेत् । तदनु विधिस्नानार्थं स्थापितमृद्भाग मादाय नाभिदघ्नजलं प्रविश्य नदीषु प्रवाहाभिमुखोऽन्यत्र प्राङ्मुख उदङ्मुखो वा मत्स्यमण्डूकादिवासभूत जलदोषपरिहारार्थं हस्तमात्रं चतुरश्रं शिवतीर्थं पुरतः परिकल्पयेत् । तत्रायं क्रमः- मृद्भागं वामकरे पूर्वयाम्यसौम्यदिक्षु त्रिधा विभज्य पूर्वं सप्तवारावृत्तेनास्त्रमन्त्रेणाभिमन्त्र्य याम्यमष्टवारावृत्तेन कवचान्तैरङ्गैर्वा सौम्यं दशवारावृत्तेनास्त्रमन्त्रेण शिवेन चाभिमन्त्र्य तत्रास्त्रजप्तं हुंफडन्तास्त्रेण नाराचमुद्रया पूर्वादिषु सर्वासु दिक्षु क्षिपेत् । एवं दिग्विघ्नानामधिपस्य इन्द्रस्य दिशि स्थितस्य मृद्भागस्य दिक्षु क्षेपेण तत्तद्दिगवस्थिताः सर्वे विघ्नाश्शमं यान्ति । तदनु शिवजप्तमृद्भागार्धं मूलेन जले शिवतीर्थसिध्यर्थे निक्षिप्य तदपरार्धं शिवतीर्थसमानसिध्यर्थं मूलमन्त्रकृतेन बाहुपरिभ्रमणेन समन्तान्निक्षिपेत् । एवं सोमदिशि स्थापितो मृद्भागः केवलममृतमयस्सन्शिवमन्त्रेण लोळनात् क्षरतीति तत्तीर्थममृतमयं भवति । इत्थं शिवतीर्थं परिकल्प्य विधितस्स्नायात् । तदर्थं प्रथमं ब्रह्माङ्गजप्तेन मृद्भागेन सर्वमङ्गं लिपेत् । धर्मराजदिशि स्थितस्य मृद्भागस्य संस्पर्शनात्सर्वपापक्षयो भवति । अतष्षण्मुखीकरणमुद्रया श्रोत्रादिद्वाराणि पिधाय शिवतीर्थमध्ये निमज्ज्य शिवमन्त्रं ध्यायन्नन्तर्जले यावच्छक्ति अवतिष्ठेत । अन्तर्जले सर्वाङ्गानिमज्ञनमुत्तममर्द्धाङ्गनिमज्ञनं मध्यमं मुखमात्रनिमज्ञनं कनीयः । ततो जलादुत्थाय वामदक्षिणहस्तौ सोमसूर्यात्मकौ शक्तिशिवौ वा विचिन्त्य ताभ्यां कृतया कुम्भमुद्रया वौषडन्तसहिताभिमन्त्रितैः

जलैश्शिरस्यभिषिच्य हंफडन्तास्त्रेण विघ्नशमनार्थं जलं दिक्षु विदिक्षु च विनिक्षिप्य तत्तीर्थजले शिवतीर्थसिद्ध्यर्थे निक्षिप्य तदपरार्द्धं शिवतीर्थसीमनि संहारमुद्रया उपसंहरेत् । इत्थं सरिदादिकं गत्वा स्नातुमशक्तौ गृहएव शुद्धे गोमयलिप्ते भूभागे पीठस्थः शीतजलपूरितैश्शिवमन्त्रजप्तैः नवभिरष्टभिः पञ्चभिर्वा कुम्भैस्स्नायात् । राजानः स्त्रीबालरोगिणः प्रवासिनश्च शीतोदकस्नानाशक्तौ उष्णोदकेन स्नानं कुर्युः ।। शिरसि स्नानाशक्तौ कण्ठस्नानादिकं कुर्युः । राजानश्चेत् शिवपूजार्थं शिवस्नपनोक्तसर्वोपचारस्नानसहितस्नानविधानात् सुवर्णपीठे स्थित्वा सुवर्णकुम्भाहृतैर्जलैश्शङ्खादिमङ्गलवाद्यघोषपुरस्सरं स्नानं कुर्युः । तदनु शुद्धमृदुवस्त्रेण देहसम्मार्जनं धौतवस्त्रद्वयपरिधानं आचमनं सकलीकरणं भस्मस्नानं त्रिपुण्ड्रधारणमित्येतत्सर्वं निर्वर्त्य सन्ध्यां वन्देत् ।।

शैवसन्ध्याप्रकारः

।। तत्प्रकारः ।।

संहितया गायत्र्यावा त्रिः प्राणानायम्य हौं नेत्राभ्यां नमइत्यङ्गुष्ठाभ्यां नेत्रयोर्दिव्यमुद्रां विन्यस्य नमोन्तमूलेन जलं निरीक्ष्य तेनैव सन्ताड्य वौषडंतकवचेनाभ्युक्ष्य वौषडंतहृदयेनाङ्कुशमुद्रया बिन्दुस्थानाद्गङ्गादीना मेकतमं तीर्थमाकृष्य नमोन्तहृदयेनोद्भवमुद्रया तत्तीर्थं जले निक्षिप्य मूलेनाभिमन्त्र्य हुंफडन्तास्त्रेण संरक्ष्य नमोन्तकवचेनावकुण्ठ्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रया अमृतीकुर्यात् । अथ सन्ध्यां ध्यायेत् । सन्ध्या त्रिविधा ब्राह्मी वैष्णवी रौद्रीति । तत्र 'रक्तस्रग्वसनारक्ता रक्तालङ्कारशोभिता । हंसासनसमासीना यज्ञसूत्रजटाधरा ।। चतुर्भुजाचतुर्वक्त्रा लोचनाष्टकभूषिता । अक्षमालां स्रुचं सव्ये वामे दण्डं कमण्डलुम् ।। दधाना ब्रह्मदेवत्या प्रातस्सन्ध्या त्रिधाच सा । प्रातःकालेऽल्पनक्षत्रे सुबाला मुक्तिदा प्रभुः।। प्रातस्तु लुप्तनक्षत्रे भुक्तिमुक्तिप्रदायिनी ।। ज्ञानशक्तिस्वरूपा सा मध्यमा बाल्यमाश्रिता ।। भुक्तिप्रदायिनी भानो रर्द्धमण्डलदर्शने । क्रियाशक्तिस्वरूपासा प्रौढा बाल्यं समाश्रिता ।। सुवर्णपङ्कजासीना सितवस्त्रादिभूषिता । वनमालोपवीताभ्यां भूषिताच द्विलोचना।। एकवक्त्रा चतुर्हस्ता दक्षिणे सगदाम्बुजा । शङ्खचक्रधरा वामे मध्या सन्ध्यातु वैष्णवी ।। साचद्वितीया यामस्य तुर्यभागे त्रिधा भवेत् । आद्यांशे मुक्तिदा

साच किञ्चिदुद्भिन्नयौवना । मध्यांशे मध्यतारुण्या वागीशी भुक्तिमुक्तिदा ।। ज्वालाभिधा तृतीयांशे मुक्तिदा प्रौढयौवना । वृषपङ्कजमध्यस्था त्रिणेत्रा चन्द्रशेखरा ।। शार्दूलचर्मवसना मेघश्यामळविग्रहा । त्रिशूलाक्षधरा सव्ये वामे साभयशक्तिका ।। सायं सन्ध्या स्मृतारोद्री त्रिविधासापि पूर्ववत् । आरक्तार्ककरे काले किञ्चिच्चलितयौवना ।। वामाभिधाना सारौद्री ध्यातॄणां मुक्तिदायिनी । यौवनार्धच्युताऽर्धार्के ज्येष्ठाख्या भुक्तिमुक्तिदा ।। भुक्तिदास्तमिते सूर्ये रौद्र्याख्या गतयौवना । एवं नवविधास्सन्ध्या शिवशास्त्रे शिवोदिताः ।। साक्षिभूतास्समस्तस्य पूजिता वाञ्छितप्रदाः ।। ब्राह्मी हृत्पङ्कजगता वैष्णवी बिन्दुमध्यगा । ब्रह्म रन्ध्रगता रौद्र्य स्स्वस्वकालेषु चिन्तयेत् ।। प्रातस्सन्ध्या समयिनो मध्यमाच विशेषिणः । निर्वाणदीक्षितस्यैव सन्ध्यात्रितयमिष्यते । तत्र यस्स्यात्सप्तकलाप्रासादप्रवणो बुधः । सबिन्दुशक्तिस्समनास्थानत्रितयवर्तिनीः । मृणाळतन्तुवत्तन्वी रारक्तश्वेतचामराः ।। ध्यायेत्क्रियादृगिच्छाख्याः प्रासादोच्चारपूर्वकम् ।। यस्य तु द्वादशकले प्रासादे निष्ठितामतिः । तेन सन्ध्या परा चिन्त्या या निशीथे विभाव्यते ।। नाभ्यादिद्वादशान्तान्तं ततो नाभ्यवसानकम्। गमागमवती तुर्या निरूपा मेचकाऽथवा ।। ज्ञानिनां तु वरा सन्ध्या शिवबोधस्वरूपिणी । द्वादशान्तस्थितं शंभुं चन्द्रिकेन्दुमिवाश्रिता ।। एकैव वस्तुतस्सन्ध्या शिवशक्तिस्वरूपिणी । कालाधिकारिभेदेन सैव भिन्ना त्रिधा मता ।। सन्ध्याचिन्तनमेवेदं सन्ध्यावन्दनमुच्यते।अङ्गमस्य प्रधानस्य यदन्यन्मार्जनादिकम् ।। एवं कृतसन्ध्योपासनादिकर्मणा शिवपूजा समारम्भणीया ।।

तत्रायं क्रमः- ततोङ्गुष्ठमीशान मनामिका ममृतकलां च ध्यात्वा अङ्गुष्ठयुक्तयाऽनामिकया चक्षुषी नासिके शोत्रे अंसौ हृदयं नाभिं शिरश्च क्रमेण आदित्यस्तृप्यतु विष्णुस्तप्यत्विति भावयन्नेव स्पृशेत् । एवं कृते शिवतेजस्संपर्कात् क्षुभितानामिकामृतप्रवाहतृप्ताः नेत्राद्यधिष्ठातार स्सूर्यादयो विष्ण्वन्ता देवाः कर्तुरधिष्ठानोपबृह्मिका भवन्ति । तदनन्तरं शरीरगतपञ्चत्रिंशत्तत्वशुद्ध्यर्थं चिन्मात्राचमनं कुर्यात्।।

तत्रायंविशेषः- सुवर्णवर्णं पद्माक्षमालास्स्रुक्कुण्डिकालङ्कृतकरचतुष्टयं चतुर्वक्त्रमात्मतत्वरूपं ब्रह्माणं ध्यायामीति आत्मतत्वध्यानपूर्वकं हां आत्मतत्वायस्वधेति प्रथममाचामेत् । अनेन स्वशरीरे पृथिव्यादिमायान्ते एकत्रिंशत्तत्वशुद्धिं भावयेत् ।

ततो नीलवर्णं चक्रबाणकमलचिन्मुद्राशङ्खकार्मुक कमण्डल्वभयमुद्राङ्कितकराष्टक-मेकवक्त्रं विद्यातत्वरूपं विष्णुं ध्यायामीति विद्यातत्वपूर्वकं हिं विद्यातत्वाय स्वधे-त्याचामेत् । अनेन शुद्धविद्येश्वरसदाशिवाख्यत्रितत्वशुद्धिं भावयेत् । ततस्फटिक-वर्णं पद्माक्षमालाशूलकमण्डलुधरकरचतुष्टयं पञ्चवक्त्रं शिवतत्वरूपं रुद्रं ध्यायामीति शिवतत्वज्ञानपूर्वकं हुं शिवतत्वायस्वधेत्याचामेत् । अनेन शक्तितत्वशुद्धिंभावयेत्। ततोऽस्त्रमन्त्रेण ओष्ठं द्विः प्रमृज्य हृन्मन्त्रेण नेत्रादीन्स्पृशेत्। अन्यत्तु तत्तद्देवतातृप्ति-ध्यानादिकं पूर्ववत्कुर्यात् ।। इत्याचमनक्रमः ।।

ततोऽभिषिच्य देवेशं निवेश्य कमलासने । तत्रासनंच मूर्तिच विद्यादेहं च पूजयेत् ।। आवाह्याथ महादेवं संपूज्य स्थापनादिभिः । मनसा स्नापयित्वाच दद्या-द्वस्त्रोपवीतकम् ।। ततस्सम्पूज्य देवेशं गन्धपुष्पविभूषणैः । धूपं दीपञ्च दच्वाऽथ कुर्यादावरणार्चनम्। नैवेद्यं मुखवासञ्च तांबूलं च समर्पयेत् ।। धूपमारात्रिकां दत्वा पवित्रञ्च समर्पयेत् । धारयित्वा सितं भस्म दर्पणाद्यैः प्रपूजयेत्।। बलिं दत्वाऽथ पाद्याद्यैः गन्धपुष्पैश्च पूजयेत् । जपस्तोत्रनमस्कारप्रदक्षिणपुरस्सरम् ।। अष्ठपुष्पि-कयाऽभ्यर्च्य विशेषार्घ्येण पूजयेत्।। पराङ्मुखार्घ्येणोद्वास्य शिवं सावरणादिकम् । काले शिवं हृदि ध्यायन् अश्नीयात्तन्निवेदितम् ।।

एवं संक्षिप्य कथितः शिवपूजाविधिक्रमः । विविच्य दर्शयिष्यामो नाति-संकोचविस्तरम् ।। तत्र तावदाचमनमुच्यते । ह्रीं शिरसेनमः । आजानुपादा वाम-मणिबन्धञ्च पाणिं प्रक्षाळ्य प्राङ्मुख उदङ्मुखोवा कुक्कुटासनस्थः पाणिद्वयं जानुनी अन्तरा निधाय पाणिद्वयेऽपि कनिष्ठिकादिषु अङ्गुळीषु हां हृदयायनमः। हीं-शिरसेनमः । हूं शिखायैनमः । हैङ्कवचायनमः हौं नेत्रत्रयायनमः । हः अस्त्राय-फडिति विन्यस्य दक्षिणपाणिं गोकर्णाकृतिं कृत्वा तेन माषमज्ञनार्हं जलं गृहीत्वा संवीक्ष्याङ्गुष्ठकनिष्टिके मुक्त्वा तज्जलं शुक्लपक्षे सोमरूपं कृष्णपक्षे सूर्यरूपं च विचिन्त्य तत्प्राशनेन रसनाग्रस्थिताया भारत्यास्तृप्तिः स्वस्यान्तर्देहशुद्धिञ्च ध्यात्वा अन्तरान्तरा हस्तप्रक्षाळनपूर्वकं ब्रह्मतीर्थेन स्वधान्तेन मूलमन्त्रेण त्रिराचामेत् । तत स्स्वस्याननशुद्धिं ओष्ठसंपुटस्थितायाः प्रणवदेवतायाः शुद्धिंविभावयन् अङ्गुष्ठमूलेन द्विरोष्ठौ द्विवारं मार्जयेत् ।।

अथ भस्मधारणम्

चतुर्विधं भस्म कल्प मनुकल्प मुपकल्प मकल्पश्चेति । तत्र व्याध्यादिरहितां सवत्सां गां तदीयं गोमयं भूमावपतितं आकाशस्थमेव गृहीत्वा पिण्डीकृत्य विशोष्य पञ्चब्रह्ममन्त्रैश्शिववह्नौ दग्ध्वा मूलेन विशोद्ध्य यत्संपादितं यच्चाग्निहोत्रे समुद्भूतं तदुभयं कल्पम् । वने शुष्कं गोमयं गृहीत्वा शिववह्नौ दग्ध्वा मूलेन विशोद्ध्य संपादितमनुकल्पम् । अटवीगृहे गोवासे इष्टकापाकादिषु दावाग्न्यादिभिर्दग्धंभस्मगृहीत्वा वस्त्रेण संशोद्ध्य गोमूत्रेण पिण्डीकृत्य पुनश्शिवाग्नौ दग्धं मूलेन शोधितमुपकल्पम् । मन्त्रादिहीनं ब्राह्मणैःस्त्रीशूद्रादिभिर्वा शुचि गोमयं गृहीत्वा संपादितं श्रोत्रियागारचुल्ल्यादिभ्योगृहीतंवा यत्तदकल्पम् । अकल्पञ्चेत्तद्गृहीत्वाऽस्त्रमन्त्रेण दिग्बन्धनं कृत्वा हों ईशानमूर्ध्नेनमः । हें तत्पुरुषवक्त्रायनमः । हुं अघोरहृदयायनमः । हिं वामदेवगुह्यायनमः। हं सद्योजातमूर्तयेनमः । हां हृदयायनमः । हीं शिरसेनमः। हूं शिखायैनमः । हैं कवचायनमः । हौं नेत्रायनमः । हः अस्त्रायनमः । ह्लां निवृत्तिकलायैनमः । ह्लीं प्रतिष्ठाकलायैनमः । ह्लूं विद्याकलायै नमः । ह्लैं शान्तिकलायैनमः । ह्लौं शान्त्यतीतकलायैनमः । इति पञ्चब्रह्मषडङ्गेन कलामन्त्रैस्संशोधयेत् । एवंभूतस्य भस्मनो धारणं द्विविधं उद्धूळनं त्रिपुण्ड्रंच । उद्धूळनमपि द्विविधम् । मलस्नानरूपं विधिस्नानरूपं च । अम्भसास्नातस्य द्विविधेऽपि भस्मस्नाने अधिकारः । तदशक्तौ कण्ठपर्यन्तं कटिपर्यन्तं जानुपर्यन्तंवा संक्षाळ्य क्षाळिताङ्गान्यार्द्रवस्त्रेण संमृज्य वस्त्रान्तरं परिधायाचम्य ततोहुंफडंतास्त्रेण दक्षिणपादाङ्गुष्ठोत्थितवह्निना देहगतबाह्यमलमात्रं दग्धं विचिन्त्यवह्निसंबन्धक्षुभित बिन्दुस्थानस्थितशक्तिमण्डलस्रवदमृतप्रवाहेण शरीरमाप्लावयेत् । अथ मनसा मूलमन्त्रनादान्तमुच्चरन्नेव तत्संपर्कक्षुभितशक्तिपरिसृतबहुळामृतधारया देहमभिषिक्तं भावयेत् । इदं मानसस्नानमशुचित्वशङ्कायां सदासर्वत्रविधेयम् । अथवा तामेव शक्तिं गोरूपां ध्यात्वा तत्पुच्छकिरणामृतप्रवाहेण शरीरमाप्लावयेत् । एतद्भावस्नानम् । गङ्गायमुनादिदिव्यजलैर्वा शरीरं प्रोक्षयेत् । तत्क्षेत्रमृत्तिकारजोभिर्वा पञ्चब्रह्मषडङ्गमूलमन्त्रैर्देहंस्पृशेत् । एषामेकतमप्रकारं कृत्वा पञ्चब्रह्मषडङ्गमूलमन्त्रमेकवारं त्रिवारंवा जपेत् । ततः प्राग्वदाचमनद्वयं कृत्वा संभावितसकलबाह्याभ्यन्तराशुद्धिनिरासकं भस्मस्नानं कुर्यात् ।।

तत्क्रमः

गोब्राह्मणदेवताग्निगुरुविद्यासन्निधिं परिहृत्य म्लेच्छान्त्यजकृतघ्नदर्शनादिरहिते मार्गभिन्ने शुचौ देशे प्राङ्मुख उदङ्मुखोवा निवेश्य कल्पानुकल्परूपं मुष्टिमात्रं विप्रादिक्रमेण निष्कसार्धनिष्कद्वयसार्धनिष्कद्वयप्रमाणं वा भस्मादाय नैर्ऋतकोणे तद्राक्षसाशं निरस्याकल्पं भस्म चेद्दिग्बन्धनपूर्वकं पञ्चब्रह्मषडङ्गमन्त्रैस्संशोद्ध्य चतुर्विधमपि भस्म सप्तवारं हुंफडन्तास्त्रेणाभिमन्त्र्य तेन विरक्तश्चेत्पादादारभ्यमस्तकान्तमविरक्तश्चेन्मस्तकादारभ्य पादान्तं दक्षिणाङ्गुष्टतर्जन्यग्रगृहीतेन स्वल्पेन भस्मना तद्रम्यकरपादव्यतिरिक्ताङ्गसंस्पर्शरूप मुद्धूळनं कुर्यात् । तदेतन्मलस्नानम्। ततष्षडङ्गमन्त्रजप्तेन भस्मनेशानादिपञ्चब्रह्ममन्त्रैः मूर्धहृदयगुह्यपादावयवानां सद्योजातमन्त्रेणवांऽसयोस्तदितरसर्वाङ्गानां च दक्षिणहस्तेनच तदगम्याङ्गानां वामहस्तेन चोद्धूळनं कुर्यात् । अवशिष्टं भस्म मूलेन कुम्भमुद्रया शिरस्यभिषिञ्चेत्। एवं सर्वाङ्गोद्धूळनं ब्राह्मणः कुर्यात् । क्षत्रियादयः क्रमेण ललाटे चतुरश्रत्र्यश्रवृत्तानि कृत्वा कण्ठादधो नाभेरूर्ध्व मुद्धूळयेयुः । शूद्रः उद्धूळनं वर्जयित्वा वक्ष्यमाणत्रिपुण्ड्रात्मकमेववा भस्मस्नानं कुर्यात्। तदेतत्तपस्विव्यतिरिक्तशूद्रविषयम् । अत एव ज्ञानरत्नावल्यामतपस्वी चेद्विधिवद्भस्मसङ्गृह्य तेनस्नानमाचरे दित्यादिना मलस्नानविधिस्नानयो रधिकारिविशेषेण तपस्विनामुक्तम्। एवं क्षत्रियवैश्यावप्यतपस्विनौ त्रिपुण्ड्रात्मकमेववा भस्मस्नानं कुर्याताम् । ब्राह्मणादयश्चत्वारोवाऽप्युद्धूळनाशक्तौ त्रिपुण्ड्रात्मकमेव भस्मस्नानं कुर्युः । केवलत्रिपुण्ड्रात्मकभस्मस्नानाभिप्रायेणैव केषुचिदागमेष्वपि विप्रादिक्रमेण निष्कंनिष्कार्द्धं तदर्द्धं तदर्द्धं चेति भस्मप्रमाणमुक्तम् । इदं व विधिस्नानरूपं दीक्षितगृहस्थैस्सन्ध्यात्रयेऽपि जलसंयुक्तं कार्यम् । स्त्रीभिर्यतिभिश्च जलवर्जितं व्रतिवानप्रस्थकन्यकादिभिर्दीक्षाहीनैश्च मद्ध्याह्नात्प्राग्जलसंयुक्तं परतोजलवर्जितञ्च कार्यम् । एवं भस्मस्नानानुष्ठाने वस्त्रांतरं परिधायाचामेत् । अपिधायवा केवलमाचामेत् ।।

त्रिपुण्ड्रविधिः

।। अथ त्रिपुण्ड्रम् ।।

तच्च वर्णानां क्रमेण सप्तपञ्चचतुस्त्र्यङ्गुळं सर्वेषांवा ललाटे हृदि बाह्वो श्चतुरङ्गुळं अवयवान्तरेष्वेकाङ्गुळमित्यादिनानागमोक्तपक्षाणां मध्ये पूर्वाचारप्राप्तं कञ्चित्पक्षं परिगृह्य ललाटादिषु स्थानेषु तर्जनीमद्धयमानामिकाभिस्तिसृभिरङ्गुळिभिः कर्तव्यम् । ललाटे मद्धयमानामिकाङ्गुष्ठैर्वा कर्तव्यम् । त्रिपुण्ड्रं सान्द्रवळित्रयं व्यक्तञ्च यथाभवति तथा कर्तव्यम् । त्रिपुण्ड्रधारणञ्च भस्मस्नानञ्च त्रिवक्त्रं त्रिहस्तं त्रिपादं त्रिणेत्रं भस्मरूषितं ताण्डवं कुर्वन्तं रौद्रं रक्तपुष्पालङ्कृतं भस्मदेवं ध्यात्वा कर्तव्यम् । त्रिपुण्ड्रस्थाने कुलाचारप्राप्तं चतुरश्रार्द्धचन्द्रदीपं त्रिपुण्ड्रान्तरं वा धारणीयम् । सर्वञ्च पुण्ड्रं केवलभस्मना चन्दनयुक्तभस्मना जलसिक्तेन कार्यम् । ललाटे यादृशं पुण्ड्रं तादृशं ललाटहृदयांसनाभिषु पञ्चसु स्थानेषु शिवमहेश्वररुद्रविष्णुपितामहदैवत्यं शिरोललाटगळांसहृदयनाभिपृष्ठेष्वष्टसु स्थानेषु ब्रह्मवाणीलक्ष्मीविष्णुशिवसूर्याग्निचन्द्रदैवत्यं ललाटकन्धरांसबाहुकूर्परमणिब्रन्धवक्षः कुक्षिनाभिपार्श्वद्वयपृष्ठेषु षोडशस्थानेषु शिवमहेश्वरादिपञ्चकवामादिनवकाश्विद्वयदैवत्यं शिरोललाटनेत्रकर्णनासावक्त्रगळांसकूर्परमणिबन्धहृदयपार्श्वनाभिगुह्यद्वयस्फिगूरुजानुजङ्घापादरूपेषु द्वात्रिंशत्स्थानेषु अष्टमूर्त्यष्टविद्येश्वराष्टदिक्पालाष्टवसुदैवत्यं करपादाङ्गुळिपङ्क्तिभिस्सह षट्त्रिंशत्स्थानेषु शिवशक्तिमहेश्वरसदाशिवशुद्धविद्यामायाविद्याकलारागकालनियति पुरुषप्रकृत्यहङ्कारबुद्धिमनश्श्रोत्र त्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगन्धाकाशवायुवह्निसलिलपृथिवीभूततत्वदेवताकं देशकालाद्यपेक्षया यथावसंभवं कर्तव्यम् । षट्त्रिंशत्स्थानपक्षे शिवाद्याकाशान्ततत्वानि वृत्ताकाराणि स्फटिकसूर्यकान्त चन्द्रकान्तगोक्षीर विद्रुमहरिताञ्जनेन्द्रायुधेन्द्रकोपमेघपद्मराग विद्रुमेन्द्रनीलकुङ्कुमजपाकुसुमेन्द्रायुध सूर्यकान्तकनक दूर्वा हरिद्रा करवीर काळमेघनीलमणि मौक्तिक माणिक्यकनकस्फटिकवर्णानि कृष्णं चतुरश्रं वायुं वृत्तं त्र्यश्रं वह्निं सितमर्द्धचन्द्राकारं जलं पीतं चतुरश्रं पृथिवीतत्वञ्च विभाव्य हां शिवतत्वरूपाय शिवायनम इत्यादिमन्त्रैस्तत्तत्स्थानेषु पुण्ड्राणि धारयेत् । एवं पक्षान्तरेष्वप्यूहनीयमेव । तत्तत्पूर्वाचारप्राप्तनानादिव्यागमस्मृतिपुराणाद्युक्तस्थानसंख्यादिव्यान्तरदेवतान्तरयुक्तानिवा पुण्ड्राणि धारणीयानि । इति भस्मधारणक्रमः ।।

।। रुद्राक्षधारणविधिः ।।

अथरुद्राक्षधारणम् । तदपि भस्मधारणवत् शिवपूजायां नित्यम् । रुद्राक्षञ्च ब्राह्मणादिभिः क्रमेण श्वेतरक्तपीत कृष्णवर्णं ग्राह्यम् । उक्तवर्णालाभे ब्राह्मणैश्चतुर्विधमपि धारणीयम् । रक्तादिवर्णत्रयं क्षत्रियैः । पीतादिद्वयं वैश्यैः । शूद्रैस्तु कृष्णमेव धार्यम् । सर्ववा सर्वैर्यथालाभं धार्यम् । शिरसि कण्ठे कर्णयो र्बाह्वोर्मणिबन्धयो रुरसिच स्वशिरःप्रमाणाद्युचितसंख्याविशेषयुक्तं वा । शिरसि चत्वारिंशत् कण्ठे द्वात्रिंशत् कर्णयोः प्रत्येकं षट् बाह्वोःप्रत्येकं षोटश मणिबन्धयोः प्रत्येकं द्वादश वक्षसि अष्टोत्तरशत मित्येवं अष्टचत्वारिंशदधिकशतद्वयसंख्याकंवा । शिखायामेकमित्येकाधिकंवा । शिखायामेकं मस्तके षट्त्रिंश द्वक्षसि पञ्चाशत् साष्टशतमुपवीतं कण्ठकर्ण बाहुमणिबन्धे पूर्ववदिति पञ्चनवत्युत्तरद्विशतसंख्याकंवा । शिरसि अष्टोत्तरशतसंख्या नाभ्यन्तमालिकात्रयं कण्ठकर्णवक्षो बाहुमणिबन्धे पूर्ववदिति द्व्यशीत्युत्तरपञ्चशतसंख्याकंवा धारणीयम् । वज्रमाणिक्यवैडूर्य प्रवाळमौक्तिकरूपपञ्चरत्नसहितरुद्राक्षधारणं ज्वरग्रह पिशाच मेह कुष्ठभगन्धरकुमारग्रहापस्मारनिवारकं मकुटकुण्डलकर्णिकाहारकेयूरकटकोदरबन्धादिषु तद्धारण मपमृत्युविनाशकं आयुश्श्रीकीर्तिवर्द्धन मन्यत्र रुद्राक्षधारणात् । शिखायां तद्धारणं कोटिगुणफलं कर्णयोः कण्ठे भुजयो रुत्तरोत्तरदशगुणफलं हस्तयोरपरिमितफलं । एकवक्त्रस्य रुद्राक्षस्य शिखायां सङ्गोप्य धारणं ब्रह्महत्यादोषशस्त्राग्नि चोरवृष्ट्यादिमहाभयहरं आयुश्श्रीकीर्तिवर्द्धनं भुक्तिमुक्तिकरं सर्वसिद्धप्रदञ्च । द्विवक्त्रं गोहत्यादोषहरम् । त्रिवक्त्रं स्त्रीहत्यादोषहरम् । चतुर्वक्त्रमगम्यागमनाभक्ष्यभक्षणदोषहरम् । पञ्चवक्त्रं सर्वपापहरम् । षड्वक्त्रं दक्षिणकरे धृतं भ्रूणहत्याहरम् । सप्तवक्त्रं सुवर्णस्तेयगोहत्यादोषहरम् । विषहरञ्च। अष्टवक्त्रं गुरुतल्पदोषहरं सर्वकूटव्यवहारदोषहरञ्च । नववक्त्रं वामकरे धृतं च लक्षकोटिमहापातकदोषहरम् । दशवक्त्रं ग्रहपिशाचवेताळब्रह्मराक्षससर्पसिंहव्याघ्रादिभयहरम् । एकादशवक्त्रं शिखायां धृतं सहस्राश्वमेधशतवाजपेयशतसहस्रगोदानफलप्रदञ्च । द्वादशवक्त्रं कण्ठदेशेधृतं बहुदक्षिणगोमेधाश्वमेधफलप्रद मैश्वर्याभिवृद्धिकारि दंष्ट्रिश्रृङ्गिचोराग्निभयहरं सर्वपापक्षयकरञ्च । त्रयोदशवक्त्र मतुलभोगप्रदं रससाधनधातुवादघुटिकादि सिद्धिकरं पितृमातृभ्रातृस्त्रीवधदोषहरम्। चतुर्दशवक्त्रं सर्वकार्यसिद्धिकरंसकलव्याधिपापहरं ज्ञानयोगसिद्धिकरञ्च।

मूर्द्धभुजकण्ठकर्णव्यतिरेकेणान्येष्वङ्गेषु क्षयवृद्धिसूतकस्त्रीसङ्गतिमलमूत्रोत्सर्जनमत्स्यमांसलशुनकतकशिग्रुश्लेष्मातकभक्षणादिसमयेषु रुद्राक्षधारणं वर्जयेत् । रुद्राक्षदानकल्पोक्तप्रकारेण तद्दानं सर्व वेदपुराणाद्ध्ययनसर्वयज्ञदानानुष्ठानसर्वतीर्थाभिगमनफलप्रदं सर्वरोगहरं शतलिङ्गस्थापनशतलिङ्गदानसहस्रश्रीमूर्तिदानसहस्रकन्यादानफलप्रदं पुत्रमित्रादिसहितसकलैश्वर्यभोगप्रदं शिवसायुज्यपदं प्रतिग्रहीतुरपि शिवभक्तस्य तावत्फलदञ्च । पौर्णमास्यमावास्यासंक्रान्त्युपरामजन्मनक्षत्रादिदिवसेषु रुद्राक्षधारणं सर्वपापक्षयकरम् । पूजाकाले रुद्राक्षधारण मीशानमन्त्रेण शिरसिकार्यं कर्णयोस्तत्पुरुषमन्त्रेण कण्ठादिष्वघोरमन्त्रेण वक्षसि व्योमव्यापिमन्त्रेण ।।

सकळीकरणप्रकारः

अथ करन्यासाङ्गन्यासरूपं सकळीकरणम् । तत् त्रिविधम्- गृहस्थानां सृष्टिन्यासरूपं ब्रह्मचारिणां स्थितिन्यासरूपं यतिवानप्रस्थानां संहारन्यासरूपम् । इहसृष्टिन्यासरूपमुच्यते-करौ गन्धादिलेपितौ कृत्वा वामकरतलं तत्पृष्ठंच मणिबन्धात्समारभ्य दक्षिणपाणिना हः अस्त्राय फडिति प्रतिमार्जनं अस्त्रमन्त्रेण द्विःपरिमृज्य तेनैव मन्त्रेण दक्षिणकरतलं तत्पृष्ठञ्च वामकरेणैकवारं प्रमृज्य करावामणिबन्ध मस्त्रतेजसा व्याप्तौ सञ्चिन्त्य संपुटीकृत्याङ्गुष्ठद्वयमद्ध्ये अमृतरूपं शक्तिमण्डलं ध्यात्वा तेनामृतेन हांशक्तयेवौषडिति कवचद्वयमाप्लाव्य योजिताङ्गुष्ठद्वयकर्णिकेकरसंपुटकमले ओं हां शिवासनायनमःइति विन्यस्य तन्मद्ध्ये ओं हां हं हां शिवमूर्तयेनम इति तेजोमयीं स्थिरविद्युन्निभां सितवर्णां शिवस्य सूक्ष्ममूर्तिविन्यस्य हों ईशानमूर्ध्ने नमः इत्यङ्गुष्ठयोस्तर्जनीभ्यां विन्यस्य तर्जन्यादिषु कनिष्ठान्त मङ्गुष्ठाभ्यां हेंतत्पुरुषवक्त्राय नम इत्यादि चतुरोमन्त्रान्विन्यस्य हांहौं विद्यादेहायनमइत्यङ्गुष्ठाभ्यां करतलयो रष्टत्रिंशत्कलामयं सदाशिवात्मकं स्थूलं विद्यादेहं विन्यस्य नेत्रेभ्योनमइति नेत्रं करतलयोर्विन्यस्यह्लां हौं शिवायनमइति अङ्गुष्ठानामिकाभ्यां मदाशिवदेहव्यापकं शिवमावाहयेत् । ततः कनिष्ठिकादिषु हांहृदयायनमइत्यादि नेत्रमन्त्रव्यतिरिक्तान् पञ्चमन्त्रान्क्रमेण विन्यस्य वामदक्षिणकरौ तदितरकराभ्यां कवचायनम इति अवकुण्ठ्य करद्वयं संयोज्यवौषडन्तमूलेन परमीकुर्यात् । न्यस्तानां हृदयशिरश्शिखादीनां कलानाञ्च भिन्नभिन्नवर्णाना मावाहितपरशिवतेजसाऽति-

धवळेन तत्तद्वर्णतात्तिभावनं परमीकरणम् । ततः अङ्गन्यासं कुर्यात् ।। दक्षिणाङ्गुष्टनामिकाभ्यां हांशिवासनायनम इति देहमद्ध्ये हृदित्वा मूलाधारात् समुद्भूतं श्वेतं शिवस्यासनपङ्कजं विन्यस्य ओं हां हां हां शिवमूर्तयेनम इति नाभीकन्दादि हृदयादिवा भ्रूमध्यपर्यन्तं तेजोमयीं शिवस्य सूक्ष्ममूर्तिं विन्यस्य मुष्टिं बध्वाऽङ्गुष्ठेन ईशानमन्त्रं मूर्ध्नि विन्यस्य अङ्गुष्ठयुक्ततर्जन्यादिभिर्वक्त्रे हृदि गुह्ये पादयोश्च तत्पुरुषमन्त्रादीन् क्रमेण विन्यस्य, भ्रूमध्यादिब्रह्मरन्ध्रान्तं हां हौं विद्यादेहायनम इति विद्यादेहं विन्यस्य नेत्रमन्त्रं नेत्रेषु मध्यमाङ्गुळिभिस्तिसृभिर्विन्यस्य तस्मिन्नङ्गुष्ठानामिकाभ्यां हां हौं शिवायनमइति परमशिवमावाहयेत् । ततो हृदयशिरश्शिखास्थानेषु स्वांगुष्ठयुक्तकनिष्ठिकानामिकामध्यमाभिर्विन्यस्य कण्ठप्रावरणत्वेन स्तनमध्यान्तं कवचतर्जनीभ्यां विन्यस्य हस्ततलयोरस्त्रमनामिकाङ्गुष्ठाभ्यां त्रिवारं विन्यसेत् । सर्वेऽप्येते मन्त्रा नमोन्ताः । अस्त्रमन्त्रस्तु हुंफडन्तः। ततोहुंफडन्तास्त्रमन्त्रेण ताळत्रयपुरस्सरं दिग्बन्धनं कृत्वा कवचेनावेष्ट्य वौषडन्तमूलेन महामुद्रां प्रदर्शयेत्। मस्तकादिपादान्तं हस्ताभ्यां संस्पर्शनं महामुद्रा । ततश्शिवसमानरूपता मात्मनश्चिन्तयेत् । इत्थं कृताङ्गन्यासो बद्धपट्टशिरोवेष्टनमस्तकत्राणकङ्कटककरगृहीतास्त्रभीषणो भटइव क्षुद्राणामप्रधृष्योभवतीति सकळीकरणम् । अथ सामान्यार्घ्यपात्र मस्त्रमन्त्रेण प्रक्षाळ्य बिन्दुस्थानस्त्रवदमृततया भावितेन शुद्धजलेन हां हृदयायवौषडिति आपूर्य हांहृदयायनम इति सप्तवारमभिमन्त्र्य कवचेनावकुण्ठ्य गन्धपुष्पादिभिरभ्यर्च्य धेनुमुद्रां प्रदर्शयेत् । इदं सामान्यार्घ्यजलं शिवमपहाय अन्येषां द्वारपालादीनां साधारणम् ।।

।। द्वारपालार्चनम् ।।

अथ द्वारपालार्चनम् । तस्यायं क्रमः- अस्त्रपञ्जरमध्यस्थं आत्मानं भावयन् पृथिव्यादिमायान्तमेकत्रिंशत्तत्ववर्गं मनसाऽतिलङ्घ्य शिवपूजामन्दिरं वृत्ताकारं रक्तवर्णशुद्धविद्यातत्वात्मकं भावयन् भोगमोक्षकामः पूर्वद्वारे द्वारपालानर्चयेत् । कीर्तिविजयसौभाग्यकामः दक्षिणद्वारे। केवलं मोक्षकामः पश्चिमद्वारे । उदग्द्वारेतु पूजा न कर्तव्या । सामान्यार्घ्योदकेन द्वारमस्त्रमन्त्रेण संप्रोक्ष्य बहिर्द्वारपालानर्चयेत्। तेच गणपत्यादयः । तत्र द्वारस्योद्ध्वोदुम्बरमुखे दक्षिणवामभागयोर्मध्येच गणपतिसरस्वतीमहालक्ष्म्यः उपविष्टाः । वामदक्षिणव्यवस्था च देवमपेक्ष्य द्वारे प्रविशन्तं पूज-

कमपेक्ष्य वा ग्राह्या । द्वारस्य बहिःप्रदेशे दक्षिणपार्श्वे नन्दी दक्षिणपार्श्व एव नन्दिन उत्तरभागे गङ्गा वामपार्श्वे महाकाळः वामपार्श्व एव तस्य दक्षिणभागे यमुनाच स्थिताः । हां गणपतयेनमः । श्यामवर्णं ततोक्षसूत्रपाशाङ्कुशान् पुष्करेण बीजापूरञ्च धारयन्तं गणपतिं पूजयामि । हांसरस्वत्यैनमः । श्वेतवर्णा मक्षमालापुस्तकधरां वीणावादनव्यापृतकरद्वयां सरस्वतीं पूजयामि । हां महालक्ष्म्यै नमः । श्रीफल-कमलाभयवरधारिणीं उभयपार्श्वस्थितगजयुगळहस्तोद्धृत हेमकुम्भामृत धाराभि-षिच्यमानां महालक्ष्मीं पूजयामि । हां नन्दिनेनमः अरुणजटामकुटधरं त्रिशूलाक्ष-मालातर्जनीमुद्गरधारिणं स्थूलदेहं नन्दिनं पूजयामि । हां गङ्गायैनमः । धवळवर्णां मकरवाहना ममृतकलशचामरधारिणींगङ्गांपूजयामि । हां महाकाळायनमः । कष्ण-वर्णं दंष्ट्राकराळभ्रुकुटीभीषणस्थूलदेहं शूलकपालमुद्गरतर्जनीमुद्राधारिणं महाकाळं पूजयामि । हां यमुनायैनमः । श्यामवर्णां कूर्मवाहनां चामरामृतकलशधारिणीं युमु-नांपूजयामि । तत्तत्स्थानेषु पुजयेत् । सर्वएते द्वारपालाः गङ्गायमुनेविना त्रिणेत्राः । सर्वेचैते द्वारसमानमुखाः । श्लोकैः कवाटोद्धाटनप्रार्थनापूर्वक मस्त्रमन्त्रेण कवाट-मुद्धाट्य । हौंशिवायनम इति नेत्रयोर्विन्यस्य । दिविस्थितान्विघ्नान् दिव्यध्यानदृष्टि-सन्त्रस्तान् कृत्वा । नभोगतान् विघ्नान् तर्जन्यङ्गुष्ठोत्क्षिप्तपुष्पसन्त्रस्तान्कृत्वा । भूमिगतान् विघ्नान् दक्षिणपार्ष्णिघातत्रयत्रस्तान् कृत्वा । अस्त्रायहुंफडिति मन्त्रेण त्रिविधान् विघ्नानुत्सारयेत् । अथ द्वारस्य देहळीशाखां वामांसंश्रितो दक्षिणां देहळी-मस्पृशन् दक्षिणपादेन शिवमन्दिरं प्रविश्य। हां अस्त्रायनमः । अग्निवर्णं चतुर्वक्त्रं शक्तिशूलाभयवरान्वितकरचतुष्टयं जटामकुटालङ्कृत मर्धेन्दुशेखरं सकलविघ्ननिवारकं अस्त्रं पूजयामीति देहळीमध्ये शिवमन्दिराभिमुखतया स्थितं अस्त्रराजं प्रीत्या परा-वृत्य तदभिमुखः पूजयेत् । राजा ब्रह्माणं परावृत्य तदभिमुखः पूजयेत् । ततः हां-ब्रह्मणेनमः । कनकवर्णं सश्मश्रुचतुराननं तुन्दिलं दण्डाक्षवलयस्त्रक्कमण्डलुधारिणं वास्त्वधिपतिं ब्रह्माणं पूजयामीति । ब्रह्मणमपि देहळीमध्य एव पूजयेत् । ततो द्वारस्याभ्यन्तरे दक्षिणपार्श्वे हां नन्दिकेश्वरायनमः । रक्तवर्णं त्रिणेत्रं चन्द्रकला-लङ्कृतजटामकुटं मृगपरशुनमस्कारमुद्रान्वितकरचतुष्टयं बाहुमूले वेत्रं कट्यां क्षुरि-कांच धारयन्तं भस्मरुद्राक्षधारिणं वानरास्यं नन्दिकेश्वरं पूजयामीति द्वारस्या-भ्यन्तरदक्षिणे पार्श्वे पूजयेत् हां सुं सुयशायै नमः । श्यामवर्णा मुत्पलालङ्कृत-दक्षिणकरां सुयशादेवीं पूजयामीति द्वारस्याभ्यन्तरे सुयशादेवीं पूजयेत्। ततश्शिवं

प्रदक्षिणीकृत्य निर्‌ऋतिकोणे ब्रह्माणं पूजयेत् । पूजाचैतेषां आसनदानावाहन स्थापन सन्निधान सन्निरोधन पाद्याचमनार्घ्य गन्धपुष्पधूपदीपदानान्तं नैवेद्यताम्बूलदानान्तंवा प्रत्येकं कर्तव्या । अशक्तौ मध्यएव सर्वेभ्यो द्वारपालेभ्योनमइति गन्धपुष्पादिभिः पूजयेत् । द्वारपा देवदेवस्य द्वारं रक्षत यत्नतः । निवार्य विघ्नसङ्घात मित्याज्ञा पारमेश्वरीति शिवाज्ञां श्रावयेत् । इदञ्च द्वारपालार्चनं आत्मार्थपूजायामागमभेदेन विहितप्रतिषिद्धत्वात् तद्विकल्पकमिति नवैकल्यम् । तदकरणे नप्रत्यवायःकरणे अभ्युदयः षोडशिग्रहन्यायेन ।।

अथ पूजोपकरणं सर्वं शिवाग्रे सन्निधाप्य देवस्य दक्षिणभागे आग्नेयभागेवा उत्तराभिमुखः स्थित्वा रुचिरं स्वस्तिकं वाऽभ्यस्तमासनमास्थाय पञ्चानामात्मस्थानद्रव्यमन्त्रलिङ्गशुद्धीनां मद्ध्ये प्रथम मात्मशुद्धिं कुर्यात् । अयमूद्र्ध्वोदुंबरादिषु गणपत्यादिपूजाकारो यथोक्तलक्षणशिवमन्दिरसद्भावे आत्मशुद्धेः पूर्वं कर्तव्यः। तद्धयेवं विहितम् । गृहस्येशानदिग्भागे शिलामयं पक्केष्टकामयं शुद्धदारुमयं मृन्मयं वा चतुरश्र मायतं वृत्तं पूजागृहं वा यजमानमध्याङ्गुळिपर्वतृतीयपर्वान्तराळमध्यपर्वदैवत्यरूप उत्तममध्यमाधमभेदभिन्नाङ्गुळिचतुर्विंशत्याख्यहस्तमानेन त्रिपञ्चसप्तनवत्रयोदशसप्तदशविंशत्येकविंशतिद्वात्रिंशद्धस्तान्यतमप्रमाणमेकं द्विभूमं त्रिभूमं वा पूजागारं निर्माय तत्पञ्चधा विभज्य तन्मद्धयभागे शिलासुधे वर्जयित्वा मृन्मयीमिष्टकाचितां वा चतुष्कोणस्तंभयुक्तां स्तंभरहितां वा षोडशाङ्गुळोत्सेधां अष्टादशाङ्गुळोत्सेधांवा वेदिकां विरचय्य तदुपरि पश्चिमभागे एकतालविस्तारायामं पञ्चाङ्गुळोत्सेधं गर्भगृहस्थानीयदेशं तस्य पूर्वभागेतादृशायामविस्तारोत्सेध मर्द्धमण्टपस्थानीयदेशं च कृत्वा तस्य पूर्वभागे पञ्चतालायामं चतुस्तालविस्तार मष्टाङ्गुळोत्सेधं बेरमण्टपस्थानीयदेशं च कल्पयेत् । तत्र गर्भगृहस्थानीयदेशे सौवर्णं राजतं ताम्रं दारुमयं वा चतुरश्रमायतं वृत्तंवा पेटकं स्थापयेत् । वेरमण्टपस्थानीयदेशे द्विहस्तायत मेकहस्तविस्तृतंवा द्वादशाङ्गुळोच्छ्रायं वा कमलभूषितपेटकं विन्यस्य तदुपरि नमनीं तन्मानां प्रसार्य तन्मध्ये जीवगजदन्तादिनिर्मितं पीठं विन्यस्य तदुपरि सुवर्णादिरचितं पद्मपीठं पश्चिमभागरचितप्रभामण्डलसहितं पूर्वाभिमुखं स्थापयेत् । पूजामण्टपञ्च प्रकीर्णकुसुमधूमामोदचन्दन चर्चावितान मुक्तादामध्वजपताकादर्पण प्रदीपादिभि रलङ्कुर्वीतेति । एवंविधपूजामण्टपाभावे शिवपूजास्थानमेव तादृशं पूजा-

मण्टपं मनसि भावयेत् । शिवपीठसमीपोपविष्टः तत्रैव द्वारपालार्चनमात्मशुद्धेः पूर्वं पश्चाद्वा कुर्यात् ।। इति द्वारपालार्चनम् ।।

।। आत्मशुद्धिप्रकारः ।।

अथ आत्मशुद्धिः । सा द्विविधा । पूजकजीवस्य शिवभावापादनात्मिका जीवशुद्धिरूपा पूजकदेहस्य शिवदेहत्वापादनात्मिका देहशुद्धिरूपाच । तत्रायं जीव-शुद्धि प्रकारः । त्रिः प्राणानायम्य देहान्तर्गतमशुद्धवायुं रेचकत्रिप्राणायामेनास्त्रमन्त्रे-णोत्सार्य बाह्यवायुनोदरं प्रपूर्य पादाङ्गुष्टद्वयादारभ्य यावन्मूलाधारं द्विधाभूतां तत ऊर्ध्व माब्रह्मरंध्र मेकीभूता मधोमुखैः पद्ममुकुळैः युक्तां शरीरान्तराळेतिसूक्ष्मां विद्युल्लेखामिव भास्वरा मन्तस्सुषिरयुक्तां सुषुम्नानाडीं संचिन्त्य तन्मध्ये हूमिति शिखाबीजं ज्वलन्तं संचिन्त्य हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेष्वधोमुखतया स्थितानि पद्ममुकुळानि पूरककुंभकरेचकैर्विकसितोत्तंभितोद्ध्र्वमुखीकृतानि भावयित्वा मूला-धारप्रदेशे दीपशिखावत् ज्वलन्तं हूङ्कारं हुंफडिति सन्ततोच्चारणेन ऊद्ध्र्वमुद्गच्छन्तं-ध्यायन् तेन पश्चापि ब्रह्मादिग्रन्धीन्पद्मनाळग्रन्धीन् भिन्नान् भावयित्वा हुंकारं प्रति-निवृत्य वायुं विरेचयेत् । पुनरपि हूङ्कारं मूलाधारे ध्यायन् पूरकवायुनोपसंहृतसर्व-शरीरव्यापकचैतन्यं हृत्पङ्कजाश्रितं पुर्यष्टकरूपसूक्ष्मदेहान्वितं जीवं पुर्यष्टकादादाय स्फुरत्तारकाकारमतिसूक्ष्ममेकाकिनं हामिति हृदयबीजसंपुटितं कृत्वा हूङ्कारं मूर्ध्नि निवेश्य कुंभकं कृत्वा वायुमूद्ध्र्वं प्रवर्तयन् संहारमुद्रया तमादाय द्वादशान्तपर्यन्तं नीत्वा तदुपरि स्थितेपरमशिवे योजयेत् । एवंच जीवः स्थूलसूक्ष्माशुद्धदेहोपाधि-निर्मुक्तः शिवसायुज्यप्राप्तनिर्मलज्ञानक्रियाशक्तियुक्तः शुद्धोभवति । यद्वा जीवं द्वा-दशान्तपर्यन्तं नीत्वा हृयकमलएव शक्तिमण्डलसंपुटितं कृत्वा भूतशुद्धिसमय-कर्तव्यदेहदाहतो रक्षेत् । तत्रायं क्रमः हृत्कमलकर्णिकोपरि हां सूर्यमण्डलायनमः । हां सोममण्डलायनमः । हां अग्निमण्डलायनमः । हां शक्तिमण्डलायनम इति विन्यस्य हां हं हां आत्मनेनमः इति देहव्यापकं जीवात्मानमादायोपसंहृतव्यापकरूपं स्फुरत्तारकाकारं सञ्चिन्त्य तं शक्तिमण्डलस्योपरि विन्यस्य तस्योपरिच शक्तिवह्नि-सोमसूर्यमण्डलानि क्रमेण विन्यस्य ऊर्ध्वाधस्थितशक्तिमण्डलद्वयविनिस्सृतामृत-परिप्लुतं भावयेत् । एवं जीवस्य रक्षामात्रं कर्तव्यम् । तस्य दीक्षाकाल एव शुद्धत्वात् प्रतिदिवसं पूजासमये शुद्धिर्नापेक्षितेति ।।

।। देहशुद्धिप्रकारः ।।

अथ देहशुद्धिः । साद्विविधा सूक्ष्मदेहशुद्धिः स्थूलदेहशुद्धिश्च । तत्र शब्दस्पर्शरूपरसगन्धबुद्ध्यहङ्कारमनोरूपपुर्यष्टकात्मकसूक्षशरीरशुद्ध्यर्थं हृत्कण्ठतालुभ्रूमद्ध्यब्रह्मरन्ध्रस्थितेषु ब्रह्मादिषु कारणपुरुषेषु ब्रह्मणि शब्दस्पर्शौ प्रविलापयामि । रसंविष्णौ प्रविलापयामि । रूमगन्धौ रुद्रे प्रविलापयामि । बुद्ध्यहंकारौत्वीश्वरे प्रविलापयामि । मनस्सदाशिवे प्रविलापयामीति सूक्ष्मशरीरांशान् शब्दादीन् प्रविलापयेत् । ततः स्थूलशरीरशुद्ध्यर्थं स्वशरीरे पादादि द्वादशान्तस्थानेषु स्थितानि वश्यमाणस्थानाकृतिरूपादियुक्तानि पञ्चमहाभूतानि ध्यात्वा पृथिवीमप्सु प्रविलापयामि । अपोऽग्नौ प्रविलापयामि । अग्निं वायौप्रविलापयामि । वायुमाकाशे प्रविलापयामि । आकाशं पराशक्तौ प्रविलापयामि । पराशक्तिं परशिवे प्रलापयामीतिभावयेत् । इयं स्वकारणेषु पृथिव्यादिप्रविलापनरूपा भूतशुद्धिः । अन्यातत्तत्गुणक्षपणरूपा गुणक्षपणरूपाच द्विविधा । प्रत्येकशोधनरूपा परस्परशोधनरूपाच । तत्राद्यायथापादाद्यारभ्य जानुपर्यन्तं चतुरश्रं पीतवर्णं कठिनस्वभावं वज्रलाञ्छितं ह्लामिति हृदयबीजेन पार्थिवबीजसहितेन युक्तं ब्रह्मणा कारणेश्वरेणाधिष्ठितं निवृत्तिकलारूपं पार्थिवमण्डलं भावयामीति विचिन्त्य ह्लां निवृत्तिकलायै हुंफडिति मन्त्रेण पञ्चभिरुद्घातैः पृथिव्या गन्धरसरूपस्पर्शशब्दगुणानुत्सारयेत् । ततोजान्वादिनाभिपर्यन्त मर्धचन्द्राकारं श्वेतवर्णं द्रवस्वभावं पद्मलाञ्छितं हीमिति शिरोबीजेनाप्यबीजसहितेन युक्तं कारणेश्वरेण विष्णुनाऽधिष्ठितं प्रतिष्ठाकलारूपमाप्यमण्डलं भावयामीति विचिन्त्य ह्रीं प्रतिष्ठाकलायै हुंफडिति मन्त्रेण चतुर्भिरुद्घातै रपां रसरूपस्पर्शशब्दगुणानुत्सारयेत् । ततो नाभ्यादिकण्ठपर्यन्तन्त्र्यश्रं रक्तवर्णं पचनस्वभावं स्वस्तिकलाञ्छितं हूमिति शिखामन्त्रेणाग्निबीजसहितेन युक्तं रुद्रेण कारुणेश्वरेणाधिष्ठितं विद्याकलारूपमग्निमण्डलं भावयामीति विचिन्त्य हूं विद्याकलायै हुंफडिति मन्त्रेण त्रिभिरुद्घातै रग्निगतान् रूपस्पर्शशब्दगुणानुत्सारयेत् । ततः कण्ठादि भ्रूमध्यपर्यन्तं षडश्रं कृष्णवर्णं चलनस्वभावं षड्बिन्दुलाञ्छितं हैमितिकवचमन्त्रेण वायुबीजसहितेन युक्तं महेश्वरेण कारणेश्वरेणाधिष्ठितं शान्तिकलारूपं वायुमण्डलं भावयामीति विचिन्त्य ह्यौं शान्तिकलायै हुंफडिति मन्त्रेण द्वाभ्यामुद्घाताभ्यां वायोःस्पर्शशब्दगुणावुत्सारयेत् । ततो भ्रूमध्यादिद्वादशान्त-

पर्यन्तं वृत्ताकारं धूम्रवर्णं आकाशस्वभावं बिन्दुशक्तिलाञ्छितं हः इति अस्त्रमन्त्रेण संयुक्तं सदाशिवेन कारणेश्वरेणाधिष्ठित माकाशमण्डलं भावयामीति विचिन्त्य हौं शान्त्यतीतकलायै हुंफडिति मन्त्रेण एकोद्घातेन आकाशस्य शब्दगुणमुत्सारयेत् । एतानि पृथिव्यादिमण्डलानि हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रगतानि विभाव्यशोधयेत् । इति प्रत्येकशोधनप्रकारः ।। परस्परशोधनेत्वयं विशेषः - सर्वाणि पृथिव्यादिमण्डलानितत्तत्शोधनसमये पादादिमूर्धान्तव्यापकानि भावयेत् । पृथिवीशोधने तद्गुणपञ्चकोत्सारणानन्तरं पृथिवींस्वविरुद्धवाय्वभिभूतावाय्वाकारापन्नां वायुशोधनसमये वायुं स्वविरुद्धपृथिव्यभिभूतं पृथिव्याकारापन्नञ्च भावयेत् । एवं जलानलावपि तत्तद्गुणोत्सारणानन्तरंस्वविरुद्धानलजलाभिभूतावनलजलाकारापन्नौ भावयेत् । आकाशगुणोत्सारणानन्तर माकाशं नित्यत्वव्यापकत्वशुद्धत्वादितद्विरुद्धगुणयुक्तपरशक्त्यात्मकपरमाकाशाभिभूतं तदाकारापन्नं शुद्धस्फटिकनिर्मलं भावयेदिति । इत्थं महाभूतानां प्रत्येकशोधनेन परस्परशोधनेनवा गुणक्षयात् क्षीणशक्तिकस्य भूतसमुदायात्मकस्य शरीरस्य शोषं विभाव्य पादाङ्गुष्ठोत्थितेन शिवशक्त्यधिष्ठितेन कालाग्निना हः अस्त्राय हंफडिति मन्त्रेण शरीरं दग्धं निरवशेषं निवृत्यादिकलामात्रशेषं शरीरगतदोषमात्रं वा दग्धं भावयित्वा द्वादशान्तस्थित शक्तिमण्डलरत्नवदमृतवर्षेणाप्लावयेत् । एवं शरीरशोषार्थमुक्तशक्तिप्रकारं शरीरारम्भकभूतगणोत्सारणं कृत्वा वा स्थूलशरीरं पृथिव्यादिपञ्चभूतबीजं मायाक्षेत्रविनिक्षिप्तं धर्माधर्ममूल मिन्द्रियशाखोपशाखं शब्दादिविषयालोचनपल्लवं भावप्रपञ्चकुसुमं सुखदुःखफलं पुरुषविहगोपभोग्य मूर्ध्र्वमूलमधश्शाखं वटवृक्षं विभाव्य प्राणायामं कुर्वन् षण्मात्रेण पूरकपूर्वार्धेन ह्नामित्युच्चारपञ्चकयुक्तेन पत्रपुष्पफलरहितं स्तब्धं विचिन्त्य पूरकापरार्धेन ह्रीमित्युच्चारचतुष्टययुक्तेन स्निग्धपत्रपुष्पफलोपेतं विभाव्य एकस्मिन्नेवोद्घातेन द्वादशमात्रेण कुम्भकेन हूमित्युच्चारत्रययुक्तेन सव्यपादाङ्गुष्ठोत्थितेन कालाग्निना शुष्कं दग्धं विभाव्य रेचकपूर्वार्धेन ह्येमित्युच्चारद्वययुक्तेन भस्मीभूय दिक्षु विप्रकीर्णं विभाव्य रेचकापरार्धेन हौमित्येकोच्चारयुक्तेन स्फटिकनिर्मलं शुद्धव्योमरूपं चिन्तयित्वाऽमृतेनाप्लावयेत् । एवं देहदाहं कृत्वा यथोक्तसंख्यैरुद्घातै स्तत्तद्गुणोत्सारणपर्यंतामेववा गुणोत्सारणादिभावनांविना पृथिव्यादिकं बन्धकत्वान्निवृत्तं भवतीत्यनुसंधानपूर्वकं तत्तत्स्थानेषु वायुमनोधारणापर्यन्तमेववा भूतशुद्धिं कुर्यात् । उद्धातशब्देन उद्धन्यते उत्सार्यते अनेनेति व्युत्पत्त्या भूतगुणानां तदशुद्धेर्वा उत्सा-

र.णसाधनमुच्यते । तत्तत्कलामन्त्रोच्चारणपूर्वकं पूरकं कृत्वा सुषुम्नया यावद्द्वादशान्तं प्राणवायोरूद्ध्र्वप्रवर्तनरूपं कर्म । तच्च पूरकं कृत्वा कुंभककाले प्राणवायोरूद्ध्र्वं प्रेरणं कृत्वा तंप्रतिनिवर्त्य दक्षिणनाड्या तद्रेचकपर्यन्तम् । एवंच एकैकस्मिन्नुद्धाते प्पूरकाद्यास्त्रयस्त्रयः प्राणायामा इति पृथिव्यां पञ्चाना मुद्धातानां पञ्चदशप्राणायामास्संपद्यन्ते । जलादिषु द्वादश नव षट् त्रयश्च भवन्ति । एकैकस्मिंश्च रेचकादिरूपे प्राणायामे द्वादशमात्राकालः । ततश्चैकैक उद्धातः षट् त्रिंशन्मात्राकालो भवति । यद्वा- धारणार्थे कुम्भकप्राणायाम एव द्वादशमात्राकालनियमः । पूरकरेचकयोर्यथासंभवं कालो ग्राह्यः । जानुमण्डल मद्रुत मविळंबित मेकवारं प्रदक्षिणीकृत्य अङ्गुळिस्फोटनकालो मात्राकालः । त्रिः प्रदक्षिणीकृत्य अङ्गुळिस्फोटनकाल इति तु सिद्धान्तशेखरादिषूक्तम् । अयञ्च कनिष्ठो मात्राकालः । द्विगुणो मद्ध्यमः । त्रिगुण उत्तमः । इत्थं कालविशेषावच्छिन्नप्राणवायुप्रवर्तनात्मक मुद्धातमनपेक्ष्य तत्तद्गुणसमसङ्ख्यकलामन्त्रोच्चारणेन तत्तद्गुणोत्सारणानुसन्धानरूपां वा एकवारं तत्तत्कलामन्त्रोच्चारणेन तत्तत्कलातत्वभुवनवर्णपदमन्त्रयुक्तानां पार्थिवमण्डलादीनां स्वात्मानंप्रति प्रतिबन्धकत्वनिवृत्त्यनुसन्धानात्मकपाशच्छेदमात्ररूपां वा भूतशुद्धिं कुर्यात् ।

पार्थिवादिमण्डलानिच निवृत्तिप्रतिष्ठाविद्याशान्ति शान्त्यतीतकलामयानि शरीरे पादादि जान्वादि नाभ्यादि कण्ठादि भ्रूमध्यादिच स्थितानि । हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्राश्रितानिवा शतकोटियोजन परिमाणमारभ्य उत्तरोत्तरदशगुणपरिमाणानि चतुरश्रार्धचन्द्र त्रिकोण षडश्र वृत्तरूपाणि वज्रपद्मद्वय स्वस्तिक षड्बिन्द्वेकबिन्दुलाञ्छितानि पीतरक्तश्वेतकृष्णधूम्रवर्णानि कठिनद्रवोष्णचलनावकाशस्वभावानि गन्धादिपञ्चचतुस्त्रिद्व्येकगुणानि ब्रह्मविष्णुरुद्रमहेश्वरसदाशिवाधिष्ठितानि बिन्दुयुक्तलकारवकाररेफयकारहकाररूपैः पार्थिवादिबीजैर्युक्तानि भावनीयानि । तत्र निवृत्तिकलायां पृथिवीतत्वमेकं अष्टोत्तरशतं भुवनानि ककार एकोवर्णः अष्टाविंशतिपदानि सद्योजातहृदयाख्यौ द्वौ मन्त्रौ । प्रतिष्ठाकलायां जलादिप्रकृत्यन्तानि त्रयोविंशतितत्वानि षट्पञ्चाशद्भुवनानि खादिमान्ताश्चतुर्विंशतिवर्णाः द्वात्रिंशत्पदानि वामदेवशिरस्समाख्यौ द्वौ मन्त्रौ । विद्याकलायां पुरुषादिमायान्तानि सप्ततत्वानि सप्तविंशतिभुवनानि यादिसान्तास्सप्तवर्णाः एकविंशतिपदानि अघोरशिखाख्यौ द्वौ मन्त्रौ। शान्तिकलायां शुद्धविद्या महेश्वरश्चेति द्वे तत्वे अष्टादशभुवनानि हक्षौ वर्णौ द्वादश-

पदानि पुरुषकवचाख्यौ द्वौ मन्त्रौ । शान्त्यतीतकलायां सदाशिवशक्ती द्वे तत्वे पञ्च-दश भुवनानि स्वराष्षोडश वर्णाः एकं पदं मूलेशानास्त्राख्यास्त्रयोमन्त्राः । एवमेका-दशमन्त्रात्मको मन्त्राध्वा। व्योमव्यापी मन्त्रगतचतुर्नवतिपदात्मकः पदाध्वा । पञ्चा-शद्वर्णात्मकः वर्णाध्वा । निवृत्त्यादिपञ्चकलात्मकः कलाध्वा । एवं सकलाध्वग-र्भाणि पृथिव्यादिमण्डलानि विभावनीयानि । यद्वा- संक्षेपेण सर्वाध्वगर्भत्वं विभावनीयम् । तद्यथा- सद्यादिपञ्चमन्त्रात्मको मन्त्राध्वा । जाग्रत्स्वप्नसुषुप्तितुर्यतु-र्यातीतरूप पञ्चावस्थात्मकः पदाध्वा । पादादि हृदयादिवा पार्थिवमण्डलादिस्थान-पञ्चकरूपो भुवनाध्वा । अकारादिवर्णत्रयबिन्दुनादात्मको मूलमन्त्रपञ्चवर्णात्मको वा वर्णाध्वा । पञ्चकलात्मकः कलाध्वेति । एवं वा सर्वाध्वगर्भाणि विभाव्य प्रागुक्त-प्रकारेण संस्थानवर्णस्वभावलाञ्छनबीजमात्रयुक्तानि वा विभाव्य शोधनीयानि । एवं पृथिव्यादिप्रविलापनरूपा तत्तद्गुणक्षेपणेन देहदाहरूपा देहगतबाह्याभ्यन्तरदोषमात्र-दहनरूपा गुणक्षपणं विना केवलदेहदाहरूपा दाहं विना केवलतत्तद्गुणक्षपणरूपा बन्धकत्वनिवृत्त्यनुसन्धानात्मकपाशच्छेदमात्ररूपा च भूतशुद्धिः । सर्वाऽप्येषा सो-द्धातानिरुद्धाता चेति द्विविधा । तत्तद्गुणक्षपणं च प्रत्येकशोधनरूपं परस्पर-शोधनादिमन्त्रेण चेति द्विविधम् ।।

सर्वाध्वगर्भत्वेनसंस्थानं च द्विविधं । भूतचिन्तनमपि सर्वाध्वगर्भत्वेन संस्थानादिमात्रेणचेतिद्विविधं सर्वाध्वगर्भत्वचिंतनञ्च प्रपञ्चेनसंक्षेपेणचेति द्विविधं एवमुक्तप्रकारासुभूतशुद्धिषुपूर्वाचारदेशकालाद्यनुसारेणयाकाचिद्भूतशुद्धिरनुष्ठेया। एवं भूतशुद्ध्यात्मिकादेहशुद्धिरुक्ता ।तत्वशुद्ध्यात्मिकां देहशुद्धिंकुर्यात् ।।

यथा- प्रकृत्यहङ्कारबुद्धिमनश्श्रोत्रत्वकक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्द-स्पर्शरूपरसगन्धाकाशवायुवह्निसलिलभूमितत्वभूत मरूप मशुद्ध मात्मतत्वं स्थूलदेहं मायाकलविद्यारागकालनियतिपुरुषतत्वरूपं शुद्धाशुद्धं विद्यातत्वं सूक्ष्मदेहं शिव-शक्तीश्वरसदाशिवशुद्धविद्यातत्वरूपं शुद्धं शिवतत्वं परदेहञ्च विभाव्य स्थूलदेहं सूक्ष्मदेहे तत्परदेहेच प्रविलापयेत् । उक्तप्रकारणामन्यतमशोधनानुष्ठानानन्तरं हौं शान्त्यतीतकलायैनम इत्यादिभिर्मन्त्रैस्सूक्ष्मपञ्चकलामयस्य शुद्धसूक्ष्मशरीरस्य सृष्टिं पञ्चभिः कलामन्त्रैरेव स्थूलपञ्चकलामयस्य स्थूलदेहस्य सृष्टिंच तत्तध्वंसनपक्षे

विभाव्य हां शक्तये वौषडिति शक्तिमण्डलस्रुतामृतधारयाऽऽप्लावयेत् । ततोहृत्कमलकर्णिकायां हामाधारशक्तयेनमः । हां धर्मासनायनमः । हां ज्ञानायनमः। हां वैराग्यायनमः । हामैश्वर्याय नमः । हां पद्मायनम इति मध्याग्रेयादिकोण चतुष्टयमध्येषु षडुत्थासनं विन्यस्य तत्र पुनस्स्थूलसूक्ष्मदेहात्मिकामविभक्तकरचरणादिरूपां मूर्ति हां हं हां आत्मूर्तये नम इति विन्यस्य हौं विद्यादेहायनमइति अष्टत्रिंशत्कलारूपं सदाशिवरूपं ध्यात्वा शिवायनमइति द्वादशान्तस्थ परमशिवसायुज्यं निर्मलज्ञानक्रियाशक्तिकं यजमानमूर्तिरूपं जीवात्मानं तत्रावाह्य हृदयादिस्थानेषु हृदयादिमन्त्रान्विन्यस्य मूलेन परमीकृत्य वौषडन्तशक्तिमन्त्रेण द्वादशान्तस्थितशक्तिमण्डलस्रुतबहुळामृतधारयाऽभिषिञ्चेत् । ततो दण्डमुण्डकलाश्रीकण्ठादिन्यासान्कुर्यात् ।।

तत्रायं क्रमः - शिवासनमव्यक्तां शिवमूर्तिञ्च हृदये विन्यसेत् । होमीशानमूर्धेनम इति समुष्टिकाङ्गुष्ठाग्रेण मूर्ध्नि । हें तत्पुरुषवक्त्राय नम इत्यङ्गुष्ठतर्जनीभ्यां मुखे । हुमघोरहृदयायनम इति अङ्गुष्ठमध्यमाभ्यां हृदये । हिं वामदेवगुह्याय नम इत्यङ्गुष्ठानामिकाभ्यां गुह्ये । हं सद्योजातमूर्तयेनमइत्यङ्गुष्ठकनिष्ठिकाभ्यां पादे । होमीशानायोद्र्ध्ववक्त्रायनमः । हें तत्पुरुषाय पूर्ववक्त्रायनमः । हुं अघोराय दक्षिणवक्त्रायनमः । हिं वामदेवाय उत्तरवक्त्रायनमः । हं सद्योजाताय पश्चिमवक्त्रायनम इत्यूर्ध्व पूर्वदक्षिणोत्तरपश्चिमस्थानेषु पूर्वोक्तप्रकारेण तत्तदङ्गुळिभिर्विन्यसेत् । एवं दण्डवक्त्रभगिन्यासानन्तरं सशक्तिकाः कलाशक्तिरहितावा वक्ष्यमाणस्थानेषुदीक्षितब्राह्मणः न्यासं कुर्यात् । क्षत्रियवैश्यौ युगान्तरे न्यासं कुर्याताम् । तदितरेशक्तीरेवन्यसेयुः । यथा - हें शशिन्यैनमः । हों अङ्गदायैनमः । होमिष्टदायैनमः । हों मरीच्यै नमः । हों ज्वालिन्यै नमः । इत्यूर्ध्वपूर्वदक्षिणोत्तरपश्चिममूर्धसु समुष्टिकाङ्गुष्ठमुद्रया न्यसेत् । हें शान्त्यैनमः । हें विद्यायैनमः । हें प्रतिष्ठायैनमः । हें निवृत्यैनमः । इति पूर्वदक्षिणोत्तरपश्चिमवक्त्रेषु अङ्गुष्ठतर्जनीभ्यां न्यसेत् । हुं तमायैनमः । हुं मोहायैनमः । हुं क्षुधायैनमः । हुं निद्रायैनमः । हुं मृत्यवे नमः । हुं मायायै नमः । हुं भयायै नमः । हुं तारायै नमः। इत्यङ्गुष्ठमध्यमाभ्यां हृदयकण्ठांसद्वयनाभिजठरपृष्ठवक्षस्सु न्यसेत् । हिं रजायैनमः । हिं रक्षायैनमः । हिं रत्यैः नमः। हिं पाल्यैनमः । हिं कामायैनमः । हिं संयमायैनमः। हिं क्रियायैनमः। हिं बुद्ध्यैनमः। हिं कार्यैनमः। हिं धात्र्यै नमः। हिं ब्राह्मण्यैनमः। हिं मोहिन्यै नमः।

हिं मनोन्मन्यै नमः । इत्यङ्गुष्ठानामिकाभ्यां मूलाधारगुगुह्यवृषणोरुद्वयजङ्घाद्वयस्फिग्द्वयकटिदक्षिणपार्श्वेषु विन्यसेत् । हंसिद्ध्यै नमः । हं ऋद्ध्यैनमः । हं दूत्यै नमः। हं लक्ष्म्यै नमः। हं मेधायैनमः । हं कान्त्यै नमः । हं स्वधायै नमः । हंधृत्यैनमः। इत्यङ्गुष्ठकनिष्ठिकाभ्यां पादद्वयकरद्वयघ्राणशिरोबाहुद्वयेषु न्यसेत् । नमस्स्वाहादिजातिषट्कयुक्तमङ्गन्यासं च कुर्यात् । यस्यावसरोऽस्ति मतिक्षोभश्च नभवति स श्रीकण्ठादिन्यासषडध्वन्यासादिकमपि कुर्यात् । एवं जीवशुद्धिं देहशुद्धिपूर्वकन्यस्तमन्त्रतनुस्वरूपेण विग्रहेण च शिवरूपतां प्राप्तश्शिवार्चनयोग्यो भवति । नाशिवशिवमर्चयेदित्यामनन्ति । एवं जीवदेहशुद्धिकरणाशक्तौ न्यासमात्रं कुर्यात् । न्यासस्यापि कृत्स्नस्य करणाशक्तौ दण्डन्यासमात्रं षडङ्गन्यासमात्रंवा कुर्यात् । तावतैव देहात्मनोश्शुद्ध्या शिवरूपतापत्त्याच शिवार्चनयोग्योभवति ।। एवं कृताङ्गन्यासोऽन्तर्यागं कुर्यात् ।।

।। अन्तर्यागक्रमः ।।

तस्यायं क्रमः - अन्तर्हृदयावकाशे दिव्यरत्नमयं शिवार्चनमण्डपं मनसा सङ्कल्प्य तत्र शिवार्चनोपयुक्तानि सर्वाणि द्रव्याणि मनसोपनीय विशोद्ध्य द्वादशान्तस्थितचन्द्रमण्डलगळदमृतधारयाऽर्घ्यपात्रादिपूरणं तत्संस्कारञ्चकृत्वाद्वारपालार्चनंविधायवक्ष्यमाणप्रकारेणगणेशगुरुवन्दनानुज्ञाप्रार्थनापूर्वकं माणिक्यवर्णनाभिकन्दसमुत्थितनीलवर्णनाळञ्चातिधवळवर्णाष्टदळहृदयकमलकर्णिकाकारसंस्थितकुण्डलिनी शक्तिरूपबिंद्वात्मके पीठे श्रवणाङ्गुष्ठसंयोगाधिगम्यनादरूपं दीपशिखाकारलिङ्गं विचिन्त्य पीठे वक्ष्यमाणप्रकारेण शक्त्यादिशक्त्यन्तं शिवासनमभ्यर्च्य लिङ्गे शिवमूर्ति विद्यादेहं चाभ्यर्च्य तत्र परमशिवमावाहनादिक्रमेण ध्यात्वाऽन्तस्संस्कारैरभ्यर्च्य द्वादशान्तस्थितबहुळामृतधारयाभिषिच्य वस्त्राभरणादिभिः वैराग्यचन्दनेनचालङ्कृत्याहिंसापुष्पं समर्प्य यामित्यादिप्रकारेण अहिंसेन्द्रियनिग्रहक्षमादानज्ञानतपस्सत्यभावरूपै रष्टभिः पुष्पैः अभ्यर्चयेत् । ततो मनसि पात्रे प्राणमग्निं महङ्कारधूपशिखांच सङ्कल्प्य धूपं दद्यात् । शिवज्ञानमेव दीपं सङ्कल्प्य दद्यात् । विषयेभ्यः प्रत्याहृतं मनो नैवेद्यमिति भावयित्वा समर्पयेत् । सुषुम्नामार्गेण प्राणस्य गमागममेव जपत्वेन भावयेत् । पार्थिवादिपञ्चधारणास्थिरीकृतसदाशिवावयवजातध्यानकल्पितै स्तत्तदव-

यवोचितैः भूषैश्चभूषयेत् । शिवोऽहमिति शिवसाम्यभावनारूप मात्मनिवेदनं च कुर्यात् । यद्वा- अभिषेकानन्तरं गन्धशब्दस्पर्शरूपरसतन्मात्राचन्दनपुष्पधूपदीप-नैवेद्यान्यात्मना समर्पयेत् । तत्रायं क्रमः- मूलमन्त्रोच्चारणपूर्वकं हां सद्योजाताय शिवाय गन्धतन्मात्रात्मकं चन्दनं समर्पयामि । होमीशानायशिवाय शब्दतन्मात्रात्मकं पुष्पं समर्पयामि । हें तत्पुरुषाय शिवाय स्पर्शतन्त्रात्मकं धूपं समर्पयामि । हूम-घोराय शिवाय रूपतन्मात्रात्मकं दीपं समर्पयामि । हिं वामदेवाय शिवाय रस-तन्मात्रात्मकं नैवेद्यं समर्पयामीति भावयेत्। ततो हस्तप्रक्षाळनमुखवासदानानन्तरं सत्वरजस्तमोगुणात्मकं तांबूलं समर्पयामीति भावयेत् । ततोनीराजनं परिकल्प्य । बुद्धिस्थवायुना क्लृप्तं दर्पणं मङ्गळानिच । मनोवृत्तिर्विचित्रा ते नृत्तरूपेण कल्पिता।। ध्वनयो गीतरूपेण शब्दवाद्यप्रभेदतः । सुषुम्ना ध्वजरूपेण प्राणाद्याश्चामरात्मना ।। अहङ्कारो गजत्वेन क्लृप्तो देहो रथात्मना । मनः प्रग्रहरूपेण बुद्धिस्सारथिरूपतः ।। सर्वमन्यन्मया क्लृप्तं तवोपकरणात्मनेति ।। सर्वमात्मीयं बुद्धिमनःप्राणादिकं शिव-पूजोपकरणत्वेन समर्पयेत् । आवरणपूजामपि वक्ष्यमाणरूपां तत्समये कुर्यात् ।। ततः प्रदक्षिणनमस्कारैश्शिवं प्रसादाभिमुखं विधाय तदाज्ञयाऽग्निकार्यं कुर्यात् ।।

अग्निकार्यक्रमः

तत्रायं क्रमः- नाभौ त्रिमेखलं कुण्डं तत्राग्निं च स्वतस्सिद्धं विभाव्य तमग्नि-मस्त्रमन्त्रेण प्रज्वाल्य तत्राग्नौ किञ्चिदंगारं क्रव्यादांशत्वेन भावयित्वा तन्निर्ऋतिकोणे परित्यज्य कुण्डस्थमग्निं निरीक्षणादिभिरसंशोद्ध्य तस्य शिवाग्नित्वसिद्ध्यर्थं रेचकेण वायुना तं चैतन्यात्मना हृदयं नीत्वा तत्रत्येन ज्ञानाग्निना संयोज्य ततस्सुषुम्नया-द्वादशान्तं नीत्वा तत्र परमशिवेन संयोज्य तत्तेजःपुञ्जपिञ्जरं सूर्यायुतसमप्रभं भाव-यित्वा तं ज्ञानाग्निरूपं प्रत्यानीय नाभिकुण्डे स्थापयेत् । एवं कृते संस्कारान्तर-मनपेक्ष्य शिवाग्निर्भवति । तत्र शिवाग्निं रक्तवर्णं चतुर्वक्त्रं दशभुजं सदाशिवसमा-नायुधं ध्यात्वा तस्य हृदयकमले आसनमूर्तिविद्यादेहविन्यासपुरस्सरं शिवमावाह्य सुषुम्नास्रुवेण द्वादशान्तस्थितामृतधाराज्यं मूलेनाष्टोत्तरशत मष्टविंशतिवार मष्टवारं वा हुत्वा शाक्तामृतघृतपरिपूर्णनाभिकन्दकलां हृदयकमलाङ्कितसुषुम्नामन्तस्स्रुचं विभाव्य तया हां शक्तयेवौषडिति पूर्णाहुतिं हुत्वा होमसंतर्पितं शिवं नाडीमार्गेण हृत्पद्म-

पूजिते शिवेसंयोज्याष्टपुष्पिकयाऽभ्यर्च्य पूजां समापयेत् । तदनन्तरं भ्रूमध्ये सर्वावयवसंपूर्ण शुद्धदीपसमाकृतिञ्च शिवं सकळनिष्कळरूपेण ध्यात्वा शिवं संपूज्य पूज्यपूजकभावेन द्विधास्थितः शिवोऽहमेवेति मनस्समाधीयतामिति आत्मशुद्धिः ।।

।। स्थानशुद्धिप्रकारः ।।

अथ स्थानशुद्धिः । तत्प्रकारः- हृद्यूर्द्ध्वमुखौ करौ कृत्वा हः अस्त्राय हुं-फडिति ताळत्रयं कृत्वा छोटिकया दशसु दिक्षु विघ्नानुत्सार्यास्त्रमन्त्रेण ज्वलदग्निवर्णं प्राकारं कृत्वा ततोबहिः हैं कवचायनम इति दक्षिणतर्जनीभ्रमणेन परिखात्रयं च कृत्वा हांशक्तये वौषडिति शावतं ज्योतिरूद्र्ध्वमधश्च विभाव्य महामुद्रां प्रदर्शयेत् । इति विघ्ननिवारणार्थं स्थानशुद्धिः ।।

।। द्रव्यशुद्धिप्रकारः ।।

अथ द्रव्यशुद्धिः । सर्वाणि वक्ष्यमाणयागोपयोग्यानि द्रव्याणि देवस्य वामभागे निवेश्य वस्त्रपूतशुद्धजलपरिपूर्णजलपात्रं च दक्षिणभागेनिवेश्य आत्मार्चनावरणपूजार्थं गन्धपुष्पादिकं शिवार्थद्रव्येभ्यः पृथग्निवेश्य अर्घ्यपाद्याचमनीयजलानि पूरयेत् । चत्वार्यर्घ्याणि ।। सामान्यार्घ्यं विशेषार्घ्यं निरोधार्घ्ये पराङ्मुखार्घ्यमिति । द्वारपालावरणदेवतादीनां सामान्यार्घ्यं शिवस्यार्घ्यकालेषु विशेषार्घ्यं शिवस्यैव निरोधनसंस्कारसमये निरोधार्घ्यं विसर्जनसमये पराङ्मुखार्घ्यम् । चतुर्णा मेतेषामर्ध्याणां चत्वारि पात्राणि दशपलप्रमाणेनवा पञ्चपलप्रमाणेनवा सार्धद्विपलप्रमाणेनवा यथासम्भवप्रमाणेनवा सुवर्णरजतताम्रान्यतमद्रव्येणवा पञ्चपर्वोन्नतानि पञ्चपर्वविवृतानि वृत्ताकाराणि चतुरश्राकाराणिवा बहिरष्टदळपद्माङ्कितानि एकाङ्गुळिप्रमाणानि अङ्गुळचतुर्थांशघनानि उक्तप्रकारादर्धप्रमाणानिवा तदर्धप्रमाणानिवा अर्घ्यपात्राणि ग्राह्याणि । पाद्याचमनपञ्चगव्यपञ्चामृतगन्धधूपदीपपात्रघण्टादीन्यपि पूर्वोक्तदशपलादिप्राणेनैव कर्तव्यानि । तत्र पाद्यपात्रं षडङ्गुळविस्तारं चतुरङ्गुळोत्सेधं चतुरङ्गुलविस्तारोत्सेधपादं चतुरङ्गुळनासिकं एकाङ्गुळोष्ठं तदर्धमानं तदर्धमानंवा कर्तव्यम् । (आचमनपात्रं) पाद्यक्षेपपात्र मष्टाङ्गुळोत्सेधं षोडशाङ्गुळविस्तारं चतुरङ्गुळो-

त्सेधमष्टाङ्गुळविस्तारपादयुक्तं एकाङ्गुळोष्ठमुक्तप्रकारार्धप्रमाणं तदर्धप्राणंवा वृत्तकङ्कणयुक्तपार्श्वद्वयं कर्तव्यम् । आचमनपात्रं द्वादशङ्गुळोत्सेधं विस्तारकुक्षिकं षडङ्कुळविस्तारेण षडङ्गुळोत्सेधेनवा पादेन युक्तं द्व्यङ्गुळत्र्यंगुळोत्सेधकण्ठं एकाङ्गुळोष्ठं त्र्यंगुळविस्तारमुख मैच्छिकप्रमाणमुकुळाकारवितानसंयुक्तं चतुरङ्गुळप्रमाणत्रिवक्त्रयवप्रमाणरन्ध्रमूलप्रभृतिक्रमापचितपरिमाणनासिकायुक्तं तदर्धपरिणं वा कर्तव्यम् । यद्वा पाद्याचमनीयपात्रेअप्यर्घ्यपात्रवदेववृत्ताकारेकर्तव्ये। आचमनक्षेपपात्रमंपिपाद्यक्षेपपात्रवत्कर्तव्यम् । अर्घ्यपाद्याचमनाधारयन्त्रिकास्तु त्रिपदीरूपाः त्रिवक्रपादसंयुक्ताः अष्टाङ्गुळोत्सेधाः पादादूद्र्ध्वभागे वलयस्याधस्तात्सिंह्मवक्त्राङ्किताः कर्तव्याः । सुवर्णाद्यसंभवे पाद्यादिपात्राण्यपि अर्घ्यपात्रवत् शिलादारुमयपत्रपुटादिरूपाणि ग्राह्याणि । तत्र सामान्यार्घ्यद्रव्याणि तिलतण्डुलाः । विशेषार्घ्यस्य एलालवङ्गकर्पूरर्तिबूजातिफलमुरव्रीहितिलावा जलक्षीरकुशाग्रतण्डुलसुमनस्तिलयवसिद्धार्थावादर्भदूर्वादिव्रीहितिलक्षीरनीरसिद्धार्थावायवसिद्धार्थव्यतिरिक्तादर्भादयष्षड्वा दर्भ सिद्धार्थजलतिलाश्चत्वारो वा दूर्वाकुङ्कुमकर्पूरास्त्रयो वा द्रव्याणि । निरोदार्घ्यस्य दर्भदूर्वायवतण्डुलसिद्धार्थाः पञ्चद्रव्याणि । तिलसहिताष्षट्पराङ्मुखार्घ्यस्य द्रव्याणि। पाद्यस्यदूर्वाचन्दनसिद्धार्थोशीरह्रिबेरकुङ्कुमानि षड्वा । तान्येव कुङ्कुमं विना पञ्चवा। दूर्वासिद्धार्थचन्दनोशीराणि चत्वारिवा ह्रीबेरचन्दनोशीराणि त्रीणि वा द्रव्याणि । आचमनीयस्य एलालवङ्गकर्पूरजातीकोष्ठतिंबुत्रिफलचन्दनोशीराणिएकादशवाएलालवङ्गकर्पूरर्तिबूमुरजातिफलानिषड्वा एलालवङ्गकर्पूरह्रीबेरजातिफलानि पञ्चवा एलालवङ्गकर्पूराणि त्रीणिवा द्रव्याणि । एलादीनि चार्घ्यादिद्रव्याणि प्रत्येकं उत्तममध्यमादिभावेन अशीतिचत्वारिंशद्विंशतिदशपञ्चव्रीहिपरिमितानि देयानि ।।

।। पाद्यादिपूजा ।।

अथ पाद्यादिपूजाविधानमुच्यते । पाद्याचमनीयसामान्यार्घ्यविशेषार्घ्यानरोधार्घ्यपराङ्मुखार्घ्यपात्रत्रिपदीर्देवस्यपुरतो वामादिक्रमेण विन्यस्य तासां पादेषु ब्रह्मविष्णुरुद्रान् वलयेष्विडाधारशक्तिं चाभ्यर्च्य पाद्यादिपात्राण्यस्त्रमन्त्रेण संक्षाळ्य त्रिपदीषु विन्यस्य अस्त्रमन्त्रेण वौषडन्तहृदयमन्त्रेण वा शुद्धतोयेनापूर्य कवचमन्त्रेण पाद्यादिद्रव्याणि तत्तत्पात्रेषु निक्षिपेत् । द्रव्यालाभे शुद्धोदकपूरणमात्रंकुर्यात् । ततः

पाद्यादिपात्राणि बिंद्वन्तं समुद्धृत्य बिन्दुप्रसृतामृतधारामयेन गङ्गादिसकलतीर्थोदकेनापूर्णानि भावयित्वा यन्त्रकाणामुपरिस्थापयेत् । अथवा बिन्दुस्थानादङ्कुशमुद्रयादिव्यामृतमयं गङ्गादितीर्थमाकृष्य संहारमुद्रया तमादाय वौषडन्तहृदयेनोद्भवमुद्रया यन्त्रकान्तस्थेष्वेव पाद्यादिपात्रेषु विनिक्षपेत् ।। ततो विशेषार्घ्यजले शिवासनमूर्तिं पञ्चब्रह्मविद्यादेहनेत्र मूलाङ्गानि विन्यस्यमूलेन गन्धपुष्पाक्षतैस्संपूज्य ब्रह्माङ्गमूलैरभिमन्त्रयेत् ।।

केवलं वा ब्रह्माङ्गमूलैरभिमन्त्रयेत् । निरोधार्घ्यं ब्रह्मभिःपराङ्मुखार्घ्यमङ्गैस्सामान्यर्घ्यमस्त्रमन्त्रेणाभिमन्त्रयेत् । पाद्याचमनीये ब्रह्मभि रङ्गैरस्त्रेण वा अभिमन्त्रयेत् । ततोऽस्त्रेण दिग्बन्धनं कृत्वा कवचेनावकुण्ठनं कृत्वा वौषडन्तशक्तिमन्त्रेण धेनुमुद्रां प्रदर्श्यामृतीकुर्यात् । पाद्यादिपराङ्मुखार्घ्यपर्यन्तेषु त्रिपदीविन्यासाद्यमृतीकरणान्तं प्रत्येकं काण्डानुसमयेन वा कुर्यात् । अथ पराङ्मुखार्घ्यसमीपे शङ्खपूजा कर्तव्या । प्रस्थमानिकाः कुडवजलपूरणीयाश्शङ्खा उत्तममध्यमकनीयांसः तथा मूलाग्रमूलस्थूलाग्रस्थूलाः पुंस्त्रीनपुसकरूपाःशङ्खार्घ्यमूलेवसुंधरा वलये सूर्यः कुक्षौ विष्णुः पार्श्वे चन्द्रमाः धारायामघोरः मुखेसप्ततीर्थानिच सन्ति । तथापि शङ्खो बहिर्मूलाग्रयोरस्थिवदशुचिरिततियोर्हेमरत्नादिभूषितः कर्तव्यः । एवंभूतं शङ्खंदग्धन्तुपशोधितास्त्रमन्त्रक्षाळितं पूर्ववदर्चितायान्त्रिपाद्यांविन्यस्य विशेषार्घ्यवत्पूजयित्वा आत्मानं शिरसि तत्तोयैस्त्रिवारमभिषिञ्चेत् । एवं बहुपात्रसंपादनतत्पूजनाशक्तौ निरोधार्घ्यपराङ्मुखार्घ्यौ निरोधार्घ्यजलेनैव कर्तव्ये । विशेषार्घ्यजलेनैववा अर्घ्यपात्रत्रयमपि कर्तव्यम् । एवं पाद्याचमनीयद्वयमपि विशेषार्घ्येणैव कर्तव्यम् । विशेषार्घ्यस्यापि पात्रान्तराभावे शङ्खजलेनैव पाद्याचमनद्वयमर्घ्यत्रयञ्च कर्तव्यम् । आवरणदेवताद्यर्थं सामान्यार्घ्यमात्रं पात्रान्तरे संस्कार्यम् । एवं पात्रसङ्कोचपक्षे यदीयजलेन उपचारान्तरं क्रियते तदीयमेव पात्रमादाय तत्संस्काराः कर्तव्याः । अन्यदीयसंस्कारा अपि वा परिधौ यूपधर्मवदविरुद्धाः कर्तव्याः । अथवा नित्यं विषुवायनोपरागादिषु कर्तव्यम् ।।

।। पञ्चगव्यविधिः ।।

अथ पञ्चगव्यविधानमुच्यते- देवस्य पूर्वभागे ईशानादिभागे वा द्विहस्तमात्रं हस्तमात्रं वा चतुरश्रं गोमयेनोपलिप्य चतुर्भिः प्राचीनैश्चतुर्भिरुदीचीनैश्च सूत्रैः प्रत्येकं तालप्रमाणानि नवकोष्ठान्युंद्धृत्य प्रतिकोष्ठं आढके तदर्द्धमानान् व्रीहीन् तदर्द्धमानान् तण्डुलान्कुशान्वा प्रसार्य उत्तराभिमुखःप्रतीर्ची दिशं पञ्चसंख्यै रुदगग्रैः प्रागग्रैश्च दर्भैः परिस्तीर्य परितः पुष्पैरलङ्कृत्य शिवतत्वायनमः । सदाशिवतत्वाय नमः । विद्यातत्वायनमः । पुरुषतत्वायनमः । कालतत्वायनमः । पृथिवीतत्वाय नमः । जलतत्वाय नमः । वायुतत्वायनमः । प्रकृतितत्वाय नमः । इति मद्ध्यपूर्वदक्षिणोत्तरपश्चिमाग्नेयनैऋतमारुतैशानकोष्ठानि संपूज्य सौवर्णानि कांस्यानि अभिन्नाकृष्णनवमृन्मयानिवा पात्राणि संक्षाळ्य नवसु कोष्ठेषु संस्थाप्य सुप्रतिष्ठपात्रायनमः । सुशान्तपात्रायनमः । तेजोमयपात्रायनमः । रत्नोदकपात्रायनमः । अमृतपात्रायनमः । अव्यक्तपात्रायनमः । सूर्यपात्रायनमः । संयुक्तपात्राय नमः । अव्यक्तपात्राय नमः । इति प्रागुक्तकोष्ठक्रमेण पात्राणि संपूज्य। ताम्रवर्णायाः क्षीरं त्रिकुडवं मध्यपात्रे शुक्लवर्णायाः दधि द्विकुडवं पूर्वपात्रे कपिलवर्णायाः घृतं कुडवं दक्षिणपात्रे श्यामवर्णायाः गोर्मूत्रं प्रस्थं उत्तरपात्रे, कृष्णवर्णायाः गोमयं कुडवं प्रमाणं पञ्चकुडवजलसंयुक्तं वस्त्रपूतं पश्चिमपात्रे कपित्थफलप्रमाणानितदर्द्धप्रमाणानि तदर्धप्रमाणानिवा तण्डुलामलकहरिद्रापिष्टा न्याग्नेयनैर्ऋतवायव्यकोणपात्रेषु कुशोदकं षट्त्रिंशत्पञ्चविंशतिद्वादशञ्च तदर्धकृतेन प्रदक्षिणं दर्भ वायव्य परिवीतेन हस्तमानेन तालमानेन वा द्व्यङ्गुलग्रन्थिना चतुरङ्गुलाग्रेण कूर्चेन संयुक्त माढिकमानकं गन्धदूर्वायुक्त मैशानकोणपात्रेच हृदयेन प्रक्षिप्य क्षीरादिगोमयान्तानि पञ्चगव्यानि क्रमात्पञ्चचतुस्त्रिद्वयेकसंख्यैरीशानादिमन्त्रैश्शालिपिष्टं हृदयेनामलकं शिरसा हरिद्रां कवचेन कुशोदकं षड्वारावृत्तब्रह्मपञ्चकेनाभिमन्त्रयेत् । तदनन्तरं गोमयं गोमूत्रे तदुभयं घृते तत्रयं दध्नि तच्चतुष्टयं क्षीरेच हृदयमन्त्रेण निक्षिप्य तत्रैव कुशोदकं मूलमन्त्रेण क्षिपेत् ।। पञ्चब्रह्मषडङ्गैरभिमन्त्र्य अस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य धेनुमुद्रां प्रदर्श्य गन्धपुष्पै रभिपूज्यास्त्रमन्त्रेण धूपदीपौ प्रदर्श्य मूलेनाभिमन्त्रयेत् ।।

।। पञ्चामृतविधिः ।।

अथ पञ्चामृतविधानमुच्यते- तत्पूजा पञ्चगव्यपूजायाः प्राग्भागे कर्तव्या। तत्र पात्रपूजापर्यन्तं पूर्वमध्यादिपश्चिमान्तेषु क्षीरदधिघृतमधुशर्कराः प्रत्येकं प्रस्थमानाः पादोनप्रस्थमानावा प्रस्थार्द्धमानावाऽऽग्नेयादिकोणेषु यथासंभवं कदळीपनसाम्रफला-नीशानकोणे कुशोदकवद्गन्धोदकं तत्तत्स्थानस्थिताना मभिमन्त्रणं पूर्ववत् । शर्करा गोमयवज्जलयुक्ता। संयोजनन्तु नास्ति । अथवा संयोजनयुक्तपञ्चामृतविधानं कुर्यात्। तस्यायं क्रमः-

पूर्वदुपक्लृप्ते व्रीहिमये स्थण्डिले पूर्वादिदिक्षु मद्ध्येन पञ्च कोष्ठानीशानदिशि अष्टदळपद्मञ्च विलिख्य शिवनियतिकालव्यक्ताव्यक्तसुमङ्गळानामभिः- षड्भिर्मद्ध्या-दिक्रमेण तानिसंपूज्य तेषु षट्पात्राणि अमृतसोमविद्यारत्नोदक सुधाप्रीत सुरप्रीतना-मभिस्संपूज्य पूर्वोक्तक्रमेण मद्ध्यादिपात्रेषु पञ्चामृतानि ऐशानकोणपात्रे नाळिकेरोद-कञ्च निक्षिप्य तानि पञ्चगव्यकुशोदकवदभिमन्त्र्य शर्करादीनि गोमयादिवत् क्रमेण क्षीरे संयोज्य कुशोदकवन्नाळिकेरोदकञ्च संयोजयेत् । ततस्समृद्धं कदळीफलं मूलाभिमन्त्रितं क्षिप्त्वा मूलेन मर्दयेत् । पञ्चगव्यवद्गन्धपुष्पाद्युपचरांश्च कुर्यात् । पञ्चगव्याद्यर्थ मुक्तद्रव्याभावे दधिक्षीरेपरस्परङ्गोमयगोमूत्रेच परस्परं प्रतिनिधिः । शर्कराया इक्षुरसः । पञ्चगव्याद्युक्तपात्रद्रव्यपरिमाणालाभे गोमयमङ्गुष्ठार्धमानं गोमूत्र-घृतदधिक्षीरकुशोदकान्येकद्वित्रिपञ्चैकपलानि ग्राह्याणि । पञ्चामृते क्षीरादीनि देवस्य लिङ्गसेकार्हाणिग्राह्याणि । गवामुक्तवर्णानामभावे निर्दोषाया स्सवत्साया रोगगर्भ-रहिताया गोः क्षीरादीनि ग्राह्याणि । क्षीरं वत्सलालाजलास्पृष्टं दध्यमथ्यङ्गोमय-माकाशस्थं घृतं गोमूत्रंच वस्त्रपूतं ग्राह्यम् ।।

।। स्नपनोदकविधानम् ।।

अथ स्नपनोदकविधानमुच्यते- शुद्धं जलकुम्भमादाय शिवाल्लब्धानुज्ञः प्रशस्तवर्णगन्धरसनदीतटाकं देवखातादिशुद्धतीर्थं गत्वा तज्जलं ब्रह्माङ्गै रभिमन्त्र्या-स्त्रसंक्षाळितं कुम्भं वस्त्रपूतेन तेन हृदयमन्त्रेणापूर्य आहृत्य देवस्य दक्षिणभागे स्था-

पयित्वा एलोशीरलवङ्गकर्पूर वारिपाटलोत्पल पद्मकरवीरादिवासितं कुर्यात् । इदं पञ्चगव्यपञ्चामृतस्तपनोदकसंविधानं आत्मशुद्धेर्द्वारपालार्चनाच्चप्रागेव कर्तव्यं । स्नपनोदकं सूर्यरहितेकालेनाहर्तव्यं । पुष्पाहरणमपि पूजकेनस्वयमेवकर्तव्यं । अशक्तौ समयालाभे च पुष्पोदकाहरणं गन्धघर्षणनैवेद्यपाकादिवत्स्नातैर्वाशुद्धवस्त्रैः पवित्रपाणिभिःपरिचारकैः करणीयं । छिन्नेपिष्ट इति न्यायसाम्यात् । एवं सकलमपि वक्ष्यमाणोपयोगद्रव्यजातं सन्निधाप्य तस्यशुद्धिं कुर्यात् ।।

।। द्रव्यशुद्धिः ।।

तत्रायंक्रमः- अङ्गुष्ठानामिकास्पृष्टेन चक्षुषा मूलेन निरीक्ष्यमाणं दृक्क्रियेच्छात्मकै रर्कबह्निसोमनेत्रैः क्रमात् शुष्कं दग्धममृताप्लावितं च भावयेत् । ततश्शुद्ध्यर्थं मस्त्रमन्त्रेण पताकया प्रोक्ष्य चिच्छक्त्यभिव्यक्त्यर्थं अस्त्रमन्त्रेणैव मध्यमाङ्गुळ्या ताडयेत् । ततोवौषडन्तकवचेन तत्सर्वं विशेषार्घ्यजलेन शङ्खजलेन वा कुशपुष्पै रभ्युक्षन् ताडितात्पाषाणा द्वह्निस्फुलिङ्गादिवत्द्रव्यजाता चिदग्निस्फुलिङ्गाना मुद्गतिं ध्यायेत् । एवं निरीक्षणादिसंस्कारचतुष्टयेन द्रव्यजात मशुद्धेन मायारूपेण परित्यक्तं शुद्धचित्छंक्त्यात्मकं शिवयोग्यतार्हभवति । ततस्सद्योजातेन गन्धं वामदेवेन वस्त्रं अघोरेणाभरणं तत्पुरुषेण नैवेद्य मीशानेनं पुष्पं हृदयमन्त्रेणान्यानि शिवार्थद्रव्याणि आवरणपूजाद्यर्थद्रव्याणि चाभिमन्त्रयेत् । ततस्सर्वं द्रव्यजात मस्त्रेण संरक्ष्य कवचेनावकुण्ठ्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रयाऽमृतीकृत्य शिवार्थं कल्पित मेतत्सर्वं शिवात्मकमेवेति भावयन् गन्धपुष्पधूपदीपैः हृदयास्त्रमन्त्राभ्यां पूजयेत् । ततस्स्वशरीरस्यार्घ्यजलबिन्दुमस्त्रेण निक्षिप्य स्वासने शिवासनायनम इति पुष्पन्दत्वा स्वदेहे शिवमूर्तिं विन्यस्य फाले चन्दनतिलकं कृत्वा स्वशिरसि पुष्पं स्वाहान्तमूलेन स्वशिरस्येवार्घ्यंच दद्यात् इत्थमात्मनि पशुबुद्धिं त्यक्त्वाशिववन्निर्मलज्ञानक्रियश्शुद्धोऽहमिति भावयन्नेवात्मानं पूजयेत् । इति द्रव्यशुद्धिः ।। यद्यप्यात्मशुद्धिः प्रागभिहिता । तथाऽपि पूजाकर्तृकतया द्रव्यान्तरवत्पूजोपकरणत्वेन प्रविष्टस्य तस्य द्रव्यान्तरवदेव गन्धादिभिः पूजयेदिति तदन्तद्रव्यशुद्धिः ।।

।। मन्त्रशुद्धिप्रकारः ।।

अथ मन्त्राणां दन्तताल्वोष्ठव्यापारजन्यमायिकाशुचिरूपनिर्हरणार्थं ऐश्वर्याधिकारि मलतिरोहितफलप्रदानसामर्थ्यादीनां तेषां सामर्थ्योन्मीलनार्थं च शुद्धिःकर्तव्या। तत्प्रकार उच्यते - हृद्यञ्जलिं बुद्ध्वा बिन्द्वन्तब्रह्मरन्ध्रान्तशिखान्तं ह्रस्वदीर्घप्लुतप्रणवादिनमोन्ततया क्रमेण त्रिवारं शनैर्मूलमन्त्रोच्चारणं कुर्यात् । ततो ब्रह्माङ्गादीनामपि तथैवोच्चारणं कुर्यात्। इत्थं मन्त्रशुद्धिंविधाय तदनन्तरं परिवारदेवतासद्भावे तदर्चनं कुर्यात् । कथं परिवारदेवतासद्भावः सशक्तिककेवलपूजने । इत्थं । सूक्ष्मोक्तानि शुद्धकेवलमिश्राख्यान्यशक्तिकसशक्तिकसौरादिचण्डान्तशिवपूजन मंशुमदुक्तेन केवलसहजमिश्रभेदेन प्रत्येकं त्रिविधानि । अंशुमति केवलं नामपरिवारदेवतारहितलिङ्गपूजनम् । सहजन्नाम वृषभगणेशस्कन्दपार्वतीरूपपरिवारचतुष्टयसहितलिङ्गपूजनम् । मिश्रंनाम महेश्वरनृत्तमूर्ति दक्षिणामूर्त्यादिभिरपि सहितस्य लिङ्गस्य पूजनम् । एवं केवलशुद्धं सहजशुद्धं मिश्रशुद्धं केवलकेवलं सहजकेवलं मिश्रकेवलं केवलमिश्रं सहजमिश्रं मिश्रमिश्रं चेति नवविधानि पूजनानि भवन्ति । तत्र शिवपूजारम्भात्प्राक् सूर्यपूजां तदनन्तरं चण्डपूजां च विधाय लिङ्गे शक्तिं विना केवलं शिवमावाह्य परिवारदेवतारहितस्य तस्य पूजनं केवलशुद्धम् । परिवारचतुष्टयसाहित्येन प्रागुक्तपूजनं सहजशुद्धं महेश्वरादिभिरपि सह प्रागुक्तपूजनं मिश्रशुद्धं । आद्यन्तयोस्सूर्यादि चण्डपूजां विहाय लिङ्गे सशक्तिकं शिवमावाह्य परिवारार्चनं विना तत्पूजनं केवलकेवलम् । उक्तपूजनमेव परिवार चतुष्टयार्चनसहितं सहजकेवलम् । महेश्वराद्यर्चासहितं मिश्रकेवलम् । आद्यन्तयोस्सूर्यचण्डपूजासहितं सशक्तिकस्याशक्तिकस्यवा परिवारदेवतारहितस्य लिङ्गे पूजनं केवलमिश्रम् । देवपरिवारचतुष्टयार्चनसहितं सहजमिश्रम् । महेश्वराद्यार्चादिभिरपि सहितं मिश्रमिश्रमिति। एवञ्च केवलकेवले परिवाराभावेऽपि सहजकेवले मिश्रकेवलेच परिवारसद्भावात् मन्त्रशुद्ध्यनन्तरं केवले परिवारार्चनकथनं युक्तमेव । तत्र वृषभं देवस्य पूर्वभागे पश्चिमाभिमुखमर्चयेत् । गणेशकुमारपार्वतीः पूर्वाभिमुखतया दक्षिणपश्चिमोत्तरदिक्ष्वर्चयेत् । पार्वत्या दुर्गारूपतयाऽर्चने दक्षिणाभिमुखत्वेनार्चयेत्। पौराणिकास्तु सूर्यगणेशविष्णुदुर्गारूपं परिवारदेवताचतुष्टयमाहुः । वृषभादिचतुष्टयेऽप्यारोग्यादिफलकामनायां परिवारदेवतामध्ये सूर्यादिपूजनमपि कर्तव्यमेव । वृषभस्य वामभागे

सूर्यः देवस्य दक्षिणभागे दक्षिणामूर्तिः पश्चिमेस्कन्दस्य वामे विष्णुः उत्तरभागेदेव्याः प्राग्भागे नृत्तमूर्तिः । एन्वमन्येषामपि कामन्यार्चनीयाना मागमोक्तानि स्थानानि द्रष्टव्यानि ।।

।। लिङ्गशुद्धिः ।।

अथ लिङ्गशुद्धिः- गर्भगृहे स्थितं देवस्य पेटक मुद्धाट्यतदग्रे स्थितं चतुर्भुजं त्रिणेत्रं वराभयच्छत्रचामरकरं भीमरुद्रमभ्यर्च्य निशाचरान्तकृद्देव देवस्य यजनार्थकम् । शुद्धद्वारस्य सव्येतु गच्छत्वं हि प्रसीदमे ।। इति संप्रार्थ्य पेटकमध्ये स्थितं देवं 'ओं नमोदेवदेवेशसर्वलोकैकनायक । उत्तिष्ठस्नानकर्मार्थ मात्मरक्षार्थमेवचे' ति संप्रार्थ्य लिङ्गं हस्ताभ्यां संगृह्य वस्त्रं विसृज्य प्रागेव षडुत्थासनेनार्चितायां स्नानवेद्यां सुवर्णरजतकांस्यत्रपुसीसक्षीरवृक्षान्यतमनिर्मितायां उपानपद्मजगतीकंपकण्टकं पजगतीपद्मवाजिनयुक्तायां वृत्तारकारायां मध्योन्नताया मुपरिप्रसारितवस्त्रायां विन्यस्य लिङ्गे पूर्वेद्युरर्चितां पूजां हृदयमन्त्रेण संपूज्य शिरसीशानक्रमेण स्वाहान्तमूलेन सामान्यार्घ्यजलेनार्घ्यन्दत्वा धूपदीपौ प्रदर्श्य अङ्गुष्ठादिकनिष्ठान्तैःईशानादिपञ्चकं विन्यस्य कनिष्ठिकानामिकामध्ये पुष्पं संगृह्य अङ्गुष्ठतर्जनीभ्यां लिङ्गमस्तकात्पूजां हृदयेनावरोप्य तत्पुष्पं लिङ्गमूर्ध्नि विन्यस्य निर्मास्य मीशानदिशि हृदयेनशुद्धपात्रेनिधाय अस्त्रेणलिङ्गं पाशुपतास्त्रेण पीठं प्रक्षाळ्य सामान्यार्घ्यजलेन स्वाहान्तं हृदाऽभिषिञ्चेत् । एवं कृते पूर्वपूजासमाप्तौ लिङ्गपीठविन्यस्तमन्त्रोपसंहारानन्तरं लिङ्गपीठयोरासक्ताः पूजकस्य भुक्तिमुक्तिप्रतिबन्धकविघ्ना निरस्ता भवन्ति । लिङ्गञ्च हृदयाम्बुस्नपनेन शुद्धं पुनः मन्त्रविन्यासयोग्यं भवति । इति लिङ्गशुद्धिः ।।

ततश्शिवशक्तिभ्यां नम इति लिङ्गमुद्रां प्रदर्श्य आसनमूर्तिमूलै रष्टपुष्पिकयावा संपूज्य धूपदीपौ प्रदर्श्य सुवर्णरजतताम्रमयशङ्खशुक्तिगोश्रृङ्गान्यतमपात्रेण चतुरङ्गुळदीर्घया गोशृङ्गाग्रप्रमाणया धारयाऽभिषिच्य हस्तयन्त्रोद्भवतैलेन गोधृतेनवाऽभ्यज्य पिष्टचूर्णादिभिर्विरूक्ष्यकोष्णतोयेनाभिषिच्य शिरसि पुष्पमारोप्य पञ्चगव्यप्रत्येकपञ्चामृतफलरससंयुक्तपञ्चामृतैरन्तरान्तराशिरश्शिखानेत्रैः पुष्पधूपदीपसमर्पणपूर्वक मस्त्रमन्त्रेण घण्टां ताडयन्नभिषिञ्चेत् । एवं फलोदकादिभिस्सिञ्चेत् । तत्र

फलोदकं नाम सुगन्धिजलं वित्वक्पनसनारिकेळखण्ड सत्वग्दाडीमीबीजपूरपुन्नाग-लिकुचनारङ्गचूतकदळीफलोपेतमुदकम् । यवनीवारव्रीहिमुद्गसिद्धार्थ सौगन्धिकहेम-शालिबीजसहितमुदकं बीजोदकं । तेनाभिषिच्य मूलबीजेन गन्धपुष्पधूपदीपैरर्चयेत्। स्फटिकमुक्ताफलमाणिक्यविद्रुमगोमेदकपुष्यराग गारुडेन्द्रनीलसहितमुदकं रत्नोदकं । तेनाभिषिच्य वर्णमन्त्रेण गन्धादिभिरर्चयेत् । चन्दनागरुकस्तूरी कुङ्कुमकर्पूरमन-शिलैलाकुष्ठतक्कोललवङ्गोशीरचम्पकमुकुळचूर्णसहितमुदकं गन्धोदकं । तेनाभि-षिच्य गन्धपूष्पधूपदीपनैवेद्यानि नाममन्त्रेण समर्पयेत् । चम्पकमल्लिकाकेतकी-पाटलकुन्दपुन्नागनन्द्यावर्तजातीमन्दारकरवीरपद्मोत्पलगिरिपुष्पयुक्तंह्रीबेरदमनकादिमि श्रितमुदकं पुष्पोदकं । तेनाभिषिच्य शिवमन्त्रेण गन्धपुष्पधूपदीपं दद्यात् । ततो नाममन्त्रं समुच्चरन्शुद्धेनान्नेन शनैश्शनैरभिषिच्य तदन्नंलिङ्गमभितस्थितं लिङ्गाकृतिं कृत्वा गन्धपुष्पधूपदीपपायसांश्च तांबूलादिचदत्वा तदन्नं प्रक्षाळ्यलिङ्गमूर्ध्नि मूलबीजं न्यस्य गन्धपुष्पधूपदीपं दत्वा ब्रह्ममन्त्रैरालभ्य धेनुमुद्रां बध्नीयात् । इदमन्नाभिषेचन-मपमृत्युनिवारकम् । अयमायुरारोग्यराजराष्ट्राभिवृद्धिदंसकलवशीकरणं सर्वशान्तिकं च । ततो जलार्चनं च कुर्यात् । निरीक्षणादिसंस्कृतेन शुद्धजलेन हेमरजतताम्र-यज्ञवृक्षजान्यतमपात्रं प्रपूर्य तन्मध्ये लिङ्गं संस्थाप्य दूर्वादलाक्षतान्दत्वा गन्धपुष्प-धूपदीपैरर्चयेत् । इदं जलार्चनं। ततस्समुद्धृत्य संमृज्य पूर्ववत् स्नाननैवेद्यं विन्यस्य नाळिकेरेक्षुरसादिभिरपि यथासंभवमभिषिञ्चेत् । शिवस्य घृताभ्यङ्गेन वर्षकोटि-सहस्रार्जितं पापं नश्यति । मासं घृताभिषेकेण त्रिसप्तकुलोपेतस्य शिवपदप्राप्ति-र्भवति । करयन्त्रोद्भवतिलतैलाभिषेकेण शिवपदप्राप्तिर्भवति । क्षीराभिषेकेणायुत-सालङ्कारगोदानफलप्राप्तिर्भवति । दधिस्नपनेन सर्वपापक्षयपूर्वकं शिवलोकप्राप्ति-र्भवति । मधुस्नपनेन सर्वपापक्षयपूर्वकं वह्निलोकप्राप्तिर्भवति । इक्षुरसस्नपनेन विद्याधरलोकप्राप्तिर्भवति । कर्पूरागरुतोयेन शिवपदप्राप्तिः । गन्धचन्दनतोयेन गन्धर्वलोकस्य पुष्पोदकेन सूर्यलोकस्य हैमोदकेन कुबेरलोकस्य रत्नोदकेन इन्द्र-लोकस्य कुशोदकेन ब्रह्मलोकस्य प्राप्तिरित्यादि द्रष्टव्यम्। तत्र द्रव्यालाभे वस्त्रपूतेन शुद्धेन तोयेनाभिषिञ्चेत् । तेनापि सर्वकामसमृद्धवरुणलोकप्राप्तिरुक्ता ।।

ततोधाराभिषेचनं कुर्यात् । तच्चात्मार्थपूजायां द्वादशङ्गुळविस्तारमेकाङ्गुळो-त्सेधं यवत्रयघनमुत्तमम् । सप्ताङ्गुळविस्तारमर्धाङ्गुळोत्सेधं यवद्वयपात्रघनं मध्यमं ।

पञ्चाङ्गुळविस्तारं पादाङ्गुळोत्सेधं यवमात्रघनमधमं । तत्सुवर्णेन रजतेन ताम्रेण वा चतुरश्रं वृत्तं वा कर्तव्यं । चतुरश्रं चेन्नवकोष्ठानि विलिख्य मध्यकोष्ठस्य मध्ये रन्ध्रमेकं परितोष्टौ मद्ध्यकोष्ठस्यैव रेखायां महादिक्षु चत्वारि पूर्वदिकोष्ठेषु प्रत्येकं द्वादशरन्ध्राणि चेत्येव मुत्तमपात्रस्यैकाधिकान्यष्टोत्तरशतं रन्ध्राणि कुर्यात् । मद्ध्यकोष्ठस्यमद्ध्यरन्ध्रमेकं परितोवाष्टौ पूर्वादिकोष्ठेषु त्रीणित्रीणि रन्ध्राणीत्येवं मद्ध्यमपात्रस्य पञ्चविंशतिरन्ध्राणि कुर्यात् । वृत्तं चेदष्टदळपद्मं विलिख्य कर्णिकाया मद्ध्ये परितश्च नवरन्ध्राणि प्रतिदळं द्वादशरन्ध्राणि दळेभ्यो बर्हिवृत्ते महादिक्षु चत्वारिचोत्तमपात्रस्य कुर्यात्। इतरपात्रयोरष्टदळपद्मे चतुरश्रवत् द्रव्याणि द्रष्टव्यानि । एवंभूतं पात्रं देवस्योपरि हस्तधृतं कृत्वा शङ्खजलेनापूर्य हस्ताभ्यां धारयन् मूलेन धाराभिरभिषिञ्चेत् । एवमभिषेकार्थानिप्राक्संस्कृतपञ्चगव्यादिव्यतिरिक्तानि तैलादीन्यस्त्रेणसंप्रोक्ष्यकवचेनावकुण्ठ्यास्त्रेण संरक्ष्य हृदयबीजेनाभिषेचने विनियोजयेत् । एवं प्रपञ्चेनाभिषेकं कर्तुमशक्तश्शुद्धजलेनाभिषेचयेत् । ततो मूलेन मन्त्रपुष्पं दत्वा मन्त्रान्नं निवेद्य शुद्धमृदुवाससा शनैस्संमृज्य पद्मपीठे स्थापयेत् । तत उत्थाय शिवंप्रदक्षिणीकृत्य निर्‌ऋतिकोणस्थितवास्त्वधिपति ब्रह्मस्थानादुत्तररूपं शिवमन्दिरस्य वायुकोणं गत्वा तत्र श्यामवर्णं दन्ताक्षसूत्रपाशाङ्कुशान्करैः पुष्करेण बीजपूरञ्च धारयन्तं दक्षिणाभिमुखमुपविष्टं गणपतिमावाहनादिसर्वोपचारैस्संपूज्य "शिवार्चनं गणेशान निर्विघ्नं कुरुमेसदे"ति प्रार्थयेत् । ततः प्राग्भागे शिवखेटकस्योत्तरदिशारूपे श्रीफलकमलाभयधारिणीं त्रिणेत्रां शिवशक्तिरूपां दक्षिणाभिमुखीमुपविष्टां महालक्ष्मीं तथैव संपूज्य 'मातश्शिवार्चनद्रव्यसमृद्धिं कुरुमेसदे'ति प्रार्थयेत्। ततः प्राग्भागे शिवमन्दिरस्येशानकोणरूपे सदाशिवानन्तश्रीकण्ठाम्बिकागुहविष्णुधातृरूपान् प्रसन्नवदनान्योगपट्टधरान्व्याख्या मुद्राक्षसूत्रविराजितकरद्वयान् गौरवर्णान्दक्षिणामुखमुपविष्टान्सप्तगुरून्वा 'शिवादिस्वरूपगुरुपर्यन्तान्सर्वान्गुरून्वा' तथैव सर्वोपचारैस्संपूज्य 'शिवादिगुरवो मह्य मनुज्ञां दातुमर्हथ । शिवार्चनं करिष्येहं युष्मद्दर्शितमार्गतः' इति प्रार्थयेत् ।। गुरुस्थाने श्रीगुरुपादुकाभ्यां नम इति पादुकेवा पूजयित्वा गणपतिमहालक्ष्मीगुरुपादुकानां पूजानन्तरं सर्वान्प्रणम्य क्षितितलनिहितनिश्चलजानुः बद्धांजलिः 'गणनाथाम्बिके स्वामिपादुके मां जगद्गुरो । यजन्तमनुजानीत यथासंपन्नकारक' मिति युगपत्प्रार्थयेत्। अथ तेभ्यस्सकाशात्पुत्र शिवं यजस्वेति अनुज्ञालाभं भावयित्वा देवस्याग्नेयकोणे दक्षिणभागेवा रुचिराद्यासने स्थितः प्रत्येकं दशमात्रैः पूरक-

कुंभकरेचकैस्सहितं प्राणायाममत्रयं कृत्वा स्वेष्टफलाभिसन्धिपूर्वकं यथाशक्ति शिवार्चनं करिष्ये इति सङ्कल्प्य पूजामारभेत ।।

तत्र प्रथमं शिवार्चनं । तच्चकन्दनाळग्रन्थिदळकेसरकर्णिकाविभक्तकमलरूपं क्षित्यादिशुद्धविद्यान्तद्वात्रिंशत्तत्वपर्यन्तोच्छ्रायं उपरिस्थितयामूर्त्यासह निवृत्यादिशान्तिकलापर्यन्तोच्छ्रायं । तदुपरिशान्त्यतीतकलाप्रमाणोविद्यादेहः । तत्स्वरूपपरिज्ञानार्थं निवृत्यादिकलाप्रमाणं तदन्तर्गततत्वस्वरूपञ्चविविच्यते । निवृत्यादिकलाशतकोटियोजनप्रमाणब्रह्माण्डरूपा तत्रैकं पृथिवीतत्वं । तदुपरि सहस्रकोटियोजनप्रमाणा प्रतिष्ठाकला । तत्र जलादिभूतचतुष्टयगन्धादितन्मात्रपञ्चककर्मेन्द्रियपञ्चकज्ञानेन्द्रियपञ्चकमनोहङ्कारबुद्धिप्रकृतिरूपाणि त्रयोविंशतितत्वानि । तदुपरि अयुतकोटियोजनप्रमाणाविद्याकला । तत्र पुरुषरागनियति कलाविद्याकालमायारूपाणि सप्ततत्वानि । तदुपरि लक्षकोटियोजनप्रमाणाशान्तिकला । तत्र शुद्धविद्यामहेश्वरश्चेति द्वेतत्वे । तदुपरि दशलक्षकोटियोजनंप्रमाणाशान्त्यतीतकला । तत्र सदाशिवशक्तिश्चेति द्वेतत्वे। तदुपरि अप्रमेयं शिवतत्वं निवृत्तिकलात्मकं प्रथिवीतत्वं यावत्कन्दं प्रतिष्ठाकलाविद्याकलान्तर्गतानि जलादिकालान्तान्येकोनत्रिंशत्तत्वानि यावन्नाळः । जलादिकालान्ततत्वेषु स्थितानि पञ्चसप्ततिभुवनानि कण्टकाः । तत्तद्भुवनान्तर्गतप्राणिनां बुद्धिधर्माः पञ्चाशद्भुवननाळान्तर्गतसूत्राणि । विद्याकलायामेव कालस्योपरि स्थितं मायातत्वं पद्मनाळग्रन्थिः । शान्तिकलायां स्थितं शुद्धविद्यातत्वदळकेसरकर्णिकात्मकं पद्मं शुद्धविद्याया उपरि स्थितं महेश्वरतत्वं यावत् शिवस्यं सूक्ष्ममूर्तिः । शान्त्यतीतकलायां स्थितं सदाशिवशक्तितत्वद्वयं यावद्विद्यादेहः । नाळे स्थितानि भुवनानि च जलानलवायुगगनाहङ्कारबुद्धिप्रकृतिषु प्रत्येकमष्टावष्टौ भुवनानीति षट्पञ्चाशत् पुरुषे षट्रागे पञ्च नियतौ द्वे कलायां द्वे विद्यायांद्वे काले द्वे इति पुरुषादिकालान्तेषु भुवनानि एकोनविंशतिरित्येवं पञ्चसप्ततिभुवनानि कण्टकाः। तमोमोहमहामोहतामिस्रान्धतामिस्ररूपाः पञ्तविपर्ययाः । ऊहश्शब्दोध्ययनं दुःखत्रयविघातस्मुहत्प्राप्तिर्दानं चेत्यष्टौसिद्धयः । आध्यात्मिकाः प्रकृत्युपादानकालभागाख्याश्च । तिस्रो विषयाः परमकृताबाह्याः पञ्चेति नवचतुष्टयः अन्धत्वमूकत्वादय एकादशेन्द्रियविधाः अनूहादयस्सप्तदशप्रागुक्तसिद्धिबुद्धिविधाश्चेत्यष्टाविंशतिशक्तयः इति पञ्चाशद्भावाः नाळसूत्राणि । अत्र कन्दनाळादियोजनप्रमाणसमये

मतान्तरं प्रदर्श्यते । निवृत्तिकलात्मकं पृथिवीतत्त्वं पूर्ववच्छतकोटियोजनमेव । पृथिवीतत्वाद्दशगुणं जलं जलतत्वाद्दशगुणोवह्निः, वह्नितत्वाद्दशगुणो वायुः, वायोर्दशगुणं व्योम, ततोदशगुणोऽहङ्कारः, अहङ्काराद्दशगुणा बुद्धिः, बुद्धे र्दशगुणं गुणतत्वम् । एवं गुणतत्वपर्यन्तं दशंसख्ययावृद्धिः । अतः परं मायातत्वपर्यन्तं शतसङ्ख्यया वृद्धिः । गुणतत्वाच्छतगुणा प्रकृतिः । प्रकृतेश्शतगुणोरागः । रागाच्छतगुणा नियतिः । नियतेश्शतगुणा विद्या। ततश्शतगुणा कला । ततश्शतगुणःकालः। ततश्शतगुणा माया । शुद्धाविद्येश्वरसदाशिवानां सहस्रसङ्ख्ययावृद्धिः मायायास्सहस्रगुणा शुद्धविद्या । शुद्धविद्यायास्सहस्रगुण ईश्वरः । ईश्वरात् सहस्रगुणस्सदाशिव इति । ततो लक्षसङ्ख्ययावृद्धिः । सदाशिवतत्वाल्लक्षगुणा शक्तिरिति । ततश्शिवतत्वमप्रमेयम् । इदं च मतं प्रकृतेः पूर्वं गुणतत्वमङ्गीकृत्य प्रकृतेनन्तरं पुरुषतत्वमनङ्गीकृत्य च प्रवृत्तम् । तथाचाहुः- (श्लो) 'क्ष्मातत्वं शतकोटियोजनमपः प्रारभ्य गौणान्तकं पङ्क्त्या तद्गणनात्तथा प्रकृतितो मायावसानं शतात् । साहस्राच्च सदाशिवावधि ततश्शक्त्यन्तकं लक्षत स्तस्योद्ध्र्वं सशिवोऽप्यमेयविभवो बिन्दोरधिष्ठायकः'इति ।। एवंसति नाळः कियद्योजनसंख्यो जात इति चेत् असंख्ययोजन एव। तथाऽपि किञ्चित्प्रकारमारोप्य योजनसङ्ख्या प्रदर्श्यतेएकत्वमारभ्य उत्तरोत्तरं दशगुणवृद्धौ क्रियमाणायां विंशतितमं स्थानं परार्धसङ्ख्या । स सर्वान्तिमसङ्ख्या । विंशतेश्च स्थानानामेतानि नामानि । एकं दश शतं सहस्र मयुतं लक्षं प्रयुतं कोटिरर्बुदं पद्मं खर्वं निखर्वं बृन्दं महापद्मं शङ्खो महाशङ्ख स्समुद्रो महासमुद्रो मध्यं परार्द्ध इति ।। तथाचाहुः- 'एकं पङ्क्तिशते सहस्रमयुतं लक्षं प्रपूर्वायुतं कोटिश्चार्बुदकञ्च पद्मक मथो खर्वं निखर्वं तथा । बृन्दं चैव महासरोजमपरश्शङ्ख स्समुद्रोऽन्तिमो मध्यं चैव परार्धसंज्ञक मिमां सङ्ख्यां विदुः पण्डिताः' इति ।। एवञ्च शतकोटिसङ्ख्या मेकत्वस्थाने निवेश्य जलतत्वादीनां सङ्ख्याक्रियते । शतकोटिर्नाम पद्मसङ्ख्या । ततश्च पद्मयोजनं पृथिवीतत्वम् । एकयोजनं जलतत्वं, दशयोजनं तेजस्तत्वं, शतयोजनं वायुतत्वं, सहस्रयोजनं गगनतत्वं, अयुतयोजनमहङ्कारतत्वं, लक्षयोजना बुद्धिः, प्रयुतयोजनं गुणतत्वं, कोटियोजनं ततः परं शतसंख्यया वर्द्धनीयत्वात् एकान्तरितसंख्याग्राह्या। यथा- प्रकृतिः पद्मयोजना, रागो निखर्वयोजनः, नियतिर्महापद्मयोजना, विद्यामहाशङ्खयोजना, कलासमुद्रयोजना, कालः परार्धयोजना इति । एवञ्च जलादिकालान्ततत्वसमुदायरूपो नाळो दशशत सहस्रायुत लक्षप्रयुत

कोटिपद्म निखर्वमहापद्म महाशङ्खमहासमुद्रपरार्धाख्यत्रयोदशसङ्ख्यासमुदायसङ्ख्येय-योजनापरिमितोभवति । पद्मसङ्ख्याया मेकतत्वरूपता मनारोप्य परार्धाधिके सङ्ख्यासद्भावमारोप्य गणनेतु नाळः खर्व निखर्व बृन्द महापद्म शङ्ख महाशङ्ख समुद्रमध्यदशगुणितपरार्ध सहस्रगुणितपरार्ध लक्षगुणितपरार्ध कोटिगुणिपरार्धरूप-त्रयोदशसङ्ख्यासमुदायसङ्ख्येययोजनोच्छ्रायो भवति । नाळान्तर्गतानामपि भुवनाना माधारणं गन्धादिपञ्चक कर्मेन्द्रियपञ्चक ज्ञानेन्द्रियपञ्चकमनसां पृथग्योजनसङ्ख्या ना-स्तीति मताश्रयाणां तेषु योजनसङ्ख्या नगणिता । अथ तेषामपि (भुवनाधारतया) पृथग्योजनसङ्ख्यामाश्रित्य मतान्तरं प्रदर्श्यते ।।

पद्मयोजनपरिमाणात् भूतत्वाज्जलादिमनोन्तानां विंशतेस्तत्वाना मुत्तरोत्तरं दशगुणा वृद्धिः । अहङ्कारबुद्ध्योश्शतगुणा । प्रकृतेस्सहस्रगुणा । पुरुषस्यायुत-गुणा। नियतिकालयोर्लक्षगुणा । रागविद्याक्लानां दशलक्षगुणा । मायायाः कोटि-गुणा । शुद्धविद्यायाः दशकोटिगुणा । ईश्वरस्य शतकोटिगुणा । सदाशिवस्य सहस्रकोटिगुणा । शक्तेरयुतकोटिगुणा । शिवतत्वस्य नास्ति योजनसङ्ख्या इति । पुरुषमायामध्यवर्तितत्वानां पञ्चानामूर्ध्वाधरभावे क्रमभेदमाश्रित्येदं मतान्तरं प्रवृ-त्तम्। अस्मिन्मते क्षित्यादिमनोंतानि एकविंशतितत्वान्युत्तरोत्तरं दशगुणवृद्ध्या क्रमा देकदशशत सहस्रायुत लक्ष प्रयुतकोट्यर्बुद पद्मखर्व निखर्व बृन्दमहापद्मशङ्ख-महाशङ्ख समुद्र महासमुद्र मद्धय परार्ध दशपरार्ध योजनानि । अहङ्कारबुद्धी शत-गुणवृध्या क्रमात् सहस्रगुणित लक्षगुणित परार्धयोजने । प्रकृतिस्सहस्रगुण-वृद्ध्याऽर्बुदगुणितपरार्धयोजना । पुरुषस्ततोऽयुतगुणवृद्ध्याबृन्दगुणितपरार्धयोजनः। नियतिकालौ लक्षगुणवृद्ध्या क्रमात् महासमुद्रगुणितसहस्र परार्धगुणितपरार्धयोजनौ। रागविद्याकलास्तु दशलक्षगुणवृद्ध्या क्रमात् पद्मपरार्धगुणितमहाशङ्ख परार्धगुणित-शत परार्धहतपरार्धगुणित परार्धयोजनाः । एवंचास्मिन्पक्षे जलादि कलान्त तत्व-समुदायरूपो नाळो दशादिशतपरार्धाहृत परार्धगुणितपरार्धपर्यन्तैकोनत्रिंशत्संख्या-समुदाय संख्येय योजनापरिमितो भवति । अस्मिन्तत्ववृद्ध्याश्रयणेनप्रवृत्ते पक्ष-द्वयेऽपि नाळात् ग्रन्थेः पज्मस्य चातिदैर्घ्यं स्यात्। तथाहि- अत्र प्रथमपक्षे तावत् नाळान्तर्गतेषु तत्वेषु कालएकः परार्धयोजनः। कलातच्छतांशपरिमितैव । विद्या-नियतिपूर्वकपूर्वतत्वानि तच्छतांशपरिमितानीति नाळः किञ्चिदधिकैकपरार्धयोजनः ।

मायारूपोग्रन्थिस्तु शतगुणितपरार्धयोजनः । कालाच्छतगुणत्वान्मायायाः पद्मं लक्षगुणितपरार्धयोजनम्। पद्मरूपायाश्शुद्धविद्याया मायापेक्षया सहस्रगुणितत्वा दित्थं पक्षान्तरेऽपि ग्रन्थिपद्मयोजनदैर्घ्यं स्यात् । एवं कन्दप्रभृति नाळापेक्षयाग्रन्थेः पद्मस्यच दैर्घ्यं न लौकिकपद्मच्छायानुकारि नवनाभिकन्दादिहृत्प्रदेशान्तर्हृत्पद्मच्छायानुकारि । अतः कलावृद्धिपक्षाश्रयणमेव शिवासनपद्मभावनाया मनुकूलम् । इदञ्च कमलं अनन्तासनसिंहासन योगासन पद्मासन विमलासनरूप पञ्चासनगर्भम्। तत्रपृथिवीतत्वपरिमितकन्द एवाधारशक्तिः। जलादि कालान्त तत्वपरिमितो नाळ एव तदुपरिस्थितपद्ममुकुळसहितस्सन् आधारशक्तिरूप क्षीरोदसमुत्थितफणामणिमण्डलसहित भुजङ्गमाकृतिशालि विद्येश्वराष्टकान्तर्गतानन्तरुद्रैतदुभय मनन्तासुमुच्यते। नाळाद्यवधि जलतत्वप्रभृति गुणतत्वपर्यन्तं नाळं परितःस्थितं सिंह्यासनम्। तत उपरि ग्रन्थिपर्यन्तं योगासनम् । तदुपरि दळकेसररूपं पद्मासनम् । कर्णिकैव विमलासनम् । कर्णिकोपरिस्थितगुणत्रय मण्डलत्रयतत्वत्रयात्मकं वा । यद्यप्यनन्तः सहस्रफणामण्डितः सर्पत्वेनोक्त इति तस्य भोगदण्ड एवोद्ध्र्वाकारस्थितो नाळः, सङ्कुचितं तत्फणामण्डलमेवात्र मुकुळं, नतु तद्व्यतिरेकेण पद्ममस्ति, तथाऽपि तदेव विकासध्यानदशाया मष्टदळपद्मरूपेण भावनीयमिति पद्मासनमुच्यते । यद्वा वृत्ताकारं कोटिसूर्याभं सिंहासनादधस्थित मनन्तभोगिरूप मनन्तपङ्कजरूपं नाळादन्यदेवानन्तासनं वृत्ताकारमुपर्युपरिस्थितानन्त वासुकि तक्षक कार्कोटक पद्म महापद्म शङ्खगुळिकाख्याष्टमहानागरूपं वा । अथवा एवमनन्तासनं भावनीयम् सिह्मांसनस्याधस्ताद्वृषसिह्मभूतकुञ्जराकार धर्मादिपादचतुष्टयस्य अधर्मादिफलकचतुष्टयस्य मञ्चस्योपरि फणपञ्चकेन पुच्छेन च सहितः फणामद्ध्ये पुरुषाकारः क्षौमवस्त्रपरीधान स्रसर्वाभरणभूषितः वराभयधरकरद्वयो नागराजः । तंपरितः पूर्वादिदिक्षु अनन्ताद्याः गुळिकान्ता एकफणाः कृताञ्जलिपुटा नागराजा ईक्षमाणा महानागाः नागराजस्यशिरसिप्रफल्लाष्टदळयुक्तं अनन्तपङ्कजमिति । अत्रादिमपक्षमेवावलंब्य शिवासनस्यार्चनाक्रमः प्रदर्श्यते ।

हामाधारशक्तये नमः शतकोटियोजनप्रमाणब्रह्माण्डाकारपृथिवीतत्वपरिमाण शिवासनपद्मकन्दरूपां धवळवर्णा पाशाङ्कुशाभयवरधारिणी माधारशक्तिं पूजयामि । अनन्तासनाय नमः । जलादिकलान्ततत्वपरिमाणनाळरूपं मायाग्रन्थिसहित मेका-

दशसहस्रकोटियोजनोच्छ्रायंवा दशशतसहस्रायुत लक्षप्रयुत कोट्यर्बुद पद्मखर्व निखर्व बृन्दमहापद्म शङ्खमहाशङ्खसमुद्र महासमुद्र मध्यपरार्ध दशशतगुणितपरार्ध-सहस्रगुणितपरार्धलक्षगुणितपरार्धार्बुदगुणित बृन्दगुणितपरार्ध महासमुद्रगुणितपरार्ध सहस्रपरार्ध गुणितपरार्ध पद्मपरार्ध गुणित परार्ध गुणितपरार्ध महाशङ्खपरार्धगुणित-परार्ध शतपरार्धाहतपरार्धगुणितपरार्ध पद्मपरार्धाहतपरार्धगुणितपरार्धरूपत्रिंशत्स-ङ्ख्यागुणित पद्मसंङ्ख्यासमुदाय सङ्येययोजनोच्छ्रायं वातदुपरि सहस्रफणामण्डल-रूपाब्जमुकुळालंकृत मेकवक्त्रं चतुर्भुजं हृदये नमस्कारमुद्रासहित मनन्तरुद्ररूपम-नन्तासनं पूजयामि । हां शिवासनपद्मनाळकण्टकेभ्यो नमः । पृथिवीकन्दोद्गत-शिवासनपद्मनाळावयवेभ्यो जलादिकलान्तत्वाश्रितामरेशप्रभासनैमिशपुष्कराषा-डिण्डिमुण्डि भारभूतल शुद्धीश्वर हरिश्चन्द्र श्रीशैल जप्येश्वर आम्रातकेश्वर मद्ध्य-मेश्वर महाकाल केदार भैरव गया कुरुक्षेत्र नाखल कनकखल विमलेश्वर अट्टहास महेन्द्र भीमेश्वर अविमुक्त वस्त्रांपदरुद्रकोटि महाळय गोकर्ण भद्रकर्ण स्वर्णाक्ष स्थाणु च्छगलण्ड द्विरण्ड महाकोट मण्डलेश्वर काळाञ्जन शङ्कुकर्ण स्थूलेश्वर स्थ-लेश्वर पैशाच राक्षस यक्षगन्धर्व ऐन्द्र सौम्य प्राजापत्य ब्राह्माकृतकृत भैरव ब्रह्म-वैष्णवकौमार नाल श्रीकण्ठ वामदेव भीमोग्र भव ईशान एकवीर प्रचण्ड उमापति अज अनन्त एकशिव कोध चण्ड द्युति संवर्त शूर पञ्चान्तक एकवीर शिखेद नामधेय सप्ततिभुवनरूपान् कण्टकान्पूजयामि । हां सूत्रेभ्यो नमः। पञ्चविपर्यायाष्ट-सिद्धि नवतुष्ट्यष्टाविंशति शक्तिरूप पञ्चाशद्भावनामात्मकानि शिवासनपद्मनाल-सूत्राणि पूजयामि ।।

एवमनन्तासनात्मकनालपूजानन्तरं नाळं परितः स्थितं सिह्मासनं योगासनञ्च पूजयेत् । हां धर्माय नमः । शिवासनस्याग्नेयकोणे पादरूपं सिंहाकारं जलादिगुण-तत्वपर्यन्तोन्नतं आग्नेयाभिमुखं विवृतास्यं परिवृत्तकन्धरं वायव्यकोणसिंहावलोकिनं कोटिसिंहपरिवारितं कर्पूवर्णं धर्मं पूजयामि । हां ज्ञानाय नमः । शिवसिंहानस्य नैर्ऋतकोणपादरूपं सिंहाकारं जलादिगुणपर्यन्तोन्नतं नैर्ऋताभिमुखं विवृतास्यं परिवृत्तकन्धरं ईशानकोणसिंहावलोकितं कोटिसिंहपरिवारितं कुङ्कुमवर्णं ज्ञानं पूज-यामि । हां वैराग्याय नमः। शिवसिंहासनस्य वायव्यकोणपादरूपं सिंहाकारं जला-दिगुणतत्वपर्यन्तोन्नतं वायव्याभिमुखं विवृतास्यं परिवृत्तकन्धर माग्नेय कोणसिंहा-

वलोकिनं कोटिसिंहपरिवारितं सुवर्णवर्णं वैराग्यं पूजयामि । हामैश्वर्याय नमः। शिवसिंहासनस्येशानकोणपादरूपं सिंहाकारभैशानाभिमुखं जलादिगुणतत्वपर्यन्तोन्नतं विवृतास्यं पूर्ववृत्तकन्धरं नैर्‌ऋतकोणसिंहावलोकिनं कोटिसिंह्मपरिवारितं मेघवर्ण-मैश्वर्यं पूजयामि । हामधर्माय नमः । शिवसिंहासनस्य पूर्वफलकरूपं श्वेतकृष्ण-वर्णं पुरुषाकारं दक्षिणशिरसमुत्तरपाद मधोमुख मधर्मं पूजयामि। हामज्ञानाय नमः। शिवसिंहासनस्य दक्षिणफलकरूपं श्वेतरक्तवर्णं पुरुषाकारं पूर्वशिरःपश्चिमपादं अधोमुखमज्ञानं पूजयामि । हां अवैराग्याय नमः । शिवसिंहासनस्य पश्चिमफलक-रूपं रक्तपीतवर्णं पुरुषाकारं उत्तरशिरसं दक्षिणपाद मधोमुख मवैराग्यं पूजयामि । हामनैश्वर्याय नमः । शिवसिंहासनस्य उत्तरफलकरूपं पीतकृष्णवर्णं पुरुषाकारं पश्चिमशिरसं पूर्वपाद मधोमुख मनैश्वर्यं पूजयामि । तदन्तरं हां शिवसिंहासनाय नमः इतिसमस्तं सिंहासनं संपूज्य योगासनं पूजयेत् ।।

तस्य श्वेतरक्तपीतकृण्णवर्णानि भूतरूपाणि कृतत्रेताद्वापरकलियुगान्याग्नेयादि-पादत्वेन अव्यक्तनियतिकलाकालान् स्फटिककाळमेघदाडिमीपुष्पभिन्नाञ्जनवर्णा-न्पूर्वादिफलकत्वेन चाभ्यर्च्य हां शिवयोगासनमध्यफलकरूपाय श्रीमहाविष्णवे नमः इति मध्ये नीलवर्णं त्रिणेत्रं शङ्खचक्रवराभयकरं विष्णुं पूजयेत् । ततो रजोगुणा-रुणाय तमोगुणतूलभरितायमायारूपाय अधश्छदाय नमः । इति योगासनस्य ऊद्ध्‌र्व मेखलायाअधोभागप्रसारितं शयनीयरूपमधश्छदनं नैर्‌ऋतकोणे संपूज्य। हां सत्वगव्रणधवलिताय शुद्धमायारूपोद्ध्‌र्वच्छदनाय नमः । इति मेखलाया उपरि शयनीयोत्तरच्छदनरूप मूद्ध्‌र्वच्छदनं नैर्‌ऋतकोणेच संपूज्य हां शिवयोगासनायनम इति समस्तं योगासनं पूजयेत् । योगासनविमलासने विना त्र्यासनात्मकमेव शिवासनमिति पक्षे शिवासनमेव मायाग्रन्थिपर्यन्तोन्नतं भावयित्वा तत्पादफलकार्च-नानन्तर माग्नेयादिकोणेषु स्थित तदीयफलकद्वय सन्धानकीलत्वेन कृतयुगादि-चतुष्टय मभ्यर्च्य तन्मध्ये फलकत्वेनैव श्रीमहाविष्णुं पूजयित्वाऽधश्छदनमूद्ध्‌र्व-च्छदनञ्च पूजयेत् । ततोऽनन्तफणामण्डलरूपं पद्ममुकुळं विकसितं भावयित्वा तस्य दळकेसरा नर्चयेत् । हां शिवासनपद्मदळेभ्योनमः । अष्टविद्येश्वररूपाणि धवळवर्णानि शिवासनपद्मस्य दळानि पूजयामि । हां केसरेभ्योनमः । मूले सुवर्ण-वर्णानि मद्ध्ये विद्रुमवर्णानि मुक्ताफलाकृतिशिरोलङ्कृतानि चतुष्षष्टिकलारूपाणि

वामादिशक्तिसहिताष्टरुद्ररूपाणिवा केसराणि पूजयामि । केसराणा मष्टरुद्ररूपत्वपक्षे अष्टावष्टौ केसराण्येकैकरुद्रत्वेन भावनीयानि । अथवा फणारूपदलसहस्रयुक्तस्य अनन्तपङ्कजस्य केसराण्यपि सहस्रं सन्ति । तानि सर्वाणि पञ्चविंशत्युत्तरशतसङ्ख्ययाऽष्टधा विभज्य वामाद्यष्टरुद्ररूपेण पूजनीयानि । कर्णिकासहितान्यष्टावेववा केसराणि तथा पूजनीयानि । अयं न्यायोऽष्टविद्येश्वररूपतया पूजनीयेषु दळेष्वपि योजनीयः । हां कर्णिकायै नमः । विमलां शक्तिरूपां कनकवर्णां शिवासनपद्मकर्णिकां पूजयामि । हां बीजेभ्योनमः । वामादिनवशक्तिरूपाणि वा पञ्चाशद्वर्णरूपाणि वा शिवासनपद्मकर्णिकाबीजानि पूजयामि। ततस्सर्वावयवयुक्तं पद्मं विभाव्य हां पद्मासनाय नमः इति संपूज्य हां पद्ममुद्रायै नमः इति पद्ममुद्रां प्रदर्शयेत् । ततः पूर्वादिप्रादक्षिण्येनाष्टस्वष्टसु केसरेषु वामादीरष्टौ शक्तीरेकैकशः पूजयेत् । वामायै नमः । ज्येष्ठायैनमः । रौद्र्यै नमः । काल्यै नमः । कलविकारिण्यैनमः । बलविकारिण्यै नमः । बलप्रमथिन्यै नमः । सर्वभूतदमन्यै नमः। अरुणवक्त्राश्चामरधारिणी शिवासनन्यस्तैकहस्ता शिवाभिमुख्येन केसरेषु स्थिता वादिशक्तीः पूजयामि । मनोन्मन्यै नमः । स्फटिकवर्णां पाशाङ्कुशाभयवरधारिणीं शिवासनपद्मकर्णिकायामीशानदिशि मध्येईशानदिशि वा स्थितां मनोन्मनीं पूजयामि । ततस्साधिपतिकानि सूर्यसोमाग्निशक्तिमण्डलान्युपर्युपरि पूजयेत् । हां सूर्यमण्डलाय नमः । कोटिसूर्यप्रतीकाशं शिवपद्मासनदळाग्रव्यापकं सूर्यमण्डलं पूजयामि । हां सूर्यमण्डलाधिपतये ब्रह्मणे नमः । पञ्चमक्त्रं चतुर्बाहुं प्रतिवक्त्रं त्रिलोचनम् । तप्तचामीकराभासं नमोमुद्रासमन्वितम् ।। सृष्टिकारण कारणमात्मतत्वरूपिणं सूर्यमण्डलाधिपतिं ब्रह्माणं पूजयामि । हां सोममण्डलायनमः । शिवासनपद्मकेसराग्रव्यापकं कोटिशीतांशुशीतळं सोममण्डलं पूजयामि । हां सोममण्डलाधिपतये विष्णवे नमः । मेघश्यामं शङ्खचक्रनमस्कारमुद्रान्वितकरचतुष्टयं स्थितिकारण कारणं सोममण्डलाधिपतिं विष्णुं पूजयामि । हां अग्निमण्डलाय नमः । शिवासनपद्मकर्णिकाग्रव्यापकं वह्निमण्डलं पूजयामि । हां वह्निमण्डलाधिपतये रुद्रायनमः । माणिक्यवर्णं शूलानलनमोमुद्रान्वितकरचतुष्टयं लयकारण कारणं शिवतत्वरूपिणं वह्निमण्डलाधिपतिं रुद्रं पूजयामि । विमलासनं कर्णिकाव्यतिरिक्तमिति पक्षे आग्नेयाद्यैशानान्तं गुणत्रयं दक्षिणाद्युत्तरान्तं मण्डलत्रयं नैर्ऋत्यादिवायव्यान्तं तत्वत्रयञ्च पूजयित्वा हां विमलासनायनमः इति समस्तमिदं विमलासनं पूजयेत् ।।

तदनन्तरं मध्ये हां शक्तिमण्डलाय नमः । धवळवर्ण मण्डलत्रयव्यापक मिच्छाशक्तिरूपशक्तिमण्डलं पूजयामि । हां शक्तिमण्डलाधिपतये महेश्वराय नमः । स्फटिकवर्णमष्टहस्तं खड्गत्रिशूलबाणाक्षमाला कमण्डल्वभयकरारविन्दधारिणं शक्तिमण्डलाधिपतिं महेश्वरं पूजयामि । ततस्समस्तं शिवासनं विभाव्य तदुपरि हां शिवासनायनमइति ज्ञानशक्त्यात्मकं शिवासनं पूजयेत् । अस्यामासनपरंपराया माधारशक्तिमात्मार्थपूजायां ब्रह्मशिलास्थानीये पद्मपीठे पूजयित्वाऽनन्तप्रभृति शक्ति-मण्डलान्तं लिङ्गवेदिकाया मुपर्युपरि लिङ्गनाभिपर्यन्तं पूजयेत् । एवं प्रत्येकं शिवा-सनावयवपूजनाशक्तौ साङ्गोपाङ्गं शिवासनं विभाव्य हां शिवासनायनम इत्येवं पूज-येत् । अयमनेकासनगर्भशिवासनार्चनप्रकारः । यद्वा - आवाहने पद्ममनन्तं स्नाने विमलमर्चने योगासनं नैवेद्ये वस्त्रादिष्वन्येषूपचारेषु सिंहासनञ्च कल्पयेत् । अथवा सिह्मासनं स्नाने अनन्तं वस्त्रे पद्ममाभरणगन्धपुष्पेषु विमलं नैवेद्ये योगमन्योप-चारेषुच कल्पयेत् । एवं शिवासनं संपूज्य हां हं हां शिवमूर्तयेनम इति लिङ्गनाभे-र्महेश्वरतत्वात्मिकां शिवस्य मूर्ति स्थिरविद्युन्निभां दण्डाकारा मविभक्तावयवां संपू-ज्य लिङ्गदैर्घ्ये होमीशानमूर्ध्ने नम इत्यादिमन्त्रैर्दण्डभङ्ग्या मूर्द्धादिपादान्त मीशानादि विन्यस्य सशक्तिक मशक्तिकं वा तत्तत्स्थानेष्वष्टत्रिंशत्कला न्यसेत् । शूद्रश्श-शिन्यादिशक्तीरेव न्यसेत् । ततश्श्रीकण्ठादिन्यासञ्च विदध्यात् । एवं सदाशिवदेह-सिद्ध्यर्थं न्यासान्कृत्वा हां हौं विद्यादेहायनम इति विभक्तावयवं सदाशिवं विद्यादेहं पूजयित्वा तत्स्वरूपं प्रपञ्चेन ध्यायेत् ।।

क्षित्यादिशुद्धविद्यान्ते कन्दनाळदळैर्युते । कर्णिकाकेसरैर्युक्ते सूर्यबिंबादि-भूषिते ।। ईश्वरान्तिकया मूर्त्या स्थिरविद्युत्प्रकाशया । अविभक्तावयवया भ्राजमा-नोपरिस्थले ।। क्षित्यादीश्वरतत्वान्ते मूर्त्याकथितया सह। नानापट्टकुटीकोटीयोज-नोन्नतशालिनि । पद्मेस्थितं महापद्मकोटियोजनसंमितम् । बद्धपद्मासनासीनं समुपासेत्सदाशिवम् ।।

यद्वा कूटाङ्गकोटी कटकनटनर्टी नाट्य नव्यान्नपान
ध्याना विद्यानकानीनकमितशतकोट्युन्नतैर्योजनौघैः ।
तेजोमूर्त्यन्तकन्दप्रभृतिषु दशधा सप्तधाच प्रभिन्नैः
सङ्ख्यातव्यप्रमाणै स्सरसिरुहवरे योगपीठे निषण्णम् ।।

दशोत्तरप्रयुतपरार्धयोजनां विवृद्धकाविषयपरार्धयोजनां ।
समुन्नातिं समुपगतं समाश्रये सदाशिवं सरसिरुहासने स्थितम् ।।

पद्मं कन्देऽथ नाळे क्रमिकदशगुणा विंशतौ तस्य वृद्धि
येकैकद्वित्रिषुस्या च्छतमुखदशलक्षान्तभङ्ग्याऽथ वृद्धिः ।
ग्रन्थौ कोट्याथ पद्मप्रभृतिषु दशकोट्येति संख्याभिराभिः
संख्याते योजनौघै र्महिमजुषि महायोपीठे स्थितं वा ।।

तदुपरि शतकोटियोजनौघ प्रथित महेश्वरतत्वमानमूर्तेः ।
लसितमुपरि तत्सहस्रकोट्या तदयुतकोटिदिशाच वृद्धिभाजम् ।।

पञ्चवक्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ।
दक्षिणे शूलवज्रासिपरश्वभयमुद्रिकाः ।।
वामेच दधतं नागपाशघण्टानलाङ्कुशान् ।
अथवा वरखट्वाङ्गशूलाभीशक्तिपञ्चकम् ।।

रुचकं डररुं सर्पं नीलाम्भोजाक्षमालिकाम् ।
अस्योद्ध्र्ववक्त्रं देवस्य बालभावमनोहरम् ।।
प्रसन्नमूद्ध्र्वाभिमुखं निर्मलं स्फटिकप्रभम् ।
पूर्ववक्त्रं महेशस्य निष्टप्ताष्टापदप्रभम् ।।
गर्वेण स्तिमितं सौम्यं संप्राप्तनवयौवनम् ।
दक्षिणं वदनं शंभोर्नीलाञ्जनचयप्रभम् ।।
भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ।
दंष्ट्राकराळं दुर्धर्षं स्फुरिताधरपल्लवम् ।।
चन्द्रापीडज्वलत्केशं विसलत्प्रौढयौवनम् ।
उत्तरं वक्त्र मीशस्य नवविद्रुमसुप्रभम् ।।
ललाटतिलकोपेतं नीलाळकविभूषितम् ।
प्रलोभनं त्रिनयनं चन्द्राभरणभास्वरम् ।।

पार्वतीवदनाकारसलीलभ्रूलतान्वितम् ।
पश्चिमं चण्डसङ्काशं नृपलक्षणलक्षितम् ।।
चन्द्रावतंसरुचिरं ध्यानस्तिमितलोचनम् ।
इति ध्यात्वा पुनरपि ध्यायेद्देवं सदाशिवम् ।।
इच्छाज्ञानक्रियारूपविलसल्लोचनत्रयम् ।
ज्ञानचन्द्रकालचूडं दशदिग्बाहुमण्डलम् ।।
पञ्चब्रह्मात्मवदनं पञ्चसादाख्यवक्त्रकम् ।
श्रीमत्पञ्चाक्षराकारवदनांसोरुशोभितम् ।।
समस्ततन्त्ररूपं च वर्णब्रह्मकलामयम् ।
निवृत्या जानुपर्यन्त मानाभेश्च प्रतिष्ठया ।।
आकण्ठं विद्यया सिद्ध माललाटं तु शान्तया ।
तदूर्ध्वं शान्त्यतीताख्यकलया परिकल्पितम् ।।
एवं पञ्चकलारूप मिदं सादाशिवं वपुः ।।
चतुर्मुखी तटिद्वर्णा निवृत्तिर्वज्रधारिणी ।
एकवक्त्रा शशाङ्काभा प्रतिष्ठा पद्मधारिणी ।।
अग्निवर्णा त्रिवदना विद्या शक्तिलसत्करा ।
कृष्णवर्णा चतुर्वक्त्रा शान्तिर्ध्वजविधारिणी ।।
पाशभृत्पञ्चवदना शान्यतीता शशिप्रभा ।
सर्वाः पद्माक्षमालाभ्या मभयेन विराजिताः ।।
चतुर्भुजा स्त्रिणेत्राश्च पीनोन्नतपयोधराः ।
आसां पञ्चाध्वगर्भत्वात् षडध्वात्मा सदाशिवः ।।
मन्त्राध्वाच पदाध्वाच वर्णाध्वा भुवनाध्वकः ।
तत्वाध्वा च कलाध्वा च षडध्वान इमे मताः ।।
चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम् ।
भुवनाध्वा स सञ्चिन्त्यो रोमबून्दात्मना विभोः ।।
पञ्चाशद्रुद्ररूपैस्तु वर्णे र्वर्णाध्वकल्पना ।
असौ त्वगात्मना चिन्त्यो देवदेवस्य शूलिनः ।।

रुधिरात्मा तु मन्त्राद्ध्वा विचिन्त्यः पार्वतीपतेः ।
पदाध्वा चिन्तनीयस्स्यात् सिरामांसतया प्रभोः ।।
पृथिव्यादीनिषट्त्रिंशत् तत्वान्यागमवेदिभिः ।
उक्तान्यमीभिस्तत्वाध्वा शुक्लमज्ञास्थिरूपभृत् ।।
नास्य देहेऽस्थि रुधिरं न मांसं नास्ति किञ्चन ।
प्रतिबिम्ब मिवादर्शे शक्रचापमिवांबरे ।।
ज्योतिर्मयतया सिद्ध मिदं सादाशिवं वपुः ।
तथाऽपि कल्पनामात्रं कलावाऽप्यध्वनामिदम् ।।
ब्रह्मस्वीशेन मूर्धानं पुरुषेण चतुर्मुखीम् ।
हृदयादीन्यघोरेण गुह्यादीनि तु वामतः ।।
सद्योजातेनतु ध्यायेत् पादादीनि जगत्पतेः ।
पञ्चवक्त्राः स्मृतास्सर्वे दशदोर्दण्डभूषिताः ।।
खड्गखेडधनुर्बाणकमण्डल्वक्षसूत्रिणः ।
वस्त्राभयोपेतकरा श्शूलपङ्कजपाणयः ।।
अघोरो घोर एतेषु तदन्ये सौम्यविग्रहाः ।
एवं ध्यात्वा सदेशस्य पञ्चब्रह्मात्मतां विभोः ।।
तत्तद्ब्रह्मकलाभेदे र्विचिन्त्याङ्गानि कल्पयेत् ।
ईशानस्य कलाः पञ्च मूर्द्धात्मकतां गताः ।।
चतुर्मुखतया ध्येया श्चतस्त्रः पुरुषस्य ताः ।
अष्टावघोरस्य कला स्समस्ता जगतीपतेः ।।
हृत्कण्ठोऽम्सौ नाभिकुक्षी पृष्ठं वक्ष इतीरिताः ।
वामदेवस्य तु कलास्त्रयोदशशिवोदिताः ।।
गुह्योरुजानुजङ्घास्फिक्कटिः पार्श्वे तथा मताः ।
सद्योजातस्यतु कला वसुसंख्याः प्रकीर्तिताः ।।
पादौ करौ नासिके च शिरोबाहू च ता मता : ।
अष्टत्रिंशत्कला देवाः तिणेत्राश्च चतुर्मुखाः ।।
वराभयपरश्वेणविलसत्करपङ्कजाः ।
तत्तद्ब्राह्यसमाकारवर्णायुधभृतोऽथवा ।।

एतेषां वामभागेषु शशिन्याद्याश्च शक्तयः ।
पाशाङ्कुशाभयवरै र्ध्यातव्यास्सुस्मिताननाः ।।
श्रीकण्ठप्रमुखान्रुद्रान्वर्णरूपान्सशक्तिकान् ।
प्रभोरवयवान्ध्यायेन्न्यासविन्यासवर्त्मना ।।
स्मरेत्सशक्तिकान् रुद्रा नर्धनारीश्वराकृतीन् ।
सिन्दूरकाञ्चनप्रख्य वामदक्षिणपार्श्वकान् ।।
पाशाङ्कुशाक्षवलय वरमुद्राविराजितान् ।
प्रसन्नवक्त्रकमला न्विश्ववाञ्छितदायकान् ।।
कामिकं पादकमलं योगजं गुल्फयो र्युगम् ।
चिन्त्यं पादाङ्गुळीरूपं कारणं प्रसृतिद्वयम् ।।
अजितं जानुनोर्युग्मं दीप्तमूरुद्वयं विभोः ।
गुह्यबीजात्मकं सूक्ष्मं सहस्रंभ्रुकुटीतटम् ।।
पृष्ठभागोऽशुमानस्य नाभिश्रीसुप्रभेदकम् ।
विजयं जठरं प्राहुर्निश्वासं हृदयात्मकम् ।।
स्वायम्भुवं स्तनद्वन्द्व मनलं लोचनत्रयम् ।
वीरागमः कण्ठदेशो रौरवं श्रवणद्वयम् ।।
मकुटं मकुटं तन्त्रं बाहवो विमलागमः ।
चन्द्रज्ञान मुरश्शंभो र्बिम्बं वदनपङ्कजम् ।।
जिह्वा प्रोद्गीत मीशस्य ललितं गण्डयोर्द्वयम् ।
सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ।।
यज्ञोपवीतं शर्वोक्तं हारस्त्रक्पारमेश्वरम् ।
किरणं रत्नभूषास्य वातुलं वसनात्मकम् ।।
एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत् ।
शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकम् ।।
विशुद्ध शिवसादाख्यं विद्युद्वृन्दमिवांबरे ।
विश्वतत्स्फुरितज्योति र्विद्यादूर्ध्वं मुखं विभोः ।।
अमूर्ति मथ सादाख्यं मूलस्तम्भ इति श्रुतम् ।
ज्योतिस्तम्भमयं लिङ्गं स्मरेदस्योत्तरं मुखम् ।।

ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् ।
मूर्तिसादाख्य मित्युक्तं ध्यायेत्पश्चिममाननम् ।।
शूलञ्च परशुं वज्र मभीतिं दक्षिणैः करैः ।
पाशं वह्निञ्च घण्टाञ्च वरं वामैः करैरपि ।।
दधानं कर्तृसादाख्यं चतुर्वक्त्रांबुजोज्वलम् ।
लिङ्गमध्ये समुद्भूतं संस्मेरदक्षिणाननम् ।।
पञ्चवक्त्रं दशभुजं पीठं लिङ्गे समुद्गतम् ।
प्रसिद्धं कर्तृसादाख्यं पुरारेः पूर्वमाननम् ।।
पञ्चब्रह्माण्यूर्ध्वपूर्वदक्षिणोत्तरपश्चिमान् ।
वक्त्रपद्मान्विभोर्ध्यायेदीशानप्रभृति क्रमात् ।।
हृदयं हृदये शुभ्रं शिरश्शिरसि पिङ्गळम् ।
शिखां शिखापदे रक्तां कवचं पार्श्वयोः स्थितम् ।।
नेत्रेतु श्यामळं नेत्रं करेऽस्त्र मसितं स्मरेत् ।
चतुर्भुजास्त्रिणेत्राश्च जटामकुटमण्डिताः ।।
वराभये कपालञ्च शूलश्च दधतं करैः ।।
अङ्कदेवाःस्मृतास्सौम्यनेत्राग्रेतूग्रविग्रहे ।
त्रिशूलस्त्रिगुणः प्राहुः परशुस्सत्यनिष्ठिताः ।।
खड्गप्रतापोवज्रश्च शंभोश्शक्तिरभेद्यता ।
वह्नेस्संहारिणी शक्तिश्शक्तिर्नागे प्रधृष्यता ।।
मलमाया कर्मपाशो घण्टानादस्वरूपिणी ।
अभयं पालिनी शक्ति र्नियमंत्वंकुशं विदुः ।।
इच्छाज्ञानक्रियारूपा स्त्रिशूलं शक्तयोमताः ।
उक्ता स्ताएव खट्वाङ्गं शुद्धतत्वप्रवर्तिकाः ।।
बीजपूरमिति प्रोक्ता जगद्बीजप्रवर्तिका ।
डमरुक्षोभसंपन्नमायातत्वप्रवर्तिका ।।
काकोदरः कला मुख्या कार्यजातप्रवर्तिका ।
मनः प्रवर्तिकाशक्तिरिन्दीवरतया मता ।।

अक्षमालातु सा ज्ञेया इन्द्रियाणां प्रवर्तिका ।
शक्त्यायुधात्मिका शक्ति र्दुष्टसंहारकारिणी ।।
वरो भोगप्रदा शक्ति रभयं मोक्षदायिका ।
इत्थं दशायुधधरं कोटिशीतांशुशीतळम् ।।
द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितम् ।
पङ्क्त्यङ्गुळपरिच्छिन्नजटामकुटमण्डितम् ।।
तत्सव्यकोटिविन्यस्तत्र्यङ्गुळार्धेन्दुशेखरम् ।
तद्वामकोटिविश्रान्तबिंद्वाकृत्यमरापगम् ।।
त्रिपुण्ड्रार्धेन्दुभूयन्त्रदीपचन्द्राकृतिं क्रमात् ।
ईशानाद्यै र्मुखं पुण्ड्रान्धारयन्तमजांतिमैः ।।
ध्यायेत्तद्वामभागेतु दिव्यरूपां मवोन्मनीम् ।
जपाकुसुमसङ्काशां शुभ्रवस्त्रविभूषिताम् ।।
सर्वाभरणसंपूर्णां पीनोरुजघनस्तनीम् ।
सहस्रपद्मनीलाब्जवरदाभयधारिणीम् ।।
एवं मनोन्मनीयुक्तं साक्षाद्देवं सदाशिवम् ।
लिङ्गेऽपि भावयन्नग्रे लिङ्गबुद्धिं परित्यजेत् ।।
नेत्रत्रयेषु विन्यस्य हौं नेत्रेभ्य इति क्रमात् ।
आवाहयेत्परशिवं सदैवं हृदयांबुजे ।।

अथावाहनक्रमः- अप्रमेय मनिर्देश्य मनुपम मनामयम् । सूक्ष्मं सर्वगतं नित्यं ध्रुव मव्यय मीश्वरम् ।। भवन्तं भवताऽऽदिष्टो मन्त्रेणाभिनमाम्यहम् ।। इति विज्ञाप्य ऋजूदूर्ध्वकायो मनश्चक्षुर्निरोधनपूर्वक मिडया वायुमापूर्य कुंभकं कृत्वा हृदि पुष्पसंपूर्ण मञ्जलिं निधाय दृढमावाहनमुद्रां बद्ध्वा स्वशरीरे मूलाधारस्थितं मन्त्रमयं परमशिवं ज्योतिस्समाकृष्य मूलाधारप्रभृति स्थितं हकार मतिलङ्घ्य हृदय-पर्यन्तं नीत्वा हृत्कण्ठताल्वादिस्थानस्थित पृथिव्यादिपाशजालब्रह्मादिकारणेश्वर-सहिताकारादिद्वादशकलाश्च क्रमेण तत्तदनुसन्धानपूर्वक मतिलङ्घ्य द्वादशान्तपर्यन्त-मुच्चारयन्नेव पुष्पाञ्जलिमपि द्वादशान्तपर्यन्तंनीत्वा मन्त्रमयं ज्योतिर्द्वादशान्तस्थित-परमशिवेन संयोज्य अविश्रान्तं परमामृतस्यन्दिबिन्दुरूपं तत आनीय भ्रूमध्यगत-

शिवमण्डरविश्रान्तं संभाव्य शरदिन्दुसहस्रवद्भाव्य हृद्देशेऽञ्जलिं धारयन् वायुमपि पिङ्गळया विरेच्य वायुना सह परमशिवं ज्योतिः पुष्पाञ्जलिमध्यप्रापितं विभाव्य हां हौं शिवायनम इति सदाशिवस्य ब्रह्मरंध्रे योजयेत् । उक्तार्थविशदीकरणाय मूलमन्त्र तदीयहकार तत्कलाद्वादशस्थानानि प्रदर्श्यन्ते ।। यद्देहमध्यस्थानं मूलाधारं ततः प्रभृति ब्रह्मरन्ध्रपर्यन्तं ताळचतुष्टयप्रमाणं देहान्तर्गतम् । ततऊद्ध्र्वं तालप्रमाणं शिखास्थानम् । तत्र मूलाधासस्थितचतुर्दळकमलकर्णिकायां प्रासादमन्त्रस्योत्थानम्। ततः प्रभृति नाभिपर्यन्तं मृणाळसूक्ष्मेविद्युत्प्रभो हकारः । नाभेरूद्ध्र्वं द्वादशाङ्गुल-पर्यन्तं विद्युद्द्युति रकारयुक्तो हकारः । ततः पञ्चचतुरङ्गुलप्रमाणं हृत्पद्मम् । तत आरभ्य शिखाग्रपर्यन्तं द्वादशकलास्थानानि । तत्रचतुरङ्गुल व्याप्तिमानौकार स्त्रिमात्र-स्समूढाङ्गारपुञ्जद्युतिः । सच निवृत्तिकलया पृथिव्यादिप्रकृत्यन्तैः चतुर्विंशतितत्वैश्च सहितेन ब्रह्मणाऽधिष्ठितः । तदूद्ध्र्वं कण्ठस्थानस्थिताष्टाङ्गुलप्रमाणा षोडशदळपद्म-व्याप्तिमा नूकारः द्विमात्र स्समसमयसमुदितचन्द्रसूर्यद्युतिः । स प्रतिष्ठाकलया पुरु-षादिकालान्तैष्षड्भिस्तत्वैश्च सहितेन विष्णुनाऽधिष्ठितः । तदूद्ध्र्वतालुमूलस्थित-चतुरङ्गुलप्रमाणचतुर्दलपद्मव्याप्तिमान्मकारः एकमात्रो विद्युद्वर्णः । स विद्याकलया मायातत्वेनच सहितेन रुद्रेणाधिष्ठितः । तदूद्ध्र्वं भ्रुमध्यस्थितद्व्यङ्गुलप्रमाणद्विदल-पद्मव्याप्तिमा न्बिन्दुबृत्ताकारोऽर्द्धमात्रो विद्युद्वर्णः शान्तिकलया शुद्धविद्येश्वरतत्वा-भ्याञ्च सहितेन महेश्वरेणाधिष्ठितः । तदूद्ध्र्वं ललाटमध्ये अर्धमात्रा ऊद्ध्र्वाग्रा अर्धचन्द्राकृतिः पादमात्रा चन्द्रवर्णा । तदूद्ध्र्वं ललाटे निरोधी । सचोर्ध्वाग्रत्रि-कोणाकृति रष्टांशमात्रो धूम्रवर्णः । तदूद्ध्र्वं शिरसि नादः । सदण्डाकृति रुभयतो-बिन्दुद्वययुक्तः षोडशांशमात्रो माणिक्यवर्णः । ततो ब्रह्मरन्ध्रे नादान्तः स दक्षिणा-मुखहलाकृतिः दक्षिणपार्श्वस्थबिन्दुयुक्तः द्वात्रिंशात्ममात्रो विद्युद्वर्णः । एवं बिन्दु-स्थानात् भ्रूमध्या दैकादशाङ्गुलीस्थतब्रह्मरन्ध्रपर्यन्ते स्थाने स्थिताना मर्धचन्द्रनिरोधि नादनादान्तानां चतुर्णामपि शान्त्यतीतकला सदाशिवतत्वाभ्याञ्च सहित स्सदाशिव एवाधिष्ठाता । ब्रह्मरन्ध्रादूद्ध्र्व मेकाङ्गुलस्थानस्थिता शक्ति स्सर्वमुखहलाकृति र्वाम-पार्श्वस्थबिन्दुसहिता चतुष्षष्ट्यंशमात्रा । ततः त्र्यङ्गलस्थाने स्थिता व्यापिनी त्रि-शूलाकृति र्दक्षिणपार्श्वस्थबिन्दुसहिताऽष्टाविंशत्यधिकशतांशमात्रा । तदूद्ध्र्वं चतु-रङ्गुलसमानबिन्दुद्वयान्तर्गतकुब्जरेखायुगलान्तरालस्समञ्जु रेखामधिषट्पञ्चाशदधिक द्विशततमांशमात्रा । तदूद्ध्र्वं चतुरङ्गुलस्थितोन्मनीबिन्द्वधिष्ठानकतदूर्ध्वप्रसृत दण्डा-

काररेखात्मिका मनोमात्रा । अत्र ब्रह्मरन्ध्रादूद्ध्वं मेकत्रिचतुरङ्गुलक्रमेण द्वादशाङ्गुलपर्यन्तशिकास्थाने उपर्युपरि स्थिता श्शक्तिव्यापिनी स्समनोन्मनी श्शतकोटिसूर्यप्रभाः अनाहतशिवेनाधिष्ठिताः। ताश्च चतस्रोऽपि मिळिताः परमाकाशा उच्यन्ते। एवमकारश्चतुरङ्गुलः । उकारोऽष्टाङ्गुलः । मकारश्चतुरङ्गुलः। बिन्दुर्ध्यंगुलमर्धचन्द्र निरोधि नादनादान्ता एकादशाङ्गुळं शक्ति व्यापिनी समनोन्मना द्वादशाङ्गुळव्याप्नुवत्येकचत्वारिंशदङ्गुलं द्वादशानामपि कलानां व्याप्तिस्थानम् । ततश्च मूलाधारात् द्वादशान्तपर्यन्तमुक्तमानेषु तत्तत्स्थाने हकारमकारयुक्तहकार मौकारमूकारं वृत्ताकारं बिन्दु मूर्द्धाग्रार्धवृत्ताकार मर्धचन्द्र मूर्ध्वत्रिकोणाकारं निरोधिनं बिन्दुद्वयमध्यगतदण्डाकारं नाददक्षिणपार्श्वस्थित बिन्दुसहितोर्ध्वाग्र दक्षिणामुखहलाकारं नादान्तं वामपार्श्वस्थितबिन्दुसहितोर्ध्वाग्रवाममुखहलाकारं शक्तिं दक्षिणपार्श्वस्थितां बिन्दुसहितोर्ध्वाग्रत्रिशूलाकारां व्यापिनीं बिन्दुद्वयान्तरालगतकुब्जरेखाद्वयमध्यस्थितऋजुरेखाकृतिं समानां बिन्द्वधिष्ठानकोर्ध्वाग्रऋजुरेखाकृतिमुन्मनां च हृदयादिस्थानस्थितकलातत्वकारणेश्वरैस्सह क्रमेण पूर्वपूर्वत्यागेन झटिति मनसा विचिन्त्य तदुपरि परमाकाशसरित्समुद्भूतकोटिसूर्यसमप्रभ कोटिशीतांशुशीतळाष्टत्रिंशत्कलात्मक केसरोज्वल प्रणवकर्णिकापञ्चाक्षरबीजाढ्य परमानन्दमधुभरित मुक्तभृङ्गनिषेवित चिच्छक्तिरूप सहस्रदळकमलमध्यगतं सद्यस्समुद्यदनेककोटि शारदशशाङ्कसङ्काशप्रकाशं परमानन्दजलधिं निष्कलंपरमशिवं मनसाऽवगाहेत । एवं भावनापुरस्सरं परमशिवं मूलेनानीय हृदयमन्त्रेणावाहनमुद्रया सदाशिवहृदयाम्बुजंप्रापप्यास्थापनमुद्रयातस्मिसंस्थाप्य सन्निधानमुद्रया स्वामिमुखीकृत्य स्वागतंते महादेवेति विज्ञाप्य वत्स सुस्वागतमितिदेवेनोक्तं मनसा विभाव्य स्वागतार्घ्यं दत्वा सन्निरोधनमुद्रया सन्निरुध्य "स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकम् । तावत्वं प्रीतिभावेन लिङ्गेऽस्मिन्सन्निधी भव" इति हृद्यंजलिबन्धपूर्वकं संप्रार्थ्य शिवस्यानुमतिं भावयित्वा निरोधार्घ्यं प्रदाय काळकण्ठ्या हुंफडन्तास्त्रेण विघ्नानुत्सार्य शिवं कवचेनावकुण्ट्य हृदयशिरश्शिखाकवचानि तत्तन्मन्त्रैर्देवस्य हृदयादिस्थानेषु विन्यस्य हृदयादिकराङ्गविन्यासरूपसकळीकरणानन्तरं पुष्पमारोप्य मूलेन परमीकृत्य धेनुमुद्रयाऽमृतीकुर्यात् । अत्रावाहनं शिवस्य सदाशिवदेहप्रापणम् । स्थापनं सदाशिवस्य हुदंबुजे स्थापनम् । सन्निधापनं स्वाभिमुखीकरणम् । सन्निरोधनं यावत्पूजासमाप्ति सन्निधानप्रार्थनम् । अवकुण्ठनं भक्तेषु प्रकाशार्थं विघ्नाना मप्राप्त्यर्थं च कवचेनाच्छादनम् ।

सकळीकरणं हृदयादिपञ्चाङ्गन्यसनम् । परमीकरणं शुक्लपीतरक्तासितरक्तवर्णानां हृदयादीनां शिवैकत्ववर्णानुसंधानम् । अमृतीकरणं विग्रहस्य शिवस्यचाभेदेन प्रतिपत्तिः । ननु विश्वव्यापकस्य शिवस्य कथमभिमतदेशप्रापणरूप मावाहन मुच्यते । अचिन्त्याद्भुतानन्तशक्तिकस्यशिवस्यव्यापकत्वमव्यापकत्व मप्यस्तीति तच्छिवस्य देशान्तरप्रापणरूप मुपपद्यते । यद्वा- व्यापकस्यापि जीवस्य शरीरावच्छेदोपाधिकत्वमिवशिवस्यापि मन्त्रतेजोवच्छेदोपाधिवदभिमतदेशान्तरप्राप्तिर्नविरुध्यते । अथवा दारुणिव्याप्तस्याग्नेर्मथनक्रियया क्वचिदभिव्ञ्जनवदभिमतदेशप्रापणभावनारूपयाक्रियया शिवलिङ्गाभिमतदेशे शिवस्याभिव्यञ्जनमेवावाहनम् । ननु सर्वत्र नित्योदितचिदानन्दप्रकाशरूपस्य परमशिवस्य किमिदमभिव्यञ्जनमुच्यते । यथा स्वयंप्रकाशमानस्याप्यंगारवह्निपुञ्जस्य भस्मच्छन्नस्य भस्मनिरासकफूत्कारक्रिययाऽभिव्यञ्जनं एवं स्वयंप्रकाशमानस्यापि परमशिवस्य पूजकमनसोविषयान्तरेषु मनोव्यापारेण तं प्रति च्छन्नस्यानन्यमनस्कविहितावाहनक्रियापूर्वक मभिमतदेशे लिङ्गादौ यावद्विसर्जनं कर्तव्यस्य तत्तदुपचारसमर्पणार्थ मनुसन्धानसन्तानस्योक्रमण मेवाभिव्यञ्जनम् । अथवा शिवपुराणोक्तप्रकारेण सदाशिवहृदयांबुजे परशिवस्योमासहायचिदानन्दमयदिव्यविग्रहाविर्भावभावनैवावाहनम् ।। तत्प्रकारः प्रदर्श्यते ।।

लिङ्गे सदाशिवं ध्यात्वा निश्चलेनान्तरात्मना ।
अष्टत्रिंशत्कलान्यासं कृत्वा स्वस्यां तनौ यथा ।।
अभ्यर्च्य गन्धपुष्पाद्यै स्त्यक्त्वा लिङ्गात्मतामतिम् ।

तस्यां मूर्तौ मूर्तिमन्तं शिवं परमकारणम् ।
प्राणस्थानं सदेशस्य चिन्तये दंबया सह ।।
ब्रह्मा विष्णुश्च रुद्रश्च तथाऽन्ये च सुरासुराः ।
तपोभि रुग्रै रद्यापि यस्य दर्शनकाङ्क्षिणः ।।
यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैस्सर्वैः प्रथमं संप्रसूयते ।।
कारणानां च योधाता ध्याता परमकारणम् ।
न संप्रसूयतेऽन्यस्मात्कुतश्चन कदाचन ।।

सर्वैश्वर्येण संपूर्णो नाम्ना सर्वेश्वरस्स्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येय श्शंभुराकाशमध्यगः ।।
सर्वोपरि कृतावास स्सर्ववासश्च शाश्वतः ।
षड्विधांध्वमयस्यास्य सर्वस्य जगतः पतिः ।।
उत्तरोत्तरभूताना मुत्तरश्च निरुत्तरः ।
अनन्तमहिमांभोधि रपरिच्छिन्नवैभवः ।।
अशेषविषयामोघशुद्धबुद्धिविजृम्भणः ।
आत्मशक्त्यमृतास्वादप्रमोदभरलालसः ।।
अनन्तानन्दसन्दोहमकरन्दमधुव्रतः ।
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ।।
औदार्यवीर्यगाम्भीर्यमाधुर्यमकरालयः ।
अतुलस्सर्वभूतानां राजराजो महेश्वरः ।।
अप्राकृतशरीरं त मतिमन्मथरूपिणम् ।
घृतरीतिघनीभूतसच्चिदानन्दविग्रहम् ।।
सर्वलक्षणसंपन्नं सर्वावयवशोभनम् ।
रक्तास्यपाणिचरणं कुन्दमन्दस्मिताननम् ।।
शुद्धस्फटिकसङ्काशं फुल्लपद्मत्रिलोचनम् ।
चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ।।
वरदाभयहस्तंच मृगटंकधरं हरम् ।
सर्वोप मानवर्गस्य दवीयांसं विभावयेत् ।।
ततस्संचिन्तयेत्तस्य वामभागे महेश्वरीम् ।
उत्फुल्लोत्पलपत्राभविस्तार्णायतलोचनाम् ।।
पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्द्धजाम् ।
नीलोत्पलदळप्रख्यां चन्द्रार्धकृतशेखराम् ।।
अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम् ।
तनुमध्यां पृथुश्रोणिं वीतसूक्ष्मतरांवराम् ।।
सर्वाभरणसंपन्नां माणिक्यतिलकोज्वलाम् ।
विचित्रपुष्पसंकीर्णकेशपाशमनोहराम् ।।

संस्कृत संस्थान ग्रन्थालय 25291

सर्वतोनुगुणाकारां किञ्चिल्लज्ञानताननाम् ।
हेमारविन्दं विकसद्दधानां दक्षिणे करे ।।
दण्डवच्चापरं हस्तं न्यस्यासीनां सहासने ।
भुक्तिमुक्तिप्रदां देवीं सच्चिदानन्दरूपिणीम् ।।
सदाशिवेश्वरहरश्रीशद्रुहिणमातरम् ।
समस्तगौरीलक्ष्यादिशक्तिचक्रस्य नायिकाम् ।।
एवं देवं च देवीं च विचिन्त्य द्व्यष्टहायनौ ।
भक्त्योपचारवर्गेण क्रमेण परिपूजयेत् ।।

एवं सदाशिवस्य हृदयाम्बुजे साम्बशिवविग्रहाविर्भावभावनापक्षे तस्य सदाशिवहृदयाम्बुजे अवस्थापनं स्वाभिमुखीकरणम् इत्यादि सर्वमुपपद्यतेतराम् । शरीरशरीरिणोरभेदप्रतिपत्तिरूपममृतीकरणं तु साम्बशिवविग्रहाविर्भावपक्ष एवोपपद्यते । स्वाभिमते लिङ्गादावावाहिते सदाशिवविग्रहे पूजार्थमभिव्यक्तिं प्रार्थयमानस्य पूजकस्यानुग्रहार्थं शिवाभिन्नसच्चिदानन्द एवाचिन्त्याद्भुततदीयशक्तिमहिम्ना करक्रमौक्तिकाद्याकारेण जलबिन्दुरिव सकलावयवसंपूर्णसांबशिवविग्रहाकरेणाभिव्यज्यत इति शिवपुराणादिमर्यादा । एवं चिदानन्दाकारपरमशिवविग्रहप्रभाधवळितरूपादेव नानावर्णाष्टत्रिंशत्कलामयस्यापि सदाशिवविग्रहस्य स्फटिकवर्णत्वभावनोपपद्यते । सदाशिवस्य तत्पुरुषादिवक्त्राणां पीतनीलसितारुणवर्णत्वं तु पूर्वादिदिक्पतीनामिन्द्रयमवरुणकुबेराणां तत्तत्कार्योपयोगिपीतनीलसितारुणवर्णस्थिरीकरणार्थं तत्तद्वर्णानुकरणप्रयुक्तम् । एवंरूपे परमशिवस्यावाहने क्रियमाणे ऊर्ध्वाभिमुखस्य सदाशिवेशानवक्त्रस्य तत्पुरुषवक्त्रवदाविसर्जनं प्राङ्मुखत्वं भावनीयम् । आवाहनाद्यमृतीकरणान्तसंस्कारं सांबसदाशिवविग्रहाभिव्यक्तिपक्षे सदाशिवमूर्तिमध्य एव कर्तव्यम् । तत्रैव परमशिवस्यांबिकायाश्च प्रत्येकं पदार्थानुसमयक्रमेण पाद्याद्युपचाराश्च कर्तव्याः । सदाशिवमूर्तौ परमशिवचैतन्यमात्रावाहनपक्षे तदावाहनानन्तरं पाद्यादि।मनोन्मनीमूर्तौ अम्बिकां चावाहनादिभिस्संस्कृत्य पाद्याद्युपचारैः पूजयेत् ।।

।। पाद्यादिप्रकारः ।।

वामहस्तेन सत्रिपदीकं पाद्याचमनार्घ्यपात्रमुत्क्षिप्य पाद्यमीश्वरतत्वान्त माचमनं सदाशिवतत्वान्त मर्घ्यं शिवतत्वान्तञ्च विभाव्य पाद्यादिकं पूजकस्येश्वरसदाशिवतत्वप्रापकञ्च ध्यात्वा मूलाधारादुत्थितं प्रासादादिमन्त्रं पाद्यादिक्रमेण भ्रूमध्यब्रह्मरन्ध्रद्वादशान्तपर्यन्त मुच्चरन्तं विभावयन् हां हौं शिवायेति मन्त्रक्रमेण नमस्स्वाहास्वधान्तमुच्चारयन्सद्योजातादिक्रमेण सपुष्पेणोत्तानेन दक्षिणकराङ्गुष्ठमध्यमानामिकाग्रेण श्रीपादयोस्सव्यवामक्रमेण पाद्यं मुखेषु तत्पुरुषादिक्रमेणाचमन मूर्धस्वीशानादिक्रमेणार्घ्यं च दद्यात् । सुगन्धि पुष्पं ज्ञानमयं शिवसायुज्यहेतुंच ध्यात्वा मन्त्रं द्वादशान्तोपरिस्थितशिवपर्यन्तमुच्चरन्तं विभाव्य वौषडन्तमन्त्रेण मूर्द्धस्वीशानादिक्रमेण निवेदयेत् । अंबिकाया अपि पाद्यादिकं तत्रतत्रैव समये पदार्थानुसमयेन दद्यात् । एवं गन्धादिष्वपि द्रष्टव्यम् । तत्र शिवायैनम शिशवायै स्वधेत्यादयो मन्त्रा इति विशेषः । ततः स्वाहान्तमूलेन धूपदीपौ पूर्वोक्तप्रकारेणाचमनार्घ्येच शिवाभ्यां दत्वा अस्त्रमन्त्रेणापि वस्त्रेण पिण्डिकाधोभागं वामहस्तेन स्पृशन्नेव दक्षिणहस्तेन पुष्पं गृहीत्वा तेन पुष्पेण पूर्वार्चित मपोह्य तत्रुरुषञ्च विसृज्य पूर्वोक्तप्रकारेणाभ्यङ्गादिकं सर्वं मनसा विभाव्य हां शिवतत्वायनम इति अर्घ्योदकबिन्दुना संस्नाप्य पूर्ववत्पाद्याचमनार्घ्याणि दत्वा स्वाहान्तमूलेन वस्त्रद्वय मुपवीतद्वयं च साचमनं दत्वा हामात्मतत्वाधिपतये शिवायनमः हां विद्यातत्वाधिपतये शिवाय नमः हां शिवतत्वाधिपतये शिवायनमः इति पुष्पाञ्जलित्रयं शिवायै नम इति देव्यै पुष्पाञ्जलिञ्च कृत्वा संभावितैर्मनसा विभावितैश्च हेमांबरकटकमकुटकर्णिकाङ्गदकेयुरादिभिराभरणैर्नमोन्तमूलमन्त्राभ्या मलङ्कृत्य गन्धपुष्पाणि समर्पयेत् । तत्र गन्धं हिमजलघृष्टसमभागगोरोचनाकुङ्कुमचन्दनैलाकर्पूरकृष्णागरुदारुकुष्ठकस्तूरिकाक्षोदो। समभागचन्दनागरुकर्पूरकुङ्कुमपत्रजलोंशीरक्षोदोवा । समभागेनतदर्धेन तदर्धेनवा कर्पूरेणयुक्तचन्दनागरुकुष्ठकुङ्कुमक्षोदोवा । समभागचन्दनागुरुकर्पूरकुङ्कुमक्षोदोवा । समभागचन्दनकर्पूरमृगमदकुङ्कुमक्षोदोवा । फलस्य निष्कप्रमाणांशेन यथासंभवमात्रेण कर्पूरादियुक्तचन्दनक्षोदोवा । केवलचन्दनक्षोदोवा । केवलबिल्वखण्टक्षोदोवा । केवलकृतमालखण्डक्षोदोवा । सर्व एवमन्धाशिवस्यातिप्रियकराः । केवलजलघृष्टकेवलदेवदारुगन्धोऽपि कल्पपर्यन्तं शिवलोकप्राप्तिकरः । केवलबिल्व-

खण्डोऽपि अत्र महदैश्वर्यप्रदाय परत्र शिवप्राप्तिकरः । केवलकृतमालगन्धोऽपि दीर्घमायुः प्रदाय परत्र गाणापत्यप्राप्तिकरः। एवंभूताश्चन्दनगन्धाः फलतोद्विगुणाः । शुक्लागरुश्चन्दनात् षट्गुणः । ततः कृष्णागुरुर्द्विगुणः । तस्माच्चतुर्गुणं कुङ्कुमम्। तत्र प्राग्गणितप्रकारेण कर्पूरादियोगेन भूयान्विशेषः । एवंभूतेषु गन्धेषु संपन्नं गन्धमर्घ्यपात्रोक्तलक्षणपात्रे निधाय देवस्यानुलेपनोचितानि ललाटादीन्यङ्गानि भावयन् लिङ्गपीठिकापर्याप्तं लिङ्गपर्याप्तं यथालब्धंवा गन्धं हृदयमन्त्रेण समर्पयेत् । ततो विंशत्यङ्गुळविस्तारे अष्टाङ्गुळोत्सेधे अष्टाङ्गळोत्सेधविस्तारपादे पार्श्वद्वयगताष्टाङ्गुळनाळे नाळपादरहितपिधानसंयुते तदर्धप्रमाणेव सुवर्णादिमये पत्रादिरचिते वा पात्रे निहितै र्मुकुळपतितशीर्णाघ्रातसजन्तुकाङ्गसंस्पृष्टलूतातन्तुवेष्टित पर्युषितवस्त्रसमाहृतत्वादिदोषरहितैस्सम्यक्शोधितैः मोचितवृन्तैः प्रशस्तपुष्पैः मूलमन्त्रेण मृगमुद्रयाऽर्चयेत् । प्रशस्तानिच पुष्पाणि द्रोणवत्पुन्नागमन्दारनन्द्यावर्त श्रियावर्तकरवीरार्कवकुळ कुरवकलोध्रशतपत्र धुत्तूरपलाशपाटल चंपककृतमालकर्णिकार मुनिमातुळिङ्गार्जुन प्रियङ्गुदेवदारु तमालाग्निगन्ध मरुवकाशोकभद्रापराजिता कतलकल्हार रक्तोत्पलनीलोत्पल कुसुम्भकुङ्कुम गिरिपुष्पकुशापामार्गभृङ्गराजपूगसरळकोविदार कदम्बाम्रमधूक जम्बूहेमाकुलिगुञ्जामुसलीवेजिकाजाजी मल्लिकापट्टिकामालती लक्ष्मीनिर्गुण्डीविष्णुक्रान्तिकदळीशारिबादेवताळी द्विकण्ठी ग्रन्थिपर्णी प्रभृतीनि । एतेषु शुभ्रवर्णानि पुष्पाणि सात्विकानि मुक्तिप्रदानि । अरुणवर्णानि राजसानि भोगप्रदानि । पीतवर्णानि मिश्राण्युभयप्रदानि सर्वकार्यसिद्धिकराणि पुत्रपौत्रवृद्धिकराणिच । कृष्णवर्णानि नीलोत्पलव्यतिरिक्तानि तामसानि वर्जनीयानि। तान्यप्यतसीकूरण्ड विष्णुक्रान्तादीनि विशेषविहितानि पुष्टिप्रदानि । तत्र सर्ववर्णानि पुष्पाणि समाहृत्याभ्यर्चन मुत्तमम् । कृष्णवर्णैर्विना मध्यमम् । सितरक्तादिभिर्वर्णै रेकवर्णैश्च पुष्पैरर्चन मुत्तरोत्तरं कनिष्ठम्। मालिकास्तु प्रत्येक मेकैकवर्णैः पुष्पैर्निर्मिताः श्रेष्ठाः। अनेकवर्णपुष्पनिर्मिता मध्यमाः । पत्रपुष्पनिर्मिताः कनिष्ठाः । अर्क करवीरपुष्प बिल्वपत्र गन्धपत्रिका पुण्डरीक शतपत्र सहस्रपत्र बक धुत्तूर द्रोणापामार्ग कुशशमी कृतमाल शङ्ख व्याघ्री सदाभद्रा कृष्णानि निर्गुण्डी बृहती श्वेतार्क बृहद्द्रोण नीलोत्पलान्युत्तरोत्तरं सहस्रगुणफलानि। तत्रार्कपुष्पं दशसुवर्णदानतुल्यम् । नीलोत्पलं सहस्र सुवर्णपुष्पार्चनतुल्यम् । तुळसी कृष्णतुळसींद्रवल्ली विष्णुक्रान्ती श्यामा प्रियङ्गुनृपपुण्ड्रपुषापादीनि अर्कसमानानि । नन्द्यावर्तविजयशतपत्र मन्दार चूतमधुक

श्वेतगिरिकर्णीमालती कदळी शारिबादिपुष्पाणि करवीरसमानि । लक्ष्मी सहदेवी नागदंति चंपकादीनि बिल्वपत्रसमानि । पाटलवकुळादीनि पद्मसमानि । जाति मल्लिका मधूर शङ्खनाग सूर्यावर्त सिंहकेसर महाभद्रादिपुष्पाण्यपामार्गसमानि । जपा कदम्ब पुन्नाग पुष्पादीनि द्रोणसमानि। अशोकश्वेतमन्दारपुष्पाणि यवगोधूम नीवार शालिवेणु तिलक मुद्ग निष्पावोशीरमापाङ्कुराणि सप्तदिनप्रवृद्धानिच कृतमालपुष्पसमानि। वज्रपद्मराग मरकतमौक्तिकेन्द्रनील महानील सूर्यकान्तेन्दुकान्तानि पुष्पाणि सहस्रसुवर्णपुष्पाणि करवीरनीलोत्पलसमानि । नीलोत्पलं सर्वोत्तममिति सर्वागमसिद्धम् । क्वचिदागमे करवीर मन्यत्र बकपुष्पमपरत्र गिरिपुष्पं सर्वोत्तरमित्युक्तम् । पद्मं सर्वोत्तममिति केचित् । कालविशेषेण पुष्पविशेषप्राशस्त्यम् । यथा - कदम्ब चम्पक कल्हार पुन्नाग कुश बृहती पुष्पाणि वसन्तऋतौ शिवपूजाया मश्वमेधफलप्रदानि । ग्रीष्मे पाटली मल्लिका शतपत्रपुष्पाणि अग्निष्टोमतुल्यानि । प्रावृषि कमल मल्लिकापुष्पाण्यश्वमेधसदृशानि । शरदि धुत्तूर कल्हार सुजात नीलोत्पलानि सत्रयागफलप्रदानि । हेमन्ते करवीर सुजातनीलोत्पलानि शतक्रतुसमानि । शिशिरे कर्णिकारपुष्पं सर्वक्रतुफलप्रदम् । तथा ज्येष्ठीदिषु द्वादशसु मासेषु अर्कबिल्वापामार्ग द्रोणनीलोत्पल पङ्कजकृतमाल बृहती व्याघ्र शमी चम्पक पाटली पुष्पाणि प्रशस्ततमानि । तथा नन्द्यावर्त श्रियावर्तश्वेतार्क श्वेतकमल पलाश पुन्नाग मालती पट्टिकारक्तागस्त्य वकुळ लक्ष्मी द्विकण्ठी वेजिकापाटल पलशाशोक कदळी शङ्खिनी पुष्पाणि प्रातःकालपूजायां प्रशस्ततमानि। द्रोणकरवीर कृतमाल धुत्तूर व्याघ्री बृहती पाटलकमलोत्पल चंपककुरण्डपुष्पाणि मध्याह्नपूजायां । चम्पकधुत्तूरमालतीमल्लिकावेजिकबलकर्णिसहभद्रा भद्रामसल्यतसीशमीशङ्खपुष्पाणि गन्धपत्रञ्च सायङ्कालपूजायां । जाती नीलोत्पलकनककदम्ब स्थलकमल केतकपूग पुन्नाग दन्ति ह्रीबेरं बिल्वपत्रं चार्धरात्रपूजायाम् । कदम्बकनक जातीपुष्पाणि रात्रावेवसमर्पणीयानि । माधव्यानन्दयूधिका मदयन्तिका शिरीषसर्ज बन्धूक विहित कुमुद डाडिम लाङ्गली श्रीपर्णी कार्पास निम्ब कूश्माण्ड शल्मली शिन्दितवोट गिरिवट मत्स्याक्षि कपित्थतितृणी पुष्पादीनि वर्जनीयानि । केतकीनिषेधोऽर्धरात्रव्यतिरिक्तविषयः । कदम्बनिषेधो दिवाविषयः । गिरिकर्णिकानिषेधोनीलगिरिकर्णिकाविषयः । किंशुकनिषेधः कण्टककिंशुकविषयः । एवं जपावकुळादीनामपि क्वचिद्विहितानामागमान्तरे निषेधस्य फलभेदानुसारिणा पूजाभेदेनवा तत्तत्पूर्वाचारप्राप्ततत्तदागमानुसारिपूजाभेदे-

नवा पूजनीयमूर्तिभेदेन वा व्यवस्था द्रष्टव्या । निषिद्धान्यपि पुष्पाणि मण्टपालंकारादिषु ग्राह्याणि । पत्रेषु बिल्वतुळसी कृष्णतुळसी दर्भ दूर्वापामार्ग करवीर नन्द्यावर्त शमीसहा धातकी विष्णुक्रान्ति भद्रा महाभद्रा जातीजम्बुकबदरोदुंबर चूत पलाश मुनिद्वय टङ्कोलकोरण्ड गिरिकर्णीद्वय रुद्रवर्णी भूपत्म ह्रीबेर मदनमरुवकद्रोणद्वय सिन्दुवार शंखिनी गोक्षुर वकुळ कृतमालादिपत्राणि प्रशस्तानि । पुष्पेषु नीलोत्पलवत्पत्रेषु बिल्वपत्रं प्रशस्ततमम् । तुळसीद्वयं प्रशस्ततरम् । येषां पुष्पाणि प्रशस्तानि तेषां पत्राण्यपि प्रशस्तान्येव । पद्म नीलोत्पल कुटज चंपक जाति करवीर नन्द्यावर्त श्रियावर्तबिल्व बृहतीद्वय पाटलीपुष्प बिल्वपञ्चक तुळसीद्वय दूर्वागस्त्य गन्धपत्राकारं शिवपुष्पपत्रेषु स्वाभिमतं यत्किञ्चित्पत्रपुष्पाकारं वा सौवर्णपुष्पं पत्रञ्चातिप्रशस्तम् । अञ्जलिपूरकै स्सुवर्णपुष्पैर्विद्यादेहशिवावाहनं अष्टोत्तरशतेन एकाशीत्या पञ्चाशता पञ्चविंशत्या वा सुवर्णपुष्पैः प्रतिदिनमर्चनं चासङ्ख्येयफलदम्। सुवर्णपुष्पसंपादनाशक्तौ सुवर्णशकलैर्वा रजतपुष्पैर्वाऽर्चनीयम् । सुवर्णपुष्पस्य नास्ति निर्माल्यदोषः । वत्सरादूद्ध्वं तन्निर्माल्यम् । वत्सरादूर्ध्वमपि पञ्चगव्येन संशोध्य पुनरर्चनीयम् । एवं नीलोत्पल पलाश बक करवीर गिरिपुष्प बिल्वपत्र तुळसीनामपि नास्ति निर्माल्यत्वम् । पुष्पाणि पत्राणि च स्वारामसम्भवान्युत्तमानि। वन्यानि कृतानि परारामोद्भवानि पूजाकाले याचितानि पुष्पाणि उत्तरोत्तरमपकृष्टानि। देवारामोद्भवानि तु वर्जनीयान्येव । पुष्पालाभे यानि पुष्पाणि शिवार्हाणि तेषांपत्रैरेवार्चनीयम् । पत्राणामप्यलाभे तेषां फलैरर्चनीयम् । फलेषु च बीजपूर जम्बीर कदळी डाडिमादीन्यर्चनाया मतिप्रशस्तानि । फलाना मप्यलाभे तिलतण्डुल सिद्धार्थै रर्चनीयम् । कृष्णतिलैश्शिवार्चनं सकलपातकहरम् । एवं मूलमन्त्रेण पुष्पादिभिरभ्यर्च्य हां शिवासनाय नमः । हां हं हां शिवमूर्तये नमः । हां हौं शिवाय नमः । हों ईशानमूर्ध्ने नमः । हे तत्पुरुषवक्त्रायनमः । हुं अघोरहृदयायनमः । हिं वामदेवगुह्याय नमः । हं सद्योजातमूर्तये नमः । इत्यासनमूर्तिं मूलैः पञ्चब्रह्मभिश्चाष्टपुष्पिकयाऽभ्यर्च्य हां हृदयायनमः । इत्यादिभि रङ्गैरभ्यर्चयेत् । ततो नाम्नां सहस्रेण शतेनवाऽर्चयेत्। तदवसराभावे शर्वाय क्षितिमूर्तयेनमः। भवाय जलमूर्तये नमः। रुद्राय तेजोमूर्तयेनमः । उग्राय वायुमूर्तये नमः । भीमाय आकाशमूर्तये नमः पशुपतये यजमानमूर्तये नमः । ईशानायसूर्यमूर्तये नमः । महादेवाय सोमूर्तये नमः । शिवाय नमः । महेश्वराय नमः । रुद्राय नमः । विष्णवे नमः ।

पितामहाय नमः । संसारवैद्याय नमः । सर्वज्ञाय नमः । परमात्मने नमः। इति नामाष्टकेन वाऽर्चयेत् । प्रभवेनमः । शंभवेनमः । उमापतये नमः इति नामत्रयेण वाऽर्चयेत् । नमोनीलकण्ठायनम इति नाम्नैकेनाभ्यर्च्य यथासंभवं पुष्पमालिकाभिरलङ्कुर्यात् । मालिकाश्च शतादिसुवर्णपुष्परचिताः सहस्रादिनीलोत्पलरचिताः करवीरसिताम्भोज विजयासितपाटल पुन्नागश्वेतमन्दार नागकेसर चंपकरचिताश्च प्रशस्ताः। ताश्च विचित्रपुष्पांतररचितमालिकाश्च उमाधारपार्श्वयोस्समृद्धा बद्धव्याः । लिङ्गमौळौ हस्तेमणिसुवर्णनिर्मितं पुष्पनिर्मितं वा एकद्वित्रिचतुरभूमिक मिंडाख्यं प्रवृत्तदाम समर्पणीयम् । एवं पुष्पोपचारानन्तरं धूपदीपोपचारः ।

तत्प्रकारः- सुवर्णरजतताम्रारकूटान्यतमनिर्मितं चतुरङ्कुळायतं तदर्धमानोत्सेध मष्टांगुळोष्ठं पश्चाद्भागे पद्मदळाङ्कित द्व्यङ्गुळकण्ठ द्व्यङ्गुळोन्नत सुवृत्तखुराकारपादं द्व्यङ्गुळानाहेन पूर्वोक्तलक्षणपादयुक्तेन वक्त्रनाळेन समन्वितं अनेकसुषिरेणैकसुषिरेण वा कमलमुकुळाकृतिना पिधानेनान्वितं धूपपात्रं निर्मलेनाङ्गारवह्निनाऽऽपूर्य तस्मिन्धूपद्रव्यं निक्षिप्य धूपपात्रंपिधाय निरीक्षणादिभिस्संस्कृत्य गन्धपुष्पैरभ्यर्च्य धूपमुद्रां प्रदर्श्य धूपपात्रं दक्षिणहस्तेनादाय वामहस्ते शुद्धकांस्यनिर्मितां चतुःपञ्चषडङ्गुलान्यतमोत्सेधां तावदायामां तावन्मानजिह्वां तत्त्रिगुणानाहा मर्धाङ्गुळोष्ठामुपपट्टिकायुक्ता मेकाङ्गुलद्व्यङ्गुल सार्धद्व्यङ्गुळिखरा मर्धाङ्गुलकण्ठां त्र्यंगुलानाहां त्रिचतुःपञ्चषडङ्गुलदैर्घ्यनाळा मुपरिशूलपद्मवृषभशङ्खचक्रान्यतमचिह्नयुक्तां घण्टां घोषयन्नेव देवस्य घ्राणसमीपे ओं हां हौंशिवाय धूपं स्वाहेति धूपं प्रदर्श्य तदुपरि धूपपात्र मुद्धृत्य तद्भ्रामयन्नेव किरीटे बिन्दुद्वयान्वितपार्श्वदण्डाकारं नादं मुखवृत्ते बिन्दुदेहे हकारं बाह्वो रौकारं पादयोरूकारं च धूपपात्रभ्रमणेन भावयेत् ।।

धूपद्रव्यम् - कर्पूरागरु चन्दनतक्कोलजातिफल लवङ्गसिल्हक मांसीमुस्तापत्रचूर्णं यक्षकर्दमाख्यम् । चन्दनागरु कर्पूरैला लवङ्ग त्वक्पत्रपुष्प सिल्हक जटामांसीचूर्णं प्राजापत्यनामकम् । चन्दनागरु कर्पूरकस्तूरि लवङ्गत्वक्सिल्हक सिता मुस्ताचूर्णं विजयाख्यम् । कर्पूर कृष्णागरुह्रीबेर कुङ्कुमकुन्दुरूत्तुरुष्कबिसचन्दनचूर्णं क्रमादेकद्वित्रिचतुःपञ्चषट्सप्तभागमधुभिश्रं शीतांशुनामकम् । चन्दनागरु कर्पूरसिल्हक सर्जरसकुष्ठमुस्ताचूर्णं कल्याणनामकम्। चन्दनागरु कस्तूरी मुस्तासिल्हक

चूर्णममृताख्यम् । तक्कोल पूगकर्पूरजातीफल लवङ्ग चूर्णं सुगन्धाख्यम् । एवमादीनि पृथक्पृथङ्नाम्ना प्रसिद्धानि धूपद्रव्याणि । इत्थं चन्दनागरुकर्पूर कुष्ठ गुग्गुळुचूर्णं घृतमधुयुक्तं चन्दनागरुकर्पूरकुष्ठचूर्णं शर्कराघृतमधुयुक्तं कर्पूरागरुचन्दननिर्यासचूर्णं कुङ्कुमादेकचतुष्षट्सप्तभागमगरुनिर्यासचन्दनचूर्णं क्रमादेकद्वित्रिचतुर्गुण मीषत्कर्पूरमिश्रितं मधुयुक्त मगरुचन्दनोशीरचूर्णं मधुयुक्तं कुष्ठचन्दनचूर्णं घृतयुक्तं गुळबिल्वपत्रचूर्णं गुग्घुळुचूर्णघृतयुक्तं केवलमेव वा गुग्गुळुनिर्यासचन्दनागरुसौगन्धिकान्यतमचूर्णं च धूपद्रव्यमिति। तत्र केवलगुग्गुलुधूपः सप्तजन्मकृतपापहरः। चन्दनधूपस्सर्वपापहरः । सौगन्धिकधूपस्सर्वकार्यार्थसाधकः । कृष्णागरुधूपस्सर्वपारहरः । श्वेतगरुधूपो मुक्तिप्रदः । लाक्षाकस्तूरीधूपः चतुर्वेदाध्यायिसद्ब्राह्मणजन्मप्रदः । घ्रतमिश्रगुग्गुलुधूपोमासार्धसमर्पितः कल्पकोटिसहस्रपर्यन्तं शिवपुरभोगस्य सार्वभौमजन्मत्वप्रापकः । द्विसहस्रफलंमहिषाक्ष गुग्गुळुधूपः तालवृक्षचूर्णेन सहितः शिवसायुज्यप्रदायकः । ईशानादिमुखपञ्चके क्रमात् शीतारि कृष्णागरु शुक्लागरु सौगन्धिक गुग्गुलुधूपाः प्रशस्ताः ।।

एवं धूपोपचारानन्तरं दीपोपचारः- तस्य पात्रं धूपपात्रोक्तपादनाळसहितं त्र्यंगुळप्रमाणं गजोष्ठाकारञ्च । वर्तिका कर्पूरमयीवस्त्रखण्डमयी तंतुखण्डमयी कार्पासमयीवा चतुरङ्गुळदीर्घा चतुस्त्रिद्व्येकाङ्गुळज्वालानुगुणपरिणाहा कार्या । वस्त्रखण्डादिमयी चेत् उत्तमादिक्रमेण सति संभवे कर्पूरागरुचन्दनचूर्णादिगर्भा कार्या । तत्र च कपिलाघृतमुत्तमम् । गवांतरघृतं मध्यमम् । अजाघृतं तिलतैलमधमम् । उष्ट्रमहिष्यादिघृतं वृक्षबीजादिभवं च वर्जनीयम् । यद्वा- गोघृतमात्रमुत्तमम् । अजाघृतं महिषीघृतं च मध्यमम् । पूतिगन्धर्निबकरजैरंडादितैलं वर्जनीयम् । तैलमात्रमधमम् । एवमुक्तलक्षणपात्रविहितवर्त्यारोपितं दीपं निरीक्षणादिभिस्संस्कृत्य पुष्पैरभ्यर्च्य दीपमुद्रां प्रदर्श्य दीपमुद्धृत्य घण्टां घोषयन्नेव हां हौं शिवाय दीपं स्वाहेति नेत्रेषु प्रदर्श्य धूपपात्रवत् किरीटादिपादान्तं तद्वर्णविन्यासभावनया दीपपात्रं भ्रमयेत्। तदश्शिवायाचमनीय मर्घ्यंच दत्वा देवं सन्तुष्टं ध्यात्वा भगवन्नाज्ञां देहि भोगाङ्गानि पूजयामीति विज्ञाप्य आवरणपूजां कुर्यात् ।

।। अथ आवरणार्चनम् ।।

पञ्चब्रह्मषडङ्गैश्च प्रथमावारण् । विद्येश्वरैर्द्वितीयम् । गणेश्वरैस्तृतीयम् । लोकपालैश्चतुर्थम् । तदायुधैः पञ्चमम् । एतानि पञ्चावरणानि शिवासनपद्मस्य कर्णिकायां शिवमभ्यर्च्य तस्यदळमूलेषु दळमध्येषु दळमध्याग्रयो र्मध्येषु दळाग्रेषु तदधोभागेषुच पूजयेत् । यद्वा- शिवासनपद्मदळमूलरूपेषु लिङ्गमूलभागेषु तद्दळाग्ररूपेषु पीठोपरिदेशाग्रभागेषु पीठकण्टे पीठपादे ब्रह्मशिलास्थानीये पद्मपीठे चार्चयेत्। होमीशानमूर्ध्ने नमः । स्फटिकवर्णं त्रिशूलाभयपाणि मुमासहित मीशानं पूजयामि । हें तत्पुरुषवक्त्राय नमः । कनकवर्णं पीतांबरोपवीतं मातुलुङ्गाक्षसूत्रधारिणं गौरीसहितं तत्पुरुषं पूजयामि । हुं अघोरहृदयाय नमः । मेघवर्णं बभ्रुश्मश्रुशिरोरुहं दंष्ट्राकराळवदनं सर्पवृश्चिककपालमालाभरणं खट्वाङ्ग कपालखेटक पाशान्वितवामकरचतुष्टयं त्रिशूलपरशुखड्गदण्डान्वितदक्षिणकरचतुष्टयं गङ्गासहित मघोरं पूजयामि । हिं वामदेवगुह्याय नमः । अरुण मरुणवस्त्रमाल्योपवीतं खड्गखेटधरं गणांबिकासहितं वामदेवं पूजयामि । हं सद्योजातमूर्तये नमः । धवळवर्णं धवळस्रग्गन्धभूषणोष्णीपांबरधरं वराभयकर मंबिकासहितं सद्योजातं पूजयामि इति क्रमादीशानेंद्रयमकुबेरवरुणादि दिक्ष्वीशानादितत्तत्पूजावेळायां ऊर्ध्ववक्त्रहृदयगुह्यपादरूप तत्तत्स्थान मङ्कुशमुद्रयाकृष्य दीपात्प्रवर्तितप्रदीपरीत्याऽभिन्नान्भावयित्वाऽर्चयेत् । ईशानाद्याः पञ्चापि शूलटङ्काभयमनोहरकरचतुष्टया वा ध्यातव्याः । एवमागमान्तरप्रसिद्धान्यपि तेषां ध्यानानि द्रष्टव्यानि । हां हृदयायनमः । हिं शिरसे नमः। हुं शिखायै नमः । हैं कवचायनमः । हौं नेत्रत्रयायनमः । हः अस्त्राय नमः। इति चन्द्र चामीकर सिन्दूर भृङ्ग विद्युदग्निवर्णान् पद्मासनस्था नर्धेन्दुजटामकुटधारिणश्चतुर्वक्त्रान् प्रतिवक्त्रं त्रिलोचनान् कपालशूलवरदाभयहस्तान् वामिनी नीलिनी चक्रिणी शङ्खिनी खड्गिनी गङ्गिनी शक्तिसहितान् हृदयशिरश्शिखाकवचदेवान् पूजयामीति हृदयशिरश्शिखादितत्तत्स्थानेभ्योऽकुशमुद्रयासमाकृष्याग्नेयनिरृतवायव्येशान कोणस्थदळेषु पूर्वादिचतुर्दळा न्यग्रेष्वस्त्रंच पूजयेत् । ईशानदळे ब्रह्मस्वीशानं अङ्गेषु नेत्रे शिरसिच क्रमेणोत्तरोत्तरदिक्स्थतया पूजयेत् । अथवा कर्णिकायां देवस्य पुरस्तादीशानं नेत्रञ्च पूजयेत् । नेत्रमस्त्रवद्दिक्षु वा पूजयेत् ।।

अथद्वितीयावरणम् - अनन्ताय भूमिसहिताय नमः । सूक्ष्माय स्वाहासहिताय नमः । शिवोत्तमाय स्वधासहिताय नमः । एकनेत्राय क्षान्तिसहितायनमः। एकरुद्राय पुष्टिसहिताय नमः । त्रिमूर्ताय श्रीसहितायनमः । श्रीकण्ठाय कीर्तिसहिताय नमः । शिखण्डिने मेधासहिताय नमः । इति हेमाग्नि मेघ भृङ्गेषु हिम विद्रुम स्फटिकवर्णान् वरदाभयज्ञानरुद्राक्षमालाधारिणस्त्रिणेत्रान् शिवज्ञानावतारकान् स्वस्वशक्तिसहितान् विद्येश्वरान् पूजयामीति पूर्वाद्यैशानादिक्रमा द्दिग्विदिषु पूर्वादीशानकोणान्तेषु वा पूजयेत् । कुण्डलीसहिताय नन्दिकेश्वराय नमः। अरुणवर्ण त्रिशूलाक्षसूत्रवराभयकरं कुण्डलीसहितं नन्दिनं पूजयामि । पद्मिनीसहिताय महाकाळाय नमः । पीतकृष्णवर्णं बभ्रुशमश्रुशिरोरुहं शूलकपालखड्गखेटधारिणं पद्मिनीसहितं महाकाळं पूजयामि । ह्लादिनीसहिताय भृङ्गिणे नमः । श्वेतवर्णं निर्मांसविग्रहं दण्डाक्षसूत्रधरशिवं शिवावलोकनतत्परं ह्लादिनीसहितं भृङ्गिणं पूजयामि । भृङ्गिणीसहिताय गणपतये नमः । रक्ताङ्ग पाशांकुश दन्तपक्काम्रफलधारिणं भृङ्गिणीसहितंगणपतिं पूजयामि । भद्रासहिताय वृषभाय नमः । स्फटिकवर्णं धर्मस्वरूपं शिवध्यानपरं भद्रासहितं वृषभं पूजयामि। देवयानीसहिताय स्कन्दायनमः । कनकवर्णं बालवेषं शक्तिकुक्कुटवराभयहस्तं देवयानीसहितं स्कन्दं पूजयामि । अम्बिकायै नमः । श्यामवर्णा सिह्मवाहनां शूलादर्शकरद्वया मुमां पूजयामि । रूपिणीसहिताय चण्डेश्वराय नमः । मेघवर्णं चतुर्वक्त्रं कमण्डल्वक्षसूत्रशूलपरशुधारिणं सर्पकङ्कणोपवीतं रूपिणीसहितं चण्डेश्वरं पूजयामि । इति पूर्वादीशानकोणपर्यन्त मर्चयेत् । यद्वा- वृष नन्दि गणेशं महाकाळ स्कन्द भृङ्गिगौरीचण्डान् नन्दिगणपति महाकाळ भृङ्गि वृष स्कन्दगौरी चण्डान्वा पूर्वादिक्रमेण पूजयेत् । अथवा गौरी चण्डेश्वर नन्दि महाकाळ गणेश वृष भृङ्गि स्कन्दावा गौरीचण्डेश्वर महाकाळ वृषभ गणेश स्कन्दनन्दि भृङ्गिणोवा उत्तरादिक्रमेण पूजनीयाः ।। उमावृषभगणपति नन्दीश महाकाळभृङ्गि चण्डस्कन्दाः कुबेरशक्र यमवरुण निर्ऋतिवाय्वीशानादिदिक्षु वा पूजनीयाः । एतेषां ध्यानभेदाश्च तत्तदागमप्रसिद्धा द्रष्टव्याः ।।

एवं गणेश्वरैस्तृतीयावरणं संपूज्य लोकपालैश्चतर्थावरणमर्चयेत् । इन्द्राय शचीसहिताय नमः । सुवर्णवर्ण मैरावतारूढं वज्रांकुशवराभयपाणिं शचीसहित मिन्द्रं पूजयामि। अग्नये स्वाहासहिताय नमः । रक्तवर्णं कमण्डल्वक्षसूत्रशक्तिवर-

मुद्रान्वितं मेषारूढं स्वाहासहित मग्निं पूजयामि । यमाय कालकण्ठीसहिताय नमः। कृष्णवर्णं दण्डपाशवराभयधारिणं महिषारूढं कालकण्ठीसहितं यमं पूजयामि । दाहिनीसहितायनैर्‌ऋतायनमः । रक्तवर्णं खड्गखेटकवराभयधारिणं भूतारूढं दाहिनीसहितं नैर्‌ऋतंपूजयामि । वरुणाय भोगिनीसहिताय नमः । चन्द्रवर्णं पाशकमलवराभयकरं मकरारूढं भोगिनीसहितं वरुणं पूजयामि । वायवे घोरासहिताय नमः । धूम्रवर्णं ध्वजकमलवराभयधारिणं मृगारूढं घोरासहितं वायुं पूजयामि । कुबेराय गंभीरिणीसहिताय नमः । स्वर्णवर्णं गदानिधिवराभयकरं खर्वविग्रहं मनुष्यारूढं गंभीरीणीसहितं कुबेरं पूजयामि । ईशानाय हर्षिणीसहिताय नमः । चन्द्रवर्णं शूलपाशवराभयकरं त्रिणेत्रं वृषभारूढं हर्षिणीसहितमीशानं पूजयामीति प्रागादिक्रमेण पूजयेत् । ब्रह्मणे सावित्रीसहितायनमः । सुवर्णवर्णं चतुर्वक्त्रं कमण्डल्वक्षसूत्रस्रुग्दण्डधारिणं हंसारूढं सावित्रीसहितं ब्रह्माणं पूजयामि । विष्णवे लक्ष्मीसहितायनमः । विद्युद्वर्णं सहस्रफणालङ्कृतमनन्तरूपं शङ्खचक्रगदाकमलधारिणं कूर्मारूढं लक्ष्मीसहितं विष्णुं पूजयामीति ।।

इन्द्रेशानमध्ये निर्‌ऋतिवरुणमध्येच विधातृवैकुण्ठौ पूजयेत् । यद्वा यमस्य उत्तरभागे कुबेरस्य दक्षिणभागे च तौपूजयेत् ।।

अथलोकपालायुधैः पञ्चमावरणम्- प्रसन्नात्मशक्तिसहिताय वज्राय नमः । नानावर्णधरं दृढकर्कशविग्रहं वज्रमूर्द्धानं दीप्तं प्रसन्नात्मशक्तिसहितं वज्रं पूजयामि । शक्तये नमः। अरुणवर्णां वराभयकरां शिरसा शक्तिं बिभ्राणां योषिदाकारां शक्तिं पूजयामि । कोपात्मशक्तिसहिताय दण्डाय नमः । कृष्णवर्णं वराभयकरं लोहितलोचनं दण्डमूर्द्धानं कोपात्मशक्तिसहितं दण्डं पूजयामि । गुणात्मशक्तिसहिताय खड्गाय नमः । श्यामवर्णं वराभयकर मर्धलोचनं खड्गालङ्कृतमूर्द्धानं गुणात्मशक्तिसहितं खड्गं पूजयामि । कोमळात्मशक्तिसहिताय पाशाय नमः । किंशुकपुष्पवर्णं नाभेरधो भुजङ्गाकारं तदूद्र्ध्वं पुरुषाकृतिं सप्तफणोपेतमूर्द्धानं कोमळात्मशक्तिसहितं पाशं पूजयामि । विषात्मशक्तिसहिताय ध्वजायनमः । पीतवर्णं वराभयकरं विवृतास्यं मूर्ध्नि ध्वजान्वितं विषात्मशक्तिसहितं ध्वजं पूजयामि । गदायैनमः । पीतवर्णा योषिदाकारां गदोपेतशिरसं गदां पूजयामि। विकृतात्मशक्तिसहि-

ताय शूलाय नमः । श्यामवर्णं त्रिषूलाङ्कितमस्तक मञ्जलियुतं विकृतात्मशक्तिसहितं त्रिशूलं पूजयामि । महात्मशक्तिसहिताय पद्माय नमः । शङ्खवर्णं पद्मकोशाङ्कित-मूर्द्धानं महात्मशक्तिसहितं पद्मं पूजयामि। मङ्गळात्मशक्तिसहिताय चक्राय नमः । श्यामवर्णं शतारचक्राङ्कितमस्तकं मङ्गळात्मशक्तिसहितं चक्रं पूजयामि । इमे चाव-रणदेवाश्शिवाभिमुखा श्शिवमंबिकाञ्च भक्त्यावीक्षमाणाः स्वासनेषूपविष्टा ध्येयाः । द्विभुजाश्चतुर्भुजाश्चैते हस्ताञ्जलिपुटावाध्येयाः । एवं पञ्चावरणपूजाशक्तौ पञ्चब्रह्म-षडङ्गरूपमेकमावरण मर्चयेत् । तेषाञ्च ब्रह्मषडङ्गदेवाना मावाहनस्थापनसन्निधान सन्निरोधन पाद्याचमनार्घ्यपुष्पदानाख्यं संस्काराष्टकं कार्यम् । यद्वा- आवाहनादि संस्काराष्टकं समुदितमेव स्मृत्वा प्रत्येक मर्घ्यमात्रं दत्वा पूरणतया ब्रह्मान्तं तत्त-दर्घ्यावसाने क्रमेण सुरभिपद्मत्रिशूलमकरस्रगाख्यमुद्राः प्रदर्श्याङ्गानां नमस्कारमुद्रां प्रदर्शयेत् । पञ्चब्रह्मषडङ्गपूजनाशक्तौ केवलं ब्रह्मावरणमात्र मङ्गावरणमात्रं वाऽ-र्चयेत् । अथ वा - तत्तत्स्थाने वामादिशक्तिं पूर्वादिदिक्ष्वभ्यर्च्य सदाशिवस्याङ्के वामभागे स्थितां मनोन्मनी मभ्यर्चयेत् । इत्थमावरणार्चनानन्तरं शिवमष्टपुष्पिकया-ऽभ्यर्च्याचमनार्घ्याणि दत्वा मूलमन्त्रेण पुष्पं समर्पयेत् । शिवस्यावरणभावकृत-शोभासिद्धये पञ्चब्रह्मषडङ्गादीनां शिवपृथग्भावेनार्चनायां प्रसक्तस्य पूजातामसत्व-दोषस्य परिहाराय शारदशशाङ्ककोटिसङ्काश परमामृतस्यन्दि परमशिवमयूखजाल-मग्नतया सर्वानप्यावरणदेवान् परमशिवेनैकवर्णान् परमशिवापृथग्भूतान् भावयेत् । तदश्शिवे धेनुमुद्रां महामुद्राञ्च प्रदर्श्य गन्धपुष्पैः घण्टामस्त्रमन्त्रेणाभ्यर्च्य सावरणाय देवाय धूपदीपौ प्रदर्शयेत् । एवमावरणार्चनं कर्तव्यं न कर्तव्यं वेति विकल्पितं केषुचि दागमेष्वात्मार्थपूजायां भोगाङ्गपूजनस्य निषिद्धत्वात् ।।

।। अथ नैवेद्यविधिः ।।

तत्र व्रीहिशालि प्रियङ्गु नीवार गोधूम वैणव यवाः प्रशस्ताः । तत्र व्रीहयः कनिष्ठा श्शालयो मध्यमाः इतरे श्रेष्ठाः । तत्रापि प्रियङ्गुनीवार गोधूम वैणवानि शतसहस्रलक्षानन्तफलान्युत्तरोत्तरं प्रशस्तानि । यद्वा शालयःश्रेष्ठाः यववैणवादयो मद्ध्यमाः व्रीहयः कनिष्ठाः। सिततण्डुलाश्शालयः इतरेव्रीहय इतिभेदः । आत्मार्थ-पूजायां कुडवादि चतुर्द्रोणपर्यन्तमुत्तरोत्तरं प्रशस्तम् । पञ्चविंशत्युत्तरद्विशतसङ्ख्यैः

व्रीहिभि रेका शुक्तिरुच्यते। शुक्तिद्वयं तलम् । तलद्वयं प्रकुञ्चम्। प्रकुञ्चद्वयं प्रसृतिः। प्रसृतिद्वयं कुडवम् । कुडवद्वयमञ्जलिः । अञ्जलिद्वयं प्रस्थम् । प्रस्थद्वयं पात्रम् । पात्रद्वय माढकम् । आढकद्वयं शिवम् । शिवद्वयं द्रोणम् । अथवा गुञ्जाद्वयं माषः। माषविंशतिर्निष्कम् । निष्काष्टकं पलम्। पलचतुष्टयं पादः । पादचतुष्टयं प्रस्थम् । प्रस्थचतुष्टय माढकम्। तच्चतुष्टयं द्रोणम्। द्रोणचतुष्टयावधिकान् नैवेद्यार्थं कल्पितान् केशकीटादिविरहितान् निर्मुक्ततुष कम्बुकणा नखण्डा नतिधावळयशालि तण्डुलान् प्रशस्तवर्णगन्धरसैर्वस्त्रपूतैर्जलै र्मुहुर्मुहु र्निष्पीडनपूर्वकं षट्कृत्वषडङ्गमन्त्रैस्संक्षाळ्य सम्यग्वालुकादीन् संशोध्य पाकाभांडे निहितेषुतेष्वधिकार्धावधिकं जलं प्रक्षिप्य गोमयोपलिप्ते प्रोक्षिते पक्षिदर्शनादिरहिते परिश्रिते बहिष्कृताद्यगोचरे महानसे हृदय-मन्त्रार्चितायां चुल्ल्यां वामदेवमन्त्रेण उद्धृतं पाकभाण्डं हृदयमन्त्रेणारोप्य अघोरेणाग्निं विन्यस्य मुखेन प्रदीप्य यथाऽन्न मपक्कं मतिपक्कं च नभवति तथा सावधानं पचेत् । एवं शुद्धान्नपाकः । तण्डुलद्विगुणक्षीरेण तण्डुलार्धमुद्गसहितेन वा तण्डुलत्रिगुण-क्षीरेण तण्डुलचतुर्थांशमुद्गसहितेन तदुचितगुळकदळीफलयुतेन वा पायसान्नपाकः । तण्डुलचतुर्थांशमानतिलपूर्णेन तिलार्धमानेन तिलचतुर्थांशमानेन वा घृतेन च कृस-रान्नपाकः । अथवा तण्डुलार्धमुद्गचूर्णमिश्रैः किञ्चिल्लवणचूर्णयुतैस्च कृसरान्नपाकः । प्रत्येकं तण्डुलार्धप्रमाणाभ्यां क्षीरगुडाभ्यां तदर्धप्रमाणेन घृतेनच गुळान्नपाकः । अथवा तण्डुलद्विगुणक्षीरेण तण्डुलार्धगुळसहितेन गुळार्धघृतसहितेन गुळान्नपाकः । अथवा तण्डुलत्रिगुण क्षीरेण तण्डुलत्रितयांशमुद्गसहितेन तण्डुलचतुर्थांशगुळमिश्रेण-कदळीफलयुतेनचगुळान्नपाकः । तण्डुलचतुर्थांशै स्तत्तृतीयांशै स्तत्समैर्वा मुद्गै र्नाळिकेरखण्डयुतै स्तद्रहितैर्वा मुद्गान्नपाकः । शुद्धान्नपायसान्न कृसरान्न गुळान्न मुद्गा-न्नान्युत्तरोत्तरं सहस्रगुणफलानि । एवं दधिमिश्रितं मधुमिश्रितंचान्नं प्रशस्तम् । एते-ष्वनेकं एकंवायथाविभवं कार्यम् । नैवेद्यस्याष्टमांशेन षोडशांशेन वा मुद्गाढकी माष राजमाष निष्पाव कुळुत्थाद्यन्यतमेन कर्तव्यम् । एवं मुद्गाद्याश्च सति संभवे निस्त्व-ग्विदळरूपा ग्राह्याः। शाकानि प्रस्थान्ननैवेद्यस्य पलद्वयप्रमाणेन एकपलप्रमाणेन वा कदळी पनस कूश्माण्डोर्वारुक कारवल्ली व्याघ्रीबृहतीद्वय कोशातकीद्वय चूत नाळि-केर फलादीनि शिशुकन्द वल्लीकन्द सूरणकन्दाद्यान्यानि च प्रशस्तरसगन्धा न्या-र्द्राणि शुष्काणि वा यथार्ह लवण मरीचि जीरक एला चूर्ण शर्करादि सकल-संस्कारोपेतानि घृतभर्जितानि कार्याणि । आम्लेन घनतक्रेण लवणमरीचि जीरक-

कुळुत्थ सिद्धार्थचूर्ण शर्करासहितं चोष्यं कार्यम् । माष मुद्गगोधूम शालिपिष्टादि विकारास्समृद्धशर्करोपेताःकर्पूरैलादिचूर्णैर्वासिता बहवोऽपूपाः पानकादयश्च कार्याः। नैवेद्यस्य षोडशांशं द्वात्रिंशांशं चतुष्षष्ट्यंशं वा घृतम् । घनदधि अष्टमांशम्। सर्वत्र क्षीरदधिघृतानि गव्यान्येव ग्राह्याणि । स्थालिका स्सुवर्णेन रजतेन ताम्रेण शुद्धकांस्येन वा कर्तव्याः । अष्टचत्वारिंशदङ्गुळायामाः एकाङ्गुळोत्सेधाः अङ्गुळघनोष्ठवत्यश्चेदुत्तमाः । उत्तमोत्तमादिक्रमेण तु षट् त्रिंशदङ्गुळप्रभृति द्वादशाङ्गुळपर्यन्तायामा नवयवप्रभृत्येकयवपर्यन्तमानोष्ठवत्य ओष्ठप्रमाणायामवेत्रवत्य स्तद्रहितावा नवाङ्गुळायामा स्तदर्धमानाश्चातिजघन्याः । सर्वाश्च पादरहिता स्सुवृत्ताकाराः कर्तव्याः । स्थालिकाधारत्रिपाद्यः पूजनीयलिङ्गपीठिकोत्सेधपर्यन्तमुन्नताः प्रकर्तव्याः । नैवेद्यञ्च सर्वशिवदीक्षासंस्कृतैः शुद्धवस्त्रै र्भस्मरुद्राक्षभूषितैः पवित्रधारिभिः परिचारकैः कारयेत् । तथा भूषिताभिः स्त्रीभिर्वा कारयित्वा द्रव्यशुद्धिकाले पूजकस्तण्डुलक्षाळनादिमन्त्रान्जपेत् । यदि कृतिं नैवेद्य मपक्वं मतिपक्वं कालातिपाता दतिशीतळं नरैर्लङ्घितं वा स्यात् तदाऽन्यत्पक्वं निवेदनीयम् ।।

अथनैवेद्यसमर्पणम् - देवस्य पाद्याचमनीय मर्घ्यं च दत्वा देवस्य पुरतो गोमयेन चतुरश्रं मण्डलं परिकल्प्य पिष्टादिचूर्णै रलङ्कृत्यशुद्धान्नपायसान्नादिपूरिताः कदळीनाळिकेर चूत पनसद्राक्षा खर्जूरादिफलैर्लड्डुककस्तूरिकापिष्टक मोदकादिभि रपूपैः कदळीपनसादिशाकैरार्द्रकोर्वारुकादिहारितै श्चूतनारङ्गाद्युपदंशै र्मुद्गविदळादिसूपैश्चवलयाकारसोपानक्रमेण निबद्धैर्भूषिताः मद्ध्ये क्षीरदधिघनैरलङ्कृताः सद्योघृताभिषिक्ताः शर्करादधिक्षीरफलरसादिविकारैर्नानाविधपेयचोष्यलेह्यैः क्षीरदधिनवनीतघृतै रेलाचंपकमुकुळ कर्पूर मृगमद लामज्ज पाटलीपुष्पादिवासित सुशीतळ स्नपनकलशाहताढकतदर्ध तदर्धप्रमाणेन पानीयेन परिपूरितैश्चषकैः परितः परिष्कृताः शिवस्य शिवायाश्च नैवेद्यस्थालिकाः सदाशिवस्य मनोन्मन्याश्च परिवारदेवताना मावरणदेवतानां च नैवेद्यस्थालिकाश्च निधाय स्थालिकानामुपरि पत्रं विन्यस्य हृदयेन प्रोक्ष्य ताळत्रय दिग्बन्धनावकुण्ठन धेनुमुद्रा विरचय्य अन्नमुद्रां पर्वतमुद्रां प्रदर्श्य पूर्वविन्यस्तं पत्रमुद्धृत्यास्त्रेणपरिषिच्य हृदयेन प्रत्येक मापोशनं त्वासपुष्पया मृगमुद्रया पूर्वं गणपतये निवेद्य तत्पुष्पं विसृज्य हस्तप्रक्षाळनं कृत्वा हां हौं शिवाय स्वधेति शिवाय नैवेद्यं पञ्चवारं त्रिवार मेकवारंवा नैवेद्यदानाभिनयवत्या सपुष्पया

मृगमुद्रया नैवेद्यंदत्वा सदाशिवादिक्रमेण सर्वेभ्योऽपि पृथक्पृथक् नैवेद्यं दद्यात् । पृथक् पात्रासंभवे सर्वासां परिवारावरणदेवताना मेकस्मिन्नेव पात्रे नैवेद्यमानीय प्रत्येकं निवेदयेत् । ततश्शिवाय सुगन्धिपानीयं प्रदाय नमोन्तमूलेन पुष्पं समर्प्य द्रव्यजातं संपूर्णं विभाव्य स्वधान्तमूलेनाचमनं दत्वा देवस्य सव्यवामहस्तयो रुद्वर्तनार्थं कर्पूरादिसहितं चन्दनं दत्वा हस्तप्रक्षाळनगण्डूष पादक्षाळनादि भावयेत् । सर्वाणि च निर्माल्यान्युद्धृत्य सदाशिवनिर्माल्यं प्रागीशदिशि विन्यस्तगन्धपुष्पनिर्माल्याभ्यां सह ऐशान्यां दिशि चण्डेशाय निवेदयेत् ।।

अथ सदाशिवः केन वक्त्रेण भुङ्क्ते ऊद्ध्र्ववक्त्रेण । 'भक्ष्यभोज्यान्नपानादि लेह्यं चोष्य मनेकधा । ऊद्ध्र्ववक्त्रे प्रदातव्यं यत्किञ्चिदिह चोदित' मिति सर्वज्ञानोत्तरवचनात् । 'भक्ष्यंभोज्यं च पेयं च लेह्यं चोष्यं च पञ्चधा । ऊद्ध्र्ववक्त्रे प्रदातव्यं हृदयेन षडानने'ति द्विशतीवचनाच्च । अथवा पञ्चभिरपि वक्त्रैर्भुङ्क्ते । 'पञ्चवक्त्रेषु नैवेद्य मूद्ध्र्ववक्त्रेऽथवा पुन'रिति पञ्चसु वक्त्रेषु प्रत्येकनैवेद्यविधानस्यापि दर्शनात्। ऊद्ध्र्ववक्त्रे नैवेद्यदानं च तदूद्ध्र्ववक्त्रं पूजाकाले दक्षिणामुखीभूतं विभाव्य कर्तव्यम् । देवस्य दिश्युत्तराभिमुखतया पूजकस्य स्थितत्वात् । 'स्थण्डिलेचरलिङ्गेच साधकाभिमुखश्शिवः । प्रत्यग्वक्त्र स्सकुंभादौ स्थिरे द्वाराभिसम्मुख' इति चरलिङ्गार्चने देवस्य पूजकाभिमुखत्वश्रवणात् । एवंचात्मार्थपूजायां शिवस्य साधकाभिमुखत्वसिद्ध्यर्थं हृदयगुह्यपादावयवा अपि दक्षिणदिक्स्था एव । यानितु पूजकस्य शिवाभिमुखावस्थानपरिहारवचनानि 'नप्राच्या मग्रतश्शंभो र्नोत्तरे योषिदाश्रये। न प्रतीच्यां यतः पृष्ठं तस्माद्दक्षं समाश्रये'दित्यादीनि, तानि पूर्वाभिमुखस्थिरलिङ्गविषयाणि । चरलिङ्गपूजायां 'स्थण्डिले चरलिङ्ग च साधकाभिमुखश्शिव' इति विशेषवचनदर्शनात् । 'अग्नौ वा निर्ऋतौ वाऽपि स्थित्वा देवं प्रपूजये'दिति वचनानुसारेण पूजकस्याग्नेयदिगवस्थाने शिवस्य पूजकाभिमुखत्वं नलभ्यइतिचेत् सत्यं। तदपि वचनं स्थिरलिङ्गविषयमेव । स्थिरलिङ्गं सर्वसाधारण्येन लोकानुग्राहकत्वाच्च चतसृषु दिक्षु स्वेष्टमुखमिति यस्यां दिशिद्वारं तद्दिगभिमुखं भवति । तत्र हृच्चरणैस्सार्धं मूद्ध्र्वमुखं तद्वाराभिमुखं । द्वारस्याभिमुखंचोद्ध्र्ववक्त्रं तत्र प्रकल्पयेदिति वचनात् । 'यस्यां दिशि भवेत्द्वारं तां प्राचीं परिकल्पये' दिति वचनाच्च । अथवा ऊद्ध्र्ववक्त्र मेकमेव हृद्गुह्यचरणैस्सह द्वाराभि मुखं भवति । तत्पुरुषादिवक्त्राणि तु

पूर्वादिदिक्ष्वेव व्यवस्थितानि नतु द्वारभेदेन भिद्यन्ते । 'प्रासादस्य द्वारम्भवतु यथा काष्ठया कामं । तत्पुरुषादिमुखानि नजहति पूर्वादिदिक्संस्था'मिति वचनात् । इदं तत्पुरुषादिवक्त्रविषये पक्षद्वयमपि कामिकसंमतम् । अतएव तत्र पश्चिमद्वारार्चने 'द्वारस्याभिमुखं चोद्र्ध्ववक्त्रं देहं प्रकल्पये' दित्युपक्रम्य 'पुरुषं पूर्व देशेवापश्चिमे वाऽथ चिन्तयेत् । दक्षिणे वोत्तरेवाऽपि बहुरूपं विचिन्तयेत् ।। उत्तरे दक्षिणे वाऽपि वामदेवं स्मरेत् गुरुः । पश्चिमे पूर्वदेशे वा सद्यवक्त्रंस्मरन्त्यसेत्' इत्युक्तम्।। तत्रैव दक्षिणद्वारार्चनेऽप्युक्तम् - 'अघोरं पुरुषं वाऽपि दक्षिणेसम्यगर्चयेत् । अघोरं-वाऽथ सद्यं वा पश्चिमेतु समर्चयेत् ।। सद्यवक्त्रं तु वामं वा सौम्यदेशे समर्चयेत् । पुरुषं वाऽथ वामं वा पूर्व देशेसमर्चयेत्' इति ।। सर्वमपि स्थिर मुत्तराभिमुखं पूजनीयम् । 'लिङ्गं वा प्रतिमा वा क्रियतेऽन्यद्वा यया ककुभा । तस्यां तस्यां यज्वा यजेत शिवमुत्तराभिमुख' इति वचनात्। तत्र मुख्यपूर्वाभिमुखलिङ्गपूजायां मुख्याग्नेयदिशि स्थितस्य पूजकस्य मुख्य मुत्तराभिमुखत्वमेव घटते । नच देवस्य वामभागे नैर्ऋतदेशे देव्या निविष्टत्वात्तत्र पूजकस्योपस्थितौ 'नोत्तरे योषिदाश्रय' इति निषेधप्रसङ्गः । कामिके पश्चिमद्वारार्चनपटले 'वामेवा दक्षिणेवाऽपि स्थापनीया मनोन्मनी । देवसंमुखसंयुक्ता द्विहस्तैकमुखान्विते'ति पश्चिमाभिमुखलिङ्गपूजूयां दक्षिणभागेऽपि देवीनिवेशनस्याङ्गीकृतत्वेन नैर्ऋतदिक्स्थितस्य पूजकस्य देवदक्षिणभागनिविष्टदेवीभावनोपपत्तेः । एवं दक्षिणदिग्रूप गौणपूर्वाभिमुखलिङ्ग-पूजायां नैर्ऋतदिग्रूपगौणग्नेयदिशिस्थितस्य प्राचीरूपगौणोत्तराभिमुखत्वंउत्तरदिग्रूप-गौणपूर्वाभिमुखलिङ्गपूजायामीशानदिग्रूपगौणाग्नेयदिशि स्थितस्य प्रतीचीरूपगौणोत्तर-वक्त्रत्वंच घटते । एवं पूजकाभिमुखत्वनियमो नविहन्यते । सर्वत्रात्मार्थपूजा-प्रकरणे 'उत्तराभिमुखो भूत्वा रुचिरासनसंस्थित' इत्यादिविधानात्। तत्रायं विशेषः-पापक्षयार्थिभिर्मुक्त्यर्थिभिश्च मुखानां दिश्यवस्थामाश्रित्याघोरवक्त्र मभिमुखत्वेन भावनीयम् । 'न विभोः पुरतस्थिष्ठेत् न पश्चात् स्त्र्यन्तिकेऽपिच । अघौघध्वंस-मोक्षार्थं दक्षे दक्षस्थितोऽर्चयेत् ।। हिमं मरुच्च शीतञ्चपद्मं निर्दहतेयथा । तथा-ऽघोरः प्रशान्तोऽपि पापनिर्दाहकारकः ।। महानपि यथा दन्ती यन्तारमनुवर्तते । तस्मादाप्तेन वचसा उत्तराभिमुखो यजेत् ।। इत्यघोरमुखस्य सकलपापहरत्वेन प्रशं-सादर्शनात्। 'अजातमिममेवैकं मत्वाजन्मनि भीरवः। रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणामुखम्' इति वायुसंहितायां दक्षिणमुखस्य मुक्तिप्रदत्वेन प्रशंसादर्शनात् ।

भोगपूर्वकमोक्षार्थिभिस्तु तत्पुरुषमुखस्य द्वाराभिमुख्यन्यायेन साधकाभिमुख्यन्यायेन वा साधकाभिमुख्यपक्षमाश्रित्य तत्पुरुषमुखमभिमुखत्वेन भावनीयम् 'प्रसन्नत्वं यदीशस्य स्तेमित्वं पुरुषस्यच । चण्डत्वं बहुरूपस्य मुक्तिस्थित्यन्तहेतुकम्' इति तत्पुरुषमुखस्य स्थितिहेतुत्वश्रवणात् । सर्वथाऽप्यूदर्ध्ववक्त्रस्य दक्षिणाभिमुखत्वं स्थितमेव । एवञ्चावाहनादिकृतं देवस्याभिमुख्यमप्यात्मार्थ पूजायामाञ्जस्यं लभते । अन्यथा परार्थपूजायामिव तदूद्ध्वमुखस्य ऊर्ध्वाभिमुखत्वत्यागमात्रपरतया कथञ्चिन्निर्वाह्यं स्यात् । परार्थपूजायां लोकानुग्रहप्रयोजनायां विशिष्य पूजकाभिमुख्यं नापेक्षितमिति युक्तं तत्र द्वाराभिमुखस्यैव कथञ्चित् गौणाभिमुख्यसमर्थनम् । इहतुसाधकानुग्रहार्थायामात्मार्थपूजायां 'स्थण्डिले चरलिङ्गे'चे'तिवचनबलादाञ्जस्येन संभवत्साधकाभिमुख्यं किमित्युपेक्षितमिति केषांचिन्मतम् । अन्येत्वाहुः आत्मार्थपूजायामूद्ध्र्ववक्त्रं हृत् गुह्यचरणैस्सह तत्पुरुषवक्त्रंच पूर्वाभिमुखमेव । अंशुमदादितन्त्रेष्वात्मार्थपूजाप्रकरण एव न विभोः पुरतस्तिष्ठेन्नपश्चातस्त्र्यंतिकेऽपिचानयोषित्सन्निधौ नाग्रे नपृष्ठेस्वामिनोभवे' दित्यादिवचनानां पठितत्वेन तेषां परार्थपूजाविषयतया नेतुमशक्यत्वात् । साधकाभिमुख्यवचनस्य दीक्षाप्रकरणे पठितत्वेनततो नित्यपूजायां साधकाभिमुख्यालाभात् । न च दीक्षायां चरलिङ्गपूजाप्रसक्त्यभावात् चरलिङ्गे साधकाभिमुख्यवचनस्य नित्यपूजाविषयत्वमेवेति वाच्यम् । दीक्षायामपि चरलिङ्गार्चने दोषाभावात् । तस्मान्निरपवादात् नप्राच्यामग्रतइति वचनात् नित्यनैमित्तिककाम्ये सर्वाधिकारणः सदाशिवः पूर्वाननो लक्ष्मीप्रत्यक्प्रष्टकलातनु' रिति लक्ष्मीकेशवसंवादे, 'दीक्षादिषुघटेशस्य प्रतीच्यां चिन्तयेद्गुरुम् । ईशं तत्पुरुषं शान्तं नित्ये नित्ये पुरानन' मिति मुखबिंबे 'ध्यायेत् सदाशिवं नित्यं प्राङ्मुखेशास्यवक्षसाम्। दीक्षादौ कलशाधारं तमेव प्रत्यगानन'मिति बृहद्भार्गवादिषुच सदानित्यशब्दाभ्यां विशेषविहितदीक्षादिव्यतिरिक्तेषुसर्वेष्वपि नित्यनैमित्तिक काम्येष्वीशान पुरुषमुखयोः प्राङ्मुखत्वश्रवणा देतेषां वचनानां द्वाराभिमुखत्व नियतस्थिर लिङ्गप्रहाणेन चरलिङ्गादिविषयावशंयभावाच्चात्मार्थपूजायां नित्यनैमित्तिककाम्यरूपायां शिवस्य पूर्वाभिमुखत्व मौत्सर्गिकम् । दीक्षादिनैमित्तिकेषु विशेषवचनैर्दक्षिणमुखत्वादिरूपस्तदपवाद इति । इदं चान्यदाहुः । ईशानतत्पुरुषमुखयोर्मध्येऽपि सदाशिवस्तत्पुरुषमुखेनैव भुङ्क्ते । 'द्वारं पश्चिम मेवं तु नैवेद्यं पूर्ववक्त्रक' मिति सूक्ष्मवचनादीशान वक्त्रस्य शिरोरूपतया तत्र नैवेद्यदानस्य लोकविरुद्वत्वा च्चेति ।। अस्तु तत्पुरुष-

मुखेन भुङ्क्ते इत्यपि कश्चन पक्षः। नतु तेनैवेति नियमः । 'भक्ष्यभोज्यान्नपानादी' त्यादिप्रागुदाहृत विषमवतनै 'रूर्ध्ववक्त्रे महासेन आहुतिं संप्रदापये' दित्यादिवचनैश्चोद्ध्र्वमुखेनापि भोजनावगमात्, 'पञ्चवक्त्रेषु नैवेद्य'मिति वचनेन 'ततोहविःप्रदानं स्यात् पञ्चवक्त्रेषु चैव हि । ईशानस्य तु शुद्धान्नं गौडं तत्पुरुषे ततः ।। कृसरं दक्षिणे वक्त्रे मुद्गान्नं च तथोत्तरे। पश्चिमे पायसंचैव स्वस्व नाम्ना समाहितः ।। दापयेत्स्वस्वदिग्भागे ईशानस्याग्रतो भवेत् । अलाभे पञ्चहविषा मग्रे शुद्धान्नमिष्यते' इति प्रतिवक्त्रन्नैवेद्यभेदप्रतिपादकवचनजातेन च पञ्चभिर्वक्त्रै र्भोजनाच्च । नह्यागमाना मविशिष्टे प्रामाण्ये कस्यचिदर्थोऽनुष्ठेयो नान्यस्येति युक्तम्। तस्मात्तत्तदागमवचनप्राप्तपक्षत्रयस्यापि विकल्प इत्येव युक्तम् । ननु नैवेद्यदानमुद्रया शिवे नैवेद्यं समर्पयता पूजकेन किं शिवस्य हस्ते तत्समर्पणीयं उत तत्तद्वक्त्र एव । अत्रापि विकल्प एव । उत्तरत्र 'अमृतीकृत्य गोस्तन्या निवेद्य कुसुमं न्यसेत् । निवेद्यदक्षिणे हस्ते दद्यात्पानीय मुत्तम'मिति दक्षिणहस्ते नैवेद्यसमर्पणश्रवणात्, 'ऊद्ध्र्वे वक्त्रे तु दातव्यं यत्किञ्चिदिह चोदितम् । ऊद्ध्र्ववक्त्रे महासेन आहुतिं संप्रदापये' दिति वक्त्रे समर्पणश्रवणाच्च । एवंचात्र योग्यतानुसारेण व्यवस्थितोविकल्पः । यद्धृदयादिसंमिते पुरुषवक्त्रे निवेदितव्यं द्रवद्रव्यवर्जं भक्ष्यभोज्यादि तत्सर्वं परित्यक्ताभयमुद्रे वामहस्ते समर्पणीयम् । यद्वक्त्रान्तरे निवेदनीयं यच्च पानीयादिद्रवद्रव्यजातं तत्सर्व मग्निहोत्राहुतिवत् सूक्ष्मरसरूपेण स्थालिकाभ्यो निर्गत्य तत्तद्वक्त्रपर्यन्तं नैवेद्यमुद्रया सहागतं सम्भावयता साक्षात्तद्वक्त्र एव समर्पणीयमिति । एवञ्च हस्ते समर्पणसंभवाद्धस्तोद्वर्तनस्य न वैफल्यम् । पूजकहस्तेन तद्वक्त्रे नैवेद्यप्रक्षेपाभावात् पूजकहस्तस्य न निर्माल्यसङ्करप्रसङ्गः ।। इति नैवेद्यविधिः ।।

।। तांबूलदानम् ।।

अथ मुखवासं ताम्बूलं च निवेदयेत् । भोजनानन्तरं मुखे वासार्थं यद्दीयते तन्मुखंवासयतीति व्युत्पत्या मुखवासम् । तच्च एलालवङ्ग तक्कोल जातीफल कर्पूरचूर्ण हिमजलपिष्टङ्गुळकीकृत मित्युक्तम् । एलालवङ्गाङ्कित तक्कोल जातीफल कर्पूरचूर्ण मीषन्मधुसितायुक्तं केवलंवा पञ्चसौगन्धिकाख्य मुत्तमम् । केवलं कर्पूरजातीलवङ्गतक्कोलचूर्णंवा मध्यमम् । प्रस्थनैवेद्यस्य द्विधाकृतमृदुक्रमुकखण्डानि

षट्चत्वारिंशद्वेवापत्राणि क्रमुकफलापेक्षया चतुर्गुणानि त्रिगुणानि द्विगुणानिवा शुभ्राणि खण्डितमूलाग्राणि शिलाचूर्णं चेतिसर्वमिदं संगृह्य कर्पूरादिसहितं सुपक्वसंस्कृतनाळिकेरमातुलिङ्गफलयुक्तं तांबूलं निवेदयेत् । ततोमूलमन्त्रेण विशेषार्घ्यं दत्वा एकत्रिपञ्चसप्तनवावृत्तियुक्तदीपं प्रदर्श्य त्रिताल पञ्चताल नागचक्रपद्म पुरुषमृग गजारूढदेवेन्द्राद्याकृतिपात्र निहितान् दीपानपि यथा विभवं प्रदर्श्यारात्रिकं कुर्यात्।।

।। आरात्रिक विधिः ।।

तत्प्रकारः- सुवर्णरजतताम्रकांस्यान्यतमनिर्मिते चतुर्विंशत्यङ्गुळिमाने तदर्धमानेवा तत्तृतीयांशमानया स्वमानपञ्चमोत्सेधया यवद्वयायामोत्सेधपट्टिकया कर्णिकया शोभिते ततो बहिरष्टदळयुक्ते परितः कर्णिकामानोष्ठसहिते सुवृत्ताकारे पात्रे कर्णिकायां मध्ये परितश्च कृतेषु सहजेषु शालिपिष्टमयेषु वा दीपासनेषु कर्पूरादिमयीं वर्तिं निधाय नव पञ्च वा दीपान् मध्यएव एकं वा दीपमारोप्य त्रिपाद्यां विन्यस्य निरीक्षणादिभिस्संस्कृत्य, नव चेन्मध्ये सूर्यं दिक्षु गुरुशुक्रबुधचन्द्रान् विदिक्षु भौमशनिराहुकेतून्, पञ्चचेन्मध्ये वह्निं दिक्षु गगनवायुजलपृथिवीः, एकश्चेत् वह्निं चाभ्यर्चयेत् । यद्वा- नवपञ्चैकदीपेषु वामादिशक्तीः पञ्चब्रह्माणि शिवं चार्चयेत् । एवं गन्धपुष्पधूपदीपैरभ्यर्च्य दिग्बन्धनमस्त्रेण कृत्वा सुरभिमुद्रां प्रदर्श्य पाणिभ्यामुद्धृत्य देवस्य शिरसि हृदये पादयोश्च त्रिर्भ्रामयित्वा सुवर्णादिनिर्मितैर्वृत्ताकारै श्चतुरश्राकारैर्वा मुकुळाग्रशालिनाळयुक्तै स्सहजशालिपिष्टकृतान्यतरदीपासनयुक्तै दीपासननिहितकर्पूरादिवर्तिष्वारोपितदीपै, र्नीराजनपात्रैर्नीराजनान्यपि निरीक्षणादिभिस्संस्कृतान्यारात्रिकवत् भ्रामयित्वा भूमौ विन्यस्यास्त्रेण निर्वापयेत् । नीराजनपात्राणि त्रिविधानि। प्रादेशमात्रविस्तारं यवद्वयघन मष्टाङ्गुळनाळं तदनुसारिमुकुळमुत्तमम् । तस्य मध्ये एकं दीपासनं पञ्चस्वावृत्तिषु क्रमा न्नव पञ्चदश एकविंशतिः सप्तविंशतिः त्रयस्त्रिंशदिति षडुत्तरशतं दीपाः । यद्वा क्रमांदावृतिष्वष्टौ चतुर्दश विंशतिः षड्विंशतिः द्वात्रिंशद्दीपासनानीति एकोत्तरशतंदीपाः । उत्तमपात्रार्धमानं पात्रं मध्यमम् । अस्य मध्ये एकं चतुर्ष्वावरणेषु अष्टौत्रयोदशाष्टादश त्रयोविंशतिर्दीपासनानीतित्रिषष्टिर्दीपाः। मध्यमादर्धमानं कनिष्ठम् । अस्य मध्ये एकं त्रिष्वावरणेषु षट् दश चतुर्दशदीपासनानीति एकत्रिंशद्दीपाः । अथ दर्पणच्छत्रचामर व्यजनताळवृन्तानि क्रमादीशानादि-

मन्त्रैस्समर्प्य तद्दिवसार्जितवाङ्मनः कायदोषपरिहाराय शिवसायुज्यप्राप्तये च दूर्वाकुशाक्षतबिल्वपत्रसहितपुष्पाञ्जलिं हां हौं शिवतत्वाधिपतये शिवायनमः । हां हौं विद्यातत्वाधिपतये शिवाय नमः । हां हौं आत्मतत्वाधिपतये शिवाय नमः । इति त्रिवारं समर्पयेत् । मुमुक्षुश्चे दात्मतत्वादिक्रमेण अथवा सर्वतत्वाधिपतये शिवायनम इति सकृदेववा समर्पयेत् । ततः पूजया सन्तुष्टं स्वाभिमुखीकृताञ्जलिपुटसकलभोगाङ्गसेव्यमानं यागमन्दिरद्वारबाह्यस्थब्रह्मोपेन्द्रमहेन्द्रचन्द्रसूर्यादिस्तूयमान मपारकरुणामृतसमुद्रं भक्तजनसकलाभीष्टाप्रदञ्च शिवं ध्यात्वा पूजासाद्गुण्यार्थं यथाशक्ति श्रीमत्पञ्चाक्षरजपं कुर्यात् ।।

।। पञ्चाक्षरजपविधिः ।।

श्रीमत्पञ्चाक्षरस्याथ प्रकारः प्रतिपाद्यते ।
गुरूपदिष्टमार्गेण गोपनीयः प्रयत्नतः ।।
शिवासनपद्मस्य दक्षिणदळे अघोरमूर्तेदक्षिणभागे-

तप्तचामीकप्रख्यां पीनोन्नतपयोधराम् ।
चतुर्भुजां त्रिणयनां बालेन्दुकृतशेखराम् ।।

पद्मोत्पलधरां सौम्यां वरदाभयपाणिकाम् ।
सर्वलक्षणसंपन्नां सर्वाभरणभूषिताम् ।।

सितपद्मासनासीनां नीलकुञ्चितमूर्धजाम् ।
श्रीमत्पञ्चाक्षरींविद्यां मनसावाहनादिभिः ।।
गन्धपुष्पै र्धूपदीपै र्नैवेद्येन च पूजयेत् ।
सुखासने समाविष्टो रक्षिताक्ष उदङ्मुखः ।
नासाग्रन्यस्तदृङ्मौनी विदध्यादात्मरक्षणम् ।।

स्रवत्पीयूषसङ्घातप्लाविताशेषदिक्तटम् ।
स्मरे दूद्ध्वमधस्ताच्च चन्द्रमण्डलसंयुतम् ।।

बिंबसंपुटमध्यस्थं सुधाधारापरिप्लुतम् ।
स्वदेहं चिन्तयेच्छाक्तैस्सुधावर्षै स्सुधात्मकम् ।।

आत्मरक्षा भवेदेषा सुरैरपि नभिद्यते ।
आत्मरक्षां विधायेत्थं मन्त्ररक्षा मथाचरेत् ।।

रेचये दुदराद्वायुं दक्षनाड्याऽस्त्रमन्त्रतः ।
इडया पूरयेद्वाह्यात् शंभुना वायुनोदरम् ।।

अपान मूद्ध्वमुत्कृष्य प्राणापानौ निरुद्ध्य च ।
कुंभेन मनसा वायुं सुषुम्नायां नियोजयेत् ।।

सुषुम्नामध्यसंस्थायां हृद्देशेशिवसंयुजि ।
मन्त्रन्नियोजयेन्मन्त्री चिच्छक्तौ मन्त्रमातरि ।।

मन्त्राक्षराणि मणिवत् प्रभावन्मन्त्रदेवताम्।
गमागमप्रयोगेन स्मरन्मन्त्रं जपेत्सुधीः ।।

वाच्यवाचकसंबन्धं जपेत्तद्गतमानसः ।
मन्त्ररक्षा भवेदेषा संहिता सुररक्षिता ।।

इत्थं विदित्वा यत्नेन जपकर्म समाचरेत् ।
जपकर्मक्रमस्सोऽथ सुस्पष्टं प्रतिपाद्यते ।।

नाभ्यादिद्वादशान्तान्तं सोमसूर्याग्निरूपिणीम् ।
आनन्दरूपिणीं शक्तिं सुषुम्नान्तर्गतां पराम् ।।

आधारचक्रमारभ्य बोधयित्वाऽनिलेन ताम् ।
ब्रह्माणं केशवं रुद्र मीश्वरंच सदाशिवम् ।।

हृत्कण्ठतालुभ्रूब्रह्मरन्धस्थानेषु तान्क्रमात् ।
त्यक्त्वा त्यक्त्वाऽस्त्रमन्त्रांशं विद्युल्लेखानिभं बुधः ।।

मन्त्रं नादान्तमुच्चार्य मूलाधारगतं पुनः ।
गमागमप्रयोगेण जपेत्साष्टशतं तथा ।।

अष्टाविंशतिमष्टौवा गुरुणाचयथोदितम् ।
इत्थं कृत्वा जपं मन्त्री शिवसायुज्यमाप्नुयात् ।।

जपश्चाभ्यन्तर्याऽकारादिक्षकारान्तवर्णमालारूपया बाह्यया रुद्राक्षादिनिर्मितया वा कर्तव्या । तन्त्रान्तर्या जपप्रकारः कथ्यते । ब्रह्मरन्ध्रे धवळाष्टदळचतुरश्रयंत्रमुपरि श्रितं पद्मं भावनीयम् । तस्य कर्णिकाकायं व्योम तत्पूर्ववर्णं चतुर्दशस्वरविसर्जनीयसमुदायरूपं बीजं केसरेष्वष्ट स्वरद्वंद्वानि दळेषु कादयः पञ्चपञ्च वर्णाः चतुरश्रयन्त्रस्य दिक्षु सुधाबीजं विदिक्षुच सप्तमो वर्णः । एवंरूपंमातृकं पद्मं भावनामात्रेण विशेषरोगमृत्युहरम्। ततो द्वारक्रमंचानुद्गतवायुसंधुक्षितमूलाधाराग्निशिखया कुण्डलिनीशक्त्या सह सुषुम्नारन्ध्रं प्रविश्य ब्रह्मरन्ध्रपर्यन्तमुद्गतेडास्यपृष्टात्तस्मान्मातृकापद्मात्स्यंदितां क्षाकाराद्यकारान्तवर्णपङ्क्तिरूपाममृतबिन्दुसन्ततिं ब्रह्मरन्ध्रप्रभृति मूलाधारपर्यन्तं व्याप्यावतिष्ठमानां भावयेत् । या कुण्डलिनी शक्तिः मूलाधाराग्निशिखासामरस्येन प्रकाशमानसुषुम्नामार्गेण ब्रह्मरन्ध्रपर्यन्तुमुद्गता सैव मामृकापद्मविद्रुतामृतबिन्दु स्यंदि सन्ततिसामरस्येनामृतायमाणा परमान्दरूपिणी मातृकाशक्तिरितिभावयेत् । तदाहुः- 'प्रकाशमानां प्रथमप्रयाणे प्रतिप्रयाणे त्वमृतायमाणाम्। अन्तः पदव्या मनुसञ्चरन्तीमाणन्दमुद्रा मवलोकयामः' इति ।। ब्रह्मरन्ध्रस्थितमातृ-

कापद्मप्रभृत्यकारादिक्रमेण मूलाधारपर्यन्तं व्याप्य स्थितायां मातृकारूपायां शक्तावकारादिभिरष्टभिर्वर्णैरेकोवर्गः ऌकारादिभिरष्टाभिरन्यः ककारादिभिः पञ्चभिः पञ्चभिर्वर्णैस्सप्तवर्गाः । नववर्गाः क्रमादादित्यसोमबुधगुरुशुक्रांगारकशनिराहुकेतुरत्नरूपाः। माणिक्यवैडूर्यकपुष्यरागवज्रप्रवाळगुळिकाबलवैरिरत्नैः । गोमेतकैर्मरकतैश्च कृताऽक्षमाला श्लाघ्या नवग्रहमयाखिलवर्णपूर्णा ।। एनामक्षमालां हृत्पुण्डरीकमध्यागतदीपाकारपरमेश्वरप्रभारूपशब्दैः पराख्यशक्तिनिस्सृतां विभावयेत् ।। तदग्रे मूलमन्त्रे नवरत्नमयकल्पलताग्रे पुष्पात् विनिस्सृतं विभाव्य क्षकारं मेरुं कृत्वा ळकारादिक्रमेणाक्षमालायां मूलमन्त्रस्य गमागमौ विभावयेत् । तस्यांमन्त्रस्यारोहणभावनयां मन्त्रस्य शिरसि ळकारादिसहितवर्णान् विसर्जनीयसहितान् विन्यस्य अवरोहणभावनायां मन्त्रस्य अकारादिवर्णान् बिंद्वन्तान्विन्यस्य जपंकुर्यात् । एवं कृते शतं मन्त्रस्यावृत्तयो भवन्ति । तदनन्तरं षोडशस्वरवर्गस्पर्शवर्गपञ्चकान्तस्थवर्ग ऊष्मवर्गाष्टके क्रमेण मन्त्रं विन्यस्याष्टधा मन्त्रमावर्तयेत् । एवमष्टोत्तरशतसङ्ख्यजपः कृतो भवति । जपारंभकाले च मूलमन्त्रेण तस्य परदेवतां मणिना प्रभामिव समरसीभूतां मूलमन्त्रेणसह तदीयान्नकारादिवर्णान् पीतकृष्णधूम्रपीतरक्तवर्णान् तद्देवतारूपतया तत्समरसीभूतान् ब्रह्मविष्णुरुद्रेश्वरसदाशिवांश्च विभावयेत् । हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेषु क्रमेण नकारादिवर्णै स्सह ब्रह्मादीन्परित्यजेत् । अयमर्थस्सर्वोऽपि प्राक् लिखितश्लोकेषु संक्षेपेणसूचितः । एवमाभ्यन्तराक्षमालया जप्तुमशक्तः प्रागुक्तक्रमेण जपारम्भकाले मन्त्रं मातृकाशक्त्यारूढं विभाव्य मन्त्रमातृकाक्षराणि विभाव्य केवलमेव मन्त्रं रुद्राक्षादिकृतबाह्याक्षमालया गणयन् जपेत् ।।

तत्प्रकारः- उत्तमादिक्रमेणणामलक बदर चणकप्रमाणै रवक्त्रैस्त्रिवक्त्रैश्चतुःपञ्चषट्सप्ताष्टनवदशैकादशवक्त्रैर्वा एकसङ्ख्यवक्त्रैर्भिन्नसङ्ख्यवक्त्रामिंश्रितै रष्टोत्तरसङ्ख्यै श्चतुःपञ्चाशत्सङ्ख्यै स्सप्तविंशतिसङ्ख्यैर्वा सुवर्णरजतादिमये क्षौमपट्टादिमयेवासूत्रे परस्परमुखसंयोजनेन परस्परपुच्छसंयोजनेन च स्यूते मेरुसहितैः वर्णानुगुणरुद्राक्षैर्निर्मितां सद्योजातादिमन्त्रैः प्रत्मेकं शतवारावृत्तैः क्रमेणाभिमन्त्रितमेरुकां शिवपूजाक्रमेणावाहनादिभिः पूजितां जपारम्भकाले हुंफडंतास्त्रमन्त्रेण प्रोक्षितां हृदयेन गन्धपुष्पादिभि र्मालामुद्राप्रदर्शनेन च पूजितां दक्षिणहस्तगृहीतां वस्त्रसंगोपितामक्षमालां वाचिकजपे मद्ध्यमायां निधाय तर्जन्यङ्गुष्ठाभ्यां, उपांशुजपे अनामिकायां

निधायमध्यमाङ्गुष्ठाभ्यां,मानसजपे कनिष्ठिकायां निधायानामिकाङ्गुष्ठाभ्यां च गणयेत्। बुभुक्षु रक्षमाला मधोनयेत् । मुमुक्षुरूर्द्ध्वं नयेत् । मेरुलङ्घनदोषे प्रायश्चित्त मघोर-सहस्रजपः । तद्दोषास्पर्शनायमेरुरहीनाक्षमाला कर्तव्या । एवमक्षमालायाः पादयोः पतनेऽप्यघोरसहस्रजपः । भूमौ तस्याः पतने तत्रिंशज्जपः। वाससि पतने तच्छत-जपः । जपारंभकाले एकं पुष्पं दक्षिणहस्तस्य कनिष्ठिकामध्ये कृत्वा जप्तव्यम् । रुद्राक्षमालिकया जपेतु तद्ग्रहणे सौकर्याय दक्षिणहस्तेनन गृहीतं पुष्पं वामहस्ते निधाय जप्तव्यम् । अद्रुतविळंबितसावधानजपं समर्प्य वामकरतले अस्त्रकवच-हृदयान्युपर्युपरि विन्यस्य तदुपरि जपकाले धृतं पुष्पंनिधाय हृदयकवचास्त्रैस्संपुटी-कृत्य अस्त्रेणसंरक्ष्य कवचेनावकुण्ठ्य दक्षिणहस्ते पुनर्गृहीत्वा हृत्प्रदेशे निधाय पूर्णचन्द्रोपमं जपं तद्गतं ध्यायन् भूनिवेशितदक्षिणजानुर्भूत्वा हां गुह्यातिगुह्यगोप्तात्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवति मेयेनत्वत्प्रसादात् त्वयिस्थिते ।। हां हौं शिवायस्वाहा । श्रीपरमशिव जपं त्वयि निक्षिपामीति जपमर्घ्याबुचुळकेन साक्षत-कुशपुष्पेण शिवस्य वरदहस्ते निवेदयेत् । अयं भुक्तिमुक्तिसाधकस्य स्वकृतजपस्य विस्मयसङ्कीर्तनकर्मनाशजलसंस्पर्शादिभिर्विनाशशङ्कया तत्संरक्षणाय शिवहस्ते-निक्षेपः । मन्त्रश्लोकस्यायमर्थः । गुह्यातिगुह्यादीनां मन्त्रतत्वादीनां गोप्ता त्वमेव। अतस्सर्वगोप्तृत्वा दस्माकं जपमपि गृहाण । यस्मिन्जपे त्वयिस्थिते त्वत्प्रसादाद-स्माकं भुक्तिमुक्तिर्भवत्येव। तस्मान्मयि कृपया तत्गृहाणेति । ततः हां यत्किञ्चि-त्कर्म हे देव सुकृतं चैव दुष्कृतम् । तन्मेशिवपदस्थस्य भुंङ्क्ष्व क्षपय शङ्कर।। हां हों शिवाय स्वाहा । परमशिवायमे सुकृतंदुष्कृतञ्च निवेदयामीति सुकृतदुष्कृतात्मकं सर्वं कर्म प्रागुक्तक्रमेण चुळकोदकेन निवेदयेत् । तत्र सुकृतजातस्य भोगार्थस्य मोक्षान्तरायपरिहारार्थस्य संरक्षणार्थं निवेदनम् । दुष्कृतजातस्यक्षपणार्थम् । अत-स्सुकृतं भुङ्क्ष्व पालय । दुष्कृतं क्षपय नाशयेति योजना । भोगनिस्पृहस्य केवल-मुमुक्षोस्तु मोक्षान्तरायपरिहारार्थं सुकृतमात्रमेव भुङ्क्ष्वेति पालनप्रार्थना । भोगार्थ-सुकृतस्य शिवपूजाया मङ्गफलत्वेनानुषङ्गिकस्य मानुषादिहिरण्यगर्भानन्दान्तभोग-प्रापकस्य विषयेभ्यो जुगुप्समानं केवलं मुमुक्षुंप्रति 'एते वै निरयास्तात स्थानस्य-परमात्मनः' इति पुराणोक्तरीत्या नरकप्रापकस्य दुष्कृतरूपतया क्षप्रणपार्थतैव । यद्यपि पालनार्थे भुजिधातोः परस्मैपदितयाभुनक्षीतिपरस्मैपदिनाभाव्यम् । तथाऽपि मन्त्ररूपश्लोके वैदिकमन्त्रेषु रक्षस्वेतिप्रयोग इव छान्दसोऽयं 'व्यत्ययोबहुळ'

मित्यात्मनेपदप्रयोगः । यद्वा भुङ्क्ष्वेति भोगएवोच्यते, नतु पालनम् । सुकृतशब्देनच केवलमुक्त्यर्थिनः पूजकस्य यदनिष्टं भोगार्थसुकृतं तदेवाच्यते, नतुमुक्त्यर्थमपेक्षितम् । तद्भोगश्शिवस्यराज्ञो राजभोगवत् स्वाधीनव्यवहारः । नतु स्वयमेव भोजनम् । स्वाधीनव्यवहारश्च पूजकस्य प्रियेषु ज्ञातिषु तस्य यथाकथञ्चित् सुहृत्सुवानिवेशनम् । मुमुक्षो रनपेक्षितं सुकृतं शिवस्तस्य ज्ञातिसुहृद्भ्यः प्रयच्छतीतिश्रुतिप्रसिद्धिः । यद्यपि तस्य दुष्कृतं तद्विपद्भ्यः प्रयच्छतीत्यपि श्रुतिप्रसिद्धिरस्ति । तथाऽपि शिवपूजकः सर्वमष्टमूर्तेश्शिवस्य रूपं मन्यमान स्तान्नद्वेष्टीति तेन स्वदुष्कृतस्य स्वस्मिन्फलाजनकत्वरूपं क्षपणमेव प्रार्थयितुमुचितमिति तत्प्रार्थना मन्त्रे निबद्धा । ततः 'शिवोदाता शिवो बोक्ता शिवस्सर्वमिदं जगत् । शिवो यजति सर्वत्र यश्शिवस्सोऽहमेवतु' ।। हां हौं शिवायस्वाहा । परमशिवमात्मानं तुभ्यं निवेदयामीति प्रागुक्तरीत्या चुळकोदकेन निवेदयेत् । अत्र मन्त्रश्लोके सोहमिति भागेन स्वस्य शिवस्य च शरीरशरीरिभावः प्रतिपाद्यते । शिवस्य नियामकत्वेन शरीरित्वात् स्वस्य नियम्यत्वेन शरीरत्वाच्च शरीरशरीरिभावे सोऽहमिति सामानाधिकरण्यम् । धर्मज्ञस्सुन्दरो राजेतिवत् । एवेति तदयोगव्यवच्छेदः । यश्शिवइति । यःपरममङ्गळवाची शिवशब्दः रूढ्या त्रिविधेनाप्याणवमायिककर्मरूपेण मलेनास्पृष्टइति 'अनादिमलसंश्लेषप्रागभावात् स्वभावतः । शिव इत्युच्यते सद्भिश्शिवतत्वार्थं वेदिभि'रित्यादिषु प्रसिद्ध इत्यर्थः । अथवा 'शीङ्स्वप्न' इतिधातो रौणादिकेन वन्प्रत्ययान्तत्वह्रस्वत्वनिपातेन शेते सामरस्येन वर्ततेऽस्मिन् कल्याणगुणजातमिति व्युत्पत्त्या परस्परविरुद्धौदार्यमाधुर्यविशेषज्ञत्वनिरतिशयत्वसहिष्णुत्वादिसमाश्रयणीयेत्वापयोगि सकलकल्याणगुणरत्नाकरइति । 'नास्तियद्यदकल्याणं तत्तदस्य कदाचन । कल्याणं सकलं चास्ति परमात्मा शिवोयतः' इत्यादिषु प्रसिद्ध इत्यर्थः । अथवा 'हिंसिधातोस्सिंहशब्दो वशकांतौ शिवःस्मृतः । वर्णव्यत्ययतस्सिद्धः कश्यपः पश्यकोयथे'तिनिपातेन वष्टिशिवमिच्छतीति व्युत्पत्यासर्वभूतहिताशासितेति । 'समेधयति यन्नित्यं सर्वार्थानामुपक्रमे । शिवमिच्छन्मनुष्याणां तस्माद्देवश्शिवःस्मृतः' इत्यादिषुप्रसिद्ध इत्यर्थः । अथवा शिवशब्दाच्छुभवाचिनः तत्करोतीतिणिचि पचाद्यचि 'णेरनिटी'ति णिलोपेच सति शिवं करोति सर्वेषामिति व्युत्पत्त्या सकलभूतहितकर्तेति । समाभवन्ति मे सर्वे दानवाश्चामराश्च ये। शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुरा'इत्यादिषु प्रसिद्ध इत्यर्थः। अथवा 'श्यैञ्

गताविति धातोरौणादिकेनवन्प्रत्ययस्याकारयकारलोपस्य च निपाताभ्यामयते प्राप्यते इति व्युत्पत्या भोगमोक्षार्थिभिः भजनीयइति । 'यद्वारे मत्तमातङ्गा वायुवेगास्तुरङ्गमाः । पूर्णेन्दुवदना नार्य श्शिवपूजाविधेः फलम् ।। सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः । परो ध्येयोऽथ देवेश स्समाप्ताऽऽथर्वणी श्रुती' रित्यादिषु प्रसिद्धइत्यर्थः। अथवा 'यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गा दघ- माशुहंति तत् । पवित्रकीर्ति तमलङ्घ्यशासनं भवानहोद्वेष्टि शिवं शिवेतर'इत्यादिषु सकलदुरितहरत्वेनानुशिष्टस्य शिवशब्दस्य वाच्योयः प्रसिद्ध इत्यर्थः । शिवोयजति सर्वत्रेति । सर्वेष्वपि लोकेषु शिव एव यजति धर्माधिकारित्वेनावतिष्ठते । कर्मवश्यसकलजीवात्मकः स एव नियन्तेत्यर्थः । शिवस्सर्वमिदंजगत् । भूतभौतिकसकलजडप्रपञ्चात्मकः तन्नियामक इत्यर्थः । भोक्ता प्रपन्नानां पालयिता । दाता प्रपन्नानां प्रामादिकेपातकाद्यन्तराये सतितस्य शोधयिता । एतानि विशेषणानि शिवे स्वात्मनिवेदनतदङ्गोपयुक्तानि । तथाहि- नियम्यस्य पूजकस्य नियामकस्य शिवस्यच नियतनियम्यनियामकभावरूपशरीरशरीरिभावेन शिवंप्रतिपूजकस्य तवाहमस्मीत्यनुसंधानमेवात्मनिवेदनम् । तदिह सोहमेवेत्यत्र तत्पदोक्तेशिवे अहंपदेन स्वशरीरकत्वं एवकारेण तदयोगव्यवच्छेदकार्थकेन तस्यनियतत्वं चानुसंधानविषयरूपं तदुपपादकमभिहितम् । अस्य चात्मनिवेदनस्य साङ्गपञ्चकत्वमाहुः- 'आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यविवर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ।। कार्पण्य'मिति। तत्र सर्वभूतानुकूल्याचरणतत्प्रातिकूल्यवर्जनरूपाङ्गद्वयोपपादकं सर्वोऽपि जीववर्गः पूजकं प्रति शरण्यस्य शिवस्य शरीरमित्येतदभिहितम् । तेन प्राणिमात्रे शिवपूजकेन राजशरीरे भृत्यइवानुकूल्येन वर्तितव्यं तत्प्रातिकूल्यं च वर्जनीयमितिलभ्यते । अत एवोक्तं वायुसंहितायां शिवस्य मूर्त्यष्टकनिरूपणप्रकरणे- 'आत्मा तस्याष्टमी मूर्तिश्शिवस्य परमात्मनः। व्यापिकेतरमूर्तीनां विश्वं तस्मात् शिवात्मकम्। सर्वोपकारकरणं सर्वानुग्रहणं तथा। सर्वाभयप्रदानंच शिवस्याराधनं विदुः । देहिनो यस्य कस्यापि क्रियते यदि निग्रहः। अष्टमूर्तेरनिष्टं तत्कृतमेव नसंशयः' इति ।। रक्षिष्यतीति विश्वासेतु सर्वैरपि विशेषणैः उपपादकमभिहितम् । अहमेवेत्युक्तं स्वशरीरकत्वंतावत् स्वरक्षणविश्वासोपपादकम् । कोहि स्वशरीरं न रक्षेत् । शिवशब्दोक्तमुक्तविश्वासविरोधिरागद्वेषादिहेतुमलराहित्यं समाश्रयणीयत्वोपयोगि सकलकल्याणगुणशालित्वं सकलभूतहिताशंसितृत्वं सकलभूताहितकर्तृत्वं हितविरोधि-

सकलदुरितनिवर्तकशिवशब्दवाच्यत्व मित्येतत्सर्वमपि तदुपपादकं' शिवोयजतिसर्वत्र शिवस्सर्वमिदंजगत्' इति विशेषणद्वयोक्तं चेतनाचेतनात्मसकलप्रपञ्चनियन्तृत्वरूपं सर्वेश्वरत्वमपि तदुपपादकम् । सर्वेश्वरोहि तद्भक्ताभिलषितदानसमर्थ इति विश्वसितुं शक्यः । पालनार्थात् भुजिधातोः 'दैपूशोधन' इति धातोश्च ताच्छील्यार्थकत्वेन भोक्ता दातेति विशेषणद्वयेनाभिहितं भक्तरक्षकस्वभावकत्वं तदीयप्रामादिकमहापातकादिसकल दुरितनिवर्तकस्वभावकत्वञ्च तदुपपादकमिति स्पष्टमेव । गोप्तृत्ववरणेऽपि भोक्तृत्वमेवोपपादकम् । स्वयमेव रक्षकस्वभावः कथं रक्षकोभवेति प्रार्थितो नरक्षेत् । तुशब्देन देवतान्तरनिपेक्षत्वरूपकार्पण्योपपादकं स्वस्य देवतान्तराणाञ्च नियम्यनियामकभावराहित्यरूपन्तुशब्देनोक्तमिति विवेकः ।।

एवं त्रिभिश्चुळकोदकैर्जपकियात्मसमर्पणानन्तरं पञ्चब्रह्मषडङ्गमन्त्रानपि मूलमन्त्रदशांशसंयोगेन जप्त्वा शिवमष्टपुष्पिकया पुष्पाञ्जलित्रयेण चाभ्यर्च्य पुरतः कृताञ्जलिबन्धः स्थित्वा स्तोत्रमपि विज्ञापयेत् । पञ्चावरणस्तोत्रै रन्यैरपि श्रुतिस्मृतिपुराणागमादिदृष्टैः पूर्वाचार्यकृतैःस्तोत्रैर्वा यथासंभवं स्तुवीत । स्वकृतस्तोत्रं श्रुतितुल्यमिति पौराणिकाः ।।

।। प्रदक्षिणविधिः ।।

एवं स्तुत्वा पुष्पाञ्जलिसमर्पणपूर्वकं साष्टाङ्गं प्रणम्य प्रदक्षिणत्रयं कृत्वा पञ्चवारं प्रणम्य पुनः प्रदक्षिणं कुर्यात् । पूजासाफल्यसिद्ध्यर्थं प्रदक्षिणमावश्यकम्। 'पदात्पदान्तरं गच्छेत् करौ चलनवर्जितौ । स्तुतिर्वाचा हृदिध्यानं चतुरङ्गं प्रदक्षिणम्।। आसन्नप्रसवा नारी तैलपूर्णं यथा घटम् । वहन्तीशनकैर्याति तथा कुर्यात् प्रदक्षिणम्'।। तत् प्रदक्षिणं त्रिविधम् ।। सव्य मपसव्यं सव्यापसव्यं चेति। देवं स्वस्य दक्षिणभागेकृत्वा क्रियमाणं सव्यम् । तद्विपरीत मपसव्यम् । उभयं मिळितं सव्यापसव्यम् । त्रिविधमपि इन्द्रदिगादीन्द्रदिक्पर्यन्तं कर्तव्यम् । तत्र सव्यं ब्रह्मचारिणा मपसव्यं यतीनां सव्यापसव्यं गृहिवानप्रस्थयोरिति कश्चन पक्षः । सव्यं साधारण मपसव्यं यतीनामेव सव्यापसव्यं दीक्षितानामेवेत्यपरः पक्षः ।।

।। प्रणामविधिः ।।

प्रणामश्चतुर्विधः । अष्टाङ्गः पञ्चाङ्गस्त्र्यङ्ग एकाङ्गश्च ।अष्टाङ्गो द्विविधः। दण्डप्रणामः केवलप्रणामश्च । पद्भ्यां कराभ्या मुरसा शिरसा वाचां क्रियमाणो दण्डप्रणामः । पादद्वयेन करद्वयेनोरसा शिरसा वाचा मनसा धिया दृष्ट्याच क्रियमाणो दण्डप्रणामइति पक्षान्तरम् । अत्र मनसेत्यनन्यमनस्कत्वमुच्यते । धियेति शिवमहिमानुसन्धानरूपस्तोत्रं विविच्यत इति भेदः। पादद्वयेन जानुद्वयेन करद्वयेन उरसा शिरसा मनसा वाचा दृष्ट्याच क्रियमाण इत्यपि पक्षान्तरम् । पादद्वयेन बाहुद्वयेन उरसा शिरसा मनसा वाचा दृष्ट्याच क्रियमाण इत्यपि कश्चन पक्षः । शिरसा हस्ताभ्यां कर्णाभ्यां चिबुकेन बाहुभ्याञ्च भुवं संस्पृश्य क्रियमाणः केवलप्रणामोऽष्टाङ्गः । शिरसा हस्ताभ्यां जानुभ्याञ्च भुवं स्पृष्ट्वा क्रियमाणः पञ्चाङ्गः। शिरो हस्तौ बाहूच जानुनि निधाय क्रियमाणः पञ्चाङ्ग इति पक्षान्तरम् । शिरसि हस्ताभ्या मञ्जलिबन्धनं त्र्यङ्गनस्कारः। केवलं शिरसैवानमन मेकाङ्गनमस्कारः । एते प्रणामा देशकालबलाद्यपेक्षया यथासंभवं विनियोक्तव्याः।।

।। अग्निकार्यविधिः ।।

इत्थं परमेश्वरं स्तुतिप्रदक्षिणनमस्कारै स्सन्तोष्य स्वामिन्नग्निकार्यं करोमीति विज्ञाप्य शिवादाज्ञां गृहीत्वा सामान्यार्घ्यकरोग्न्यगारं गत्वा निरीक्षणादिचतुस्संस्कारैश्शुद्धे हस्तमाने मृत्सिकतान्यतरनिर्मितेस्थण्डिले अरणिसूर्यकान्तादिनिर्मितं श्रोत्रियागारसमाहृतं वाऽग्निं प्रज्वाल्य हुंफडन्तास्त्रेण क्रव्यादांश मग्निं निर्ऋतिकोणे निरस्य मूलेनाग्निं निरीक्ष्य हुंफडन्तास्त्रेणप्रोक्षणताडने विधाय वौषडन्तकवचेनाभ्युक्ष्य हां हं हां वह्निर्मूर्तये नम इति संहारमुद्राय वह्निचैतन्यं पूरकवायुना हृत्पुण्डरीकस्थितेन वह्निना संयोज्य तत्सहितं सुषुम्नामार्गेण द्वादशान्तं प्रापय्य परमशिवसंपृक्तं कृत्वा रेचकेन पिङ्गळया निस्सार्य हां हूं वह्निचैतन्याय नमइति तमुद्भवमुद्रया ज्वलदग्नौ निक्षिपेत् । तदनु सद्योजातादिमन्त्रैर्नमोन्तैः पञ्चभिरग्निं संपूज्य वौषडन्तशक्तिमन्त्रेण धेनुमुद्रयाऽमृतीकृत्य कवचेनावकुण्ट्यास्त्रेणसंरक्ष्य हृदयेनाभ्यर्च्य पारमेश्वरवीर्यमिति विभाव्य वागीश्वरीं वागीश्वरञ्च समरसावीशदिग्गतौ ध्यात्वा वागीश्वरी-

गर्भनाड्या मात्मसंमुखं वागीश्वरेण तद्वीर्यं क्षिप्यमाणं विभावयेत् । ततः स्वाहान्तमूलेनाहुतिपञ्चकं दत्वा हां शिवाग्निस्त्वं हुताशनेतिनाम कृत्वा गर्भाधानादिपञ्चसंस्कारादिसंस्कृतमग्निंविभाव्य पितरौ हृदाऽभ्यर्च्य विसृज्य सामान्यार्घ्यजलेन वौषडन्तकवचेन कुण्डं मेखलाञ्च संप्रोक्ष्य मेखलायाःदिक्षु पूर्वोत्तराग्रान्दशदर्भान्कवचेनास्तीर्य मेखलायाः पूर्वदक्षिणपश्चिमोत्तरदिक्षु ब्रह्मविष्णुरुद्रानन्तान्समभ्यर्च्य अग्न्यर्भकं रक्षतेति विज्ञाप्य पञ्चवक्त्रयुतं रक्तं सप्तजिह्वाविराजितम् । दशहस्तं त्रिणेत्रञ्च सर्वाभरणभूषितम् ।। रक्तवस्त्रपरीधानं पङ्कजोपरि संस्थितम् । बद्धपद्मासनासीनं दशायुधसमन्वितम् ।। शिवाग्निं ध्यात्वा तस्योद्ध्र्ववक्त्रेकनका बहुरूपाऽतिरिक्तेति जिह्वात्रयं पूर्वादिवक्त्रेषु सुप्रभाकृष्णारक्ताहिरण्मयीति जिह्वाचतुष्टयं ध्यायेत् । ततोहामग्नयेनम इति संपूज्य हां हूमग्नये स्वाहेति तिलाहुतिपञ्चकं हुत्वा । 'अग्ने त्वमैश्वरं तेजः पावनं परमं यतः । तस्मात्त्वदीयहृत्पद्मे स्थाप्य सन्तर्पयाम्यह' मित्यग्निं विज्ञाप्याग्नेः हृदयकमले आसनमूर्तिसदाशिवावाहनपूर्वकं सर्वोपचारैस्संपूज्य अग्निवक्त्रै शिववक्त्रेसन्निधानंविभाव्य स्वाहान्तमूलेन समिदन्नाज्यलाजसर्षपतिलादिभि श्शतं तदर्धंवा यथाशक्ति हुत्वा ब्रह्माङ्गानां दशांशाहुतिं हुत्वा हौंशिवाय वौषडित्यूद्ध्र्ववक्त्रे पूर्णाहुतिं दत्वा स्वाहान्तमूलेन चरुं ग्रासत्रयपरिमितं हुत्वा ब्रह्माङ्गनामेकैकाहुतिं हुत्वाऽऽचमनं प्रदाय चन्दनतांबूलानिदत्वा भस्मपाद्याष्टपुष्पिकया संपूजयेत् । आद्याद्यभावे पत्रपुष्पादिभिर्वा जुहुयात् । ततः स्तोत्रप्रदक्षिणनमस्कारैस्सन्तोष्य पराङ्मुखार्घ्यं दत्वा शिवमुत्थाप्य लिङ्गस्थे शिवे संपूजयेत् । ततः परिस्तरणदर्भान्संगृह्याग्रमध्यमूलान्याज्यसिक्तानि कृत्वा एकं दर्भं समादाय शेषमग्रप्रभृति दहेत् । तमेकं दर्भ मग्नौ निक्षिप्य तद्भस्मना ललाटे तिलकं कुर्यात् । तद्भस्मधारण मायुश्रीकीर्तिवर्धनं विजयारोग्यकरञ्च । ततस्तस्य दक्षिणभागे चतुरश्रं मण्डलं कृत्वा मण्डलात् प्राग्भागे पूर्वाद्युत्तरान्तासु महादिक्षु रुद्रमातृगणयक्षा नीशानादिकोणेषु ग्रहासुरराक्षसनागान् मण्डलमध्ये ईशानाग्नेयनैर्ऋतकोणेषु नक्षत्रराशिविश्वदेवान् वायुवरुणादिशोर्मध्ये क्षेत्रपालञ्चाभ्यर्च्यार्घ्यं दत्वा जलमिश्रान्नेन रुद्रादिभ्यो बलिं दत्वाऽऽचमनं दद्यात् । रुद्रादीनामभ्यर्चने नमोन्तास्तत्तन्नाममन्त्राः। बलिदाने स्वाहान्ताः । क्षेत्रपालस्यैकवचन मन्येषां बहुवचनमिति भेदः । ततः प्राग्भागे चतुरश्रमण्डले इन्द्रादिविष्णवन्तानां लोकपालानां बलिं दद्यात् । ततोमण्डपाद्बाह्यांकणे गोमयमण्डले वायसादिभ्यस्समयभेदिभ्यः स्वाहा । आग्नयादिभ्यः स्वाहा । सर्वे-

भ्योग्रहवास्तुदेवेभ्यः स्वाहा । इतिपृथक्पृथक् बलिं दत्वा श्वभूतपतितप्रेतादिभ्योऽप्येकं बलिंदद्यात् । यद्वा-संक्षिप्य सर्वोद्देशेन 'येरुद्रारुद्रकर्माणो रौद्रस्थाननिवासिनः। (सौम्याश्चैवतुयेकेचित् सौम्यस्थाननिवासिनः । मातरो रुद्ररूपाश्च गणाना मधिपाश्च ये ।। विघ्नभूतास्तथाऽन्येच दिग्विदिक्षु समाश्रिताः । सर्वे सुप्रीतमनसः प्रतिगृह्णंत्विमंबलिम् ।। सिद्धिं जुषन्तु नः क्षिप्रं भयेभ्यः पांतुमासदे'ति मन्त्रेणैकं- बलिं- क्षिपेत् ।। सर्वमिदं बलिकार्यमग्निकार्याधिकारिणैव कर्तव्यं नसर्वैः । अग्निकार्याधिकारे सत्यपि होमोपकरणवैकल्पे तदशक्तौवा होममन्त्रान् होमसङ्ख्यापेक्षया दशगुणावृत्त्या जपेत् । ततश्शिवज्ञानपूजां कुर्यात् ।।

।। शिवज्ञानपूजाविधिः ।।

शिवज्ञानानि कांमिकादयो दिव्यागमाः । तत्र कामिकं त्रिभेदं परार्द्धग्रन्थम्। योगजं पञ्चभेदं लक्षग्रन्थम् । सूक्ष्म मेकतन्त्रं पद्मग्रन्थम् । सहस्रं दशभेदं शङ्खग्रन्थम् । अंशुमान् द्वादशभेदं पञ्चलक्षग्रन्थम् । सुप्रभेद मेकतन्त्रं त्रिकोटिग्रन्थम् । विजयमष्टभेदं त्रिकोटिग्रन्थम् । निश्वासमष्टभेदं कोटिग्रन्थम् । स्वायम्भुवं त्रिभेदं सार्धकोटिग्रन्थम् । अनलमेकतन्त्रं त्रिंशत्सहस्रग्रन्थम् । वीरतन्त्रं त्रयोदशभेदं लक्षग्रन्थम् । रौरवं षट् भेद मष्टार्बुदग्रन्थम् । मकुटं द्विभेदं लक्षग्रन्थम्। विमलं षोडशभेदं लक्षग्रन्थम् । प्रोद्गीतं षोडशभेदं त्रिलक्षग्रन्थम् । ललितं त्रिभेदमष्टसहस्रग्रन्थम् । सिद्धं चतुर्भेदं सार्धकोटिग्रन्थम् । सन्तानं सप्तभेदं षट्सहस्रग्रन्थम्। शर्वोक्तं पञ्चभेदं द्विलक्षग्रन्थम् । पारमेश्वरं सप्तभेदं द्वादशलक्षग्रन्थम् । किरणं नवभेदं पञ्चकोटिग्रन्थम् । वातुळं द्वादशभेदं लक्षग्रन्थम्। एवमष्टाविंशतिभेदा दिव्यागमाः । परार्धशङ्खपद्मषट्पञ्चाशत्सहस्राधिकैः षडुत्तरषष्ट्या लक्षन्यूनं पद्मंचेत्येतावत्संख्या ग्रन्थाः । तदुपभेदाः अष्टोत्तरद्विशतसङ्ख्याः । इत्थंभूतान् सर्वानपि दिव्यागमान् यथालाभं कतिचिद्वा एकंवा तत्रापि स्वपूजोपयोगिसंहितामात्रं वा लक्षणशालिषु पुस्तकेषु लेखयेत् । पुस्तकेषु द्वाविंशत्यङ्गुळदीर्घं चतुरङ्गुळविस्तारं पुस्तकं लक्ष्मीभद्रम् । एकविंशत्यङ्गुळदीर्घं त्र्यंङ्गुळविस्तारं श्रीरक्षम् । विंशत्यङ्गुळदीर्घं यवहीनत्र्यङ्गुळविस्तारं चन्द्रकान्तम् । इदमुत्तमत्रयम् । अष्टादशाङ्गुळदीर्घं अर्धाधिकाङ्गुळद्वयविस्तारं नळिनम् । सप्तदशाङ्गुळदीर्घं त्रियवाधिकाङ्गुलत्रयविस्तारं श्री-

निवासम् । षोडशाङ्गुळदीर्घं द्वियवाधिकाङ्गुळद्वयविस्तारं श्रीभद्रम् । इदं मध्यमत्रयम्। पञ्चदशाङ्गुळदीर्घं यवाधिकाङ्गुलद्वयविस्तारं लक्ष्मीनिवासम् । चतुर्दशाङ्गुलदीर्घमङ्गुळद्वयविस्तारं उमाभद्रम् । त्रयोदशाङ्गुळदीर्घं यवहीनाङ्गुलद्वयविस्तारं वीरभद्रम् । एवंविधेषु पुस्तकेषु यजमानस्ययान्यनुकूलानि पत्रीयचतुष्टयांशतृतीयांशयोर्मद्ध्येमद्ध्यगतसुषुरवन्ति कारयित्वा यवोदरमानैः कार्पाससूत्रै राबध्नीयात् । एतेषां शिवज्ञानपुस्तकानां पूजनाय शिवस्य दक्षिणपश्चिमे वायव्यभागेवा त्रयस्त्रिंशद्धस्तप्रभृतिषु त्रिहस्तपर्यन्तेषु परिमाणेष्वन्यतमपरिमाणवद्विद्याकोशगृहं कृत्वा सुगन्धिचन्दनाद्यनुलिप्तभित्तिकस्य तस्य मध्ये नागदन्तादिरचितं सुवर्णरेखादिचित्रितं विद्यासिह्मासनं निधाय तत्र दुकूलादिकमास्तीर्य तन्मध्ये स्वर्णरूप्यताम्रकांस्यारकूटलोहदारु वेणुविदळिकादिकृतां विद्यारत्नकरण्डरूपां मञ्जूषां निधाय तस्यां पुस्तकानि निदद्ध्यात् । तेषु 'सर्वेभ्यश्शिवज्ञानेभ्योनमः' इति गन्धपुष्पधूपदीपनैवेद्यैस्संपूज्य ।। 'सर्वज्ञानप्रदं शम्भुं सर्वाज्ञानविघातकम् । कायेन मनसा वाचा विद्यापीठाश्रयंभजे' इति स्तुत्वा नमस्कुर्यात् । पुस्तकालाभे चतुरश्रमण्डले अष्टदळपद्मं तदावारक मष्टादशदळपद्मंच लिखित्वा कर्णिकायां हौं शिवायनमः । हां वागीशायनमः । इति वागीश्वरसहितं शिवं संपूज्य पूर्वादिषु दशसु दळेषु कामिकादीन् सुप्रभेदान्तान् शिवेनाधिकरणान्तरनिरेपेक्षेण साक्षान्निर्मिततया शैवसंज्ञान् दिव्यागमान् संपूज्य अष्टादशसु दळेषु विदयादिवातुळान्तान् अनादिरुद्राद्यधिकरणेन शिवेन निर्मिततया रौद्रसंज्ञान् पूजयेत् । अथ गुरुं स्वपीठस्थं गत्वा तस्य पादौ प्रक्षाळ्य शिवबुद्ध्या गन्धादिभिस्संपूज्य पुष्पाञ्जलित्रयं कृत्वा साष्टाङ्गं त्रिः प्रणम्योत्थाय भूमौ जानुनी न्यस्य कृताञ्जलिपुटः क्षमस्वेति ब्रूयात् । यदि 'मधुलुब्धो यथा भृङ्गः पुष्पात्पुष्पं वनान्तरे । ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्' इति शास्त्र मनुसृत्याधिकज्ञानार्थ मन्यं गुरु माश्रयति, तथाऽपि पूर्वगुरुमपि यथापूर्वं पूजयेत् । ततश्शिवसमीपमागत्याष्टपुष्पिकया शिवं संपूज्य विशेषार्घ्यं दत्वा प्रणामपुरस्सर मभितः प्रार्थनां कृत्वा 'न्यूनं वाऽप्यधिकं वाऽपि यन्मया मोहतः कृत्म् । सर्वं तदस्तु संपूर्णं त्वत्प्रसादात् प्रभोममे'ति संप्रार्थ्य'अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षन्तव्यं भक्तवत्सल ।। स्वामिन्क्षुद्रेण दासेन मलीमसधिया मया । कदर्थितो वायद्भक्तिवशात् प्रीतः क्षमस्वत' दिति विज्ञापयेत् । ततस्सद्योजातादिक्रमेण पञ्चसुशिरस्सुशिवमभ्यर्च्यास्त्रादिहृदयान्तान्यङ्गानिच प्रातिलोम्येन संपू-

ज्य पूर्ववद्यथेष्टमूद्र्ध्वमुखोभवेति संप्रार्थ्य हां हौं शिवाय साङ्गाय पराङ्मुखार्घ्यं स्वाहेति पराङ्मुखार्घ्यं दत्वा सद्यादीनि ब्रह्माण्यस्त्रादीन्यङ्गानिच गर्भावरणरूपाणि देवस्याङ्गेषु योजयेत् । अन्येभ्योऽपि तत्तदावरणदेवेभ्यः पराङ्मुखार्घ्यं दद्यात् । हुंफडन्तास्त्रेण करद्वयाङ्गुष्ठतर्जन्यग्राभ्या मूद्र्ध्वं पुष्पं प्रक्षिपन्नाराचमुद्रया मन्त्रानुत्थाप्य हां हं हां शिवमूर्तयेनमः इतिदिव्यमुद्रया शिवस्य हृदयस्थाने संयोज्य तेषां तत्र लयं विभावयेत् । तदनु गुहुगृह विद्यापीठ सप्तगुरु महालक्ष्मी गणपति द्वारपालेभ्योऽपि पराङ्मुखार्घ्यं दत्वा स्वस्वमन्त्रेणतान्विसर्जयेत् । ततः परिवारदेवेभ्योपि पराङ्मुखार्घ्यंदत्वा प्रत्येकं सपुष्पैर्वस्त्रै राच्छाद्य अस्त्रमन्त्रेण पेटकस्य पार्श्वेषु निदद्ध्यात् । ततश्शिवमन्त्रं समुच्चार्य पद्मपीठाल्लिङ्गमादाय दुकूलादिभिस्संवेष्ट्य पेटकमध्ये विन्यस्य भीमरुद्रं स्मरन् रक्षेति शिवाज्ञां विज्ञाप्य पिधानं कुर्यात् । ततः मिश्रपूजां कुर्यात् । प्रागकृतचण्डपूज शिवस्योद्वासनानन्तर मावाहनादिसर्वोपचारसहितां चण्डपूजां कुर्यात् ।।

इत्थं प्रातर्मध्याह्नसायार्धरात्रिषु प्रातरादिषुकालेषु वा प्रातरादिकालद्वये वा प्रातःकालमात्रेवा घटिकात्रयेण पूजा कर्तव्या । संक्रान्त्युपरागाष्टमीचतुर्दश्यादिव्यतिरिक्तकालेषु बुभुक्षुणा रात्रौ पूजा वर्जनीया । तेनापि त्रिकालपूजा क्रियतेचेदस्तमयं समारभ्य घटिकात्रयमध्ये सायङ्कालपूजा समापनीया । मुमुक्षोस्तु नकालनियमः । यद्वा बुभुक्षोरपि न कालनियमः । यथासंभवकाले तु यथा- संभवनाडिकाः । 'आत्मार्थयजनं कुर्या द्यथाशक्त्यनुरोधत' इत्यप्यागमदर्शनात्। एवं प्रपञ्चोपचारान् कर्तुमशक्नुवन् षोडश पञ्चोपचारान्कुर्यात् । आवाहनासन पाद्यार्घ्याचमनस्नान वस्त्रोपवीत गन्धपुष्प धूपदीप नैवेद्य मुखवास स्तोत्रसहितप्रणामप्रदक्षिणसहितविसर्जनानि षोडशोपाचराः । यद्वा- आसनावाहन पाद्याचमनार्घ्यस्नान वस्त्र गन्धपुष्प नैवेद्य तांबूल धूपदीपरात्रिक भस्म चुळकोदकानि षोडशोपचाराः । आवाहनासन पाद्याचमनार्घ्य स्नान वस्त्रगन्धपुष्पनैवेद्यानि दशोपचाराः । गन्धपुष्पधूपदीपनैवेद्यानि पञ्चोपचाराः । यद्यपि 'पार्थिवं गन्धपुष्पाद्यं कन्दमूलफलादिकम् । आप्यं वारि पयो वस्त्रं दधि गोमूत्रकादिकम् ।। आग्नेयं हेमरत्नादि दीपमाभरणादिकम् । वायव्यं चामरं धूपं व्यजनं ताळवृन्तकम् । नाभसं गेयवाद्याद्यं वीणावेणुस्वनादिकम् । एते पञ्चोपचारास्तु कथिता श्शास्त्रवेदिभि'रिति पञ्चोपचाराः प्रपञ्चेन

दर्शिताः । अथाप्यशक्तानां गन्धादिनैवेद्यान्तोपचारा एव क्रमात् पार्थिव नाभस वायव्य तैजसाप्याः पञ्चोपचाराः । सर्वोपचाराश्शिवस्यावाहनवत् निश्वासोछ्वासरूप-चन्द्रार्कगतिनिरोधेन कर्तव्याः इत्यागमप्रसिद्धेः केषुचि दुपचारेषु मात्रागणनेन् काल-नियमोऽप्यागमेषु दर्शितः । आवाहने द्वादश मात्राः । पाद्ये पञ्च। आचमने तिस्रः । अर्घ्ये एकम् । गन्धे षट् । धूपे द्वादश । दीपे षट् । नैवेद्ये चतुर्विंशतिः । आरा-त्रिके सप्त । नीराजने षोटश । भस्मार्पणे सप्त । छत्रे पञ्च । चामरे दश । व्यजने तिस्रइति । एवं चन्द्रार्कगतिनिरोधेन क्रियमाणेषूपचारेषु तत्तन्मन्त्राः मनसैव जप्त-व्याः । मन्त्राश्च प्रासाद शिवमन्त्र पञ्चब्रह्म षडङ्गरूपा स्तत्तदुपाचारेषु यथाविधि विनियोक्तव्याः । तत्रावाहनपाद्य वस्त्र विलेपनभूषणदर्पणच्छत्रचामर तालवृन्त जप-स्तोत्र नमस्कारेष्वन्येषुचविशेषोक्तिरहितेषूपचारेषु मन्त्रान्ते नमश्शब्दः । अर्घ्यस्नान-धूपदीपनैवेद्यपानीयमुखवासनीराजनपवित्रजपपूजासमर्पणेषु स्वाहाशब्दः । मार्जन सेचन पुष्पपूर्णाहुतिषुवौषट्शब्दः । मलस्नानशोधन पाशच्छेदन प्रोक्षण ताडनभेदन विघ्ननिवारणेषु हुंफट्शब्दः । रक्षायां फट्शब्दः । आचमेनेस्वधाशब्दः। एवमुक्त-नियमैः पञ्चोपचारानपि कर्तुमशक्तः केवल मष्ट- पुष्पिकयाऽर्चयेत् । 'आसने प्रथमं पुष्पं दातव्यं शुद्धचेतसा । मूर्तिध्यानं हृदा कार्यं पुष्पेणैवापरेणतु ।। पञ्चपुष्प-प्रदानेन पञ्चाङ्गानि प्रकल्पयेत् । शिवं तथाऽष्टमेनैव कथिताचाष्टपुष्पिका' । पञ्चा-ङ्गानि मूर्धादीनि पञ्चब्रह्माणि नैत्रवर्जितानि हृदयादीनि वा। 'एतानि चाष्टपुष्पाणि सर्वसाधारणानि तु । सर्वसिद्धिप्रदानीह तथा सर्वाश्रमेषु च ।। सर्वेषां चैव वर्णानां सर्वसाधारणानिच । एककालं द्विकालं वा त्रिकालं वा प्रपूजयेत् । प्रातर्मध्याह्न-समये तथा चास्तमिते रवौ । पूजयेत्परया भक्त्या अष्टपुष्पविधानतः ।। दरिद्राणा मनाथानां वालस्त्रीवालिशेषु च । भोगिनां व्याधिजुष्टानां तथा ध्यानार्पितात्मनाम् ।। शिवशास्त्रानुरक्तानां नानासिद्धिहितात्मनाम् । अनुरक्तविरक्तानां कथितासाऽष्ट-पुष्पिका'इति कालोत्तरवचनात् । भोगो राज्यपरिपालनम् । तद्वन्तो भोगिनः । तेषां राज्यपरिपालनं कुर्वतामित्यर्थः । राज्यपरिपालनेन बहुषु शिवस्थानेषु शिवभक्तानां गृहेषुचशिवपूजाप्रवर्तनेन बहुपुण्यं लभ्यते । शिवशास्त्रानुरक्तानां तद्व्याख्यानतद-ध्ययननिरतानामित्यर्थः । शिवशास्त्रव्याख्यानेन हि लोके यथावत् शिवपूजाप्रवर्तनेन बहु पुण्यं लभ्यते । तदध्ययनेन चाग्रे स्वयं यथावद्बहुकालपूजनेन बहुपुण्यं लभ्यत इति ।।

।। कपिलापूजाविधिः ।।

इति शिवपूजां समाप्य कपिलापूजां कुर्यात् । यथा कपिलां गां नन्दा सुभद्रासुरभि सुशीला सुमनस्संज्ञां पञ्चगोत्ररूपायै कपिलायैनमइति गन्धपुष्पादिभिरभ्यर्च्य 'सौरभेयि जगन्मात देवाना ममृतप्रदे । गृहाण वरदे ग्रास मीप्सितार्थं च देहि मे' इति ग्रासं दत्वा 'वन्दिताऽसि वसिष्ठेन विश्वामित्रेण जह्नुना । कपिले हरमे पापं यन्मया दुष्कृतं कृत'मिति संप्रार्थ्य 'गावो ममाग्रतो नित्यं गावः पृष्ठत एव मे । गावो मे हृदये चापि गवां मध्ये वसाम्यह'मिति जपेत् । एतं नरो जपेन्मन्त्री त्रिसंध्यं नियतश्शुचिः । विमुक्तस्सर्वपापेभ्य शिवलोकं प्रपद्यते ।।

।। परार्थालयदर्शनम् ।।

ततः परार्थालयसमीपस्थः पूजान्ते शिवालयं गत्वा तत्सेवामपि कुर्यात् । तत्रायं क्रमः- देवालयसमीपं गत्वा गोपुरद्वारवाह्ये वा बलिपीठस्य बाह्ये वा स्थूललिङ्गात्मकस्य विमानस्य नमस्कारं कुर्यात् । ततो भद्रलिङ्गस्य बलिपीठस्य ध्वजस्तम्भस्य वृषभस्यापि नमस्कारं कृत्वा । (श्लो) 'अन्तः प्रवेशे शिवदर्शनेच शिवार्चनेतत्फलसिद्धिलाभे । देह्यभ्यनुज्ञां भगवन् प्रसन्न स्त्वत्पादपद्मप्रणतायमह्य'मिति वृषभं संप्रार्थ्य बलिपीठाग्रदेशे साष्टाङ्गं शिवं प्रणमेत्। देहं वस्त्रेणाच्छाद्य नप्रणमेत् । शिवस्याग्रपृष्ठ वामभाग गर्भगृहेषु च नप्रणमेत् । प्रत्यङ्मुखे चोत्तरदिङ्मुखेच लिङ्गे वामभागे प्रणमेत् । प्रणम्यच देवस्य पुरतः पुष्पाञ्जलिं क्षिपेत् । ततः प्रदक्षिणंकुर्यात् । गर्भगृहेप्रदक्षिण मर्चकस्यैव । अन्तर्मण्डले प्रदक्षिणं दीक्षितानामेव । अन्तर्हारादिषु सर्वेषाम् । तत्रान्तर्हारे प्रदक्षिण मेकगुणम् । मध्यहारेत्रिगुणम् । मर्यादायाञ्चतुर्गुणं । महामर्यादायां पञ्चगुणम् । क्षेत्रावधौषडगुणीएवंबलकालाधिकारानुरूपेप्रदेशे एकविंशतिंपञ्चदशवा सप्तवापञ्चवात्रीणिवा प्रदक्षिणानिकुर्यात् । अत्यन्तमनवसरे एकंप्रदक्षिणंवा कुर्यात् । एवंप्रदक्षिणंकुर्वन् गर्भगृहेन्तर्मण्डलेच संभावितं सोमसूत्रलङ्घनं नकुर्यात् । तल्लङ्घनवर्जनार्थं गर्भगेहे सोमसूत्रप्रभृति सव्यापसव्यमेव कर्तव्यम् । ततोबहि रन्तर्मण्डलमात्रे सव्यापसव्यम् । तत्वैन्द्रादि सोमसूत्रादि वा कार्यमिति प्रागुक्तम् । प्रदोषेतु वृषादिचण्डनाथान्तं वृषभं सोमसूत्रकम् । पुनर्वृषं

चण्डनाथं नाळदेशस्य पार्श्वतः।। पुनः प्रयाया च्चण्डञ्च तथैव वृषपष्ठकम् । एवं सव्यापसव्यन्तु प्रदक्षिण मिहोच्यते । आद्यन्तं वृषदेवस्य चतुस्स्थान मुदाहृतम् । त्रिचण्डस्थानसंयुक्तं द्विस्थानं सोमसूत्रक'मित्युक्तप्रकारेण कर्तव्यम् । सोमसूत्रञ्च प्रासादाद्बहिर्नाळप्रदेशे प्रासादविस्तारमानं तदर्धमानं वा । तस्य लङ्घने दोषः । सूत्राद्बहिर्लङ्घनेतु नदोषः।। तदभ्यन्तरेऽपि सङ्कटे तृणादिक मन्तर्धाय लङ्घनीयम् । तृणैः काष्ठै स्तथा पर्णैः पाषाणै र्लोष्टकादिभिः । अन्तर्धानं पुनः कृत्वा सोमसूत्रं तु लङ्घयेत्' इति वचनात्। क्वचिदपसव्यस्य निषेधो दृश्यते। 'सोमसूत्रद्वयं यत्र यत्र वा विष्णुमन्दिरम् । अपसव्यं नकुर्वीत कुर्यादेव प्रदक्षिणमिति ।। ततो द्वारपालं नन्दिकेश्वरं च नमस्कृत्य त्ततदनुज्ञयाऽन्तः प्रविश्य विघ्नराजं पुष्पाञ्जलिविकिरण मस्तकाहतिपूर्वकं नमस्कृत्यं मण्डपं प्रविश्य देवदेवं नमस्कृत्य मस्तके हृदये वाऽञ्जलिं बद्ध्वा यथाधिकारं वैदिकागमिकं पौराणिक लौकिक द्राविडादिस्तोत्रैः स्तुवीत । तत्राचार्यस्यैव गर्भगृहं प्रविश्य सेवा । इतरेषां ब्राह्मणाना मर्धमण्डपं प्रविश्य । क्षित्रियाणा मर्धमण्डपद्वारमुखेऽवस्थाय । वैश्यानां वृषाग्रे । शूद्राणां वृषपृष्ठे । वैश्यशूद्राणां वृषाग्रे वृषपृष्ठेच गोमयेन चतुरश्रमण्डलं कृत्वा तत्रैव पुष्पाञ्जलिर्दातव्यः । एवं नृत्तमूर्त्यादीनामपिपुष्पोपहारपूर्वकं प्रणामः कार्यः । एवं प्रणामानन्तरं चण्डेश्वरं प्रणमेत् । इत्थं पीठादिचण्डान्तनमस्कारानन्तरं देवालेय संभाविताना मपराधानां क्षाळनाय देवस्य सन्निधौ यथाशक्ति देवस्यमूलमन्त्रं जप्त्वा देवस्य पृष्ठीकरणं विना निर्गच्छेत् । अपराधाश्च शिवालयमध्ये वाहनारोहण सोपानहसंचारगोपुरप्रतिमाच्छायालङ्घन निर्माल्यस्पर्श तल्लङ्घन शिवबलिपीठमध्यसञ्चार प्रमदास्पर्श रागपूर्वकतद्वीक्षण वृथाहास गानभाषण सोत्तरीयप्रदक्षिणनमस्कारैकहस्तनमस्कार वामभागादिनमस्काराकालनमस्कारप्रभृतयः । एतेषु संभावितान् वर्जनीयानपराधान् क्षमाप्य निर्गच्छेत् । एवं शिवं सेवमानेन ग्रामभूषणादिपत्रपुष्पपर्यन्तेन द्रव्येणवा संमार्जनादिना शरीरव्यापारेण वा देवालयोपकारपर्यवासायिवाङ्मात्रेणवा कैङ्कर्यं कृत्वैवसेवनीयम् । प्रतिदिनं सेवाया मशक्तश्चेत् अष्टम्यादिषु सेवेत । अष्टम्यामष्टभिर्दिवसैः पर्वणि पक्षेण संक्रान्तौ मासेनच कृतस्य पापस्य क्षयः । प्रदोषे त्रिविधकरणार्जितानां महत्तराणामपि पापानां क्षयः । विषुवायनोपरागमहोत्सवादिषु सेवया शिवपदप्राप्तिः। ततः गृहमागत्य यथावसरं स्वल्पमात्रं वा सिद्धान्तशास्त्रश्रवणं तदभ्यासंवा दीक्षितैस्सहादीक्षितसन्निधिं परिहृत्य कुर्यात् । 'नप्रकाश्यमिदं ज्ञान म-

भक्तानां वरानने । रक्षणीयं प्रयत्नेन तस्करेभ्यो यथाधन'मिति वचनात्। अथ मध्याह्नसमये प्रपञ्चेन संकोचेनाष्टपुष्पिकामात्रेण वा पूजयेत् । कुतश्चिद्वैकल्यात् परिगृहीतलिङ्गार्चनालाभे तुल्यानुष्ठायिना परेणार्चिते लिङ्गे संक्षेपेणाष्टपुष्पिकामात्रं कुर्यात् । 'प्रणवो मातृका माया व्योमव्यापी षडक्षरम् । प्रसादोऽघोरमन्त्रश्च सप्त साधारणामताः' ।। एवं यथाकथञ्चित् शिवमभ्यर्च्य काले भोक्तुमिच्छन् सर्वस्मादपि पाकादग्रयमुद्धृत्य तत्रार्धं शिवाय निवेद्य अर्धेन यथाधिकारं वैदिकं शैवं च होमं कुर्यात् । वैदिको वैश्वदेवहोमः । शैवः चुल्लीहोमः ।।

।। चुल्लीहोमः ।।

तस्यायं क्रमः । चुल्लीं निरीक्षणादिभिस्संशोद्ध्य तत्राग्निं पूरककुंभकाभ्यां बिन्दुनाभिस्थानाभ्यां सहैकीकृत्य भौतिकबैन्दवजाठराग्नित्रयं रेचकेन निस्सार्य पिङ्गळया चुल्लिकाग्नौ निक्षिप्य तदनन्तरं अग्नये नमः । सोमाय नमः। सूर्याय नमः। बृहस्पतये नमः। प्रजापतये नमः। सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो विश्वेभ्यो नमः। अग्नये स्विष्टकृते नमः । इत्यग्नावाग्नेयादिपूर्वान्तमग्न्यादीन् संपूज्यस्वाहान्तैस्तत्तन्मन्त्रैर्हुत्वा तान्विसर्जयेत् ।।

।। निर्माल्यभोजनम् ।।

ततो निवेदितं तच्छेषं वा भुंजीत । शिवनिवेदितभोजने फलवचनानि बहूनि श्रूयन्ते - 'मदीयभुक्तनिर्माल्यं पादांबु कुसुमं दळम् । धर्ममर्थंच कामञ्च मोक्षं च ददते क्रमात्' इति ।। तन्निषेधवचनान्यपि श्रूयन्ते 'नधारयेत् क्वचिच्छंभो र्निर्माल्यं नच भक्षये'दित्यादीनि । एतेषां शिवदीक्षासहित तद्रहितविषयत्वेन व्यवस्था । 'निर्माल्यं निर्मलं शुद्धं निर्मलत्वादनिन्दितम् । तस्मादभोज्यं निर्माल्य मशुद्धै रशिवात्मकैः।। जिह्वाचापल्यसंयुक्त शिवसंस्कारवर्जितः । शिवनिर्माल्यभोजी चेत् रौरवं नरकं व्रजे' दिति शिवपूराणवचनादिति केचित् । कामिकादिसिद्धान्ततन्त्रेषु दीक्षितानामेव समयाचारविधानेन 'निर्माल्यं नचभुञ्जीते'ति 'शिवभक्तान्नं न निन्दये' दित्यादीनि निषेधवचनानि 'निर्माल्यभक्षणेऽघोरं प्रमादादयुतंजपे'दिति प्रायश्चित्त-

विधानानि च श्रूयन्ते । अतः 'स्वाद्यानिचादनीयानि पेयान्यन्यानि यानि च । देयानि तानि वै शंभो रश्नीयाद्दासभावतः' इत्यादि पुराणवचनानि वैदिकपौराणिकपाशुपतादिविहित शिवसंस्कारेण ये दीक्षितास्तेषामेव शिवनिर्माल्यं ग्राह्यम् । नतु कामिकादिसिद्धान्ततन्त्रेण दीक्षितानामिति केचित् । कामिक एव'अशुद्धात्माऽशुचिर्लोभान्मद्भुक्तं पावनं परम् । भक्षयन्नाशमाप्रोति रसभोक्ता यथाद्विजः ।। मल्लिङ्गधारिणोलोके देशिका मत्परायणाः मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु'इति वचनात्, 'उपवाससहस्राणि प्राजापत्यशतानिच । शिवप्रसादसिद्धस्य कोट्यंशेनापि नोसमाः' इत्यादिवातुळागमप्रभृतिवचनदर्शनाच्च । सिद्धान्ततन्त्रे दीक्षितानामपि शिवनिवेदितं प्रशस्तमेव । शिवनिर्माल्यनिषेधप्रायश्चित्तवचनानि तु 'देवस्वं देवताद्रव्यं नैवेद्यञ्च निवेदितम् । चण्डभुक्तबहिःक्षिप्त'मिति पञ्चविधनिर्माल्यविषयाणि । कामिके 'देवस्वं देवताद्रव्यं नैवेद्यञ्च निवेदितम् । चण्डद्रव्यञ्च निर्माल्यं निर्माल्यं षड्विधं भवेत् ।। ग्रामादीशस्य देवस्वं देवद्रव्यं षटादिकम् । नैवेद्यं कल्पितं तस्मै देवोच्छिष्टं निवेदितम् ।। चण्डद्रव्यंतु तद्दत्तं निर्माल्यं प्रेरितं बहि'रिति निर्माल्यषाड्विध्य निर्माल्योपभोगदोपसंकीर्तन तत्परायश्चित्तोपदेशानन्तरमेव निवेदिताख्यनिर्माल्यस्वीकारानुमत्यर्थ 'मशुद्धात्माऽशुचिर्लोभा'दित्यादिसार्धश्लोकद्वयस्य पठितत्वात् । एवञ्च सिद्धान्ततत्रेषु शिवनिवेदितनिषेधवचनानि तदुक्तशिवदीक्षारहितविषयाणीत्यपरे ।। सुप्रभेदे- 'सदाशिवस्य निर्माल्यं मनुष्याणां नभोजनम् । पशूनाञ्च गजानाञ्च जलेवाऽथ विनिक्षिपेत् ।। अथवा वह्निना दह्याद्भूमौवा खातयेद्बुधः' इति सदाशिवनिर्माल्यस्य मनुष्यमात्रसाधारण्येनाभोज्यत्वं प्रतिपाद्य तस्यभूवन्हिगोगजादिष्वेव प्रतिपत्तिवर्णन्नाच्च सदाशिवनिर्माल्यं दीक्षितानामप्यभोज्यमेव । तेषां शिवनिर्माल्यं प्रशस्तमिति वचनानि तु सकळनिर्माल्यविषयाणि । 'प्रतिमासु च सर्वासु न चण्डोऽधिकृतोभवे'दिति सकळेषु चण्डाधिकारनिषेधात् । कारणे' सकळानाञ्च नैवेद्यं सर्वेषां भोजनं भवे'दिति सकळनैवेद्यानुमतिवर्णनात् । तदपि शिवदीक्षितैस्तत्परिचारकैरेव भोक्तव्यम् । सुप्रभेदे-'सदाशिवस्य निर्माल्य'मित्याद्युक्त्यनन्तरं 'सकळानां तु निर्माल्यं परिचारकभोजनम्। तदप्यन्यजनानां तु भोजने दोषकृद्भवेत्' इत्युक्तत्वादित्यपरे । सदाशिवनिर्माल्येष्वपि मनुष्यादिस्थापितशिवलिङ्गार्पितेष्वेव निषेधः । नतु चरलिङ्गादिषु । तेषु चण्डाधिकाराभावात् । 'बाणलिङ्गे चरे लोहे रत्नलिङ्गे स्वयंभुवि । प्रतिमासुच सर्वासु नचण्डोऽधिकृतो भवेत्।।

लिङ्गेस्वायंभुवेबाणे रत्नजेरसनिर्मिते । सिद्धप्रतिष्ठितेलिङ्गे न चण्डोधिकृतोभवेत्'इति च वचनादित्येके । चललिङ्गादिषु चण्डाधिकारो नास्तीति वचनानि वैदिक-पौराणिक वामदक्षिणतन्त्रादिविषयाणि । नतु कामिकादिसिद्धान्तविषयाणि । 'स्थिरेचरे तथा रत्ने मृद्दारौशैलकल्पिते । लोहचित्रमये बाणे स्थितश्चण्डोनियामकः।। सिद्धान्ते नेतरे तन्त्रे नवामे नच दक्षिणे' इति ।। 'अव्यक्तव्यक्तलिङ्गेषु मण्डले स्थण्डिलेऽनले । चरे स्थिरे तथा रत्ने मणिचित्रादिके तथा ।। गन्धान्नसंभवे लिङ्गे मृद्भस्मफलककल्पिते । तथा पुष्पमये लिङ्गे चण्डपूजा नियामिके'ति च कालोत्तरादिषु विशेषदर्शनात् । अतो निर्माल्यविधिनिषेधयोश्चरस्थिरादिविषयत्वेननव्यवस्था । किन्तु निर्माल्यविशेषविषयत्वेन । 'तांबूलं भस्म तैलं च गन्धपुष्प मपूपकम् । फलादि भक्षणद्रव्यं निर्माल्यमिति नोच्यत' इति वचनादितिकेचित् । कामिके-स्वेष्टलिङ्गे च यद्दत्तं चरुवत्तत्र संशयः । नैवेद्यं भ्रातृपुत्राणां भगिनीनां च दापये'ति चरुदृष्टान्तवचनात् । कारणे'स्फाटिकं बाणलिङ्गञ्च स्थापितं चरमेव वा । तन्निवेदितनिर्माल्यं न निर्माल्यं प्रकल्पयेत् ।। बालानां युवतीनाञ्च भोजनं बलवर्द्धन' मेत्यनिर्माल्यत्वप्रतिपादनाच्च चरलिङ्गादिनिवेदितान्नमपि भोज्यमेव । किन्तु पूजकस्य न भोज्यम् । 'नैवेद्यं भ्रातृपुत्राणा' मित्यादिविशेषवचनात् । तांबूलादिमात्रस्य ग्राह्यत्ववचनन्तु मनुष्यादिस्थापितलिङ्गविषयमित्यपिकेचित् । 'नैवेद्यं कल्पयित्वातु शिवायेतितदूर्ध्वतः । निवेद्यं मह्यमुच्छिष्टं भुङ्क्ते प्रत्यहमादरात्।। सोऽयं मत्सदृशः प्रोक्तः चरुद्रव्यस्तथाभवे' दिति कामिके निवेदनकर्तुरपि तदुच्छिष्टभोजनप्रतिपादनात्पूजकस्यापि शिवनिवेदितं भोज्यमेव । तस्य निवेदितभोजननिषेधवचनानितु संहाररुद्रादिनिवेदितविषयत्वेनयोज्यानीत्यपि केचनवदन्ति । सदाशिवमूर्तौ परमशिवावाहनपुरस्सरं तत्पूजानिरूपणावसानएव तन्निवेदितनिषेधस्यदिव्यागमेषुबहुशश्श्रवणात् विधिनिषेधसहस्रशबळितं सर्वविधमपिशिवनिर्माल्यंवर्जनीयमित्येवयुक्तम्। 'श्रूयतेचमहान्दोषः श्रूयतेच महाफलम् । फलं तत्रपरित्याज्यंदोषोहिबलवत्तर' इति वचनात् । नचकामिके - 'पत्रंपुष्पं फलं तोयमन्नं पाद्यमथौषधम् । अनिवेद्य नभुञ्जीत भगवन्तं सदाशिव'मित्यनिवेदितभोजनेऽपि निषेधःश्रूयते इति वाच्यम् । तस्यातिथिसत्काररहितभोजननिषेधव त्तच्छेषभोजनविधिपरत्वसंभवात्, 'अन्नाद्य मौषधं तोयं पत्रं पुष्पं फलादिकम् । शिवाय दत्वातच्छेषं भोज्यं भुञ्जीत बुद्धिमा'निति सिद्धान्तशेखरे तथैवप्रतिपादनाच्चेत्येवमितरेवर्णयन्ति । एवं

निर्माल्यविधिनिषेधवचनानां विचारे नव पक्षास्सपन्नाः । शिवसंस्काररूपदीक्षा-वतामेव शिवनिर्माल्यानुमतिरन्येषान्तन्निषेध इत्याद्यः पक्ष्ः । शिवसंस्कारवत्स्वपि वैदिकदीक्षावतामेवात्याश्रमिप्रभृतीनांतदनुमतिः, नतुकामिकादिसिद्धान्ततन्त्रोक्तदीक्षा-वतां तन्निषेधतद्भक्षणप्रायश्चित्तविधानदर्शनादिति द्वितीयः पक्षः निवेदितव्यितिरिक्त-पञ्चविधनिर्माल्यविषय एव निषेधप्रायश्चित्तोपदेशः । निवेदितं तु तेषामपि ग्राह्यमिति तृतीयः पक्षः । निवेदितमद्ध्येऽपि शिवलिङ्गनिवेदितनिषेधात् सकळनिवेदितमेव ग्राह्यमिति चतुर्थः पक्षः । शिवलिङ्गनिवेदितं न सर्वनिषिद्धं, किन्तु मनुष्यादिप्रति-ष्ठापित स्थिरलिङ्गनिवेदितमेव । चरलिङ्गादिनिवेदितन्तुग्राह्यम् । तत्र चण्डाधिकारा-भावादिति पञ्चमः पक्षः । कामिकादिगत निवेदितनिषेधतदनुमतिवचनानां स्थिर-चरादिविषयतया न व्यवस्था, कामिकादिसिद्धान्तमार्गे चरादिपूजायामपि चण्डस-द्भावात् । किन्तु अन्नादिविषयो निषेधः । फलापूपतांबूलादिविषयाऽनुमतिरिति व्य-वस्था। तदितरेषुविशेषवचनसद्भावादितिषष्ठः पक्षः। चरलिङ्गादिनिवेदितमन्नादिक-मपिग्राह्यमेव । किन्तु भ्रात्रादिभ्योदेयं, नतु पूजकनभोक्तव्यमिति सप्तमः पक्षः । शिवार्पणबुद्ध्याशिवनिवेदितं पूजकेनापि भोज्यमित्यष्टमः पक्षः । फलनिषेधवच-नयोर्निषेधवचनस्य बलीयस्त्वात् सर्वस्यापिशिवनिर्माल्यस्यवर्जनमेव युक्तमिति नमवःपक्षः ।। एतेषु नवमःपक्षस्तावदत्यन्तमयुक्तः। शिवनिर्माल्यस्वीकारे महा-फलप्रतिपादकानां बहूनां दिव्यागमपुराणादिवचसा मप्रामाण्यप्रसङ्गात् । नह्यार्षेषु वचनेषु वर्णमात्रमप्यप्रामाण्यं सहते । नितरां शिववाक्येषु । येष्वर्थवादकतया प्रामाण्योपपादनमपि महते प्रत्यवायायेति सर्वदिव्यागमघण्टाघोषः । 'श्रूयतेच महा-न्दोष'इत्यादि वचनं तु यत्र विधिनिषेधयोरुभयोरप्यन्यत्रप्रामाण्यावकाशः तत्र तयोः द्वयोः क्वचिन्मेळने निषेधोबलीयानित्येतत्परम् । यथाद्वादश्यामामलकप्राशस्त्यवचन-प्रामाण्य मर्कवारमेळनरहितद्वादश्यां सावकाशं अर्कवारे तन्निषेधवचनप्रामाण्यं द्वादशीमेळनरहितेऽर्कवारे सावकाशम् । द्वादश्यर्कवारमेळने सत्यामामलकफल-निषेधवचनद्वयप्राप्तौ निषेधवचनं बलीय इति । फलवचनानां सर्वथैवाप्रामाण्योप-पादकं निषेधवचनानां बलीयस्त्वंतु प्रामाणिका नाद्रियन्ते । अतो विधिनिषेध-वचनानां विषयव्यवस्थाप्रदर्शनमेव युक्तम् ।

(श्लो) तां तु प्रदर्शयिष्यामः पूर्वदर्शितवर्त्मना । सर्वागमाविरोधेन सर्वशैवानुमोदिनीम् ।। शैवानां भोजनं त्रिविधम् । शिवपूजासमाप्तौ बाह्यकुण्डे शिवाग्निकार्यवत् तदनन्तरं शिवाग्निकार्यान्तर मात्मभोजनमिति भावनयैकम् । नैवेद्यसमये निवेद्यमानद्रव्याणां रूपार्पणात्मकं शिवे निवेदनस्यारम्भमात्रकृत मात्मभोजनन्तु शिवाय तद्रुच्यर्पणात्मकनिवेदनपूरणमिति भावनया द्वितीयम् । प्रथमं निवेदनसमय एव परस्वदादियागीयहविरिव सूक्ष्मरूपतया नैवेद्य रुच्यासह शिवेन उपभुक्तमेवात्मभोजनं शिवदासस्य कर्म तदुच्छिष्टस्वीकरणरूपमिति भावनया तृतीयम् । तत्राद्यं सुप्रभेदे वह्निकार्यपटलेप्रपञ्चितम्- 'अग्निकार्यस्य चान्तेतु प्राणाग्नौहोममाचरेत् । तत्पार्श्वे वह्निशालायां भोजनस्थानमुच्यते ।। गृहेवाऽपि प्रकर्तव्यं प्राणाग्नियजनं परम् । तत्स्थानं गोमयालिप्तं शुद्धं कृत्वा विशेषतः ।। पिष्टचूर्णैरलंकृत्यसवितानं सदीपकम् । सौवर्ण राजतं ताम्रं कांस्यं वा कदळीदळम्। पात्रमेतत्तु सङ्ग्राह्यंशोधयित्वा यथार्हकम् ।। पात्रेऽशेषाणि संयोज्य स्वात्मस्थं शिवमर्चयेत् । आत्मातु यजमानोऽसौ बुद्धिस्तत्पत्निकास्मृता ।। केशरोमाणिदर्भास्स्युर्जिह्वाद्या यज्ञपात्रकम् । हृत्पुण्डरीकवेद्यां तमन्तस्थाग्नौ सुपूजयेत् ।। रोमदर्भान्परिस्तीर्य प्रणवं शिवसंयुतम्। उच्चार्य परिषिच्याथ शिवेनोद्धुक्ष्य मन्त्रवत्।। शिवमन्त्रं जले जप्त्वा ब्रह्माण्यङ्गान्यनुक्रमात् । शिवं ध्यात्वा शिवायेति जलं पीत्वा हृदा पुनः ।। शिवाय जुहुया दीशमन्त्राद्यैर्ब्रह्मपञ्चभिः। मध्यमानामिकाङ्गुष्ठै रादायान्नं शनैश्शनैः ।। यच्चामृतेत्यादिनैव जलं पीत्वा विशेषतः। पञ्चाहुतीश्च जुहुयात् प्राणमन्त्रैस्तु पञ्चभिः ।। पात्रसंस्पर्शनं कृत्वा पश्चाद्भुञ्जीत साधकः । आचम्य च विधानेनादित्याभिमुखसंस्थितः ।। उदरं शिवमन्त्रेण सव्येनाभिमृशेत्ततः । दक्षिणांङ्गुष्ठकेनांभः पादाङ्गुष्ठे तु दक्षिणे ।। स्रावयेत्तु शिवं स्मृत्वा हृन्मन्त्रं तु समुच्चरन् । चुळकोदकमेतत्स्यात् स्वात्मनःपादमूलतः।। प्राणाग्निहोत्रमित्येवं नित्यमेतदुदाहृतम्। अग्निकार्य मिदं प्रोक्तं शृणुत्वं कुण्डलक्षण'मिति ।। इदं भोजनमनिवेदितान्नेनैव कर्तव्यम् । तदर्थमनिवेदितान्नसद्भावः परार्थपूजाया 'मेकभागं निवेद्यं स्यादेकभागं हुतं भवेत् । एकभागं तु बल्यर्थं शेषमाचार्यभोजन'मिति आगमवचनैर्दर्शितः । आत्मार्थपूजायां 'पाकादर्धं समुद्धृत्य तस्यार्धं शंभवेऽर्पयेत् । अग्नावर्धेन जुहुयात् तद्विधिश्च निगद्यत'इत्यादि चुल्लीहोमप्रकरणागमवचनैर्दर्शितः । द्वितीयभोजनन्तु वातुळोत्तरेदर्शितम्- 'रूपं समर्प्य द्रव्यस्य रुचिमप्यर्पयेच्छिवे । उभयार्पणहीनं चेत्

नैवेद्यं निष्फलं भवेत् ।। तत्त्रसादभोगान्तंनैवेद्यार्पणमुच्यते । प्रसाददानहीनं चेत् नैवेद्यमपि निष्फल'मित्यादिना । इदमारब्धासमाप्तनिवेदनक्रियेणान्नेन कर्तव्यम् । नैवेद्योपचारसमये देवस्य पुरतो यन्नैवेद्यं निहितं तस्य तदानीं रूपार्पणेनारब्धा निवेदनक्रिया रुच्यर्पणपर्यन्त मनुवर्तत इति तदेवारब्धासमाप्तनिवेदनक्रियमन्नम् । तच्च देवपित्राद्युद्देशेन दत्तमन्नं तत्समर्पणबुद्ध्येव पूजकश्शिवसमर्पण बुद्ध्या भुञ्जीत। तत्तृतीयं भोजनं । 'मल्लिङ्गधारिणो लोके देशिका मत्परायणाः । मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु ।। स्वाद्यनिचादनीयानि पेयान्यन्यानि यानि च । देयानितानिवै शंभो रश्नीया द्दासभावतः ।। दासमार्गप्रपन्नाये शैवे पाशुपते स्थिताः । तैरेव पेयं-भोज्यं चाघ्रातव्यञ्च मुमुक्षुभि'रिति कामिकागमादिषु प्रसिद्धमिदं भोजनं निवेदितेनैव कर्तव्यम् । देवस्य पुरतो मुमुक्षुभि नैवेद्योपचारसमये यन्निहितं तत्तदानीमेव सूक्ष्म-रूपेण रुच्यासहशिवेनोपभुक्तमिति निवेदितमुच्यते । तदेव शिवोच्छिष्टं शुश्रूषार्थं ब्राह्मणदास्यं प्रपन्नश्शूद्रस्तदुच्छिष्टमिव शिवदास्यं प्रपन्नः भुञ्जीत। एवञ्च शिवनिर्माल्ये यानि सामान्यतो निषेधवचनानि तानि शिवदास्यभावनारहितपशुरूपमनुष्यमात्र-विषयाणि । यानि तु दीक्षितान् शिवदास्यभावनावत एवाधिकृत्य तन्निषेधवचनानि तानि निवेदितातिरिक्तपञ्चविधनिर्माल्यविषयाणीति व्यवस्थाद्वयं प्राचीनैरेव दर्शितम्। अत्र द्वितीयव्यवस्था 'निर्माल्ये षड्विधे भोज्यमेकमेव निवेदित'मित्याद्यागमप्रसिद्धा। प्रथमव्यवस्था शिवपुराणे स्पष्टं प्रपञ्चिता । तत्राहि - अनर्हं मम नैवेद्यं पादांबु कुसुमं दळम् । इतीश्वरेण कथितमिति केचिन्महर्षयः ।। वदन्ति तत्कथं स्वामिन् यथार्थं कथयस्वमे'इति जैमिनिप्रश्ने- 'देवदेवस्य वचसोविषयस्तत्र जैमिने । ये वीर-भद्रशपिताश्शिवभक्तिपराङ्मुखाः ।। शंभोरन्येषु देवेषु ये भक्ता ये न दीक्षिताः । ये शुद्धकर्मिणश्शम्भो रन्यत्र समबुद्धयः ।। तेषामनर्हमीशस्य तत्प्रसादचतुष्टय'मिति व्यासवचनं दृश्यते । अन्यानि चादीक्षिताना मभक्तानां शिवनिर्माल्ययोग्य मित्यर्थे कामिकादिप्रसिद्धानि वचनानि प्रागुदाहृतानि । ननु शिवनिर्माल्यं सकलपातकहरं सकलव्याधिनिवर्तक मखिलयत्रफलप्रद मशेषतीर्थस्नानतुल्यं भुक्तिमुक्त्येक-साधनमिति शिवशास्त्रज्ञैरुद्घुष्यते । भक्तिदीक्षारहितैर्नभक्ष्यं नस्प्रष्टव्य मित्यप्युच्यते । कथमेतदुपपद्यते । तथा सकलपापनिवर्तनशक्त्यादियुक्तं सर्वप्रायश्चित्तादि-वच्छिवनामकीर्तनवद्वा सर्वसाधारणीभवितुमेवहि योग्यम् । कथं केषाञ्चित् परि-हरणीयं स्यात् । अतश्शिवनिर्माल्यं निकृष्टमित्येव केषाञ्चित् परिहरणीय मासीदिति

कुतो नभवति । हरदत्ताचार्यैरपि सममुक्तरीत्योत्कर्षापकर्षसाधारण्येनैवोक्तम्- 'उत्कर्षतः परिहरत्यपकर्षतो वा का वासना भवति कस्य कृते न विद्मः । यद्दीक्षितस्य पतितस्य च तुल्यरूपं प्रत्यादिशन्ति मुनयः कमनीयमन्नम् ।। चण्डाल चण्डिलचितानल शौण्डिकानां गोब्राह्मण ज्वलनदीक्षितयोषितां वा । स्पर्शःकथं भवति भावनया निषिद्धः स्पृष्टेषु वा शिवकथा विहिता विशुद्धिः ।। वर्ज्यान्नमाहुरपि दीक्षित मग्निकल्पं भोज्यान्नमेव कृतराजपरिक्रयं तम् । शङ्खास्थि पावन मपावन-मस्थिनृणामित्थं स्थिते वचनमत्र परायणं नः'इति ।। तस्माद्विविच्येदं कथनीयमिति। किमुत्कर्षतः शिवनिर्माल्यं केषांचित्परिहरणीयं अपकर्षतोवेति । उच्यते । शिवनिर्माल्यं सकलपापहरत्वादिसर्वोत्कृष्टगुणशालीत्यत्र तावन्नविवादावकाशः। येषु पुराणागमेषु केषांचित्तन्निषेधः कृतः तेष्वेव तथाविधगुणशालीत्यपि प्रतिपादितत्वात्। श्रूयन्तेहिपुराणागमेषु वचनानि- 'पादोदकं च निर्माल्यं भक्त्या धार्यं प्रयत्नतः । न तं स्पृशन्ति पापानि मनोवाक्कायजान्यपि ।। भक्षये द्यो नरो भक्त्या पवित्रमिति शंसितः । शुद्धात्मा ब्राह्मणस्तस्य पापं क्षिप्रं विनश्यति ।। मत्प्रसादोदकं पुष्पं सदा धार्य मिहाश्रितैः । रोगिभिश्च विशेषेण विषदिग्धैश्च यत्नतः ।। स्वेष्टलिङ्गे च यद्दत्तञ्चरुवत्तन्नसंशयः । राजसूयसहस्रस्य फलं प्राप्नोति नारद ।। पृथूदकं महातीर्थं गङ्गा च यमुनानदी । नर्मदा सरयूर्विप्रास्तथा गोदावरीनदी ।। सदासन्निहितास्त्वेता श्शंभोः स्नानोदके मुने । शंभोस्स्नानोदकं सेव्यं सर्वतीर्थमयं हि तत् ।। अयुतं योगवां दद्याच्छ्रोत्रियायाहिताग्नये । मम पादजले स्नात्वा तत्फलं समवाप्नुयात्' इत्यादीनिच ।। वैद्यशास्त्रेच- 'निर्माल्यसलिलं प्राश्य देवदेवस्य शूलिनः । क्षयकुष्ठ-ज्वरश्वासैर्मुच्यते किल्बिषै रपि' इति ।। रामायणेऽपि- 'तत्र देवर्षिगन्धर्वा वसुधातलवासिनः । भवांगपतितं तोयं पवित्रमिति पस्पृशु'रिति ।। भागवतेऽपि- 'किं वा शिवाख्य मशिवं नविदुस्त्वदन्ये ब्रह्मादयस्तदवकीर्यजटाःश्मशाने । तन्माल्यभस्मनृकपालवसत्पिशाचैर्ये मूर्द्धभिर्दधति तच्चरणावसृष्ट'मिति ।। एवं परमपावनस्यापि शिवनिर्माल्यस्य स्पर्शे केषांचिन्निषेधश्शिवलिङ्गस्पर्शे निषेध इव तेषामनधिकारप्रयुक्त एव । यथाहि पूर्वं लौकिकशिलाविशेषरूपमपि शिवलिङ्गं प्रतिष्ठासंस्कारेण निरस्तमायाविकारभूताशुद्धरूपं चिन्मयं जातमिति तदनन्तरम-दीक्षितानामस्पृश्यमासीत्, एवं निर्माल्यमपि निरीक्षणादिसंस्कारवृन्देन तथाभूतं जातं तदनन्तरं शिवेन स्वोपभोगयोग्यमित्युपभुक्तञ्चेत्यतिविशुद्धं जात मतस्तेषाम-

स्पृश्यमासीत् । एतदभिप्रायेणोक्तं वातुळोत्तरेसुप्रतिष्ठितलिङ्गेषु न यथापूर्वभावना। तथा शिवप्रसादस्य पूर्वनामनसंस्मरेत्'इति ।। एवंभूतं शिवनिर्माल्यं दीक्षया विधूतकल्मषाणां छिन्नपाशानांशिवभक्तानामेव शिवलिङ्गमिव स्पृश्यं तदाज्ञया भोज्यञ्च । ते हि शिवभक्तश्शिवदीक्षया प्रतिदिवसपरिचीयमानभूतशुद्धिदण्डमुण्ड-कलान्यासेन च शिवलिङ्गवच्छिवनिर्माल्यवच्चाप्राकृतरूपा स्संपन्नाः । 'हस्तपादादि-साधर्म्याद्रुद्रान्ममवपुर्धरान् । प्राकृतानेव मन्वानो नावजानाति बुद्धिमान्' इति वायु-संहितावचनात् । यत्तुसकलपापहरत्वादिगुणवत्त्वे सर्वप्रायश्चित्तवत्किमिति सर्व-साधारणं नजातमिति शङ्कितं तदप्येतेन निरस्तम् । अतिशुद्धशिवनिर्माल्यस्पर्श एवान्येषा मनधिकारस्योक्तत्वात् । नहि ब्रह्महत्यादिमहापातकहरमिति अघमर्षणादि वैदिकसूक्तं वेदश्रवणेऽप्यनधिकारिणामत्रैवर्णिकानां साधारणं भवति । नच तावता-वैदिकसूक्तस्य कश्चिदपकर्षः । किंचोत्कर्ष एव । तदभिप्रयेणैव पुराणोष्वीश्वरवचनं 'अशुद्धात्माऽशुचिर्लोभान्मद्भुक्तं पावनं परम् । भक्षयन्नाशमाप्नोति शूद्रोह्यध्ययना-दिव'इति ।। यत्तु शिवनामवदतिविशुद्धमपि शिवनिर्माल्यं सर्वसाधारणं किमिति न-जातमिति शङ्कितं तत्र ब्रूमः । अतिविशुद्धमप्राकृतमपि शिवनाम शिवाज्ञया सर्व-साधारणं जातम् । तद्धटितं वैदिकं पञ्चाक्षरं जीवरत्नमपि । तथाहि वायु-संहितायाम्- 'कलौ कलुषिते काले दुर्जयेदुरतिक्रमे । अपुण्यतमसाच्छन्ने लोके धर्मपराङ्मुखे ।। क्षीणेवर्णसमाचारे संकरे समुपस्थिते । सर्वाधिकारे संदिग्धे निश्चिते वा विपर्यये ।। गुरूपदेशेविहितेगुरुशिष्यव्यतिक्रमे । केनोपायेन मुच्यन्ते भक्तास्तव महेश्वरे'त्यंबिकायाः प्रश्ने । शिववचनम् - 'आश्रित्यपरमां विद्यां हृद्यां पञ्चाक्षरीं मम । भक्त्याच भावितात्मनो मुव्यन्ते कलिजानराः ।। मनोवाक्कायजै-र्दोषैर्वक्तुं स्मर्तुमगोचरैः । दूषितानां कृतघ्नानां निर्दयानां खलात्मनाम् ।। बद्धानां वक्रमनसा मपि मत्प्रवणात्मनाम् ।। मम पञ्चाक्षरीविद्या संसारभयतारिणी । मयैव मसकृद्देविप्रतिज्ञातं धरातले ।। पतितोऽपि विमुच्येत मद्भक्तो विद्ययाऽनये'ति ।। पुनश्च 'कर्मयोग्यो भवेन्मर्त्योऽपतितो यदि सर्वथा । कर्मायोग्येन यत्कर्म कृतं-तन्नरकायहि ।। ततः कथं विमुच्येत पतितोविद्ययाऽनये'ति अंबिकाप्रश्ने । शिव-वचनम्- 'सत्यमेतत् त्वया प्रोक्तं तथाऽपि श्रृणु सुन्दरि । रहस्यमिति मत्वैतत् गोपितं यन्मया पुरा ।। स्वकर्मपतितो मर्त्यः पूजयेद्यदि मोहतः । नारकी स्यान्न-सन्देहो मम पञ्चाक्षरं विने'ति ।। एवं शिवाज्ञयासर्वसाधारण्यापादनादेवेदमाज्ञा-

सिद्धमित्यपि तत्र व्यवहृतम् । 'तदल्पाक्षर मर्थाढ्यं वेदसारं विमुक्तिदम्। आज्ञा-सिद्ध मसंदिग्धं वाक्य मेतच्छिवात्मक'मिति ।। तस्मादतर्कनीयशिवनाम्नो महिमेति तस्यपतितचण्डालादिसाधारण्यं युक्तमेवेत्यलं प्रपञ्चेन ।। प्रकृतमनुसरामः।।

यत्तु 'सदाशिवस्य निर्माल्यं मनुष्याणां नभोजन'मित्युदाहृतं, तच्चण्डसमर्पित-सदाशिवनिर्माल्यविषयम् ।। कामिके 'निर्माल्यं तुसमानीय चण्डेशाय निवेदयेत् । यतो निर्मलतां याति तन्निर्माल्यं प्रकीर्तितम् ।। चण्डस्याचमनं दत्वा निर्माल्यन्तु विसर्जयेत् । अगाधेऽम्भसिवाऽग्नौवा गवां वा विनिवेदये'दिति चण्डसमर्पणानन्तर-मेव जलादिषु प्रतिपत्तिविधानात् । तत्रैव- 'चण्डभोज्यं दुराधर्षं वर्जनीयं प्रयत्नतः' इति, 'देवस्वं चण्डभोज्यं वा नान्यभोगाय कल्प्यत'इति च चण्डद्रव्यस्य सर्वा-भोज्यत्वप्रतिपादनेन तावन्मात्रस्यैव जलादिषु प्रतिपत्यपेक्षत्वाच्च । नन्वेवं सति सर्वमपि शिवलिङ्ग निर्माल्य मभोज्यमेवेत्युक्तं भवति । 'लेह्यचोष्यान्नपानादि तांबूलं-स्रग्विलेपनम् । निर्माल्यं निखिलं तुभ्यं प्रदत्तं तु शिवाज्ञये'ति चण्डसमर्पणमन्त्र-लिङ्गानुसारेण सर्वास्यापि शिवनिर्माल्यस्यचण्डायसमर्पणीयत्वावगमादिति केचित् । मैवम् । कामिके- 'परार्थपूजायाम् ऐशान्यां पूजयेच्चण्डं गन्धपुष्पादिभिः क्रमात् । तस्मै समर्पयेत्सर्वं निर्माल्यं यत्प्रकल्पित'मिति सर्वस्य निर्माल्यंस्य चण्डेशाय समर्पणीयत्वपक्षमुक्त्वा 'लिङ्गमूर्ध्निस्थमित्येके पिण्डिकास्थमथापरे । ऐशान्यापिण्डि-कास्थंवा बाह्येचण्डगृहेनये'दिति गन्धपुष्पनिर्मालयैकदेशसमर्पणपक्षस्याप्युक्ततया त-न्न्यायेननिवेदितान्नेऽप्येकदेशसमर्पणपक्षाङ्गीकारोन्नयनात् । अन्यत्रच- 'शिवोपभुक्तं स्रग्गन्धमन्नपानादिकं तथा । निवेदितमिति प्रोक्तं सर्वपापहरं परम् ।। निर्माल्ये षट् विधे भोज्यमेकमेव निवेदित'मिति चण्डद्रव्यात्पृथक्निवेदितसद्भावस्य तद्भोज्यतायाश्च साक्षादेव प्रतिपादनाच्च । आत्मार्थपूजायां तु नैतच्छङ्कावकाशः । कामिकएव शिव-पूजानिरूपणानन्तरं 'अन्ते चण्डेश्वरं यजे'दित्युपक्रम्य 'बाणे लोहे चले सिद्धे न-चण्डेशस्स्वयंभुवी'ति चण्डपूजानिषेधात् । अजितेऽप्यात्मार्थपूजायाम्- न द्वारिपूजा कर्तव्या न चण्डेशनिवेदनम् । नाममन्त्रहविस्तत्र न नित्योत्सवमेवच'इति तत्प्रति-षेधात् । यदितु प्रागुदाहृतकालोत्तरवचनानुसारेण चण्डपूजाक्रियते, तथाऽपि न दोषः । अंशुमति चण्डेशार्चनपटलेषु 'केवलंसहजं चैव स्वतन्त्रं च त्रिधामतम् । आत्मार्थं केवलं प्रोक्तं मण्डलेतु समर्पयेत् ।। यामाङ्गं सहजं ज्ञेयं चण्डरूपं प्रति-

ष्ठितम् । ग्रामाङ्गं चेत् स्वतन्त्रंस्याच्चण्डेशस्यार्चनं त्रिधे'ति चण्डेशार्चनत्रैविध्यमुपक्रम्यात्मार्थयजनान्तचण्डपूजायां- 'विलेपनं च दानं च दत्वा तन्मूलमन्त्रतः । नैवेद्यं चैवतांबूलं तन्मूलेनैव दापये'दिति पृथगेव गन्धपुष्पादिकमुक्त्वा 'केवलस्यार्चनं प्रोक्तं सहजस्यार्चनं श्रृणु । अन्तर्मण्डलदेशे तु मण्डलस्य च गोचरे।। चण्डेशं स्थापयेद्विद्वान्निर्माल्येनैवचार्चये'दिति यामाङ्गचण्डेश्वरपूजायामेव निर्माल्यसमर्पणस्योक्तत्वात् । सिद्धान्तसारावळयामापि चण्डपूजाप्रकरणे- 'नैवेद्यं तद्विधानोक्तं दत्वा तांबूलसंयुतम् ।। यामाङ्गश्चेच्छिवेनोपभुक्तं चापि निवेदये' दित्युक्तत्वाच्च । 'सदाशिवस्यनिर्माल्यं चण्डेशायसमर्पये'दिति आत्मार्थपूजागतसूक्ष्मवचनानुरोधेन चण्डेशाय निर्माल्यसमर्पणपक्षेऽपि नदोषः। परार्थपूजोक्तरीत्या तदेकदेशसमर्पणसंभवात्। स्मृतिनिबन्धनेषुच' विष्वक्सेनाय दातव्यं नैवेद्यञ्च शतांशकम् । पादोदकं प्रसादं च लिङ्गे चण्डेश्वराय चे'तिनिवेदितशतांशस्य चण्डांशस्यैव चण्डभागत्व प्रतिपादनाच्च। एवं 'सदाशिवस्य निर्माल्य'मिति सुप्रभेदवचनस्य कामिकवचनाद्यनुसारेण 'यत्सदाशिवनिर्माल्यं चण्डेशाय समर्पितम् तन्मनुष्याणांनभोज्य'मित्यर्थः ।। अथवैवं तदभिप्रायः । शिवस्य निर्माल्यं शिवदास्यभावरहितानां पशुप्रायाणां केवलमनुष्याणां नभोज्यम् । अतः काम्यतया परार्थपूजाया मात्मार्थपूजायांवा समृद्धमहाहविर्निवेदने सति तावद्भोजनासमर्थानां देवालये परिचारकाणां पूजकगृहवासिना मन्येषाञ्च शिवदीक्षावतां शिवभक्तानामलाभे तेभ्योदत्तावशिष्टं यथाकथञ्चिन्मनुष्यमात्रेन दातव्यम् । किंतु गोगजेभ्यो देयम् । अगाधेऽम्भस्यग्नौवा क्षेप्तव्यं भूमौ वाखातव्यमित्येतत्परम् । यथाऽश्वमेधादिक्रतुषुऋत्विजां हविश्शेषभक्षणसामर्थ्या भावेऋत्विग्भ्योदत्तावशिष्टंहविरनुपनीतेषु वर्णान्तरेषु नदातव्यम् । किंतूपनीतेषु ब्राह्मणादिषुदातव्यमग्नौ वाक्षेप्तव्यमित्येतत्परं 'हविश्शेषान्भक्षयितु मृत्विजश्चेन्न शक्नुयुः । विप्रेभ्यस्संप्रयच्छेयुः क्षिपेयुर्वा हुताशन' इति वचनम् । यथावा 'ब्रह्मणोच्छिष्टभोक्तृतद्दासशूद्राभावे तदुच्छिष्ट मप्सुक्षेप्तव्यं भूमौवाखातव्यमित्येपर 'मशक्तौभूमौ निखनेदप्सुवा प्रवेशये' दितिवचनम् । एतदभिप्रायेणैवोक्तं हरदत्ताचार्यैः - 'यद्ब्राह्मणस्त्वमसिनाकसदां निकाये तुभ्यं निवेदितमभोज्यमिति स्मरन्ति । उच्छिष्टमीश्वर विशिष्टमपि द्विजानां भूमौ निखेय मथवाऽम्भसिमज्जनीय'मिति । अस्य श्लोकस्य उच्छिष्टभोक्तृदाससद्भावेऽपि तदुच्छिष्टं भूमौ निखेय मंभसिवा मज्जनीयमिति न तात्पर्यम् । 'उच्छिष्टमन्नं दातव्यंशीर्णानि वसनानिचे'ति दासेन प्रपन्नाय शुश्रूषुशूद्रायोच्छिष्टदान-

स्मरणात् ।। 'जीर्णान्युपानच्छत्रवासः कूर्चान्युच्छिष्टाशनं शिल्पवृत्तिश्चे'ति शुश्रूषुशूद्र-धर्मस्मरणाच्च । एवमेव 'तुभ्यं निवेदितं भोज्य'मित्यत्रापि शिवनिवेदितभोजनार्हस्य शिवदास्यं प्रपन्नस्यालाभे यस्मैकस्मैचिन्नदातव्यं किन्तु खननादिनैव तत्प्रतिपादनीय-मिति तात्पर्यम् । इत्थमनेन श्लोकेनाचार्यै रुत्कर्षतएवनिर्माल्यं दासादिरिक्तैः परि-हार्यं नत्वपकर्षत इति विभावितमेव । 'उत्कर्षत' इत्याद्यनन्तरश्लोकैस्तु शिवोत्कर्ष-निरूपणग्रन्थे तत्प्रसादोत्कर्ष निरूपणं नोपयोगीति विभावनाय प्रौड्यासममुक्तरीति-रवलंबिता । यानितु स्वेष्टलिङ्गसमर्पितमपि भ्रातृपुत्रभगिन्यादिभ्य एव देयमित्येवं-प्रतिपादितानि तान्यग्निकार्यरूपभोजनकर्तृशिवार्चकविषयाणि । तेन तत्स्वयंभोक्तुम-शक्यम् । शिवाग्निकार्यरूपस्वभोजनेनैव प्रसङ्गात् आपत्तिरूपस्वकार्यस्यापि सिद्धेः। अदीक्षितेभ्यस्तु तद्दानंप्रतिषिद्धं इष्ट्यादि हविश्शेषवदुपेक्षापरिहाराय न्यायतो भक्षणे-नैव प्रतिपादनीयम् । दीक्षितानाञ्च तद्भोजनं महाफलप्रदम् । अतः केभ्यो देय मित्याकाङ्क्षायां स्वगृहदीक्षावत्वेऽपि येऽग्निकार्यानधिकारिणः स्त्रीबालादयस्तेभ्योदेय मित्येवंपराणि । यत्तु कामिके- 'निर्माल्यलङ्घनं कृत्वा दक्षिणस्यायुतं जपेत् । लङ्घ-नेन समस्स्पर्श स्समे विक्रयभक्षणे' इति लङ्घननिर्माल्यस्पर्शेऽपि दीक्षितानां प्राय-श्चित्तविधानम् ।यच्च- 'यन्निर्माल्येन संस्पृष्टं तद्भुजा पुरुषेण वा । पादोनं तत्र पूर्वोक्तं स्पर्शलङ्घनभक्षण' इति निर्माल्यतद्भक्षयितृस्पृष्टस्य स्पर्शे प्रायश्चित्तविधानं तत्र-सर्वत्रापि निर्माल्यपदं बहिः क्षिप्तनिर्माल्यविषयम् । तस्मिन् प्रायश्चित्तप्रकरणे देवस्वं देवताद्रव्यं 'नैवेद्यञ्च निवेदितम् । चण्डद्रव्यं च निर्माल्यं निर्माल्यं षड्विधं भवे' दिति बहिः क्षिप्ते विशिष्य निर्माल्यसंज्ञाकरणात् । पिण्डिकास्थं न निर्माल्यमपिदेवे-विसर्जित' मितिदेवविसर्जनानन्तरमपि बहिः क्षेपपर्यन्तस्पर्शप्रायश्चित्तपरिहाराय प्राय-श्चित्तप्रकरणे 'देवस्वं देवताद्रव्य'मिति पदैर्निर्माल्यत्वाभाववर्णनाच्च । अन्यथा प्राय-श्चित्तविधानगतनिर्माल्यशब्दानां सर्वनिर्माल्यविषयत्वे तत्र बहिःक्षिप्तेति विशिष्य निर्माल्यसंज्ञाकरणस्य वैयर्थ्यप्रसङ्गात् । विसर्जनानन्तरमपि बहिः क्षेपपर्यन्तं निर्मा-ल्यत्वाभाववर्णनस्यासामञ्जस्यप्रसङ्गाच्च । देवभूम्यादिस्पर्श तत्संस्पृष्टस्पर्शेषु दोष-भावेन स्पर्शप्रायश्चित्तगतनिर्माल्यशब्दानां विशेषविषयत्वावश्यंभावाच्च । बहिः क्षिप्तञ्च तदुच्यते यन्महाहविर्निवेदनादिषु भक्तपरिचारकेभ्यो दत्तावशिष्टं गोगजादिभ्यो बहिर्नीतं जलादिषु क्षिप्तं बहिर्बल्यर्थं दत्तं । तत्सर्वं वचनबलाद्धूपोपस्थानानन्तरंधूपव दस्पृश्य मेव । नन्वेवं तर्हि तत्र निर्माल्यभक्षणादिप्रायश्चित्तोपदेशानां बहिः क्षिप्त-

मात्रविषत्वे 'देवस्य देवताद्रव्यनिवेद्यचण्डद्रव्याणां भक्षणादिषु प्रायश्चित्तविधानं नलभ्यतइति चेन्न । तत्रैव निर्माल्यभक्षणोपेक्षणदानविक्रयलङ्घनस्पर्शेषु, निर्माल्यतद्भक्षयितृस्पृष्टभक्षणलङ्घनस्पर्शेषुच प्रायश्चित्तविधानानन्तरं 'देवायतनवस्त्वन्यद्देवग्रामादिसंभवम् । व्रीह्यादियेनकेनैवोपाधिनाऽऽदायभक्षणम् ।। करोति यस्स संमूढोमलिनः स्तेनकृन्मत'इत्यादिना देवस्व देवताद्रव्यनिवेद्यचण्डद्रव्याणां भोगदानयोःपृथगेवस्तेयप्रायश्चित्तवर्णनात् । सूक्ष्मागमे- 'निर्माल्यस्य निवेद्यस्य लङ्घने दानकर्मणि । चान्द्रायणं चरेत्ततुगोनागानां विनिक्षिपे'दिति निर्माल्यात्पृथक् निवेद्यग्रहणादपि प्रायश्चित्तोपदेशगतनिर्माल्यशब्दानां विशिष्य निर्माल्यसंज्ञिक बहिः क्षिप्तमात्रविषयत्वं ज्ञायते । अन्यथा तेषां षड्विधनिर्माल्यपरत्वे निवेदनस्यापि तदन्तर्भूततया प्राक् निवेदनग्रहणं व्यर्थं स्यात् । यत्तु कामिक एव- 'स्नानपानीयदुग्धाद्यैर्यदि सिक्तो भवेत्तदा । स्नायात् प्रक्षाळयेत् द्वेधानाभे रूद्र्ध्वमधस्तथा ।। चललिङ्गेऽप्ययं न्यायो विहितो यज्ञमन्दिरे' इति शिवस्याभिषेकसमये अभिषेकजल दुग्धदध्यादिकरण सेकेनाप्यूद्र्ध्वतदधोगात्र विभागेन स्नानप्रक्षाळन विधानं, तत् शिवाभिषेकजलादिचिन्दूना मर्चकं प्रति अपवित्रताभिप्रायेण न भवति। शिवाभिषेकजलादिप्राशस्त्यस्य प्राक्प्रपञ्चितत्वात् । किन्तु तदनन्तरमर्चकेन करिष्यमाणं शिवस्य गन्धविलेपनादिकं तन्निर्माल्यसंसिक्तगात्रेण कर्तुमयुक्तम्, गुरोरभ्यङ्गस्नपनं कृतवता तत्तैलबिन्दुसंसिक्तगात्रेण शिष्येण गुरोर्गन्धविलेपनादिकमिवेत्याभिप्रायेण । एवमन्यान्यप्येवं संभावितानि वचनानि नेतव्यानि । तदित्थमग्निकार्यबुद्ध्या भुञ्जानै र्निवेदितशेषं भोक्तव्यं । दास्यबुद्ध्या भुञ्जाने र्निवेदितं भोक्तव्यमिति व्यवस्था निरवद्या । तथाच वायुसंहितायामपि दर्शितम् - 'ततस्स्वयञ्च भुञ्जीत शुद्धमन्नं यथासुखम् । निवेदितंवा देवेशे तच्छेषं वाऽऽत्मशुद्धये ।। श्रद्दधानो नलोभेन न चण्डाय सर्मर्पितम् । गन्धमाल्यादि यच्छान्यत्तत्राप्येष समो विधिः ।। नतुतत्र शिवोऽस्मीति बुद्धिं कुर्याद्विचक्षण' इति ।। निवेदितं भुञ्जानः स्वहृत्पुण्डरीकान्तरवह्निमध्यगतशिवभावनया स्वस्य शिवाग्निकार्य रूप शिवपूजाकर्तृतामभिप्रेत्य श्रीशिवोऽहमिति बुद्धिं न कुर्यात् । किन्तु शिवदास्यबुद्धिमेव कुर्यादित्यर्थः । एवं निवेदितान्नभोजनं कुर्वता प्राणाहुतयोऽपि निवेदितेनैव कर्तव्याः 'प्राणाग्निहोत्रं यः कुर्याच्छिवस्यैव प्रसादतः । अश्वमेधायुतं पुण्यं सिद्धे सिद्धे भवेन्नरः' इति शिवपुराणवचनात् ।।

।। भोजनविधिः ।।

अथभोजनविधिः ।। स्वाहान्तैः स्वसूत्रोक्तमन्त्रैःहुत्वातान्विसर्जयेत् । एवमग्निकार्य निर्वर्त्यधौताङ्घ्रिकर स्समाचान्त शिवभक्तैस्सदाचारैस्सहितो हीनजातीयानदीक्षितानेकपङ्क्तौ परिहरन् भोजनस्थानमासाद्य पीटे प्राङ्मुख उपविश्य चतुरश्रेण हस्तमानेनाचार्यपुत्रसाधकसमयिक्रमेण चतुस्त्रिद्व्येकरेखाङ्कितपरितोभस्मरेखांकितेन मण्डले नभूषितभूतले सुवर्णरजतताम्रलोहान्यतमनिर्मितं कांस्यनिर्मितं वा सप्तधा भस्मना शोधितमघोराभिमन्त्रितं तदभावे कदळीपलाशपद्मचूतमधूकाद्यनिन्दितपत्रं वा पात्रं निवेश्य तत्र घृतेनोपस्तिर्य परिवेषितं द्विरभिघारितं सव्यंञ्जनं शुद्धमन्नमस्त्रेण संप्रोक्ष्यत्र्यक्षरमृत्युञ्जयपूर्वकेण मृत्युञ्जयाय वौषडिति मन्त्रेण सप्तवारमभिमन्त्र्य यथावर्णं परिषेचनादिकं कृत्वाग्रासार्द्धमात्रेणान्नेन नागकूर्मक्रकर देवदत्तधनञ्जयेभ्यः उपप्राणवायुभ्यः स्वाहेति स्वस्यदक्षिणभागे गोमयोपलिप्ते मण्डले दद्यात् । ततस्सव्यहस्तकनिष्ठिकया स्रवणेन नागादिभ्यश्चुळकोदकं दत्वा माषमज्जनार्हं शिष्टजलममृतमन्त्रेण प्राश्य प्राणाहुतिपञ्चकं कुर्यात् । तेन प्राणापानव्यानोदानसमानानां क्रमेण तदावाहिताना मात्मभूतयोनयः पाताळतलवासिनः पितरो देवा इत्येतेषाञ्च तृप्तिं भावयेत् । ततो यथाकिञ्चिदुच्छिष्टान्नमादाय नरकवासिभ्यःस्वाहेति भूमौ दत्वा उत्तरापोशनानन्तरं तच्छेषजलं कनिष्ठाङ्गुळ्यानि स्राव्य हस्तोद्वर्तनादि शुद्धाचमनान्तं कर्म कृत्वा भुक्तदोषशुद्ध्यर्थं दक्षिणकराङ्गुष्ठजलेन दक्षिणपादाङ्गुष्ठाग्रस्थकालाग्निरुद्रं सेचयेत् । अनिवेदितभोजिनां तु भोजने विशेषः प्रागेव सुप्रभेदोदाहरणेन दर्शितः । निवेदितभोजिनामनिवेदितभोजिनाञ्च भोजनकालादन्यत्र यदन्यदौषधतांबूलपानीयादि भोज्यं गन्धपुष्पादि भोग्यं वोपतिष्ठते, तत्सर्वं मनसावादेवाय समर्प्यैव भोक्तव्यम् । 'पत्रं पुष्पं फलं तोय मन्नपानाद्य मौषधम् । अनिवेद्यनभुञ्जीत भगवन्तं समाहित'इति कामिकवचनात् । 'उपभोगाय पुरतो वस्तु यद्यदुपस्थितम् । तत्तत्समर्प्य देवाय विदधीतात्मसा- त्ततः'इति वातुळवचनाच्च । यत्तु- 'अन्नाद्यमौषधं तोयं पत्रं पुष्पं फलांदिकम् । शिवस्य दत्वा तचछेषं भोज्यं भुञ्जीत बुद्धिमा' नित्यौषधादे र्निवेदितशेषस्य बोजनविधानं, तत् कार्यार्थमनिवेदितभोजनं कुर्वतो भोजनमध्यग्राह्यौ षधादिविषयम् । अन्यत्र शिवदासानां शिवोच्छिष्टमेव ग्राह्यम् । किञ्च भक्तेन यत्किञ्चित्फलमुद्दिश्यया क्रिया लौकिकी वैदिकीवा कर्तुमिष्यते सा सर्वाऽपि शिवाराधन-

रूपेति भावेन कर्तव्या । तत्तत्क्रियाजन्यसुखमपि शिवस्तद्भोक्तेति शिवे समर्प्यत-द्भुक्तमेव सुखं मया भुज्यतइति भावेन भोक्तव्यम् । एवं विनैव स्वयत्नमुपनता-श्शब्द स्पर्शरूपरसगन्धाख्या विषयाश्च शिवसमर्पण पूर्वकं तदुच्छिष्टबुद्ध्यैवस्वेंन्द्रि-यैरनुभवितव्याः । तत्तद्विषयांनुभवजन्यंसुखमपि तदुच्छिष्टबुद्ध्यैवभोक्तव्यम्। 'या या क्रिया विधातव्या प्रस्तुता जायते पुरः । तां तां कुर्यान्महादेवसमर्पितधिया सुधीः।। इन्द्रियादागतं किञ्चिद्यत्सुखं तच्छिवार्पितम्। कृत्वा प्रसादं भोक्तव्यं तदिन्द्रिय-मुखेनचें'तिवातुळश्रवणात् ।। तदर्थंच भक्तेन सदा सावधानेन भाव्यम् । संयोगेषु वियोगेषु सावधानोनिरन्तरम् । गच्छन्तिष्ठन्स्वपन्जाग्रद्भुञ्जानो मैथुनेरतः ।। य-श्शिवार्पितचेतस्कोभक्तिमांस्तु नचान्यथें' तिबृहत्कालोत्तरे श्रवणात् । एवं क्रिया-समर्पणपूर्वकं क्रियां कुर्वतः विषयसमर्पणपूर्वकं विषयाननुभवत स्तत्तज्जन्यसुख-समर्पणपूर्वकं सुखं भुञ्जानस्य च सावधानस्य भक्तस्य पूर्वजन्मवासनान्ते क्वचित् क्वचित् प्रमादान्निषिद्धक्रियां कुर्वतोऽपि निषिद्धविषयाननुभवतोऽपि निषिद्धसुखं-भुञ्जानस्यापिनपापलेपोभवति । किंतुसर्वं शिवसमाराधनमितिभावयत स्सर्वमपि शिवप्रीतय एव भवति । तत्रात्मभोगार्थं नृत्तावलोकनहर्म्योपवनदीर्घिकादिक्रीडारूपां क्रियामारभमाणस्तत्तत्क्रियासमये संभावितानां वाक्पाणिपादपायूपस्थरूपकर्मेन्द्रिय-व्यापारसाध्यानां श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणरूपज्ञानेन्द्रियजन्यतत्तद्विषयसाध्यानाञ्च सुखानां समर्पणार्थंस्वकीये श्रोत्रादिज्ञानेन्द्रियपञ्चके वागादिकर्मेन्द्रियपञ्चके च क्रमेणाधिष्ठा-तृत्वेन सन्निहिताना मीशानादीनां श्रोत्रादिवागादीनि स्वकीयश्रोत्रादिष्वैक्येनानुसंधाय तत्तदिन्द्रियव्यापारसाद्ध्यसुखान्यैशानादि मूर्तिरधिष्ठात्राशिवेनानुभूयमानानि विभाव्य तान्येव सुखानि शिवोच्छिष्टबुद्ध्या स्वयं भुञ्जीत । अयत्नोपनमद्विषयसुखसमर्पणं तत्तद्विषयोपभोगसमयेषुसावधानेनकर्तुमशक्तः प्रातर्वाशिवपूजावसानेवाभविष्यदेत-त्समयपर्यन्तं भावितायत्नोपनमच्छब्दरूपरसगन्धात्मकविषयानुभवतज्जन्यसुखानि-शिवायार्पयामीति युगपदेवार्पयेत् । एवं युगपद्विषयार्पणं हृदयादिषु वा हृदयादि-स्थानभावितस्यसांबशिवस्य श्रोत्रादिषुवा, हृदयादिस्थानभावितस्य सदाशिवस्य क्रमादीशानादिमुखगतश्रोत्रादिषु वा स्वकीयश्रोत्राद्यैक्येन संहितेष्वीशानादीनां श्रोत्रा-दीषुवा कर्तव्यम् । सर्वत्रापि समर्पणे नमोन्तशिवमन्त्र एवमन्त्रः । तस्यच शिवायेदं नममेति अर्थो भावनीयः । सचार्थो मकारस्य जीववाचकस्य षष्ठ्यन्ततया लभ्य-तइति सर्वमेतदतिरहस्यम् । एवं प्रतिदिनंप्रातश्शिवचिन्तनंशक्यस्नानविभूतिरुद्राक्ष-

धारणसंध्योपासनपूर्वकं त्रिकालंद्विकालमेककालंवा चत्वारिंशता षोडशभिर्दशभिः पञ्चभिरुपचारे रष्टपुष्पिकामात्रेण वा शिवं पूजयन् यथावसरंशिवशास्त्राण्यधीयान-शिवकथास्समाकर्णयन् भोजनकाले शिवाग्निकार्यबुद्ध्या शिवनिवेदितशेषं वा शिवदास्यबुद्ध्या शिवनिवेदितंवा स्वीकुर्वन् अन्यत्तांबूलपानीयगन्धपुष्पादिभोग्यजातं शिवसमर्पितं जानन् चिकीर्षितं कर्मजातं तत्फलरूपाणां सुखानां शिवोपभोग्यत्वं विभाव्य शिवाराधनबुद्ध्या कुर्वाणः स्वयत्नमनपेक्ष्य उपनतानपि विषयान् तत्तद्विष-योपस्थितिसमयेषु युगपद्वा शिवार्पितान्विदधानः सर्वाण्यपि सुखानि शिवोच्छिष्ट-बुद्ध्यैवानुभवन् बहिर्लौकिककार्यविचारकालेप्यनन्तशिवनामानुसन्धानेन सफलयन्न-न्तरध्वनि गमागमाभ्यां विहरतीं निरतिशयप्रकाशाममृतरूपिणी मानन्दलेखामपि समयेष्वाकलयन् पञ्चाक्षरपरदेवता मशेषोपनिषदन्विष्यमाणचरणांबुज मखिलदेवता-सार्वभौम मपाकरुणांबुधि माश्रितरक्षाधुरन्धर मंबिकयासह निजहृदयजलरुहकुहरे विहरमाणमानन्तसन्दोहमूर्तिं परमशिवमनवरतमन्तर्दृशावलोकयन् इष्टबन्धुभिस्सह सुखमासीत ।।

वेलूरधीशचिनबोम्मविभोरुदारे
चित्ते च धामनि चिरादभिवर्धमानाम् ।
अर्चाविधां पशुपते रमराभिनन्द्या
मित्थं समाचकलमीश्वरशासनेन ।।

सद्राजयोगनिजचंचुरनाहताज्ञा-
शक्त्यादिसारसमुदञ्चितदिव्यतेजाः ।
आवाहनक्रमकलानिपुणोऽतिधीरः
श्रीबोम्मभूपतिलकश्शिवपूजकस्स्यात् ।।

करोतु ज्वरकण्ठेशस्स्वकीयार्चनचन्द्रिकाम् ।
आकल्पस्थायिनी मेनां द्युस्थले चन्द्रिकामिव ।।

हरिः ओम् ।।

शुभमस्तु । गुरुभ्यो नमः ।।

भजामिज्वरकण्ठेशमृत्युञ्जयपदांबुजम् ।
यदाश्रितो नखव्याजाद्भाति जैवाकस्सदा ।।

शिवार्चनाचन्द्रिका समाप्ता ।।

शिवार्चनाचन्द्रिकायाः विषयसूचिका ।।

विषयाः	पृष्ठे	विषयाः	पृष्ठे
दन्तधावनविधिः	२	द्रव्यसुद्धिः	२९
स्नानविधिः	३	मन्त्रशुद्धिः	३०
संक्षिप्तशैवसन्ध्याविधिः	४	लिङ्गशुद्धिः	३१
भस्मधारणविधिः	८	पाद्यादिप्रकारः	५३
त्रिपुण्ड्रविधिः	१०	आवरणार्चनं	५९
रुद्राक्षधारणविधिः	११	नैवेद्यविधिः	६२
सकळीकरणप्रकारः	१२	तांबूलदानं	६८
द्वारपालार्चनम्	१३	आरात्रिकविधिः	६९
आत्मशुद्धिः	१६	पञ्चाक्षरजपविधिः	७०
देहशुद्धिः	१७	प्रदक्षिणविधिः	७७
अन्तर्यागक्रमः	२२	प्रणामविधिः	७८
अग्निकार्यक्रमः	२३	अग्निकार्यविधिः	७८
स्थानशुद्धिः	२४	शिवज्ञानपूजाविधिः	८०
द्रव्यशुद्धिः	२४	कपिलापूजा	८४
पाद्यादिपूजा	२५	परार्थालयदर्शनं	८४
पञ्चगव्यविधिः	२७	चुल्लीहोमः	८६
पञ्चामृतविधिः	२८	निर्माल्यविचारः	८६
स्नपनोदकविधानं	२८	भोजनविधिः	९८

अप्पय दीक्षिता. అప్పయ్యదీక్షితులవారు नीलकण्ठ दीक्षिता నీలకంఠదీక్షితులవారు

அப்பய்ய தீக்ஷிதர் நீலகண்ட தீக்ஷிதர்

అప్పయ్యదీక్షితులు నీలకంఠదీక్షితులు

श्रीः

शिवाभ्यां नमः

सर्वतन्त्रस्वतन्त्रचतुरधिकशतग्रन्थनिर्मातृ-
श्रीमदप्पय्यदीक्षितेन्द्रविरचितम्

।। मध्वतन्त्रमुखमर्दनम् ।।

तत्कृतया मध्वमतविध्वंसनाख्यया
व्याख्यया सहितम् ।

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ।।१।।

मध्वतन्त्रमुखमर्दनं मया यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ।।२।।

आनन्दतीर्थप्रवर्तितशारीरकशास्त्रप्राथमिकपञ्चाधिकरणप्रक्रियां प्रायस्तन्मतमर्यादयैव दूषयितुं प्रकरणमारभमाणः प्राप्सितप्रकरणस्य निर्विघ्नपरिसमाप्त्यादिप्रयोजनायाऽऽदौ विशिष्टेष्टदेवतानुसन्धानकीर्तनरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिपति-

शिवं विष्णुं वै यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नस्सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहिनिन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्धार्यमुचितम् ।।१।।

वस्तुतो निर्विशेषब्रह्मणि प्रतिष्ठितस्यापि शारीरकमीमांसाशास्त्रस्य केचन शिवं विष्णुं वा विषयं वदन्ति चेत्तदिष्टमेव; यतस्तच्छिवरूपं विष्णुरूपं वा सगुणं ब्रह्मोपासीनानामस्माकमद्वैतवादिनां उपास्य स्वरूपगुणमहिमावधारणाय तत्प्रतिपादनप्रवृत्तं तदीयं शास्त्रस्य योजनं ग्राह्यम् । अपेक्षितं खल्वस्माकमपि निदिध्यासनोपयोगिचित्तवशीकरणकैलासवैकुण्ठादिस्थानगतदिव्यभोगानुभवक्रममुक्तिरूपलापेक्षिणां तयोरुपासनम् । अथाऽपि स्यात्क्वचित्क्वचिद्विरुद्धत्वात्तदीयं योजनमग्राह्यमिति । नैतावदेवोपेक्षणीयताहेतुः, विरोधाभावात् । तथाहि- निर्गुणवाक्यानां सगुणे ब्रह्मणि सगुणान्तरपरवाक्यानां स्वस्वाभिमतसगुणब्रह्मणि योजनम्, ब्रह्मणस्सगुणत्वसप्रपञ्चत्वादिसाधनम्, स्वस्वाभिमतसगुणब्रह्मणस्सगुणान्तरादधिकत्वसाधनम् सगुणान्तरस्य परब्रह्मत्वाभावसाधनम्, तत्र सर्वत्राऽपि युक्त्युपन्यसनम्, तद्विरोधियुक्तिनिरसनमित्यादिकं हि विरुद्धमेव भासते । तत्सर्वं "नहिनिन्दा" न्यायेनाविरुद्धम् । नहिनिन्दान्यायश्च "स्फारात्तत्तत्पुराणागमे'ति श्लोकव्याख्यानावसरे स्फुटीकरिष्यते । अपिचाऽस्मदीयपूर्वाचार्यग्रन्थेष्वपि महता यत्नेन परस्परपक्षप्रतिक्षेपपूर्वकमेकजीववदनेकजीववादादिव्यवस्थापनं दृश्यते । न च तत्सर्वं तार्किकादिग्रन्थेषु परस्परपक्षप्रतिक्षेपादिवद्विरुद्धमेव । किन्त्वद्वितीयब्रह्मप्रतिपत्त्युपायेषु नानाविधेषु संभवत्सु विनेयबुद्धिप्रावण्यानुसारेणोपदिदिक्षितोपायविशेषाणां तत्तद्विनेयबुद्धिस्थिरीकरणार्थत्वात्सूक्ष्मारुन्धतीप्रतिपत्त्युपायतदुपदेश्यपुरुषचक्षुर्विक्षेपाभिमुखतारकविषयनानाविधस्थूलारुन्धतीप्रदर्शकवाक्यवत्सिद्धशब्दप्रतिपत्त्युपायकृत्रमशब्दगतविविधप्रकृतिप्रत्यया दिविमार्गप्रदर्शकानेकव्याकरणवच्चाऽविरुद्धम् । किं बहुना, श्रुतिष्वपि क्वचिदाकाशादिसृष्टिप्रतिपादनं, क्वचित्तेजः प्रभृतिसृष्टिप्रतिपादनमित्याद्यध्यारोपापवादाभ्यामद्वितीयब्रह्मप्रतित्त्युपायभेदत्वादविरुद्धम्। "कारणत्वेन चाकाशा'दित्यधिकरणे तथा निरूपितत्वात् ।

तथा शारीरकसूत्राणां तत्र तत्र सगुणे योजनान्तरमपि तत्सगुणोपासनाभिमुखानां तत्र तत्र बुद्धिस्थिरीकरणार्थमित्यविरोधनये न काप्यनुपपत्तिः ।

यत्त्वस्मदनभिमतोपासनाप्रकारकथनादि तावन्मात्रमनुपादेयमस्तु । न तावता सगुणपरत्वेन सूत्रयोजनानां सर्वथैवोपेक्षणीयता ।

अथोच्येत-निर्गुणपरस्सूत्रसन्दर्भः कथं सगुणपरोऽपि स्यादिति । स्यादेव, सूत्राणां विश्वतोमुखत्वादिति ब्रूमः । न ह्यस्मदीयैरपि निर्गुणपराणामेव सूत्राणां सगुणेऽपि सम्भवदपेक्षितं योजनान्तरं वार्यते । भाष्य एव "शास्त्रयोनित्वादि"ति सूत्रस्य निर्गुणौपनिषदत्वव्यवस्थापनार्थत्वेन सगुणसार्वज्ञादिसमर्थनार्थत्वेन च योजितत्वात् । **कल्पतरौ** च "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शना"दिति सूत्रस्याग्निहोत्रादिकं "तस्मै तदधिगम उत्तरपूर्वाघयोरि"ति सूत्रे तदधिगमशब्देन प्रस्तुताय निर्विशेषब्रह्मापरोक्षज्ञानरूपाय कार्यायैव "विविदिषन्ति यज्ञेने" त्यादि श्रुतिदर्शनात् समस्तकर्मबृन्ददाहकत्वेन कर्मजातिविरोधिनोऽपि तस्य ज्ञानस्य नित्ययज्ञादिकर्मविशेषकार्यत्वं नायुक्तम्, समस्तवनदाहकस्याऽपि दावदहनस्य वनान्तर्गतवेण्वादिकार्यत्वदर्शनादिति निर्गुणविषययोजनस्याऽग्निहोत्रादिकं सगुणब्रह्माधिगमस्य कार्यायैव; सगुणविदां केकयादीनां यज्ञाद्यनुष्ठानदर्शनात् निर्गुणविद्याफलस्येव सगुणविद्याफलस्य कर्मकार्यत्वं नाऽयुक्तम् । सगुणविध्याफलस्य सातिशयत्वदर्शनादिति सगुणविषययोजनस्य च दर्शितत्वात् । एवं च भगवतो नारायणस्य स्वरूपं तस्याऽचिन्त्याद्भुतगुणमहिमविभूतिवैभवं तदुपासनादिप्रकारं तत्फलभोगक्रमं च श्रुतिस्मृतिन्यायैर्निरूपयितुं प्रवृत्तमानन्दतीर्थीयं मतमपि कुतो न ग्राह्यम् ? येन तद्दूषणे प्रवृत्तिरित्याक्षेपाभिप्रायः ।।१।।

इममाक्षेपं समादधानः प्रयोजनप्रदर्शनपूर्वकं प्रकरणारम्भं प्रतिजानाते-

तथाऽप्यानन्दतीर्थीयं मतमग्राह्यमेव नः ।
यत्र वैदिकमर्यादा भूयस्याकुलतां गता ।।२।।
अतः पञ्चाधिकरणीं लक्ष्यीकृत्यैव तन्मते ।
दूष्यस्थलानि सर्वत्र सूच्यन्ते सुधियां मुदे ।।३।।

यद्यप्येवमुक्तया रीत्याऽन्यदीयानि सगुणयोजनान्युपादेयानि तथाप्यानन्दतीर्थीयं योजनमनुपादेयमेव । अन्यदीयेषु हि योजनेषु सगुणनिर्गुणभेदाभेदादिविषयतया कतिपयेष्वेव सूत्रेषु प्रकारभेदः । अन्येषु हि सूत्रेषु क्वचित्क्वचित्पूर्वसिद्धान्तरचनाभङ्गीभेदेऽपि फलतो न विवादः । आनन्दतीर्थीये तु योजने प्रायस्सर्वत्रैव

प्रकारभेदः। सोऽप्यन्येषामसम्प्रतिपन्नेषु स्वमात्रकल्पितेष्वर्थेषु। तत्र चतुर, कमठ, माठर, कौंठरव्य, कौण्डिन्य, माण्डव्य, मार्कण्डेय, मौद्गल्य, पौष्यायण, पौत्रायण, सौत्रायण, पाराशर्यायण, माध्यन्दिनायन, कौषारव, काषायण, बृहदुद्दालकौद्दालकायन, कौशिक, सौपर्ण, शाण्डिल्य, वत्स, गौपवन, भाल्लवेयाग्निवेश्य, चतुर्वेदसंहिता, चतुर्वेदशिखेन्द्रद्युम्न, परमश्रुत्यादिवचनानीति तदनुसारिण्यध्यात्मनारायणाध्यात्मसंहिता, बृहत्संहिता, महासंहिता, नारायणतन्त्र, बृहत्तन्त्र, पुरुषोत्तमतन्त्र, मायावैभव, ब्रह्मतर्क, भविष्यत्पर्वोदिवचनानीति चाऽत्यन्ताप्रसिद्धानामेव वचनानां साक्षितयोपन्यासः, तदुपन्यासप्रसक्तस्वानाप्तत्वशङ्कापरिहाराय हनुमद्भीमसेनक्रमेण वायोः स्वयं तृतीयावतार इत्युद्घोषः ; तत्र च साक्षितया-

"प्रथमो हनुमान्नाम द्वितीयो भीमसेनकः ।
पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः" ।।

इति स्मृतिवचनमस्तीति स्वयमेव तदुदाहरणम् । "बडित्था तद्वपुषे, धायि दर्शतं" इत्याद्यृग्वेदमन्त्रस्य स्वकल्पितवाय्ववतारत्रयपरतया प्रदर्शकमित्यादि प्रामाणिकमर्यादालङ्घनं भूयसा दृश्यते । तथाऽपि "युक्तियुक्तं वचो ग्राह्यं न तु पूरुषगौरवमि" ति न्यायेन तन्मतं श्रद्दधीमहि यदि तत्रोपपन्नं किंचिदाकलयेन। न त्वेवम्, प्रायेण हि तन्मते स्वमात्रहृदयारूढानि वचनान्येवोपजीव्यानि, न तु न्यायाः। ये तु न्यायाः प्रदर्शितास्तेऽप्यत्यन्तशिथिला एव क्वचित्क्वचिदाश्रिताः । पूर्वमीमांसामर्यादाप्यसामञ्जस्येनैव नीता । प्रायेणाऽसाधुभिरेव च शब्दैर्व्यवहारः । श्लोकरचनायां त्वन्वयासंभवो वृत्तान्यथाभावश्चाऽधिकः । सर्वमेतत्तदीयभाष्यानुव्याख्यानभारततात्पर्यसङ्ग्रहादिदर्शिनां स्पष्टमेव । अत्रापि तत्र तत्र तदीयवचनोदाहरणैः कियदपि स्पष्टीभविष्यति । तस्मादेवंभूतं मतमनुपादेयमेवेति तन्मतसिद्धामीक्षत्यधिकरणान्तां पञ्चाधिकरणीं दूष्यतया लक्ष्यीकृत्य तन्मते सर्वत्रापि दूषणीयप्रदेशास्तन्मतदूषणकौतुकिनां विदुषां मुदे सूच्यन्ते । तथा च यद्यपि मदुक्तानि दूषणानि सम्यञ्चि न भवेयुस्तथाऽप्यस्मिन् प्रकरणे सङ्गृह्य प्रदर्शितांस्तन्मतदूष्यप्रदेशान् पश्यन्तो विपश्चितः सम्यग्दूषयिष्यन्तीति तदर्थं प्रकरणमिदमारभ्यत इत्यर्थः ।।३।।

तत्र प्रथमाधिकरणपूर्वपक्षमनूद्य दूषयति-

आत्मा ब्रह्मेत्यधीतश्श्रुतिशिखरगणैर्निर्विशेषश्च सर्वैः
किं तत्र स्वप्रकाशे गुणलवरहिते वस्तु शास्त्रेण चिन्त्यम् ।
इत्याक्षेपो गुरूणां नतिततिविषये स्वप्रणम्यत्ववादः
श्रुत्यन्तानां निरूप्यस्स यदि जडमते केन शास्त्रस्य न स्यात्।।४।।

अत्रेदं परकीयमधिकरणम्- ब्रह्ममीमांसाशास्त्रमिदं नाऽऽरम्भणीयं निर्विषयत्वात् । न तावदस्य सविशेषं ब्रह्म विषयः, तत्र मानाभावात् । वेदान्तानां निर्विशेषजीवस्वरूपमात्रपरत्वात् । न च जीव एव ब्रह्मेति स एव विषयः । तस्य स्वप्रकाशत्वेनाहमिति सर्वानुभवसिद्धत्वात् । निर्विशेषे च तत्र निरूपणीयानां धर्माणामभावादिति पूर्वः पक्षः । सिद्धान्तस्तु भवेदेवं निर्विषयत्वं यदि विचार्यत्वाभिमतं ब्रह्म जीवरूपत्वेन संशयविपर्ययानास्पदं स्यात्। न त्वेवम्, तस्य "तद्विजिज्ञासस्व। तद्ब्रह्मेति" इति विचारविषये धर्मिणि श्रुतेन ब्रह्मशब्देनैव गुणपूर्तिवाचिनाऽल्पगुणाज्जीवनिकायाद्विलक्षणत्वसिद्धेः । तस्य गुणपूर्तिवाचिता च- "अथ कस्मादुच्यते ब्रह्मेति । बृहन्तो ह्यस्मिन्गुणा" इति श्रवणात् स्वरूपतो गुणतश्चाऽपरिच्छिन्नत्वरूपविषयावयवत्वात्तदनुरोधाच्चेति ।

तत्र निर्विशेषजीवस्वरूपस्य ब्रह्मणश्श्रुत्यन्तनिरूप्यत्वमङ्गीकृत्य शास्त्रनिरूप्यत्वासंभवपूर्वपक्षो गुरूणां प्रणतिपरंपराविषये महापुरुषे तच्छिष्याश्रितस्वप्रणामानर्हत्ववादमनुकरोति । प्रमाणशिखामणयो हि वेदा नितान्तमनधिगतमर्थमन्विच्छन्ति। पौरुषेयाणि तु शास्त्राण्युपायान्तरेणाऽवगन्तुं शक्येष्वर्थेषु श्रोतृबुद्धिसौकर्यार्थं प्रवर्तमानानि स्वोक्तमप्यर्थमविस्मरणार्थमाम्रेडयन्ति। न तथाऽनधिगतार्थव्यसनितामनुभवन्ति । ततश्च यदि वेदान्ता अपि स्वप्रकाशजीवस्वरूपमात्रे कर्तृत्वभोक्तृत्वादिधर्मरहिततयाऽकर्मशेषतामप्रतिपद्यमाने स्वातन्त्र्येण पर्यवस्यन्ति तदा शास्त्रस्य तत्र पर्यवसाने काऽनुपपत्तिः ? पूर्वपक्षिणाऽपि हि वेदान्तानां प्रामाण्यसंरक्षणाय स्वप्रकाशजीवस्वरूपमात्रपरत्वेऽप्यनधिगतार्थत्वमुपपादनीयम्। ततश्च शास्त्रस्याऽपि तेन सविषयत्वोपपत्तिरिति भावः ।।४।।

ननु पूर्वपक्षिणा वेदान्तानां प्रामाण्यं न संरक्षणीयम् । ते ह्युपक्रमादिन्यायैः स्वप्रकाशजीवस्वरूपमात्रपरा एव । तस्य चाऽनधिगतत्वं कथमपि समर्थयितुं न शक्यते । तथा सति यदि तेषां प्रामाण्यं न स्यात्; मा भूत् । न्यायलब्धेऽर्थे किं कुर्मः? अत एव तदर्थमधिकृत्य शास्त्रमनारम्भणीयं सर्वथैव विषयालाभादिति पूर्वपक्षः क्रियते । काऽत्रानुपपत्तिरित्याशङ्क्याऽऽह-

प्रामाण्यं सिद्धमेव ह्यकृतकवचसां त्वन्मते तर्कशास्त्रे
शास्त्रस्याऽङ्गं यदस्य स्मरसि हरिकृतं ब्रह्मतर्काभिधानम् ।
तच्चेद्व्येन नित्यस्फुरदगुणलवप्रत्यगात्मैदमर्थ्ये
तन्निर्वाहाय तेषां सगुणविषयता पूर्वपक्षेऽपि न स्यात् ।।५।।

इत्थं हि तव मतमस्ति- विष्णुना नारायणरूपेणाऽतिविस्तरेण कृतं पुनर्व्यासरूपेण तेन संक्षिप्तञ्च ब्रह्मतर्काभिधानं शास्त्रम् । तदेव चतुर्दशविद्यास्थानान्तर्गततर्कशास्त्रम् । न तु गौतमादिप्रणीतम् । तच्चाऽस्य मीमांसाशास्त्रस्याऽङ्गम् । इदं हि सर्वेषां कर्मब्रह्मकाण्डरूपाणां वेदानां सकलगुणपरिपूर्णो भगवानेव मुख्यार्थ इति निर्णयाय प्रवृत्तम् । तत्वेन निर्णयार्थानां वेदानां तदर्थनिर्णायकानां प्रत्यक्षादीनामुपक्रमादीनांश्रुतिलिङ्गादीनां च स्वरूपप्रामाण्यतद्बलाबलनिर्णायकत्वेनैतदपेक्षितमिति। तदुक्तं **अनुव्याख्याने-**

प्रमाणन्यायमीमांसा क्रियते तर्कशास्त्रतः ।
मानन्यायैस्तु तत्सिद्धैः मीमांसामेयशोधनम् ।।
ब्रह्मतर्कञ्च भगवान् स एव कृतवान् प्रभुः ।
पञ्चाशत्कोटिविस्तारान्नारायणतनौ कृतात् ।।
उद्धृत्य पञ्च साहस्रं कृतवान् बादरायणः ।। इति ।।

एवं च यदि वेदान्तानामखण्डजीवस्वरूपपरत्वे मानान्तरसिद्धतत्स्वरूपानुवादमात्रपर्यवसायित्वेन प्रामाण्यं न निर्वहेत्, तदा तन्निर्वाहाय तेषामुपक्रमादिस्वारस्यावगतमपि तद्विषयत्वं परित्यज्य मानान्तरानधिगतसगुणब्रह्मविषयतयैव पूर्वपक्षिणाऽप्यङ्गीकर्तव्या स्यात् । न हि सिद्धप्रामाण्यानां वेदवाक्यानामनधिगतार्थपर्यवसा-

नविरोधी क्वचिदपि वाक्यस्वारस्याऽनुरोधोऽस्ति । "त्रेधा तण्डुलन्विभजेत्" "सृष्टीरुपदधाति" "कपालेषु श्रपयति" इत्यादिषु तत्स्वारस्योपस्थितानप्यन्यतः प्राप्तिमतोऽर्थान् परित्यज्य लक्षणया प्रत्यक्षविध्यन्तरद्वारा कल्पितविध्यन्तग्द्वारा वाऽनधिगत एवाऽर्थे पर्यवसानस्याऽङ्गीकृतत्वात् । विश्वजित्स्वर्गकामाधिकरणपूर्वपक्षयोरपि नाऽनधिगतार्थत्वरूपप्राणाण्यत्यागः, किन्तु फलाभावादनुष्ठानालाभमात्रम् । उक्तं हि तन्त्ररत्ने स्वर्गकामाधिकरणपूर्वपक्षेनन्वेवमप्रमाणं स्यात् । न । गम्यमाने प्रवर्तनामात्रे प्रमाणमेव । न हि पुरुषप्रवृत्यधीनं वेदप्रामाण्यम् । यदि हि तथा स्यात्ततः प्रमाणभूतवेदविहितस्यानुष्ठानं तदनुष्ठानाय च प्रामाण्यमितीतरेतराश्रयापात इति। तस्मात्त्वत्पूर्वपक्षिणा वेदान्तानां ब्रह्मतर्कसिद्धप्रामाण्याविघाताय निर्विशेषजीवविषयत्वेऽपि वाऽनधिगतविषयत्वमद्वैतिवत्समर्थनीयम् । तद्विलक्षणसगुणब्रह्मविषयत्वं वाऽङ्गीकरणीयम् इत्युभयथापिन निर्विषयत्वशङ्कावकाश इति भावः ।।५।।

परमते मतान्तरसिद्धोपक्रमादिन्यायजालमवलम्ब्य पूर्वपक्षप्रवर्तनमपि न युक्तमित्याऽऽह-

साक्षी जीवस्सुखादीन्यनिशमनुभवन्सर्वमानाधिकस्ते
तेषां तर्के त्वदिष्टो बलवदबलतासंविभागश्च सिद्धः ।
तस्याऽत्यन्तानुकूलं श्रवणमपि तव प्राग्विचारांदपेक्ष्यं
श्रुत्यन्तानां कुर्तस्यादगुणविषयतापूर्वपक्षस्य लाभः ।।६।।

एवं हि तव मतम्-सुखादिकं साक्षिवेद्यम् । साक्षी च सर्वप्रमाणाधिकः नित्यत्वेनाप्राणाण्यहेतुदोषजन्यत्वाभावात् । साक्षिविषये सुखदुःखेच्छाद्वेषादौ कदापि संशयविपर्यययोरदर्शनात् । दूरसंजातजलादिज्ञानप्रामाण्यपरीक्षाधारायाः ततो जलावगाहनादिप्रयुक्तसुखादिग्राहकं साक्षिणमासाद्यैव विश्रान्तेश्च । अतः साक्ष्यनुभवविरुद्धेऽर्थे श्रुतिरपि न प्रमाणमिति । इदं च साक्षिणो बलवत्त्वं तव मीमांसारूपे ब्रह्मतर्क एव सिद्धम् । अतोऽत्र साक्ष्यनुभवविरुद्धं वेदान्तानां सुखदुःखादिबन्धरहितनिर्विशेषजीवस्वरूपमात्रपरत्वमपेक्ष्य पूर्वपक्षप्रवर्तनं न युज्यते।

अपि च सर्वेषामपि प्रमाणानां त्वदिष्टबलाबलविभागस्तव **ब्रह्मतर्क** एव प्रसिद्धः । अतो वाक्यार्थनिर्णयप्रमाणभूतानामुपक्रमादीनामुपक्रमादुपसंहारो बलीयानित्यादिरूपस्त्वदिष्टो मानान्तरविलक्षणो बलाबलविभागोऽपि तत्रैव सिद्धः ।

उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम् ।
श्रुत्यादौ पूर्वपूर्वं च ब्रह्मतर्के विनिर्णयात् ।।

इत्य**नुव्याख्यानोक्तेः** । त्वदभिहितोपक्रमादिबलाबलानुसारी सर्ववेदान्तानामर्थश्च त्वन्मते विचारात् प्रागेन गुरुमुखादवगन्तव्यः । यावच्छक्ति सकलवेदाध्यायनपूर्वकं प्रतिवाक्यम् 'अस्य वाक्यस्याऽयमर्थ' इति सर्वेषां वेदवाक्यानां गुरुमुखादर्थग्रहणं श्रवणम् । तच्च यावदज्ञाननिवृत्त्येकस्मादेव गुरोर्वा, तत्तदुत्तमगुरुलाभे बहुभ्यो गुरुभ्यो वा सम्यगावर्तनीयम् । एवं श्रवणावृत्तिलब्धस्य वाक्यार्थग्रहस्य स्थिरीकरणार्थं न्यायविचारात्मकं युक्त्यनुसन्धानं मननम् । न तु तदेव श्रवणम् । ततश्च विचारशास्त्रं मननादिविधिमूलम्, न श्रवणविधिमूलम्, इति हि तव मर्यादा । तथा च निर्विशेषनिष्प्रपञ्चजीवाभेदादिपरवाक्यानामपि सगुणप्रपञ्चजीवभिन्नस्वाभिमतब्रह्मपरत्वमेव बोधयतां स्वाप्तानां गुरूणां सकाशाद्बहुधाऽऽवर्तितश्रवणलब्धसकलवाक्यावधारणस्तदनुगुणप्रमाणस्वरूपतद्बलाबलव्यवस्थापकब्रह्मविचारशास्त्रेतिकर्तव्यतातर्काभ्यासेन लब्धश्रवणसंवादस्तदनन्तरं तदर्थमननात्मके विचारे प्रवर्तमानः शिष्यः प्रत्यक्षादेस्तर्कशास्त्राभ्यासलब्धप्रमाणबलाबलस्याऽप्यनुगुणमनेकाप्तोपदिष्टं तं तमर्थं परित्यज्य सर्वेषां वेदान्तवाक्यानां निर्विसेषजीवचिन्मात्रमेवार्थ इति सर्वविरुद्धमर्थं कथमाशङ्केत? । तत्तदाशङ्काभावे च कथं पूर्वपक्षोदयः? शिष्यस्य प्रागेव गतार्थेन प्रतिबद्धुमशक्यतयोदेतुं योग्या शङ्कैव हि वादकथारूपे शास्त्रे पूर्वपक्षो नाम । अतोऽत्र शिष्यस्य प्राङ्निर्वृत्तेन श्रवणेनाऽङ्गविद्याभ्यासेन च प्रतिबद्धुं शक्या शङ्का नोदेतुमर्हतीति तव मते नैव पूर्वपक्षावकाशोऽस्तीति भावः ।।६।।

एवं परमर्यादया पूर्वपक्षस्य निरवकाशत्वमुक्तम् । हेत्वन्तरेणाऽपि तदाह-

श्रुत्यन्तानामखण्डो विषय इति च ते केन बोद्धव्यमेतत् ?
न्यायैस्तादर्थ्यमेषां घटयदिति दृढैः शास्त्रमेकं न चेत्स्यात् ।

तच्चेदङ्गीक्रियेत प्रतिहतविभिदप्रत्यगात्मैकनिष्ठं
कस्याऽनारम्भसिध्यै प्रभवतु भवतः पूर्वपक्षप्रयासः ।।७।।

सर्वेषां वेदान्तानां निर्विशेषजीवस्वरूपपरत्वं प्रबलन्यायैः प्रतिष्ठापयच्छास्त्रमिष्यते वा न वा? । न चेत् प्रत्यक्षादिविरुद्धं सविशेषत्वादिविषयानेकावान्तरवाक्यकृतान्तकलहधीप्रतिरुद्धं तेषां तत्परत्वं न सिध्येदिति तत्सिद्धिसापेक्षानारम्भपूर्वपक्षोत्थापनं न स्यात् । इष्यते चेत् तदारम्भमपेक्ष्य विषयत्वाभावेन तदनारम्भस्समर्थ्यत इति व्याघातः स्यादित्यर्थः।।७।।

नन्वेवं सति **वाचस्पतिविवरणकाराभिमतयोर**प्याद्याधिकरणपूर्वपक्षयोर्व्याघातः स्यात् । **वाचस्पतिमते** हि प्रत्यगात्मन एव ब्रह्मत्वात् तस्य चाऽहमिति प्रकाशमानत्वाल्लोकसिद्धस्य तस्य विचारार्थं शास्त्रं नाऽऽरम्भणीयमिति पूर्वः पक्षः । **विवरणकारमते** तु प्रत्यग्ब्रह्मैक्यस्य विषयत्वेनाऽभिमतत्वात् प्रत्यग्ब्रह्मणोश्च विरुद्धस्वभावयोरैक्यासिद्धेः तद्विचरार्थं शास्त्रं नाऽऽरम्भणीयमिति पूर्वः पक्षः । न च प्रत्यगात्मन एव ब्रह्मत्वं प्रत्यग्ब्रह्मणोरैक्यं च शास्त्रं विना सिध्यति, येन व्याघातो न स्यादित्याशङ्क्याऽऽह-

सिद्धेऽसिद्धे च सिद्धान्त्यभिमतविषये दूषणं चैत्क्रियेत
न्यायापेक्षा न तस्योन्मिषति निजमतप्रक्रियार्थानुवादे ।
सिद्धान्त्यस्वीकृतेऽर्थे यदि तु विषयतापादनं पूर्वपक्षे
कर्तव्यं तर्ह्युपायः कथमिव सुधिया तत्र नाऽपेक्षणीयः।।८।।

प्रत्यगात्मन एव ब्रह्मतया विषयत्वं प्रत्यग्ब्रह्मणोरैक्यस्य विषयत्वं च सिद्धान्त्यभिमतमेवाऽनूद्य तयोरैक्यस्य सिद्धत्वेनाऽन्यस्याऽसिद्धत्वेन विषयत्वासंभव इति तौ पूर्वपक्षौ प्रवृत्तौ । तत्र कुतः प्रत्यगात्मैव ब्रह्मेति वा कुतःप्रत्यग्ब्रह्मणोरैक्यमिति वा पूर्वपक्षिणं प्रति सिद्धान्तिनो हेत्वाकाङ्क्षा न संभवति, सिद्धान्त्यभिमतस्यैव तयोर्विषयत्वस्य पूर्वपक्षेऽनूदितत्वात् । ततस्तत्र विषयोपपादकशास्त्रारम्भमनपेक्ष्य तदनारम्भपूर्वपक्षप्रवृत्तेर्न व्याघातः । त्वन्मते तु निर्विशेषजीवचिन्मात्ररूपं ब्रह्मेति

सिद्धान्त्यनभिमत एवाऽर्थेविषयत्वमापाद्य पूर्वपक्षप्रवृत्तिरिति तस्मिन्मते सिद्धान्तिनो हेत्वाकाङ्क्षोदयेन तदुपपादकशास्त्रारम्भस्य त्वत्पूर्वपक्षिणाऽपेक्षणीयत्वात् व्याघातो भवत्येवेति भावः ।।८।।

ननु सिद्धान्त्यनभिमतमर्थं पुरस्कृत्य शास्त्रानारम्भपूर्वपक्षे तदुपपादनाय शास्त्रारम्भोऽपेक्षित एवेति व्याघातश्चेत्, पूर्वमीमांसाद्याधिकरणपूर्वपक्षेऽपि व्याघातस्स्यात् । स खल्वेवं प्रवृत्तः- अध्ययनविधिना विश्वजिन्न्यायादध्ययनस्य स्वर्गार्थतावबोधकेनाऽर्थज्ञानेतरफलार्थत्वं नीयमानानां वेदानां विषनिर्हरणादिमन्त्राणामिवाऽर्थविवक्षाग्राहकं प्रमाणं नाऽस्तीति वेदवाक्यान्यापाततोऽपरिपूर्णानुपपन्नार्थानि लक्षणानुषङ्गाध्याहारव्यवधारणकल्पनाधिकार्थकल्पनादिभिरवश्यमुपपादनीयानीत्यत् नियामकाभावादनुपपत्तिशङ्काकलुषितवेदार्थविचारात्मकं शास्त्रं नाऽरम्भणीयमिति। तत्रापि स्वाध्यायाध्ययनस्य स्वर्गार्थत्वं सिद्धान्त्यनभिमतमेव पूर्वपक्षिणोपपाद्यमिति तदुपपादकविश्वजिन्न्यायादिप्रतिपादकशास्त्रारम्भापेक्षेत्याशङ्क्याऽऽह-

एकं वाक्यं विचार्यं यदि भवति नयो वापि सर्वत्र तुल्यः
तत्किंचिन्न्यायक्लृप्त्याऽनभिमतरचना युज्यते पूर्वपक्षे ।
सर्वेषामेव नानाविधनयनिकरानेयतात्पर्यसीम्नां
वेदान्तानां विमर्शाद्विषयविरचना त्वेकमीहेत शास्त्रम् ।।९।।

धर्मजिज्ञासासूत्रेऽध्ययनवाक्यमेकमेव विचार्यम् । तस्य सिद्धान्त्यभिमतदृष्टफलरूपार्थज्ञानार्थत्वे वैयर्थ्यप्रसङ्गात् सर्वापेक्षितस्वर्गार्थत्वं वाच्यमिति शक्यं पूर्वपक्ष एव किञ्चिन्न्यायोपपादनमिति तदर्थं न शास्त्रारम्भापेक्षा । अध्ययनविधिद्वारा तदुपात्तानां सर्वेषामपि वेदवाक्यानां विचार्यत्वेऽपि तेषामविंविक्षितार्थत्वे पूर्वपक्षिणोपपादनीये विषनिर्हरणादिमन्त्रवदन्यार्थनीयमानत्वमेक एव न्यायः। सोऽपि पूर्वपक्षएव व्युत्पादयितुं शक्य इति तदर्थमपि न शास्त्रारम्भापेक्षा । न हि कियन्तमपि न्यायमप्रदर्श्य पूर्वपक्षः क्रियते । इह तु त्वन्मते नैकमेव वेदान्तवाक्यं विषयः । तस्यैकस्य केनचिन्न्यायेन पूर्वपक्ष एव व्युत्पादितेन निर्विशेषचिन्मोक्षपरत्वव्यवस्थापनेन सिद्धान्त्यभिमते सगुणे ब्रह्मणि प्रमाणाभावात्तद्विचारार्थमपि शास्त्रं नारम्भणीयमिति

वाच्यम्, त्वदभिमतं च । न च त्वन्मते सर्वेषां वेदान्तानां निर्विशेषजीवचिन्मात्रपरत्वे सार्वत्रिक एको न्यायोऽस्ति । उपक्रमादीनां श्रुतिलिङ्गादीनां च परश्शतं बाध्यबाधकभावप्रकारशालिनां तत्र तत्र व्यवस्थिततत्वात् ।

न च तेषां सर्वेषामेकस्मिन्नेवाऽत्र पूर्वपक्षे व्युत्पादनं युक्तम् । तथा सति सर्वस्याऽपि शास्त्रस्यैकाधिकरणकल्पनाप्रसङ्गात् । तस्मात्तावतां न्यायानां व्युत्पादकमेकं शास्त्रमिहाऽपेक्षितमित्यत्रैव व्याघातो न धर्ममीमांसानारम्भपूर्वपक्ष इति भावः ।।९।।

एतेन **वाचस्पतिपूर्वपक्षे** प्रत्यगात्मन इदानीमहमिति प्रकाशमानं रूपमध्यासपरिनिष्पन्नं तदिह न विचार्यम् । किन्तु संसारदशायामनाविर्भूतं निर्विशेषं तस्य तात्विकं रूपमस्ति श्रुतिप्रसिद्धम् तद्विचारार्थं शास्त्रारम्भ इति शङ्कावारणाय। **विवरणकार**पूर्वपक्षे प्रत्यग्ब्रह्मैक्यं नाऽसिद्धम्, तत्साधकश्रुतिसद्भावादिति शङ्कावारणाय च बहूनां निर्विशेषवाक्यानामभेदवाक्यानां चाऽन्यपरत्वं वक्तव्यमिति तदुपपादकशास्त्रारम्भापेक्षया व्याघातस्स्यादित्यपि शङ्का निरस्ता । एकयैव प्रत्यक्षादिविरोधयुक्त्या तेषामन्यपरत्वकल्पनात् ।।९।।

स्यादेतत्- अस्त्येव शारीरकशास्त्रादस्मादन्यत्सर्ववेदान्तानां निर्विशेषपरत्वव्युत्पादकं शास्त्रम् । तदवलोकनेनैव पूर्वपक्ष स्यादित्याशङ्क्याऽऽह-

तच्छास्त्रं चेदितोऽन्यत्कणचरमतवत्कल्प्यते पूर्वसिद्धं
जीवं तस्य स्वसिद्धं विषयमुपयतो हन्त तस्यैव सोऽस्तु ।
तेनैकार्थ्ये विरोधेऽप्यपहतविषयं शङ्क्यते चेदिहेदं
जीवासंदिग्धतोक्तिः कथमिव घटनी पूर्वपक्षस्य ते स्यात् ।।१०।।

तस्य शास्त्रस्य स्वप्रकाशोऽपि जीवो विषयः स्वीक्रियते चेदस्यैव शास्त्रस्य स विषयोऽस्तु । किमप्रसिद्धशास्त्रान्तरकल्पनया ? तत्कल्पनया पूर्वपक्षसमर्थनेऽपि स्वप्रकाशस्य विषयत्वासंभवयुक्तिव्याहतत्वापरिहारात्। नन्वत्र स्वप्रकाशस्य विषय-

त्वासंभवयुक्त्यानारभ्यमिति न पूर्वः पक्षः ; किन्तु वेदान्तानां स्वप्रकाशचिन्मात्रपरत्वव्यवस्थापकं तावच्छास्त्रमस्तु । इदमपि तथाभूतमिति चेत्तेन गतार्थम्। सगुणब्रह्मपरत्वव्यवस्थापकं चेत्तेन बाधितार्थमित्युभयथापि तदपहृतविषयत्वादनारभ्यमिदं शास्त्रमित्यतो न व्याघात इति चेत् ; एवं तर्हि जीवस्य स्वप्रकाशत्वेनाऽसंदिग्धत्वोक्तिः पूर्वपक्षेऽनुपयुक्ता तद्विरुद्धा च स्यात् । तदेव हि त्वया पूर्वपक्षसमर्थनार्थमुक्तम् । कश्च कणभुगादिशास्त्रेणाऽप्यपहृतविषयतयाऽनारम्भे शङ्कितुं शक्ये निर्विशेषशास्त्र एव तव पक्षपातः ? समयपादे तत्सर्वं निराकर्तव्यमिति चेत् इदमपि तथा । अनभिमतं शास्त्रान्तरमस्ति चेत्तत्रैव निराकर्तव्यं स्यात् । अनभिमततन्त्राणां सर्वेषामपि स्वातन्त्र्येण पृथक् पृथक् तत्रैव निराकरणात् । तस्मादनिराकरणादवसीयते- इदमेव तच्छास्त्रं नाऽन्यदिति ।।१०।।

नन्वेतावताऽपि स्वप्रकाशस्य विषयत्वानुपपत्तिरसमाहितैवेत्याशङ्कां परस्याऽपि संमतेनाऽविद्यावरणेन जीवस्याऽनधिगतत्वमुपपादयन् परिहरति-

का चात्रानुपपत्तिर्जीवस्य स्वप्रभस्य विषयत्वे ।
आविद्यकमावरणं जानीषे चानुमन्यसे च त्वम् ।।११।।

ननु भावरूपाज्ञानं नाऽनुभवामः । न चाऽनुमन्यामहे । न जानामीत्यनुभवस्य ज्ञानाभावविषयत्वसमर्थनादित्याशङ्क्याऽऽह-

पुंस्त्वादिवत्त्विति नये पुरुषस्य हि त्व-
मानन्दमावृतमभिन्नमुपेत्य नित्यम् ।
तत्त्वावबोधसमनन्तरमस्मदुक्तं
मुक्तो तदावरणभञ्जनमन्ववादीः ।।१२।।

एवं हि तव मतम् । नित्यानन्दस्वरूप एव सन्मुक्तियोग्यो जीवः । न तु तस्य मुक्तावागन्तुकोऽस्त्यानन्दः । विकाररूपाणां धर्माणां मुक्तावभावात् । न च तदानी पुरुषार्थरूपस्याऽऽनन्दस्य संसारदशायामपि सत्वे मुक्तिसंसारयोरविशेष-

प्रसङ्गः । तस्येदानीमावृतत्वाभ्युपगमात् । न चाऽनादिभावरूपमज्ञानं तदावरकं सिद्धान्ते नेष्यते सादिना तु कामकर्मादिना न निर्वाहः । सृष्टिप्रलययोस्तद्वृत्त्यभावेन मुक्ताविवाऽऽनन्दस्फूर्तिप्रसङ्गादिति वाच्यम् । सिद्धान्तेऽपि सत्यस्याऽनादेः जीवाश्रितस्य तं प्रति तदीयानन्दादिकं ब्रह्मस्वरूपतद्गुणगणादिकं चाऽऽवृण्वतो मायाविद्याप्रकृत्यादिशब्दवाच्यद्रव्यरूपस्य ज्ञानविरोधिनो भावरूपस्याऽज्ञानस्य "अनादिमायया सुप्तो यदा दीवः प्रबुध्यते" "भूयश्चान्ते विश्वमायानिवृत्तिरि" त्यादिश्रुतिस्मृतिप्रतिपन्नस्येष्यमाणत्वात्तस्य च परमेश्वरापरोक्षज्ञानेन निवृत्तौ प्राक् सत एवाऽऽनन्दस्य बाल्येऽपि सतः पुंस्त्वादेर्यौवन इव मुक्तावभिव्यक्तिः । सुषुप्त्यादौ तत्सत्वेऽपि कामकर्मादिवृत्त्यभावादीषदभिव्यक्तिः । तस्याऽऽनादित्वेन स्वोपादानगतोत्तरावस्थारूपनिवृत्त्यसंभवेऽपि प्रमाणसिद्धनिवर्तकोपनिपातबलात् रूपप्रध्वंसरूप निवृत्तिः । तच्च प्रतिजीवं भिन्नमित्येकमुक्तौ न सर्वमुक्तिरिति स सर्वोऽप्ययमर्थः "पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगादि" त्यधिकरणे प्रतिपाद्यत्वेन त्वदभिमतोऽस्मदीयभावरूपाज्ञानवृत्तानुवाद एव । तदनिर्वचनीयत्वादिकं किञ्चित्परं नेष्यते । तथा च यस्त्वया संसारदशायां प्रकाशमानस्यैव जीवस्य स्वरूपभूतानन्दस्तदानीमावृत इष्यते स एव श्रुतीनां जीवस्वरूपत्वपक्षेऽनधिगतो विषय इति न तस्मिन्पक्षे विषयाभावसिद्धिरित्यर्थः ।।१२।।

ननु मत्सिद्धान्ते जीवतदानन्दयोरभेदेऽपि गुणगुणिभावनिर्वाहकस्य भेदप्रतिनिधेः विशेषस्य सत्वात् स्वप्रकाशजीवस्वरूपानावरणेऽप्यानन्दस्य युक्तमावरणम् । अखण्डजीवपक्षे जीवतदानन्दयोर्विशेषाभावादयुक्तम् । तदा हि प्रकाशमानस्यैवाऽऽनन्दस्याऽप्रकाशमानत्वं वाच्यम् । न च तद्युज्यते, विरोधादित्याशङ्क्याऽऽह-

अभेदे दृढे तत्प्रकाशप्रकाशावविद्याभिधब्रह्म शक्त्योपपन्नौ ।
विशेषोऽपि ते जीवचैतन्यरूपं विरोद्धुं न शक्नोति तस्य प्रकाशम् ।।१३।।

सत्यं निर्विशेषजीवपक्षे प्रकाशमानस्यैवाऽऽनन्दस्याऽप्रकाशमानत्वं वाच्यमिति । तत्त्वविद्याशक्तिमहिम्नोपपद्यते । सा ह्यघटितघटनापटीयसी ब्रह्मणः शक्तिः तस्यास्तादृशो महिमा नेष्यते चेत् सविशेषाभेदपक्षेऽप्ययं विरोधो दुष्परिहरः। न हि

विशेषोऽस्तीत्येतावताऽऽनन्दप्रकाशस्याऽविद्यावरणेन किञ्चिदपनीयते । घटस्य कुड्यावरणेन तत्सन्निकर्षप्रतिबन्धवत् पटशौक्ल्यस्य महारजतावरणेन तद्ज्ञानप्रतिबन्धवच्चाऽत्राऽऽनन्दस्य सन्निकृष्टत्वप्रतिबन्धस्य तत्प्रकाशोत्पत्तिप्रतिबन्धस्य च वक्तुमशक्यत्वात् । नित्यस्य जीवचैतन्यस्यैव तत्प्रकाशकतया तदुत्पत्तेः तत्कारणेन्द्रियसन्निकर्षस्य चाऽनपेक्षणात् । छत्राद्यावरणेनाऽऽलोकस्य विषयसंबन्धप्रतिबन्धवज्जीवचैतन्यस्याऽऽनन्दसंबन्धप्रतिबन्धस्याऽपि वक्तुमशक्यत्वाच्च । तयोर्विषयविषयिभावसंबन्धस्याऽनागन्तुकस्वरूपाभिन्नधर्मत्वात् ।

न च मुक्तावानन्दप्रकाशो जीवभिन्नो जन्यज्ञानरूप एवाऽस्तु । जीवचैतन्यस्यैवाऽऽनन्देन विषयविषयिभावसंबन्धस्याऽनागन्तुकस्वरूपाभिन्नधर्मत्वात् । जीवचैतन्यस्यैव वाऽऽनन्देन विषयविषयिभावस्तदानीं जन्योऽस्त्विति वाच्यम् । मुक्तावन्तःकरणविलयेन तद्वृत्तीनां जन्यज्ञानानां जीवे जन्यधर्माणाञ्च त्वयाऽप्यनङ्गीकृतत्वात् । न चाऽऽनन्दजीवचैतन्ययोर्विषयविषयिभावः सदा शक्त्यात्मना स्थितोऽपि मुक्तौ व्यक्त्यात्मतामापाद्यत इति तदानीमेवाऽऽनन्दप्रकाशो न प्रागिति वाच्यम् । व्यक्तेरपि नित्यत्वानभ्युपगमे मुक्तौ जीवस्य सविकारत्वापत्तेः । नित्यानित्ययोश्शक्तिव्यक्त्योः भेदप्रसङ्गाच्चेति ।।

"न विशेषात्मता चेयमनित्या शक्तिरूपता ।
सैव यत्सविशेषा स्यात् विशेषोऽन्यो न चाऽप्ययम् ।।"

इत्यनुव्याख्याने व्यक्तेश्शक्त्यभिन्नत्वेन नित्यत्वप्रतिषेधाच्च । इदानीमप्यानन्दप्रकाशप्रयुक्तस्य स्वात्मनि परमप्रेम्णोऽनुभवाच्च । तस्मात्त्वन्मतमर्यादया लोकानुभवेन च जीवानन्दे प्रकाशमान एवाऽप्रकाशमानत्वं वक्तव्यम् । तच्चाऽविद्यामहिम्नैवोपपादनीयम् । तथैवोपपादितञ्च **न्यायसुधायाम्** । अतः परमेश्वर एव सत्वादिगुणमप्यविद्याविरोधित्वेनाऽविद्यया? स्वाधीनया प्रकृत्याख्ययाऽचिन्त्याद्भुतया स्वशक्त्या जीवस्य स्वप्रकाशमपि स्वरूपचैतन्यमाच्छादयतीति युक्तमिति तत्र विशेषोऽकिञ्चित्कर एवेति भावः ।।१३।।

मुख्यो भेदस्सन्नपि ब्रह्मदृष्टिं नेष्टे रोद्धुं तत्र को वा विशेषः ।
तद्दृष्टिस्ते नित्यसिद्धोहि जीवस्तस्मादन्यन्नाऽस्ति तद्गोचरत्वम्।।१४।।

जीवस्य ब्रह्मणस्सकाशान्मुख्यो भेदस्सन्नपि ब्रह्मदर्शनं यदा निरोद्धुं न शक्नोति तदा जीवस्य स्वानन्दाद्विशेषो भेदप्रतिनिधिस्तद्दर्शनं निरोद्धुं न शक्नोतीति किमु वक्तव्यमित्यर्थः । भेदोऽपि निरोद्धुं न शक्नोतीत्यत्र विशेषे दर्शित एव न्यायः। स तु पूर्वश्लोके संक्षिप्त इह स्पष्टीकृतः । न चाऽव्यक्तस्वभावत्वाद्ब्रह्मणस्तदप्रकाशोपपत्तिरिति वाच्यम् । तथा सति ब्रह्मणः प्रकाशप्रसक्त्यभावेन जीवाश्रितमज्ञानं ब्रह्म तद्धर्मविषयमानन्दपारतन्त्र्यादिस्वधर्मविषयं चेति कल्पनावैयर्थ्यप्रसङ्गात् । उपासनानन्तरमप्यप्रकाशापातेन मोक्षशास्त्रावैयर्थ्यप्रसङ्गाच्च ।

न चाऽव्यक्तस्वभावमपि ब्रह्मोपासनया प्रसन्नं सत्स्वशक्त्यैवाऽपरोक्षीभवति । तच्चाऽपरोक्षज्ञानमन्तःकरणवृत्तिरूपमिति तेनैव मोक्षः। अतः स्वरूपचैतन्यस्य कदाचिदपि ब्रह्म न विषयमिति वाच्यम् । त्वया "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तादि"ति श्रुत्या ब्रह्म परमप्रेमास्पदतयोक्तमिति मुक्तौ स्वरूपानन्दानुभववत्तदनुभवस्याऽपि पुरुषार्थतयाऽङ्गीकृतत्वात् । मुक्तौ माहात्म्यग्रहणपूर्वकस्नेहरूपाया भक्तेरुपासनायाश्च त्वयाऽङ्गीकृतत्वाच्च । तस्मान्मुक्तौ स्वरूपचैतन्यातिरिक्तज्ञानाभावात् स्वरूपचैतन्यस्य च तदानीमागन्तुकविषयविषयिभावासंभवादनादिकालमारभ्यैव ब्रह्मणस्तद्गुणगणस्य च मुक्तियोग्यानां जीवानां स्वरूपचैतन्ये प्रकाशनं वक्तव्यमेव । तथाऽङ्गीकृतञ्च त्वया "स्थानविशेषात् प्रकाशादिवदि" त्यधिकरणे । तत्र हि चतुर्मुखादिजीवानन्दानां ब्रह्मानन्दप्रतिबिंबत्वे बिम्बावैचित्र्याद्वैचित्र्यानुपपत्तिमाशंक्य तत्तज्जीवगतानादिभक्त्यादिगुणवैचित्र्यात्तदानन्दादिवैचित्र्यमुपपद्यत इत्युक्तम् । उदाहृतञ्च-

"ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः ।
ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता ।।" इति ।

एवं "अनुबन्धादिभ्य" इत्यधिकरणान्तरोक्तं

"तथाप्यनादिसंसिद्धभक्त्यादिगुणपूगतः ।
लभेद्गुरुप्रसादञ्च तस्मादेव च तद्भवेत् ।।

इति वचनमप्युदाहर्तव्यम् । युक्तञ्चाऽतीतानागतपदार्थानां तत्तत्कालानामव्याकृताकाशस्य तदंशानां प्राच्यादीनां दिशां मनसः परमाणूनां तदवयवपरम्पराणां च साक्षिप्रत्यक्षविषयत्वमातिष्ठमानस्य तव ब्रह्मणोऽपि तद्विषयत्वम् । एवं ब्रह्मणः तद्गुणानाञ्च प्रकाशमानत्वेऽपि त्वयाऽस्य शास्त्रस्य निर्विषयत्वपरिहारायाऽप्रकाशमानत्वमप्यविद्यामहिम्नोपपादनीयम् । उपपादितञ्च तथैव **न्यायसुधायाम्** । यद्यपि जीवचैतन्यं ब्रह्म स्वधर्मप्रकाशनात्मकम्, तथापि परमेश्वराचिन्त्याद्भुतशक्त्युपबृंहिताविद्यावशात् न तथा संसारे प्रकाशयतीति।।१४।।

एवं परमते सविशेषाभिन्नस्य जीवानन्दस्येवाऽत्यन्तभिन्नस्य इव चाऽत्यन्ताभिन्नस्याऽखण्डानन्दस्य प्रकाशमानस्याऽप्यप्रकाशमानत्वमविद्याशक्तिमहिम्नोपपन्नमित्युक्तमर्थं उपसंहरन्नेव तत्र युक्त्यन्तरं दर्शयति--

इति तव सविशेषानन्दवद्ब्रह्मवच्च
स्फुरणयुतमखण्डानन्दमप्याद्रियन्ते ।
अनधिगतमविद्याशक्तिभूम्नैव धीराः
स हि सकलमनूद्य प्रश्नतोऽपि प्रसिद्धः ।।१५।।

त्वदुक्तोऽर्थःक इति न जानामि, दूरे जलमिव भासमानं किमिति न जानामि इति शब्दतः प्रत्यक्षतश्चाऽवगतमप्यर्थं साकल्येनाऽनूद्य तत्रैव प्रश्नो ज्ञानानुभवश्च दृश्यते । अतो बाह्यविषयेऽपि प्रकाशमानस्याऽप्रकाशमानत्वं प्रसिद्धमेव । न च त्वदुक्तोऽर्थ इत्यादौ सामान्यतो ज्ञाते विशेषतः प्रश्नो ज्ञानानुभवश्चेति वाच्यम् । सामान्यस्य ज्ञातस्य प्रश्नविषयतायाः अज्ञानावच्छेदकतायाश्चाऽनुपपन्नत्वात् । अज्ञातस्य विशेषस्य प्रश्नविषयतयाऽज्ञानावच्छेदकतया चाऽनुवादायोगात् । न चाऽन्वयव्यतिरेकाभ्यां विशेषप्रश्ने सामान्यमेव तन्त्रम्; विशेषज्ञानानुभवे च सामान्यमेवाऽवच्छेदकमिति वाच्यम् । सामान्यविशेषभावस्य व्याप्यव्यापकभावातिरिक्तस्याऽभावेनाऽज्ञातधूमस्याऽपि ज्ञातवह्निकस्य धूमप्रश्नप्रसङ्गात् । धूमाज्ञानस्य वह्निं न जानामीति वह्न्यवच्छेदेनाऽनुभवप्रसङ्गाच्च । अनुमितिहेतुज्ञानविषयव्याप्तिप्रश्नादिस्थले विशिष्य त्वदभिमतसकलविशेषणविशिष्टं व्याप्त्यादिकमवगच्छत एव प्रश्नार्थं

तदप्रकाशस्य त्वयाऽपि वक्तव्यत्वाच्च । अन्यथा प्रष्टुः तदवगमाभावे तस्य प्राक्तनवह्न्याद्यनुमानविलोपप्रसङ्गात् । तदवगमं विनाऽपि तदा तस्याऽनुमित्यङ्गीकारे तत्रैव व्यभिचारेण त्वदभिमतव्याप्तिज्ञानस्याऽनुमित्यकरणत्वप्रसङ्गात् ।।

न च दूरे जलज्ञानमनभ्यासदशादोषात् सन्दिग्धप्रामाण्यमिति तदा हितार्थसंदेहात् प्रश्नो ज्ञानानुभवश्चेति वाच्यम् । अनभ्यासदशापन्नज्ञाने प्रकाशमानस्याऽपि जलस्याऽप्रकाशमानत्वानङ्गीकारे प्रामाण्यसंशयस्यैवाऽनवतारप्रसङ्गात् । प्रामाण्यशरीरनिविष्टस्य प्रामाण्यसंशयविषयज्ञानविषयीभूततद्वत्स्वभागातिरिक्तस्य पुरोवर्त्तिविशेषकत्वस्य जलत्वप्रकारकत्वस्य च संशयविपर्ययानास्पदतया प्रामाण्यसंशयस्य तद्वत्त्वसंशयपर्यवसन्नत्वात् ।।

एवमस्मिन्ज्योतिर्मण्डले "कश्चन्द्र" इत्यादिः चक्षुषा चन्द्रमण्डलादिकं पश्यत एव प्रश्नोऽपि प्रकाशमानस्याऽप्रकाशमानत्वसाधक उदाहर्तव्यः । तत्प्रपञ्चस्त्वन्यत्र कृतोऽनुसन्धेयः ।।

इदं त्वत्राऽवशिष्यते-परसिद्धान्ते सत्यमज्ञानमस्ति । पूर्वपक्षे तु कल्पितमेव तदभ्युपगम्यते । कल्पितश्च न तदप्रकाशोपपादकमिति तदपवरके प्रविशता तदालोके कल्पितस्याऽपि तमसस्तदप्रकाशोपपादकत्वं दृष्टमित्यादि युक्तिभिस्स्माभिस्सिद्धान्तलेशसङ्ग्रहादिषु दर्शिताभिर्निरस्तप्रायमिति नेह प्रपञ्च्यते।।१५।।

एवं निर्गुणस्याऽनधिगततया विचार्यत्वसंभवेऽपि तत्र विचिकित्सा चेत् सगुणब्रह्मविषयतैव शास्त्रारम्भस्स्यात्। न च सर्ववेदान्तानामद्वैतिदर्शितन्यायैरखण्डैकपरत्वात्सगुणे ब्रह्मणि मानाभावः । अद्वैतिनां मतेऽध्यारोपापवादन्यायेनाऽद्वितीयब्रह्मप्रतिपादने महातात्पर्येण स्वरसतः प्रवृत्तानामपि वेदान्तानां मध्येकेषाञ्चिद्वाक्यानां सृष्टिवाक्यप्राप्तगुणसहितब्रह्मोपासनाविधिपरस्य ब्रह्मणस्तदुपासनाविषयगुणत्वप्रतिपादकत्वस्य चाऽङ्गीकृतत्वादित्यभिप्रेत्याऽऽह-

यदि त्वेनं सत्यप्यगुणविषयं नाऽनुमनुषे
तदा शास्त्रं कामं भवतु सगुणब्रह्मविषयम् ।
श्रुतीनां कासाञ्चित्तदपि कथयत्येकविषयं
महातात्पर्येण प्रगुणमगुणेऽपि स्थितिजुषाम् ।।१६।।

इत्थं कृतं पूर्वपक्षदूषणमुपसंहरन्नेव तत्सिद्धान्तस्य दूषणं वक्तुं तस्याऽप्यसारतां प्रतिजानीते-

तस्मात्तुच्छं प्राचि पक्षे शास्त्रानारम्भवर्णनम् ।
तथैव तत्सिद्धान्तेऽपि तदारम्भसमर्थनम् ।।१७।।

परेण स्वकीयाधिकरणपूर्वपक्षप्रदर्शनव्याजेनाऽद्वैतवाद एव शास्त्रानारम्भदूषणं दर्शितमिति तत्साधारण्याय पूर्वपक्षस्य प्राचि पक्षे इति निर्देशः।।१७।।

अथ परसिद्धान्तमनूद्य दूषयति-

अद्वैते यद्यशेषश्रुतिशिखरगिरामैकमत्यं निरास्यं
तासां ब्रह्मेति शब्दो गुणगरिमनिमित्तोऽपि नेष्टे गुणत्वात् ।
निर्दोषाशेषदीव्यद्गुणजुषि कलयन्सर्ववेदैकमत्यं
तद्बद्धत्वादिवाचां त्वमपि खलु तथैवाऽन्यपर्यं ब्रवीषि ।।१८।।

सर्वेषां वेदान्तानां सजातीयविजातीयस्वगतभेदरहिते निर्विशेषजीवचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्य कृतस्य पूर्वपक्षस्य निरासाय सर्व वेदान्तप्रतिभटत्वेन विचारविधिवाक्यगतब्रह्मशब्दस्त्वया स्थापितः । न चाऽयं गुणपूर्तिनिमित्तः सन्नपि सर्वानपि वेदान्तानुपक्रमादिदृढन्यायनिर्णीताद्वैततात्पर्यात्प्रच्यावयितुं शक्तः । प्रत्युत स्वयमेव तद्गुणभूतत्वात्तदनुगुणमेवाऽद्वैतवाद्यभिमतत्रिविधपरिच्छेदराहित्यरूपमर्थमालम्बते । दर्शितश्चाऽयं न्यायः त्वयाऽपि "न स्थानतोऽपी" त्यधिकरणे । तत्र

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्येन सिध्यतः ।।

इत्यादिश्रुतिवाक्याद्विश्वतैजसप्राज्ञादिरूपस्य भगवतोऽपि बद्धत्वादिदोषोऽस्तीत्याशङ्क्योक्त**मनुव्याख्याने-**

"सर्वत्राऽशेषदोषोज्झपूर्णकल्याणचिद्गुणः ।
तद्विरुद्धन्तु यत्तत्र मानं नैव भवेत्क्वचित् ।
महातात्पर्यरोधेन कथं स्यान्मानमत्र त्वि"ति ।।

न्यायसुधायाञ्चोक्तम् - सकलश्रुतीतिहासपुराणानां परमेश्वरस्याऽशेदोषविधुरत्वे समस्तगुणपरिपूर्णत्वे च यन्महातात्पर्यं तद्विरोधेन तद्वाक्यमत्र भगवतो दोषित्वादौ कथं मानं भवेत्? । दृष्टं हि निर्णीतमहावाक्यार्थविरुद्धस्य तदवान्तरवाक्यस्य तत्राऽप्रामाण्यम् । यथा- स्वर्गप्रयोजनाग्निहोत्रपरमहावाक्यार्थविरुद्धस्य "यद्यमुष्मिंल्लोक्रेऽस्ति वा न वै"त्यादेस्तदवान्तरवाक्यस्य । महावाक्यं हि प्रधानं अनन्यार्थत्वात् । अप्रधानं त्ववान्तरवाक्यं तदर्थप्रतिपत्तिहेतुत्वादिति । तस्मादिहाऽद्वैतवादिदर्शितोपक्रमादिनयेभ्यः प्रबलतरैः न्यायैः सर्ववेदान्तानां सगुणे ब्रह्मणि महातात्पर्यं प्रसाध्यते चेदेवं कृतपूर्वपक्षनिरासो लभ्यते । न तु ब्रह्मशब्दशक्तिप्रदर्शनमात्रेणेति भावः ।।१८।।

स्यादेतत् - जीवातिरिक्ते ब्रह्मणि प्रमाणं नास्तीति प्रत्यवतिष्ठमानं पूर्वपक्षिणं प्रति तत्र प्रमाणतयोपन्यस्तं ब्रह्मपदं तस्याऽज्ञातस्य ज्ञापकं उत्पत्तिवाक्यस्थानीयमिति तत्प्रतिपादितं गुणपूर्णत्वमुत्पत्तिशिष्टम् । तेन जीवातिरिक्ते ब्रह्मणि सिद्धे वेदान्तेषु सर्वैरपि ब्रह्मप्रकरणैस्तत्रैव वर्तितव्यमिति तत्प्रतिपादितानि निर्गुणत्वजीवाभिन्नत्वादीन्युत्पन्नशिष्टानि । अत उत्पत्तिशिष्टप्राबल्यमर्यादया ब्रह्मपदस्य सर्ववेदान्तेभ्योऽपि प्राबल्यं स्यादित्याशङ्क्याऽऽह-

नाऽऽशंक्योत्पत्तिशिष्टस्थितिरिह यत इत्यन्यसिद्धानुवादा-
त्यक्तं चोत्पत्तिवाक्यावगतमपि पशोर्भूरि बाधाद्धविष्टम् ।
अस्ति श्रुत्यन्तरानुग्रह इति सुशकं तद्धविष्टेऽपि वक्तुं
रूपत्वादीव कुम्भे गुणिनि गुणगतं नापि नाम्नो निमित्तम् ।।१९।।

स्यादेतदेवं यदि ब्रह्मणो धर्मिणः तद्ब्रह्मेत्यत्रत्यं ब्रह्मपदमज्ञात ज्ञापकं स्यात्। न त्वेवम् तस्य "यतो वा इमानी"ति यदुपबन्धबलेन जगत्करणतया सहाऽन्यतः प्राप्तस्य धर्मिणोऽनुवादकत्वावगमात् । ततश्च "सदेव सौम्येदमग्र आसीत्" "आत्मा वा इदमेक एवाऽग्र आसीत्" इत्यादिकारणवाक्यमेव तत्प्रापकं वक्तव्यम् । तत्र च सजातीयविजातीयस्वगतभेदनिषेधः स्वरसतः प्रतीयत इति स एवोत्पत्तिशिष्टो न तु गुणपूर्णत्वमिति विपीरतमेव बलाबलम् । अस्तु वा तदेव ब्रह्मपदमज्ञातधर्मिज्ञापकं तथाऽपि नाऽत्रोत्पत्तिशिष्टन्यायावतारः । उत्पत्तिशिष्टमपि हि न भूरि बाधाय प्रभवति । अत एव "पशुमालभेत" इत्युत्पत्तिवाक्ये देवता सम्बन्धेनावगतं पशोर्हविष्ट्वं "पशुं विशास्ति हृदयस्याग्रेऽवद्यती"त्यादि हृदयादिहविष्ट्वगमकानेकवाक्यविरोधात् त्यक्तम् । इह बृहन्तोस्मिन्गुणा इति श्रुत्यन्तरसहायकमप्यस्तीति चेत्, किं ततः ? पशोर्हविष्ट्वोऽपि "जुष्टं देवानामिदमस्तु हव्यं" इति तदुपाकरणमन्त्रसहायकमस्ति । तथाऽपि बह्ववदानवाक्यविरोधात् तद्धविष्ट्वं त्यक्तं चेत्पूर्णगुणत्वमप्यनेकाद्वैतवाक्यविरोधात् किमिति न त्यक्तव्यम् ।

एतेन ब्रह्मपदस्य श्रुतिरूपतया निर्गुणत्वादिप्रतिपादकवाक्येभ्यः प्राबल्यमित्याशङ्का निरस्ता । प्रथमोपस्थितिप्रयुक्तबलाद्बहुत्वप्रयुक्तबलस्यैवाऽधिकत्वात् । "विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वमिति" न्यायात् । अयुक्तं च गुणबृहत्त्वस्य गुणिनि शब्दप्रवृत्तौ निमत्तत्वम् । अन्यथा रूपत्वगन्धत्वादीनि निमित्तीकृत्य कुम्भेऽपि रूपरसगन्धादिशब्दप्रवृत्तिप्रसङ्गात् । तस्मादद्वैतविषयमहावाक्यार्थविरोधादद्वैतस्यैवोत्पत्तिशिष्टत्वेन तदवरोधाद्बहुवाक्यविरोधाद्गुणगतधर्मस्य गुणिनि शब्दप्रवृत्तिनिमित्तत्वायोगाच्च ब्रह्मशब्दो न गुणबृहत्वनिमित्तः, किन्तु परब्रह्मण्यद्वैत्यभिमतत्रिविधपरिच्छेदराहित्यनिमित्त एव । "बृहन्तो ह्यस्मिन्गुणा" इति श्रुतिरस्ति चेत् सा व्यावहारिकगुणविशिष्टसगुणब्रह्मणि कथंचित् स्तुतिपरतया नेतव्या । अ-

द्वैतिभिः स्याच्चैकस्य ब्रह्मशब्दवत्" इति सूत्रे ब्रह्मशब्दस्य निर्गुण इव सगुणेऽपि वृत्तेरङ्गीकृतत्वादिति भावः ।

एतेन "अथाऽतो ब्रह्मजिज्ञासे"ति सूत्रस्याऽऽदावस्योङ्कारो ब्रह्मवाचकः सूत्रावयवः। स चाऽवतेर्धातोरुत्पन्न ओतत्ववाची सन्योग्यतया गुणौघतत्वपर इति तेनाऽपि ब्रह्मणो गुणपूर्तिसिद्धेस्तस्य जीवाद्वैलक्षण्यमित्यपि कल्पना गलहस्तिता।।१९।।

एवं ब्रह्मशब्दस्य गुणपूर्तिवाचकत्वमेव नाऽस्तीति ब्रह्मणो जीवाभेदाविरोध उपपादितः । इदानीं तद्वाचकत्वमङ्गीकृत्याऽपि तदविरोधमुपपादयति-

किं चैशे गुणगरिमा न जीववर्गे
भूमाख्यस्त्वदभिमतो विरुद्ध एषः ।
यत्तस्मिन्नपि घटते सदा सतोऽस्य
स्वानन्दप्रभृतिवदावृतेरभानम् ।।२०।।

ईश्वरस्य गुणबृहत्वं नाम त्वन्मते तद्गुणानामानन्दादीनां भूमा निरतिशयत्वरूपं उत्कर्ष इति "भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति" "ब्रह्मदृष्टिरुत्कर्षादि"ति त्वदीयाधिकरणयोः स्पष्टम्। जीवब्रह्माभेदसंजीववर्गेऽपि स्यादिति तथैवाऽनुभवोऽपि भवेत्तथा च तस्याऽल्पगुणत्वेनाऽनुभवो न स्यादिति हि तस्य विरुद्धत्त्वमुच्यते । नाऽयमस्ति विरोधः। जीवानां मुक्तिसमयभोग्यानन्दज्ञानबलाद्युत्कर्षमङ्गीकृत्य त्वया तस्य संसारे किंचित्प्रकाशमानस्याऽपि सर्वात्मना प्रकाशे मुक्तिसंसारयोरविशेषः स्यादिति तत्परिहारार्थमविद्यावरणस्योपपादितत्वेन तत एव तस्मिन्परमेश्वरगुणपूर्तिसत्वेऽपि तदननुभवस्याऽल्पगुणत्वानुभवस्य च समर्थितप्रायत्वात् स्वकीयमुक्तिभोग्यानन्दाद्युत्कर्ष एव परमेश्वरे गुणभूमेति वक्तुं शक्यत्वाच्च । अविद्यावरणनिवृत्तिरूपमुक्त्यनन्तरमपि हि केषाञ्चित्परमेश्वरापरोक्षज्ञानानन्तरसंभूतसत्कर्माननुष्ठानविकर्मानुष्ठानदोषेण परमेश्वरेच्छावशात्स्वरूपानन्दस्य किञ्चिदनभिव्यक्तिमङ्गीकुरुषे। "स्तुतयेऽनुमितिर्वे"ति त्वदीयाधिकरणे तथा निरूपितत्वात् । परमेश्वरस्य चाऽऽनन्दादिभूम्नो निरतिशयस्वरूपस्याऽपि अतीतक्षणान्त्यवन्न्यूनाधिकभाववदसंख्यनाना-

विशेषशालिनः कश्चिद्विशेष एव मुक्तान्प्रति यथाऽधिकारं भासते इति विशेषान्तराणां पुरुषभेदेनाऽभिव्यक्तिमङ्गीकुरुषे । "नानाशब्दाद्भेदादि"ति त्वदीयाधिकरणे तथा निरूपितत्वात् । पारमेश्वरस्याऽऽनन्दादिभूम्नो जीवेऽपि सत्वे तस्य संसारदशायां विद्यमानेनाऽविद्यावरणेनाऽप्रकाशे काऽनुपपत्तिरिति भावः ।।२०।।

एवं गुणपूर्णत्वस्य जीवेऽपि संभवेनाऽविरोध उपपादितः । इदानीं तस्य विरुद्धत्वेऽपि न परमते जीवभेदकसाधकमित्याह-

अपि च भगवानेकोऽनेकस्तनुस्तनुमानपि
स्वयमवयवो नाऽस्त्यैश्वर्याद्विरोध इतीदृशम् ।
विषमगुणसाङ्कर्यं वर्यं तवाऽभ्युपगच्छतः
कथमितरवद्भेदस्सिध्येद्विरुद्धगुणान्वयात् ।।२१।।

इत्थं हि तव मतम्- ईश्वरस्स्वयमेकस्सन्नपि आनन्दमयाधिकरणोदाहृतान्नमयप्राणमयादिरूपेण, गुहाधिकरणोदाहृतशुभकर्मफलभोक्त्रन्तरात्मरूपेण,"न संख्योपसंग्रहादि" त्यधिकरणोदाहृतपञ्चपञ्चजनरूपेण, "न स्थानतोऽपी" त्यधिकरणोदाहृतविश्वतैजसप्राज्ञरूपेण चाऽनेकः । तथा शरीरी सन्नपि "अरूपवदेव हि तत्प्रधानत्वादि"त्यधिकरणोक्तरीत्या परव्यूहावतारादिनानाशरीरिरूपः । एवमानन्दमयोऽवयवी सन्नपि तदीयशिरःपक्षमध्यपुच्छावयवरूपः । सर्वं चैतदचिन्त्याद्भुतशक्तेः परमेश्वरस्यैश्वर्यवशान्न विरुध्यते ।

अङ्गाङ्गित्वेन भगवान्क्रीडते परमेश्वरः ।
ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिन्जनार्दने ।।

"अतर्क्ये हि कुतस्तर्कस्त्वप्रमेये कुतः प्रमे"ति बृहत्संहितायाम् ।

इत्यादि वचनादिति । एवं सर्वत्र विरुद्धधर्मसाङ्कर्यमेव भगवदैश्वर्यातिशयप्रयुक्ततया बहुमन्यमानस्य तव मते सकलगुणपरिपूर्णस्यैव ब्रह्मणोऽल्पजीवगुणभावोऽपि

संभवतीति न ब्रह्मशब्देन जीववैलक्षण्यं सिध्यति । विरुद्धधर्मेण भेदसाधनं खलु विरुद्धधर्मसङ्करमन्यत्र परिहरतः शोभते । सर्वत्र विरुद्धधर्मसंकरमेव श्रेयांसमभिमन्यमानस्य तव कथं तदुपपद्यतामिति भावः ।।२१।।

नन्वीश्वरः स्वकीयाचिन्त्याद्भुतशक्तिमात्रेण स्वस्मिन्नेकत्वानेकत्वादिविरुद्धधर्मसमावेशं घटयतीति मया नेष्यते; किन्तु भेदप्रतिनिधिं विशेषमपेक्ष्य तं घटयतीति । न च जीवेश्वरयोर्मया विशेष इष्यते; येन भेदाभावेऽपि तत एव तस्य स्वविरुद्धधर्मशालिजीवभावः स्यादित्याङ्क्याऽऽह-

विशेषं वैकुण्ठे यदि वदसि भेदप्रतिनिधिं
तदेकानेकत्वप्रभृतिगुणसंवासघटकम् ।
सजीवब्रह्मत्वव्यतिकरविरोधं च शमयेत्
समं खल्वत्राऽपि श्रुतिशिरसि भेदापवदनम् ।।२२।।

परमेश्वरे "नेह नानास्ति किं चने"त्यादि स्वगतभेदनिषेधश्रुतिबलादेव हि तस्मिन्नेकत्वादिविरुद्धधर्मसमावेशाय त्वं विशेषमङ्गीकृत्य स्वयमेकोऽपि परमेश्वरो विशेषबलादनेक इत्यादि कल्पयसि । तथा जीवब्रह्मभेदनिषेधश्रुतिबलात्तयोः विरुद्धधर्मसमावेशाय भेदस्थाने विशेषमङ्गीकृत्य परमेश्वर एव विशेषवशाद्विविधजीवभावेन संसरतीति किमिति त्वया न कल्पनीयम् ? न हीश्वरे स्वगतभेदनिषेधश्रुतेर्जीवेश्वरभेदनिषेधश्रुतेश्च कश्चिद्विशेषस्त्वयोपपादयितुं शक्यत इति भावः।।२२।।

एवं ब्रह्मणः सविशेषगुणपूर्तिमत्वाङ्गीकारेऽपि तदीयशक्तिमहिम्ना विशेषबलेन च तस्यैवाऽल्पगुणजीवभावस्संभवतीत्युक्तम् । इदानीं सर्वविधविरुद्धधर्मसङ्घटने ब्रह्मणश्शक्तिरेव पर्याप्तेति विशेषाङ्गीकारो व्यर्थ इत्याह-

वक्तव्यं ते विरुद्धं घटयति भगवच्छक्तिरेवेत्यवश्यं
नो चेत्कृत्स्नप्रसक्तिर्निरवयवरवक्षोभणं वा कथं स्यात् ? ।

एकोऽनेकस्थितश्चेत्यणुरखिलजगद्व्यापकश्चेति वा ते
तत्र व्यर्थो विशेषः क्वचन तव तया सर्वनिर्वाहसिद्धेः ।।२३।।

पारमेश्वरी शक्तिरेव विरुद्धधर्मसङ्घटनीत्यवश्यं त्वयैष्टव्यम् । अन्यथा जीवस्य स्वतन्त्रकर्तृत्वे कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा स्यादिति त्वदुक्तदूषणमदूषणं स्यात् । तथा हि -

जीवस्य स्वतन्त्रकर्तृत्वनिरासार्थं "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति"रित्यधिकरणम् । तत्र "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वे"ति गुणसूत्रं जीवस्य स्वतन्त्रकर्तृत्वनिरासे हेत्वन्तरपरमिति तव मतम् । तत्र "न जीवात्कारणं पर"मिति श्रौतव्यपदेशाज्जीवः स्वतन्त्रकर्तेति पूर्वपक्षे स्वतन्त्रकर्तृत्वे तस्य हिताकरणमहितकरणञ्च न स्यात् । दृश्यते च तस्य हिताहिते विविंचतोऽपि तदुभयमास्तिककामुकादेरिति दूषणमुक्त्वा कृत्स्नप्रसक्तिसूत्रेण यदि जीवः स्वतन्त्रकर्ता स्यात् तदा तस्य सिद्धान्ते तत्स्वरूपातिरिक्तकार्यानुसारितारतम्यवत्कृतिरूपगुणानङ्गीकारात् स्वयमेव प्रवृत्तिशक्तिरूपस्य तस्य तृणादनादिष्वपि कृत्स्नशक्त्या प्रवृत्तिः प्रसज्येतेत्यनुभवविरोधः ।

न चैकदेशेन प्रवृत्तिः तस्य निरंशत्वात्। अन्यथा निरवयवत्वशब्दव्याकोपः। न च "व्यतिरेको गन्धवदि" त्यधिकरणे जीवस्य सांशतया व्यवस्थापयिष्यमाणत्वादंशानां बहुत्वेनाऽशविशेषैः कार्यानुसारिणा तारतम्येन तस्य कर्तृत्वोपपत्तिः । बहुत्वस्य भेदव्याप्तत्वेन भेदस्याऽपि प्रसक्त्या भिन्नांशराहित्यरूपनिरवयवत्वशब्दव्याकोपतादवस्थ्यात् । न च विशेषबलेन बहुत्वोपपत्तिः । भेदेनोपपादनीयस्यांऽशांशिबहुत्वस्य चेतने विशेषेणोपपादने घटादावचेतनेऽपि तस्य तेनोवोपपादनप्रसङ्गादिति दूषणान्तरं प्रदर्श्य, तस्मादचिन्त्यशक्तिः परमेश्वर एव परस्परं विरुद्धमप्यभेदं अंशांशित्वकृतं बहुत्वं च चेतनेषु विशेषेणैव निमित्तेन समावेश्याऽभेदेन निरवयवत्वशब्दकोपं बहुत्वेन कृत्स्नप्रसक्तिं च निराकृत्य कार्यानुरूपं जीवेन कारयतीत्यङ्गीकर्तव्यमिति तदुपसंहृतम् ।

अत्र परमेश्वरशक्तिमनपेक्ष्य विशेषेणैवाऽभेदबहुत्वयोः विरुद्धयोस्समावेश-समर्थने "कृत्स्नप्रसक्त्यादि" सूत्रोक्तं दूषणं न लगेदिति स्फुटमेव। तदपेक्षायां तु सैव तव पर्याप्ता किमजागलस्तनायमानविशेषकल्पनया? किमपि साधनान्तरमन-पेक्ष्य सर्वमपि कर्तुमकर्तुमन्यथा कर्तुमपि शक्तः परमेश्वर इति हि तव मतम् ।

तस्य शक्तिः कथं भेदापेक्षं बहुत्वं अभेदेऽपि विशेषमपेक्ष्य संपादयति न तु तमनपेक्ष्येति नियन्तुं शक्यते? यदि हि तस्य जगत्सृष्टौ प्रकृत्याद्यपेक्षावदभेदे बहु-त्वसमावेशसंपादने विशेषापेक्षा श्रुत्यादिप्रमाणसिद्धा स्यात् तदा स्वयमेव गन्तुं शक्तस्याऽपि दण्डावलंबनवद्विशेषापेक्षाऽपि लीलामात्रेणेति तव कल्पना प्रसरेत्। न चैवम्; विशेषस्य विरुद्धसमावेशकल्प्यत्वात्तस्य चाऽऽवश्यकपरमेश्वरशक्त्यैवोप-पन्नत्वात् ।।

अपि चैक एव विष्णुरनेकत्र सर्वेषां दक्षिणाक्षिस्थाने जाग्रदवस्थाप्रेरकेण सप्ताङ्गैकोनविंशतिमुख इत्याद्युक्तलक्षणेन विश्वाभिधानेन रूपेण प्रतिस्थानं समग्रेणैव स्थितः । यथा नानादेशस्थितानशेषपुरुषान् प्रति सतताभिमुखेन समग्रेण रूपेण तरणिस्तदूर्ध्वं देशे स्थितः न तु बहुकुंभसंभृताम्भोवत्तत्तदक्षिस्थाने स्थितः स्वरूपत-श्शरीरतो वा भिन्नः । नाऽपि बहुतृणाग्रप्रसारितपटवत्तत्तदधिकरणेष्वेकदेशेन स्थित इति त्वया "न स्थानतोऽपि पटस्योभयलिङ्गं सर्वत्र ही" त्यधिकरणे स्थापितम् ।

तथाऽणुरेव विष्णुरखिलजगद्व्यापकश्च सूक्ष्मतया दृश्यमान एव कृष्णस्य मुखे गर्भीकृतब्रह्माण्डत्वस्य यशोदया दृष्टस्यैकेन दाम्ना बन्धनादनुभवाच्च सूक्ष्म एव तदु-दरे बहूनामपि दाम्नां बन्धुमपर्याप्तत्वस्य तद्दृष्टस्य महत्वलिङ्गस्य सत्वादिति च "अक्षरमंबरान्तरधृते" रित्यधिकरणे "अस्थूलमनण्वि"ति श्रुतिवाक्यमणुत्वस्थूलत्व-परं व्यवस्थाप्य त्वया निरूपितम् । दहराधिकरणे च दहराकाशान्तस्थस्य परिच्छि-न्नस्यैव ब्रह्मांशस्य "यावान्वा अयमाकाशस्तावानि"ति श्रुत्यर्थतया बहिर्ब्रह्माकाशव-द्व्याप्तत्वं त्वयाऽङ्गीकृतम् ।

तत्रैव परिच्छिन्नस्य व्याप्तत्वासंभवमाशङ्क्याऽन्यत्राप्येवम् "आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वे"त्यणीयस्त्वेन श्रुतस्यैवाऽन्तर्हृदयस्थितस्य ब्रह्मांशस्य "एष आत्मा अन्तर्हृदये ज्यायान्पृथिव्याः ज्यायानन्तरिक्षात् ज्यायान् दिवः ज्यायानेभ्यो लोकेभ्यः ।" इति सर्वतो ज्यायस्त्वश्रवणात् तद्वदिहाऽप्युपपद्यते इत्युपपादितम् ।

अत्र सर्वत्राऽपि केवलं परमेश्वरस्य शक्त्यैवैकत्वप्रत्येकपर्याप्तानेकवृत्तित्वयोः अणुत्वमहत्वयोश्च विरुद्धयोः समावेश उपपादनीयः । न विशेषस्योपयोगोऽस्ति । विशेषोऽहि तव भेदप्रतिनिधिरेकस्यैवाऽनेकत्वमापाद्य धर्मावसाङ्कर्येण निवेशयेत्। न चाऽत्र द्विविधेऽपि विरुद्धधर्मसमावेशोदाहरणेऽनेकत्वापादनमस्ति। अत एवैतादृशोदाहरणे त्वयाऽपि केवलं परमेश्वरशक्तिरेव नियामकत्वेनाऽऽश्रिता । उक्तञ्च "ऐश्वर्याद्रूपमेकञ्च सूर्यवद्बहुधेयत" इत्यादि । एवञ्च सत्यन्यत्रापि विरुद्धधर्मसमावेशसंघटने विशेषो व्यर्थः । ईश्वरः स्वयमेकस्सन्ननेकस्तनुमानवयवोऽवयवी चेत्यादेः सर्वविधस्याऽपि विरुद्धधर्मसमावेशस्याऽवश्यवक्तव्यतया तदीयशक्त्यैव निर्वाहोपपत्तेरिति भावः ।।२३।।

इत्तश्च परमेश्वरशक्त्यैव एकत्वानेकत्वादिविरुद्धधर्मसमावेशः संघटनीयो न विशेषेणेत्याह-

किञ्चाऽयं भेदसाध्यं कमपि घटयितुं कल्प्यते न त्वयाऽर्थं
किन्तु व्याहारमात्रं क्वचन कथमितः स्याद्विरुद्धार्थयोगः ।
सम्बन्धस्स्याद्गुणानां गुणिभिरितरथा गोचरस्तत्प्रतीते-
र्न स्याद्भेदः पटादिष्वपि च घटयता सत्सु तन्तुष्वसत्त्वम् ।।२४।।

अयं विशेषस्त्वया भेदसाध्यं कंचिदप्यर्थं घटयितुं न कल्प्यते । किन्तु यत्र भेदाभावेऽपि भेदाधीनो व्यवहारो दृश्यते यथा- "लोके नीलं सुगन्धि महदुत्पलमि"त्यादौ, वेदे "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्मे" त्यादौ च नीलगन्धादीनां ज्ञानानन्दादीनाञ्च धर्मिणः परस्परस्माञ्च भेदाभावेऽपि अपर्यायशब्दैरुक्तिरित्यादिस्त-

न्मात्रनिर्वोढृतया कल्प्यते । भेदाभावेऽपि भेदस्थाने स्वयमवभासमानस्सन्नपर्यायशब्दप्रयोगादिकं निर्वर्तयतीति वैकत्वानेकत्वादिविरुद्धधर्मसमावेशरूपार्थनिर्वाहाय । यदि व्यवहारस्येव भेदाधीनस्याऽर्थस्याऽपि निर्वाहकोऽयमङ्गीक्रियेत तदा गुणगुणिनां घटस्य नीलवर्णः, ब्रह्मण आनन्द इत्यादिधर्मधर्मिभावव्यवहारमूलप्रतीतिगोचरस्सम्बन्धोऽपि तद्विरोधिनि सत्यप्यभेदे विशेषबलात्कल्प्येत । सत्सु तन्तुषु पटाद्यसत्वनिर्वाहाय भेदश्च न कल्प्येत । तन्तूनामवयवानां पटाद्यवयविनाञ्चाऽभेदेऽपि विशेषबलादेव सत्त्वासत्त्वविरुद्धधर्मसमावेशोपपत्तेः । न चोभयत्रापीष्टापत्तिः ।

अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः ।
अनन्यत्वान्नाऽनवस्था भेदो नाशे भवेत्तथा ।।

इत्य**नुख्यान**विरोधात् । अत्र हि "तद्वन्तो हि विशेषतः" इत्यस्य व्याख्यानसमये "भेदसम्बन्धकार्यकरो हि विशेष" इति **न्यायसुधायां** तदभिप्रायो वर्णितः । तेनयथा विशेषो भेदस्य प्रतिनिधिरिति शुक्लः पट इत्यादिप्रतीतौ भासमानो भेदाधीनं सामानाधिकरण्यव्यवहारं निर्वर्त्तयति तथा संबन्धस्याऽपि प्रतिनिधिरिति सएव पटः शुक्लगुणवानित्यादिप्रतीतौ भासमानस्तद्वत्त्वव्यवहारमपि निर्वर्त्तयतीति गुणगुण्यादिषु संबन्धानङ्गीकारस्स्पष्टीकृतः । अत एव समवायनिराकरणस्थलेऽपि गुणगुण्यादीनां संबन्धो नास्तीति व्यवस्थापितम् । स्वाभिमतं संबन्धान्तरमस्तीति तु नोक्तम् । ब्रह्मतद्धर्माणामभेदे धर्मधर्मिभावो न युक्त इत्याशङ्कापरिहारार्थं "उभयव्यपदेशात्त्वहिकुण्डलवदि"ति त्वदीयाधिकरणे च तदाशङ्कापरिहाराय सिद्धान्ते विशेष एव समर्थितः न तु तदधीनः क्वचन संबन्धः ।

नन्वाश्रयाश्रयिभाव एव धर्मधर्मिभावात्मा गुणगुण्यादीनां सम्बन्धःकिमिति न स्यात्? न च तस्याऽद्विष्ठत्वात् संबन्धत्वानुपपत्तिः । संयोगस्याऽपि मन्मते द्विष्ठत्वाभावादिति चेत् न- त्वन्मते ययोरभेदस्तयोर्धर्मधर्मित्वव्यवहारे सत्यपि वस्तुत आश्रयाश्रयित्वानङ्गीकारात् । अत एवाऽयं पटः एतत्तन्तुसंबद्धः एतदाश्रितत्वादेतदाश्रिततृणवदिति सगवायसाधकानुमाने तन्तुपटयोराश्रयाश्रयिभावासिद्धेरिति **न्यायसुधायां** स्वरूपासिद्धिरुक्ता ।

एवं तावद्गुणगुण्यादीनां विशेषाधीनसंबन्धान्तरसिद्धिप्रसङ्गोऽनिष्ट इति स्थितम् । तथा तन्तुपटादीनां भेदासिद्धिप्रसङ्गोऽप्यनिष्ट एव । 'भेदो नाशे भवेत्तथे' त्युदाहृतश्लोकशेषे सत्सु तन्तुषु विनश्यतां पटादीनामभेदवद्भेदस्यापि अङ्गीकृतत्वात्। **न्यायसुधायां** च तद्व्याख्यानानन्तरं "स्यादेतत् । यथा भेदसाधकानां व्यपदेशभेदादीनां विसेषाश्रयेणैवाऽन्यथासिद्धिरुक्ता; तथा सत्यपि तस्मिन्नसत्त्वस्याऽपि विशेषेणैव निर्वाहः क्रियताम् । किं भेदाभ्युपगमेन? मैवम्, विशेषस्य भेदकार्यव्यवहारमात्रनिर्वाहकत्वेनाऽसत्त्वं प्रत्यनिर्वाहकत्वात् । सकलभेदकार्यकारित्वे विशेषो भेद एव न तत्प्रतिनिधिः स्यादि"ति शङ्कापरिहाराभ्यामुक्तार्थस्य स्थिरीकरणाच्च । तस्माद्विशेषस्याऽविरुद्धधर्मसङ्घटकताया अपि परमेश्वरशक्त्यायत्तत्वस्य विशेषाभावस्थलेऽपि परमेश्वरशक्त्यैव विरुद्धधर्मसंघटनस्य च त्वयाऽङ्गीकृतत्वात्। वस्तुतो विशेषस्य भेदसंबन्धकार्यव्यवहारमात्रनिर्वर्तकताया एव त्वयोक्तत्वाच्च भेदभावस्थलेषु एकत्वानेकत्वादिपरमेश्वरशक्त्यैव संपादनीयमिति व्यर्थः क्वाचित्कविशेषाङ्गीकारः । अपर्यायशब्दप्रयोगादेरपि परमेश्वरशक्तिकृतानेकत्वेनैवोपपत्तेः । अतो जीवेश्वरयोर्निर्विशेषाभेदेऽपि बह्वल्पगुणत्वरूपविरुद्धधर्मसमावेशः संघटत इति न गुणपूर्णत्वेन जीवादीश्वरस्य भेदसिद्धिरिति भावः ।।२४।।

नन्वैश्वर्यबलादनन्यसाध्यं विरुद्धधर्मसङ्करं संपाद्य क्रीडन्नपि परमेश्वरो विविधदुःखादिकलुषितं जीवभावं नाऽनुमन्यत इत्याशङ्कामुद्भाव्य परिहरति-

ऐश्वर्याज्जीवभावं कथमिव स भजेद्दुःखभीत्यादिदूष्यं
मैवं दुःखादयस्ते करणगुणतया न स्पृशन्त्येव जीवम् ।
स्वामित्वेन स्पृशन्तीत्यपि न तव मते तत्परस्यैव हीष्टं
तस्मात्तस्याऽखिलान्तःकरणगणपतेर्जीवतैवाऽर्थनीया ।।२५।।

भवेदेवं यदि जीवभावस्त्वन्मते दुःखादिकलुषितस्स्यात् । न त्वेवम् । त्वया दुःखादीनामन्तःकरणपरिणामत्वेनाऽङ्गीकृतत्वात् ।

ननु मन्मते अन्तःकरणपरिणामा एव दुःखभयादय इति सत्यम् । न तु ज्ञानेच्छाकृतिवदन्तःकरणवृत्यात्मधर्मरूपेण तद्वैविध्यमस्ति। मुक्तियोग्यजीवेषु मुक्तौ तदनुवृत्त्यभावात् । तथाऽपि दुःखादिमत्त्वं नाम दुःखादिस्वामित्वं, न तु तदाश्रयत्वम् । "इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं न चापरम्" इति सांख्याधिकरणाऽनु**व्याख्याने**ऽन्तःकरणवृत्तिरूपे छायामुक्तस्य न्यायस्य दुःखादिष्वपि तुल्यत्वात् । स्वामी च तेषामन्तः करणोपादानानामपि जीव एव; क्षेत्रे फलितानां धान्यानामिव क्षेत्रपतिः । अत एव क्षेत्रपते 'रहं धान्यवा'नित्यनुभववज्जीवस्याऽहं दुःखी, बिभेमि, द्वेष्मीत्यनुभव इति चेत् ? ।

उच्यते- यदि जीवस्य हेयतया प्रसिद्धं दुःखादिमत्वन्नाम दुःखादिस्वामित्वं हन्त तर्हि तत्परमेश्वरस्यैव स्यान्न जीवस्य । परमेश्वर एव दुःखादिपरिणामिनोऽन्तः-करणस्य तदन्यस्य चेन्द्रियवर्गस्य स्वामी नाऽन्य इति हि त्वयेष्यते । त्वया "ज्योतिराद्यधिष्ठानं तु तदाम्नानादि"त्यत्राऽधिकरणे "ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागि"त्यादिकाषायणश्रुतिवचनात् सर्वान्तर्यामित्वाच्च परमेश्वर एव करणानां स्वामी । स तु स्वकीयैः करणैरनादिकालमारभ्य दर्शनादिकार्याणि जीवैः कारयतीति जीवकरणत्वव्यवहारस्तथाभिमानश्च स्वामिनः कुठारैः तत्प्रेरितेषु भृत्येषु छिन्दत्सु तत्तद्भृत्यकुठारत्वव्यवहारदर्शनात्परकीयेऽपि बहुकालसंबन्धिनि तदीयतोपचारदर्शनात्तथाऽभिमानदर्शनाच्चेति व्यवस्थापितत्वात् । "स्वामिनः फलश्रुतेरित्यात्रेयः" इत्यधिकरणे मनुष्यादीनां स्वस्वेन्द्रियजन्यज्ञानकर्मस्वामित्वमुररीकृत्यैव सिद्धान्तप्रदर्शनाच्च ।

एवं हि त्वदीयं तदधिकरणम् "ब्रह्मविदाप्नोति परमि"त्यादिश्रुत्युक्तज्ञानफलं ज्योतिष्टोमादिधर्मफलं चेन्द्रियप्रेरकाणां देवानामेव भवति? उत कर्तृभूतानां मनुष्यादीनामपीति संशयेदेवानामेवेति तावत्प्राप्तम् । भगवदुपासनापुण्यफलमिन्द्रियप्रेरकदेवतापदं प्राप्तानां तेषां भगवत्प्रसादलब्धतत्तदिन्द्रियजन्यज्ञानकर्मस्वामित्ववत्वाल्लोके च स्वामिन एव फलदर्शनात्कर्तुरप्यस्वामिनः कर्मकरादेः क्षेत्रादिफलादर्शनात् । "यदु किं चेमाः प्रजाः शुभमाचरन्ति देवा एव तदाचरन्ति यदु किं चेमाः प्रजा विजानते देवा एव तद्विजानते देवानां ह्येतद्भवति तेषां तत्तत्स्वामी हि फल-

मश्नुते । नाऽस्वामी कर्म कुर्वाण" इति माध्यन्दिनायनश्रुतेश्च । ततश्चैकैकेन्द्रियस्य बहवो देवा स्वामिन इति तेषां तत्तत्स्वातन्त्र्यविज्ञानादितारतम्यानुसारेण फलतारतम्यं भवति । लोकेऽपि हि यस्याऽधिकं क्षेत्रस्वातन्त्र्यं यस्य चाऽऽवापादिकर्मणि ज्ञानप्रयत्नाधिक्यं तस्य तत्फलमधिकं दृश्यत इति प्राप्ते राद्धान्तः- अयजमानानामप्यृत्विजां सत्रयागफलमिवाऽस्वामिनामपि कर्तॄणां कर्मज्ञानफलमुपपद्यते ।

ननु सत्रेष्वस्वामिनामपि ऋग्विजामगृहीतदक्षिणत्वेन कर्तृत्वात्भाव्यं फलेनेति चेत्तर्हि प्रजार्थमेव देवैः ज्ञानकर्मणोः क्रियमाणत्वात्तासामपि भाव्यं फलेन।

ननु यदि ज्ञानादिकं प्रजार्थं देवैः सम्पाद्यते तर्हि कृत्स्नं फलं प्रजानामेव स्यान्न किञ्चिद्देवानामिति चेत्, न; यथा राज्ञां प्रजार्थमेव क्रियमाणस्याऽपि पालनस्य फलं प्रजापते राज्ञ एव मुख्यं प्रजानां तु तत्सहकारिमात्रत्वादल्पम्, यथा गुरुणा शिष्यार्थमेव क्रियमाणस्याऽपि व्याख्यानस्य फलं गुरोरेव मुख्यं, शिष्याणां चाऽल्पं तथैव ज्ञानादिदानप्रवृत्तैः देवैः प्रजार्थमेव क्रियमाणस्याऽपि ज्ञानादेः फलं देवानामेव मुख्यं, प्रजानामल्पमित्युचितत्वात् । अल्पफलत्वादेव प्रजानामफलत्वश्रुतिः । अल्पधने निर्धनत्वव्यवहारदर्शनादिति ।

अत्राऽधिकरणे यद्यपि संप्राप्तविद्योपासनाप्रीतभगवद्दत्तमिन्द्रियतत्फलेष्ववान्तरस्वामित्वमिन्द्रियप्रेरकाणां देवानामङ्गीकृतम्, तथाऽपि लोके तत्तदिन्द्रियतत्तत्फलस्वामित्वेनाऽभिमतानां मनुष्यादीनां तत्र नाऽस्ति स्वामित्वमितिस्पष्टमेव व्यवहृतम्। पूर्वपक्षे बहूनां देवानां स्वामित्वे तारतम्यानुसारेण फलतारतम्यमुक्त्वाऽपि कर्तुः फलप्रतिषेधात् । सिद्धान्ते पूर्वपक्ष्यभिमतं कर्तुस्सर्वथैवाऽस्वामित्वमङ्गीकृत्यैव राजगुरुस्वामिकपालनव्याख्यानास्वामिनामपि प्रजाशिष्याणामिव ज्ञानकर्मास्वामिनामपि मनुष्यादीनां किञ्चित्फलमिति तेषां फलोपपादनाच्च ।

यद्यपि सत्रेषु यजमाना एवर्त्विजः "ये यजमानास्त ऋत्विज"इति तत्र यजमानानां ऋत्विक्कार्ये विधानात् तथापि स्वमते ते यजमाना न भवन्ति इत्यभिमानेन वा, तथैव मीमांसकमर्यादेत्यभिमानेन वा तथोक्तम् । दृश्यते हि त्वद्भाष्यानुव्या-

ख्यानतत्त्वप्रकाशिकान्यायसुधासु मीमांसकमर्यादोल्लङ्घनेन व्यवहारः, तन्मतमित्यन्यथानुवादश्च । तथाहि- "द्वादशाहवदुभयविधं बादरायण" इति सूत्रे भाष्यम् "द्वादशाहः क्रत्वात्मकस्सत्रात्मकश्च भवति" इति । "प्रदानवदेव तदुक्तमि" ति सूत्रे श्रवणगुरुप्रदानयोः प्रधानेतिकर्तव्यतारूपयोः गुरुप्रदानं प्रबलमित्युपपादनार्थं **तत्त्वप्रकाशिका** न चेतिकर्तव्यतात्वेन दौर्बल्यम्, यज्ञियहिंसायां इति कर्तव्यताया एव प्राबल्यदर्शनादिति । "भूम्नः क्रतुवज्ज्यायस्त्वं तथा च दर्शयतती"ति सूत्रे

"भूमैव देवः परमो ह्युपास्यो नैवाऽभूमा फलमेषां विधत्ते ।
तस्माद्भूमा गुणतो वै विशिष्टो यथा क्रतुः कर्ममध्ये विशिष्टः" ।।

इति भाष्योदाहृतश्रुत्यभिप्रायकथनार्थे**तत्त्वप्रकाशिका** - यथा खलु दीक्षाप्रायणीयोदयनीयसवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तनं एवं साकल्यादन्यथा वैकल्याज्ज्यायस्त्वम् । तत्च सर्वैः कर्तव्यत्वं तथा भूमत्वस्याऽपि सर्वत्राऽऽनन्दादिषु सहभावेनोपासन एवेष्टसिद्धेरिति ।

जिज्ञासासूत्रे च प्रथमसंहिततयौकारनिर्देशं सूत्रावयवभूतमङ्गीकृत्याऽसंहिताप्रयोजनं उत्तरसूत्रेष्वनुगतिसूचनमिति व्युत्पादनार्थं **न्यायसुधा-** सर्वाणि हि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरब्रह्मविद्याः,"स्रवन्त्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यत" इति श्रौतार्थवादसामर्थ्यात् सर्वास्वपि ब्रह्मविद्यासु आद्यन्तयोरोकारस्योहः कर्तव्य इति गम्यते । न चोह्यमानं वाक्यात्पृथगिति शक्यते वक्तुम् । मन्त्रेष्वप्यूह्यमानस्य मन्त्रानवयवत्वप्रसङ्गादिति ।

आनन्दाधिकरणे च **न्यायसुधा-** ज्योतिषां स्तोमो हि ज्योतिष्टोम इति। अत्र सर्वत्र प्रसिद्धमीमांसानुरोधी व्यवहारो न भवतीति तद्विदां सुविदितमेव । अहीनसत्ररूपेण ह्युभयविधो न तु क्रतुसत्ररूपेण । क्रतुत्वस्योभयसाधारणत्वात् । यज्ञियहिंसायां इतिकर्तव्यताप्राबल्यं दृष्टमित्यत्यन्तमेव निरालम्बनम् । दीक्षणीयादिसकलाङ्गसहितः क्रतुः सर्वयागेष्वनुवर्तत इत्यपूर्वो व्यवहारः । दीक्षणीयादिज्योतिष्टोमेति कर्तव्यताकलाप एव हि तद्विकृतिभूतेषु विश्वजिदादिष्वतिदिश्यते न ज्योति-

ष्टोमक्रतुरपि । न वा सर्वयागेषु । न चेतिकर्तव्यताकलापः क्रतुरिति व्यवह्रियते। न च ज्योतिष्टोमेतिकर्तव्यताकलापस्य तद्विकृतिष्वतिदेशेन किमपि ज्यायस्त्वं ऐष्टिकादीतिकर्तव्यताकलापस्याऽपि तत्तद्विकृतिष्वतिदेशेन साम्यात् ।

न चाऽनतिदेश्यात् स्वप्रधानाज्ज्यायस्त्वं विवक्षितम्, विरोधात् । न ह्यमात्यानपि सेवमानो भटवर्गस्तानसेवमानाद्राज्ञो भवति ज्यायान् । नापि अर्थलोपादिनाऽनतिदेश्यादङ्गान्तरात् ज्यायस्त्वम् । दीक्षणीयादेरपि त्रैधातव्याप्रत्याम्नानादिनाऽऽश्वमेधादिष्वनतिदेशात् ।

न चोङ्कारस्योत्तरसूत्रेष्वनुगतिरूहः । देवस्य त्वेत्यादिमन्त्रेषु सूर्यादिशब्दोहे अग्न्यादिशब्दादेरिव कस्यचित्स्थानिनः शब्दस्याऽभावात् ।

न च ज्योतिषां स्तोमो ज्योतिष्टोम इति नामनिर्वचनम् । किं तर्हि "त्रिवृत्पञ्चदशस्सप्तदश एकविंश एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः" इति वाक्यशेषदर्शितज्योतिर्नामकाःस्तोमाः यस्येति तन्निर्वचनं **मीमांसकाभिमतम्।**

न चैवमुदाहृतेषु अन्यथालिखितस्थलेषु क्रत्वादिशब्दानामहीनादिलक्षकत्वेन प्रसिद्धमीमांसानुसारित्वसमर्थनं युक्तम् । तच्छास्त्रानुरोधिनां क्वाचित्के खल्वन्यथाभावे प्रतीयमाने तथा समर्थनं क्रियते । इह तु त्वद्भाष्यटीकाकाराभ्यां यावन्मीमांसागन्धि लिखितं तत्सर्वमप्यन्यथाभूतमिति कथं तथा समर्थनं क्रियेत ?।

एवं तावन्मीमांसकमर्यादोल्लङ्घनेन व्यवहार उदाहृतः । तन्मतमित्यन्यथाऽनुवादो यथा-

"अङ्गीकृतत्वादपि तैः पदार्थानां पृथक् पृथक् ।
क्रियापदेनाऽन्वयस्य वाक्यभेदो हि दूषणम् ।।" इति

सत्यज्ञानादिवाक्येषु ब्रह्मानुवादेन सत्यत्वाद्यनेकविधाने वाक्यभेदः स्यादिति शङ्का-

"पृथगेव च वाक्यत्वं पृथगन्वयतो भवेत् ।
अवान्तरत्वाद्वाक्यानां वाक्यभेदो न दूषणम् ।।"

इत्यभ्युपगमेन परिहृत्य मीमांसकमतेऽपि इदं समानमित्यनेन श्लोकेनोच्यत इति **न्यायसुधायां** व्याख्यातम्-तैर्मीमांसकैरपि "अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाती"त्यादावरुणादिपदानां क्रियापदेन पृथक्पृथदन्वयस्य स्वीकृतत्वात्तेषामपि हि वाक्यभेददूषणं प्रसज्येत । तत्रैतावदेव वक्तव्यं महावाक्य एव दूषणं नाऽवान्तरवाक्यभेद इति । तदस्माकमपि समानमि"ति । न प्रसिद्धमीमांसकमते तत्राऽवान्तरवाक्यभेदोऽस्ति । क्रयभावनायाः विधेयत्वेन "अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः" इत्युक्तरीत्याऽऽरुण्यादिविशिष्टक्रयभावनारूपक्रियैक्येन पदैकवाक्यताया एव तैस्स्वीकृतत्वात्। एवमन्यत्राऽपि द्रष्टव्यम्। विस्तरभयादुपरम्यते । एवञ्च सत्रर्त्विग्दृष्टान्तकरणात् कर्तॄणामपि ज्ञानकर्मस्वामित्वमनुमतमिति न भ्रमितव्यम् ।

स्यादेतत्- यदि जीवस्य दुःखादिस्वामित्वं न स्यात्तदा तस्य दुःखाद्याश्रयत्वस्याऽप्यभावादहं दुःखीत्यादिप्रत्ययानामध्यासात्मकत्वमङ्गीकर्तव्यं स्यात् । न चैतदङ्गीकर्तुं युक्तम् -

"मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधतः ।
मिथ्यात्वं यदि दुःखादेस्तद्वाक्यस्याऽग्रतो भवेत् ।।
मिथ्यायास्साधकत्वं च न सिद्धं प्रतिवादिनः ।।"

इत्याद्य**नुव्याख्याने** बन्धमिथ्यात्वस्य प्रत्यक्षविरोधेन यदि श्रुतिवाक्याद्बन्धस्य मिथ्यात्वं तदा तस्याऽपि वाक्यस्य तत एव मिथ्यात्वं भवेत् । वाक्यस्य सर्वमिथ्यात्वबोधकत्वात् । ततश्च तस्य मिथ्यात्वसाधकत्वं न स्यात् । मिथ्याभूतस्य साधकतायाः प्रतिवाद्यसम्मतत्वादिति युक्त्या च निराकृतत्वात्, **अनुव्याख्यान** एव सुखादिग्राहकस्य साक्षिणो निर्दोषत्वादिना याथार्थ्यनियमस्य प्रतिपादितत्वाच्च । अस्मिनपि ग्रन्थे पूर्वपक्षनिराकरणोपयोगितया तस्याऽर्थस्य "साक्षी जीवे सुखादीन्यनिशमनुभवन्सर्वमानाधिकस्त" इत्यनूदितत्वाच्च । तस्मादहं दुःखीत्याद्यनुभव-

निर्वाहाय जीवस्य दुःखादिस्वामित्वमस्तीत्येव मन्मतम् । किन्तु तत्स्वामित्वमीश्वरदत्तमपकृष्टमित्येव विशेषः । अत एव सांख्याधिकरणा**नुव्याख्याने**-

द्वैविध्येपि तु कामादेः कुतः स्वामित्वमात्मनः ।
साक्षादनुभवारूढं शक्यतेऽपोदितुं क्वचित् ।।

इति कामादिस्वामित्वस्याऽप्रत्याख्येयत्वमुक्त्वा तदनन्तरश्लोके तस्याऽपकृष्टत्वमप्युक्तम् । **न्यायसुधायां** चाऽत्यन्तावश्यत्वरहितगवादिस्वामित्वदृष्टान्तेन तस्याऽपकर्षस्समर्थितः । तस्मादीश्वरस्यैव दुःखादिस्वामित्वं न जीवस्येत्युक्तमयुक्तमिति चेत्,

उच्यते- त्वन्मतेऽपि दुःखित्वाद्यनुभवोऽध्यासरूप एव । उक्तं ह्यानन्दमयाऽधिकरणे **त्वद्भाष्ये**-

प्रमादात्मकत्वाद्बन्धस्य विमुक्तत्वं च युज्यते ।
मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिरि"ति भागवत इति ।

तत्वप्रकाशिकायां च "विमुक्तश्च विमुच्यत" इति संसारिणोऽपि विमुक्तत्वश्रवणात्तदन्यथाऽनुपपत्या तस्य परब्रह्मत्वसिद्धेः तद्विरोधो भेदव्यपदेशस्येति शङ्कानिराकरणार्थत्वेनोदाहृतं भाष्यग्रन्थमवतार्य तस्याऽर्थो वर्णितः- जीवस्य परब्रह्मत्वाभावेऽपि विमुक्तत्वोक्तिर्युज्यते बन्धस्याऽज्ञानमूलत्वेनाऽस्वाभाविकत्वादिति।

यत्त्वनुव्याख्याने बन्धस्याऽध्यासात्मकत्वनिरसनं तस्याऽभिप्रायस्तु तद्व्याख्यानानन्तर**न्यायसुधायां**- अत्र तत्वविदो वदन्ति- सर्वोऽपि हि बन्धो बुद्धीन्द्रियशरीरविषयतद्धर्मलक्षणोऽस्माभिरप्यात्मन्यारोपित एवेत्यङ्गीक्रियते। यथोक्तं भाष्यकृताप्रमादात्मकत्वाद्बन्धस्येति । अतः किन्निबन्धनो बन्धमिथ्यात्वनिरासनिर्बन्ध इत्याशङ्कां कृत्वा, सत्यम्; तथाप्यस्त्यत्र दर्शभेद इति तत्परिहारमारभ्य बुद्धीन्द्रियशरीरविषयाःस्वरूपतस्सन्त एवेश्वरपरवशा अप्यविद्यादिवशादात्मीयतयाऽध्यस्यन्ते।

तांश्चाऽऽत्मनो विविक्तानपि विस्पष्टं तथाऽनुलपभमानस्तद्धर्मान् दुःखादीन् सत्याने-वाऽऽत्मत्वेन पश्यंस्तत्कृते नीचोच्चत्वलक्षणे विकृती सत्ये एव प्रतिपद्यत इत्यादि-वाक्यैः स्वमतस्थितिप्रतिपादनेन मायावादिनस्तु दुःखादिके स्वरूपेणाऽपि मिथ्येति मन्यन्ते। अतस्तन्निराकरणनिर्बन्धो युक्त एवेत्येतत्परिभावयितुं बन्धमिथ्यात्वमिति सम्मुग्धे प्रस्तुते दुःखादेरिति निष्कृष्योक्तमित्यद्वैतिमते निराकार्यांशनिष्कर्षेण च स्पष्टीकृतः ।

यत्तु साक्षिणो याथार्थ्यनियमान्न साक्षिरूपस्य दुःखित्वाद्यनुभवस्याऽध्यासत्वं संभवतीति, तदयुक्तम् । ईश्वरपरतन्त्रस्य जीवस्य स्वातन्त्र्यग्रहणे प्रमाणाप्रमाण-ज्ञानयोरप्यप्रामाण्यप्रामाण्यग्रहे च तस्य याथार्थ्यपरित्यागात् । यदि तु"मानसे दर्शने दोषाः स्युर्नवै साक्षिदर्शन" इति 'यत्किञ्चिद्व्यभिचारिस्याद्दर्शनं मानसं हि तदि'ति चाऽ**नुव्याख्यान**दर्शनात्स्वातन्त्र्यादिग्रहणं मनोवृत्तिरूपं न तु साक्ष्यनुभवरूपमिती-ष्यते तदा दुःखित्वाद्यनुभवोऽपि त्वत्सिद्धान्तसिद्धाध्यासत्वनिर्वाहाय मनोवृत्तिरूप एव त्वयेष्टव्यः स्यात् । यदि चैवं सति दुःखित्वाद्यंशोऽपि मनोवृत्तिविषयतयैव स्यात् दुःखित्वाद्यनुभवव्यतिरेकेण दुःखादिमात्रविषयानुभवाभावात् । ततश्च दुःखा-देस्साक्षिविषयत्वं स्वाभिमतं न सिध्येदित्यनुशयस्तदा दुःखित्वाद्यनुभवरूपसाक्षिण आत्मीयत्वांशेऽध्यासरूपत्वमकामेनाऽपि त्वयेष्टव्यम् । त्वयाऽपि हि सर्वेषां साक्ष्यनुभवस्य याथार्थ्यनियमो नेष्यते, असुराणां साक्षिणो यथार्थत्वाभावस्य मनु-ष्याणां साक्षिणो मिश्रत्वस्य चाऽङ्गीकृतत्वात् । तस्मात्त्वन्मते दुःखादीनामन्तः करणपरिणामतया जीवस्य दुःखाद्याश्रयत्वाभावेन "ज्योतिराद्यधिष्ठानं तु तदामन-नात्" "स्वामिनः फलश्रुतेरित्यात्रेय" इत्यधिकरणयोस्तस्येन्द्रियतत्फलस्वामित्वस्य प्रतिषिद्धतया दुःखादिस्वामित्वाभावेन चाऽहं दुःखीत्यादिप्रत्ययानां कथंचिदपि याथार्थ्यासंभवात् त्वद्भाष्यटीकयोर्बन्धस्याऽध्यासात्मकत्वप्रतिपादनात् स्वपर-सिद्धान्तविशेषरहस्याविष्करणपर**न्यायसुधाग्रन्थे** मम शरीरं, ममेन्द्रियाणि, मम मनः, अहं दुःखीत्यादिप्रत्ययानां शरीरेन्द्रियदुःखादिषु भासमाने आत्मीयत्वांश एवा-ऽऽरोपितविषयत्वं न तु शरीरादिस्वरूपेऽपीति स्वमतनिष्कर्षात् साक्षिणो याथार्थ्य-नियमाभावाच्च त्वत्सिद्धान्ते तेषां सुनिश्चतेऽध्यासरूपत्वे यदन्यत्र प्रपञ्चमिथ्यात्व-निराकरणप्रस्तावे-

"सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् ।
साक्षिसिद्धस्य न क्वाऽपि बाध्यत्वं तददोषतः ।"

इत्यादि साक्षिणो याथार्थ्यनियमकथनं यच्च सांख्यमतदूषणप्रस्तावे आत्मनः कामादिस्वामित्वकथनं न तत्र त्वयाऽभिनिवेष्टव्यम्; किन्तु परमतदूषणलोभेन तद्दुराग्रहकृतमौढ्येन वा स्वसिद्धान्तविरुद्धभाषिणः स्वकीया इत्येव शोचनीयम्; याननुसृत्याऽद्यतना अपि त्वदीयाः परमतसिद्धाविद्यादूषणादिप्रस्तावेष्वनादिभावस्य निवर्त्यत्वमयुक्तमित्यादि स्वसिद्धान्तविरुद्धमेव कल्पयन्ति । त्वन्मते ह्यनादिभावरूपैवाऽविद्या ज्ञाननिवर्त्या च । तस्माज्जीवे दुःखित्वादिप्रत्ययानां त्वन्मतेऽध्यासरूपत्वात स्वस्वान्तः- करणगतदुःखादिस्वामित्वाध्यासमात्रजुष्टाज्जीवभावात् वास्तविकसकलजीवान्तःकरणगतनिखिलदुःखादिस्वामित्वानु भवनिरन्तराकुलितस्त्वन्मतसिद्धपरमेश्वरभाव एव पापीयानिति कथं त्वदीयःपरमेश्वरो जीवभावं नाऽर्थयेत्? । अतो न तस्य जीवभावाननुमतिशङ्कावकाश इति भावः ।।२५।।

स्यादेतत्- दुःखस्वामित्वादिरूपं दुःखित्वादिकं न हेयं, येन परमेश्वरस्याऽपि हेयसंबन्धः स्यात्, किन्तु दुःखित्वादिप्रयुक्तं जीवत्वम् । न च तत्परमेश्वरेऽस्तीत्यादिशङ्कामुद्भाव्य परिहरति-

दुःखित्वाद्येव हेयं न यदि कथय तत् किन्नु बन्धेषु हेयं
नीचत्वं तत्प्रयुक्तं यदि तदिदमिति व्याकुरुष्व स्फुटोक्त्या ।
यद्याक्रन्दादिदुःखाद्युदितनयहतं नाऽपि सार्वत्रिकं त-
द्यत्किंचित्तस्य कार्यं यदि तदिह जगद्व्याप्यते नेत्यसिद्धम् ।।२६।।

यदि "तत्राऽपि तद्व्यापारादविरोध" इति त्वदीयाधिकरणभाष्योदाहृतम्-

नरकेऽपि वसन्नीशो नाऽसौ दुःखभुगुच्यते ।
नीचोच्चतादिदुःखादेर्भोग इत्यभिधीयते ।।
नाऽसौ नीचोच्चतां याति पश्यत्येव सदा प्रभुः ।

इति वचनमवलम्ब्य दुःखादिप्रयुक्तं नीचत्वमेव दुःखादिभोक्तृत्वम् । तदेव च हेयमित्युच्यते । तर्हि किं तन्नीचत्वं नामेति प्रश्ने विवरणीयं त्वया । दुःखादिहेतुकमाक्रन्दादिकमिति चेत्; तदपि दुःखादिषु दर्शितेनैव न्यायेन निरस्तम्। तदपि हि शरीरेन्द्रियविकाररूपत्वादाश्रयाश्रयिभावेन जीवं न स्पृशति । स्वस्वामिभावेन तु परमेश्वरमेव स्पृशति । किञ्च न तत्सार्वत्रिकम् । लोके हि मानी धीरोदात्तस्तापसादिश्च महति दुःखेऽपि नाऽऽक्रन्दति, न रोदिति, न चाऽन्यं कमपि देहेन्द्रियविकारमापद्यते, न च तदपायार्थमितरप्रार्थनादैन्यमवलम्बते इति तस्य तद्दुः हेयं न स्यात् । कापालिकादिश्च भिक्षुकः स्वाङ्गच्छेदकर्दमकण्टकतप्तवालुकाशयनादिभिर्महद्दुःखमनुभवन्नपि न तत्प्रयुक्तं नैच्यमनुभवति, किन्तु याचनाप्रयुक्तमेवेति तस्याऽपि तद्दुखं हेयं न स्यात् ।

अथोच्येत- नाऽयमसार्वत्रिकदोषो लगति । यावत्किञ्चिद्दुःखादिकार्ये तत्सर्वं नैच्यमित्यङ्गीकाराद्धीरादीनामपि दुःखानुभवादिप्रयुक्तविकारनिरोधप्रयत्नतदपनयनोपायचिन्तादि यत्किंचित्तत्कार्यमस्ति-इति । नैतदपि युक्तम्; परमेश्वरेऽपि नानाविधजगद्व्यापारस्य दुःखादिप्रयुक्ततया कल्पयितुं शक्यत्वेन नैच्याभावासिद्धिप्रसङ्गात् । त्वयाऽप्यानन्दमयाधिकरणे "लोके चतुर्विधा पुंसां प्रवृत्तिः- सुखार्था, दुःखनिवृत्त्यर्था, सुखोद्रेकप्रयुक्ता, दुःकोद्रेकप्रयुक्ता चेति । तत्र प्रवृत्तित्रयस्याऽपि परमेश्वरेऽनुपपन्नत्वात् सुखोद्रेकप्रयुक्तैव लौकिकानां नृत्यादाविव तस्य जगत्सृष्ट्यादौ प्रवृत्तिरि"ति निरूपितम् । तत्तदा शोभते यदि तस्य दुःखित्वं न स्यात्। तत्सत्वे तु केचन जगद्व्यापारा दुःखोद्रेकप्रयुक्ताः कुतो न स्युः? । तथात्वे पुनरपि दुःकोद्रेकहेतुं जगद्व्यापारं न कुर्यादिति चेत्, भ्रान्तेऽसि । न हि दुःखोद्रेकाद्रोदनादौ प्रवृत्तिरभिसन्धिपूर्विका तन्निवृत्त्यर्था, प्रत्युत शिरोऽक्षिरोगादिदुःखोद्रेकात्पुनरपि तदुद्रेके हेतव एवाऽऽक्रन्दशिरस्ताडनाश्रुविमोचनादिप्रवृत्तयो दृश्यन्ते । ईश्वस्य दुःखित्वादेः श्रुतिविरुद्धत्वात् तद्व्यापाराणां तत्प्रयुक्तता कल्पयितुं न शक्यत इति परिशेषसिद्धिरिति चेत्, सत्यं तस्य दुःखित्वादिकं श्रुतिविरुद्धमिति । तथाऽपि त्वन्मतपर्यालोचनया तस्य दुःखादिस्वामित्वरूपं तदापतितमिति पूर्वोक्तं त्वमेव परिभावय। तथाऽपि तत्र दुःखित्वप्रयुक्तं कार्यं न भवतीति चेत्, न; तत्र सुखित्वप्रयुक्तकार्याभ्युपगमे तद्वदेव दुःखित्वसत्वे तत्प्रयुक्तकार्यस्याऽपि दुर्वारत्वात्। यदि तु-

"आहूतस्याऽभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविप्लवः ।।"

इत्यादौ धीरोदात्तमहापुरुषगुणत्वेन प्रसिद्धामवहित्थां तत्राऽभ्युपैषि तदा सुखोद्रेकप्रयुक्तमपि कार्य तत्र न स्यादेव । न चेदितरदपि केन वार्यते । किञ्च दुःखकार्यमात्रस्य हेयत्वोक्तिरयुक्ता । दुःखकार्यस्याऽपि भगवद्भजनादेः पुरुषार्थताया दृष्टत्वात्; "चतुर्विधा भजन्ते मा"मित्यादिशास्त्रसंमतत्वाच्च । तस्मात्दुःखकार्यमाक्रन्दादिकमेव हेयतया वक्तव्यमिति तस्याऽसार्वत्रिकत्वदोषो युक्त एवेति भावः ।।२६।।

एवं दुःखित्वस्य कार्यमेव हेयम्; न दुःखित्वमिति परोक्तमनुसृत्य दोष उक्तः। इदानीं वस्तुतो दुःखित्वमेव हेयम् । न तत्कार्यमित्युपपादयति-

एवं सुखित्वकृतमेव हि नर्तनादि
ग्राह्यं फलं तव भवेन्न सुखित्वमेव ।
अस्त्वित्युशन्तमनुभूतिमपि क्षिपन्तं
लोकाः पिशाच इति निश्चिनुयुर्भवन्तम् ।।२७।।

दुःखकार्यमेव हेयं न दुःखमित्यङ्गीकारे न्यायतौल्यात्सुखकार्यमेवोपादेयं न सुखमित्यपि त्वयाऽङ्गीकर्तव्यं स्यात् । नन्वस्त्वेतत् । एवं सति परमेश्वरः शक्तिमत्वेऽपि दुःखित्वप्रयुक्तमेव कार्यं निरुन्धे, हेयत्वात् न तु सुखित्वप्रयुक्तमपि, पुरुषार्थत्वादित्युपपादनं संभवति । "को ह्येवाऽन्यात् कःप्राण्यात्" यदेष आकाश आनन्दो न स्यात् "यदा वै सुखं लभते अथ करोति नाऽसुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोती"ति श्रुत्योः प्राणयितृत्वादिरूपः सर्वोऽपि परमेश्वरव्यापारः सुखोद्रेकप्रयुक्त इत्येतत्परतया मदीयग्रन्थेषु व्याख्यानमपि सङ्गच्छत इति यद्याशंसेथाः तदा सकलानुभवमर्यादाविरोधस्तावदनिवार्यः सुखदुःखे हि निरुपाधीच्छाद्वेषविषयतया पुरुषार्थापुरुषार्थरूपे सकलानुभवसिद्धे न तत्कार्ये ।

एवमनुभवविरोधमप्यविगणय्य सुखदुःखकार्ययोरेव पुरुषार्थापुरुषार्थरूपत्वं अभ्युपगम्यते चेत्स्वाभ्युगमानुसारेण त्वदीयसुखादेः पुरुषार्थपर्यवसायितानिर्वाहाय सुखानुभवकालेषु सर्वेषु यत्किञ्चिन्नृत्यगीतादिकार्यमारभमाणेनैव त्वया स्थातव्यं स्यात् । तथा च लोकास्त्वां पिशाच इत्येव मन्येरन् । पिशाचजातिर्हि यत्किंचित्सन्तोषलाभेऽपि विकटं नृत्यति गायति चेति प्रसिद्धिः । अतस्तान्त्रिकेण त्वया लोकशास्त्रमर्यादामनुसृत्य सुखदुःखयोरेव पुरुषार्थापुरुषार्थरूपत्वमङ्गीकरणीयमिति ईश्वरस्त्वन्मते नितान्तहेयसंबन्धाकुलितः । ततो वरमल्पदुःखाध्यासमात्रकलुषितो जीवभाव इति मत्वा पूर्णापूर्णगुणत्वविरोधं अचिन्त्यया निजशक्त्या परिभूय जीवभावमापद्येतैवेति न पूर्णगुणत्ववाचिना ब्रह्मशब्देन जीवाद्भेदसिद्धिरिति भावः ।।२७।।

ननु ब्रह्मशब्देनैव ब्रह्मणो जीवाद्भेदं प्रसाध्य सिद्धान्त इह न क्रियते; किन्तु निखिलकल्याणगुणाकरे जीववर्गाद्भिन्ने विश्वातिशायिनि भगवति सर्वासां श्रुतीनामैककण्ठ्यं बलवद्भिः परस्परसंवादरूपसामरस्यशालिभिस्तात्पर्यलिङ्गैरवगमय्य तत्तत्तात्पर्यलिङ्गप्रदर्शनेन प्रसाध्य तासामद्वैतेऽत्यन्तवैरस्यं च तत्तन्न्यायैरुपपाद्य सिद्धान्तः क्रियते । ब्रह्मशब्दतस्त्वभ्युच्चमात्रम् । अतो न पूर्वोक्तदूषणानामवकाश इत्याशंक्याऽऽह-

विष्णौ विश्वातिशायिन्यनवधिकगुणे जीववर्गाद्विभिन्ने
सर्वश्रुत्यैकमत्यं समरसबलवल्लिङ्गसङ्गत्युपेयम् ।
अद्वैते च श्रुतीनामधिकविरसतामत्र संसाध्य कुर्या-
स्सिद्धान्तं चेत्किमञ्चेत् फलमुपरि तयोः साधकस्ते नयौघः ।।२८।।

त्वन्मते प्राधान्येन जीवब्रह्मभेदसाधनं "पृथगुपदेशादि" त्यधिकरणे कृतम्। अप्राधान्येन तत्साधनं च किञ्चित्किञ्चिद्भेदवाक्यमवलम्ब्य तत्र तत्राऽस्ति । तथा च यद्यत्र सकलद्वैताद्वैतश्रुतिप्राबल्यदौर्बल्यचिन्तया सर्वप्रकारेणाऽपि तत्साधनमिहैव क्रियते तदा तदधिकरणमन्यत्र तत्र तत्र तत्साधनं च निष्फलं स्यात् । तस्मादस्मिन्नधिकरणे ब्रह्मशब्देनैव सिद्धान्त इति त्वयाऽङ्गीकरणीयम् । अत एवाऽऽनन्दमयाधिकरणे "भेदव्यपदेशाच्चे" ति सूत्रस्य पौनरुक्त्यशङ्कानिवारणार्थम् ।

न जीवभेदसूत्राणां शंक्याऽऽत्र पुनरुक्तता ।
वाक्यान्तरद्योतकत्वात्पृथगित्यत्र पूर्णता ।।

इत्यनुव्याख्यानश्लोकं व्याचक्षाणेन **न्यायसुधा**कृतोक्तम्- अत्र शास्त्रे तत्र तत्र प्रकरणे ह्यैक्यविवक्षायां चोदितायां तत्तद्गतभेदवाक्यद्योतनेन सूत्रेषु भेदसमर्थनं क्रियते । अतस्तात्पर्यभेदान्न पुनरुक्तता शङ्क्या । तथा हि- जिज्ञासावाक्येष्वभेदशंकायां तद्गतब्रह्मशब्देनैव भेदसमर्थनम् । जिज्ञास्यस्य ब्रह्मणो जीवत्वे शङ्किते तत्पूर्ववाक्योक्तलक्षणेन भेदसाधनमित्यादिस्वयमूह्यम् । एवमेव "भेदव्यपदेशाच्चाऽन्य" इत्यादावपि पुनरुक्ततादोषः परिहरणीय इति । इयांस्तु विशेषः- अन्नमयादिशब्दा विकारार्थमयट्प्रत्ययानुरोधाज्जीववाचिनः । तेषु ब्रह्मशब्दादिप्रयोगस्तु ब्रह्माभेदविवक्षयेति शङ्किते तत्प्रकरणगतेन "स यश्चाऽयं पुरुषे" इति भेदव्यपदेशेन प्रत्यवस्थानमित्यादि सङ्गच्छते । इह तु जिज्ञासावाक्येष्विव जिज्ञास्यं ब्रह्म निर्विशेषजीवचैतन्यरूपमिति शंकाहेतोः कस्य चिदभावात्सर्ववेदान्तानामप्यखण्डपरत्वेन सगुणे ब्रह्मणि मानं नाऽस्त्येवेति त्वदीयपूर्वपक्षदर्शनाच्च सर्ववेदान्तावलम्बने पूर्वपक्षे जिज्ञासावाक्यगतेनैकेन ब्रह्मशब्देन प्रत्यवस्थानं न सङ्गच्छते ।।२८।।

अपि चाऽग्रे निरूपणीयमपि न्यायजातं न जीवेश्वरयोर्भेदं व्यवस्थापयितुं भवतीत्याह-

अग्रे वाच्योऽपि कस्ते कथय नय इह स्थापको भिन्नतायाः
जीवेशित्रोर्गुणानां स खलु विषमता सा तु दत्तोत्तरैव ।
निर्भेदत्वं तवेष्टं विषमगुणजुषां प्राक्क्रयार्थादिकाना-
मन्यत्वस्योक्तिरन्योऽन्तर इति बहुशः संमता भेदहीने ।।२९।।

इत्थं हि त्वया तत्र तत्र न्याया निरूपिताः- प्रत्यक्षं तावज्जीवस्येश्वराद्भेदे प्रमाणम् । यद्यप्यनवगतेश्वरस्य पुरुषस्य स्वात्मनि तद्भेदो न प्रत्यक्षः ; तथापि शास्त्रावगतसार्वज्ञ्यसर्वशक्तिकत्वादिमदीश्वर एव स्वात्मानं च तद्विरुद्धाल्पज्ञत्वाल्पशक्तिकत्वादिधर्मकं साक्षिणाऽनुभवतः स प्रत्यक्ष एव । यो हि यमर्थमधिगम्य तद्विरुद्ध-

धर्माणां यमर्थं पश्यति स तस्मात्तस्य भेदं प्रत्यक्षयतीति सर्वानुभवसिद्धम् । तथा च शास्त्रीयलक्षणज्ञानसाचिव्येन रत्नतत्वसाक्षात्कार इव शास्त्रीयेश्वरज्ञानसाचिव्येन स्वात्मनि तद्भेदसाक्षात्कारो नाऽनुपपन्नः । एवं प्रत्यक्षागमावगतेन जीवेश्वरयोर्विरुद्धगुणवत्वेन दहनतुहिनवद्भेदोऽनुमातुं शक्यत इत्यनुमानमपि तद्भेदे प्रमाणम् । तथा-

भिन्नो चिन्त्यः परमो जीवसङ्घात्पूर्णः परो जीवसङ्घो ह्यपूर्णः ।
यतस्त्वसौ नित्यमुक्तो ह्ययं च बद्धो मोक्षं तत एवाऽभिवाञ्छेत् ।

इति पूर्णापूर्णादिविरुद्धधर्मवत्वोपपत्तिमुखप्रवृत्ता कौशिकश्रुतिरपि तत्र प्रमाणम् । न च श्रुतिर्व्यावहारिकभेदपरा । 'एतमन्नमयमात्मानमुपसंक्रम्य, 'निरञ्जनः परमं साम्यमुपैति' 'प्रज्ञानेत्रो लोक' इत्यादिश्रुतिषु मुक्तावपि प्राप्यप्राप्तत्वसादृश्यप्रतियोग्यनुयोगित्वनेतृत्वनेतव्यत्वादिविरुद्धगुणवर्णनेन तद्भेदसिद्धेः । न चाऽभेदश्रुतिविरोधादुदाहृतश्रुतीनामन्यथा नयनं शङ्क्यम् । सोपपत्तिककौशिकश्रुतिविरोधेनोपजीव्यविरोधेन च दुर्बलानामभेदश्रुतीनामेव गौणाभेदपरत्वौचित्यात् । तत्त्वमसीत्याद्यभेदश्रुत्या यदि जीवमनूद्य तस्येश्वरैक्यं बोध्यते तदाऽल्पज्ञत्वादिधार्मिकतया जीवग्राहकं साक्षिप्रत्यक्षमुपजीव्यम् । यदि त्वीश्वरमनूद्य तस्य जीवैक्यं बोध्यते तदा सर्वज्ञत्वादिधर्मकेश्वरग्राहकं "यः सर्वज्ञ" इत्यादिशास्त्रमुपजीव्यमित्युभयथाऽपि विरुद्धगुणमुखेन भेदपर्यवसायिनोपजीव्यप्रमाणेन विरोधस्याऽवश्यंभावादिति । तदेतत्सर्वं भेदप्रमाणं विरुद्धगुणवत्वोपजीवकमुपन्यस्तमिति विरुद्धगुणाक्रान्तिरेकैव तव भेदसाधको न्यायः पर्यवसितः । तत्र च प्रागेन दत्तमुत्तरम् । जीवे सतामधिकानन्दादीनामावरणेनाऽल्पानन्दत्वाद्यनुभवस्य त्वयाऽङ्गीकृततया तन्न्यायेन ब्रह्मगुणानां निरतिशयसर्वज्ञत्वसर्वशक्तिकत्वादीनां जीवे सतामेव संसारमुक्तिदशयोरावरणेनाऽल्पज्ञत्वाल्पशक्तिकत्वाद्यनुभवसंभावज्जीवे तत्सत्त्वानभ्युपगमेऽपि ब्रह्मण्येवैश्वर्यवशादणुत्वमहत्त्वाद्यविरोधस्य च त्वयाऽङ्गीकृततया तन्न्यायेनाऽधिकगुणस्यैव ब्रह्मणोऽल्पगुणजीवसंभवाच्च जीवब्रह्मणोः विरुद्धगुणवत्वमसिद्धमिति ।

एवञ्च रत्नशास्त्रालोकनप्रभवस्य लक्षणज्ञानस्य किञ्चिद्रत्नलक्षणे तदन्यलक्षणत्वविषयतया भ्रमत्वे तन्मूलस्य रत्नविशेषप्रत्यक्षस्येव जीवब्रह्मणोविरुद्धगुणव-

त्वासिध्या तद्ज्ञानस्य भ्रमत्वे तन्मूलस्य भेदप्रत्यक्षस्य भ्रमत्वावश्यंभावान्न प्रत्यक्षं भेदे प्रमाणम् । हेत्वसिध्यप्रयोजकत्वादिभिर्नाऽनुमानं प्रमाणम् । जीवेऽपूर्णत्वबद्धत्वयोरसिध्या पूर्णापूर्णत्वयोर्बद्धत्वमुक्तत्वयोश्च विरोधसिध्या वा विरुद्धतदुभयवत्वोपपत्तिमुखेन भेदप्रतिपादने श्रुतेस्तात्पर्यं कल्पयितुं न युक्तमिति श्रुतिरपि तत्र न प्रमाणम् । "भिन्नोऽचिन्त्यः" इति श्रुतिरस्तिचेत्तस्या अभेदप्रतिपादन एव तात्पर्यं सुवचम् । परमो जीवसङ्घाद्भिन्नो न चिन्त्यः किन्तु भिन्न एव चिन्त्य इति । पूर्णः पर इत्याद्यपि भेदचिन्तननिषेधापेक्षितनिषेध्यप्रसक्तिपरतया सुयोजम्। जीवब्रह्मणोर्हि प्रत्यक्षागमाभ्यां अपूर्णत्वपूर्णत्वे बद्धनित्यमुक्तत्वे चाऽवगम्येते । ते च लोकतो विरुद्धत्वेन प्रतीयेते । तन्मूलेन भेदभ्रमेण भेदानुचिन्तनं प्रसक्तमिति ।

अपि च नैवाऽत्र विवदितव्यम्- कथं विरुद्धगुणसमावेशे भेदाभाव इति । विरुद्धगुणशालिनामप्यर्जुनाखण्डलादीनां त्वया भेदाभावस्येष्यमाणत्वात् । त्वया "ह्येक आत्मनः शरीरे भावादि" त्यधिकरणेऽर्जुनादीनामन्योन्यानभिमतखाण्डवदहनतत्प्रशमनादिकृतवतामाराधकाराध्यत्वादिविषमगुणशालिनामपि निर्भेदत्वं व्यवस्थापितम् । आखण्डलादयोंऽशिनः अर्जुनाद्याः तदंशाः । अंशाः पृथग्भूय संचारदशायामपि अंशिना सहाऽभिन्ना एव पुनरपि तेनैक्यं च प्रतिपद्यन्त इति तव मतम्।

एतेन जीवब्रह्मणोर्भेदाभावे ब्रह्मभोगानां जीवेऽप्यनुसन्धानं स्यादित्यपि निरस्तम् । त्वन्मते भेदाभावेऽप्यर्जुनगतेन्द्रभोगाननुसन्धानवज्जीवगतब्रह्मभोगाननुसन्धानोपपत्तेः । इन्द्रभोगादीनामर्जुनादिषु यदननुसन्धानं तद्भेदाभावेऽपि भूम्याद्यपकृष्टदेशावस्थानगर्भप्रवेशमानुषान्नोपभोगादिकं निमित्तीकृत्याऽचिन्त्याप्रतिहतं शक्तिकेन परमेश्वरेण क्रियत इति हि त्वयोक्तम् । एवं देहविशेषप्राप्त्यादिकं निमित्तीकृत्याऽचिन्त्यशक्तिकेन परमेश्वरेण जीवे पारमेश्वरस्य जीवान्तरगतस्य च भोगस्याऽननुसन्धानं क्रियत इति किमिति त्वया वक्तुमशक्यम्? ।

यत्तु परमेश्वरस्य जीवाभिन्नत्वे तस्यैश्वर्यमेव न भवेत् । यो जीवाभिन्नो नाऽसावचिन्त्यशक्तिकतारूपैश्वर्यवान्, यथा देवदत्त इति व्याप्तेरिति; तत्तुच्छम् । यो जीवभिन्नो नाऽसावैश्वर्यवान्, यथा घटः इतिवदप्रयोजकत्वेन व्याप्त्यसिद्धेः । यच्चो-

क्रमभेदस्याऽननुसन्धानमात्रं व्यापकं, न तु सर्वानुसन्धानम् । अर्जुनादीनामाखण्डलादिगताल्पविषयभोगाननुसन्धानेऽपि तद्गतोपासनाफलानुसन्धानमस्त्येव।एवञ्च जीवब्रह्मणोर्जीवानां चाऽभेदे देवदत्तस्य ब्रह्मगतजीवान्तरगतयत्किञ्चिद्भोगानुसन्धानं दुर्वारमिति । तदपि तुच्छम् । यदि ह्यभेदे सत्यप्यननुसन्धाने एकस्मिन्नेवाऽननुसन्धानमनुसन्धानं च विरुद्धं प्रसज्येतेत्यनुकूलतर्कमुपजीव्याऽननुसन्धानस्याऽभेदव्यापकत्वं गृह्यते तदा सर्वानुसन्धानमेव व्यापकम् । कस्यचिदप्यननुसन्धाने तद्विरोधसमाधानालाभात् । यदि त्वभेदेऽपि कस्यचिदननुसन्धानं संभवति तदीयाचिन्त्यशक्तिबलेनाऽनुसन्धानाननुसन्धानविरोधविधूननादिति सर्वानुसन्धानस्य व्यापकत्वं नेष्यते तदाऽनुसन्धानमात्रमपि न व्यापकं तद्बलेनैव क्वचिन्न कस्याऽप्यनुसन्धानमित्यपि वक्तुं शक्यत्वात्। सहचारदर्शनमात्रस्याऽप्रयोजकत्वादित्यास्तामेतत्।

स्यादेतत्- मा भूद्विरुद्धगुणाक्रान्त्या भेदसिद्धिः । अन्यत्वव्यपदेशेन तु स्यात् । दृश्यते हि साक्षादेव जीवब्रह्मणोरन्यत्वव्यपदेशः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" "अन्यश्च परमो राजन् तथाऽन्यः पञ्चविंशकः" "भेदव्यपदेशाच्चान्य" इत्यादिश्रुतिस्मृतिसूत्रेषु इति । नैतत्सारम् । त्वन्मते ब्रह्मण्यन्यत्वव्यपदेशस्य भेदासाधकत्वात् । त्वयाऽन्नमयादीनां पञ्चानामपि ब्रह्मभावमभ्युपगच्छताऽन्नमयाद्यभिन्नेष्वेव प्राणमयादिष्वन्योन्तर आत्मेति व्यपदेश इतीष्यमाणत्वात् ।

अनन्योऽप्यन्यशब्देन तथैको बहुरूपवान् ।
प्रोच्यते भगवान्विष्णुरैश्वर्यात्पुरुषोत्तमः ।।

इति वचनमुदाहृत्य त्वया तस्य निबर्हणाच्च । जीवे ब्रह्मान्यत्ववचनस्याऽपि तन्न्यायेन भगवदैश्वर्यबलादेव निबर्हणसंभवाच्चेति भावः ।।२९।।

ननु च शब्दानां स्वार्थे वृत्तिरौत्सर्गकी । अन्यशब्दस्य च भिन्नत्वमेव मुख्योऽर्थः । तथाऽप्यानन्दवल्यामन्नमयादिपर्यायेषु पञ्चस्वपि "येऽन्नं ब्रह्मोपासते। ये प्राणं ब्रह्मोपासते । आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने"ति । "विज्ञानं ब्रह्म चेद्वेद" "अस्ति ब्रह्मेति चेद्वेदे" ति ब्रह्मशब्दाम्नानेन "एतमन्नमयमात्मानमुपसंक्रामति"इत्यादि

पर्यायेषु मुक्तप्राप्यत्वात्मशब्दयोः श्रवणेन चाऽन्नमयादीनां पञ्चानामपि ब्रह्मरूपावधारणात् ब्रह्मण्येक"मेवाऽद्वितीयमि" त्यादिश्रुतिभिरेकत्वावधारणात् प्राणमयादिपर्यायेषु "अन्योन्तर आत्मे" ति अन्यशब्दानां मुख्योर्थः परित्यज्यते । न च जीवब्रह्मणोरन्यत्वव्यपदेशे मुख्यार्थबाधकमस्ति ।

एवं विरुद्धगुणाक्रान्त्याऽपि भेदसिद्धिरौत्सर्गकी । अणुत्वमहत्वादीनामेकस्मिन्नेव ब्रह्मणि प्रमाणबलेनाऽवधृतत्वात्तत्र विरुद्धगुणवत्वमैश्वर्यबलादिति समाधीयते । न चेह तथा बाधकमस्ति । तस्माज्जीवब्रह्मणोर्विरुद्धगुणवत्वेन साक्षादन्यत्वव्यपदेशेन च भेदसिद्धिस्स्यादेवेत्याशङ्कामपाकरोति-

प्राबल्ये भवतोऽप्यभेदवचसां भेदश्रुतिभ्यो मतं
नो चेदन्नमयादयो वद कथं भिन्ना भवेयुर्न ते ।
भेदे सत्यपि युज्यते भगवतश्शक्त्यैव निर्दोषता
शक्तः किं न स एक एव बहुधा भिन्नो हरिः क्रीडितुम् ।।३०।।

"एकमेवाऽद्वितीयं" "नेह नानाऽस्ति किंचने" त्याद्यभेदश्रुतीनां भेदश्रुतिभ्यः प्राबल्यं तवाऽपि सम्मतमेव । अन्यथा "अन्योऽन्तर आत्मे"ति भेदश्रुत्यनुसारेणाऽन्नमयादीनां भेदो दुर्वारः । न चाऽभेदश्रुतीनां ब्रह्मभेदश्रुतिभ्य एव प्राबल्य न जीवब्रह्मभेदश्रुतिभ्य इत्यत्र विशेषहेतुरस्ति । एकमेवाऽद्वितीयमित्यादिशब्दस्वारस्यस्याऽस्मदुक्तषड्विधतात्पर्यलिङ्गवत्वस्य लाघवस्य वा प्राबल्यहेतोरुभयत्राऽप्यविशेषात् ।

स्यादेतत्- नाऽभेदश्रुतिप्राबल्याद्ब्रह्मभेदश्रुतीनां मुख्यार्थं परित्यजामः। किन्तु सकलवेदमहातात्पर्यविरोधात् । तथा हि- "सर्वेषामपि वेदान्तानां मोक्ष एव प्रधानं प्रयोजनम् । "तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तत" इति वचनात् । मोक्षस्य च तत्प्रयोजनत्वं न साक्षात् तत्साध्यतया । तस्याऽनेकश्रुतिस्मृतिपुराणैर्भगवत्प्रसादेनैव साक्षात्साध्यत्वावधारणात् । किन्तु यद्ज्ञानेन मोक्षहेतुर्भगवत्प्रसादस्संपद्यते तत्प्रतिपादनद्वारेति वाच्यम् । तत्प्रसादश्च तदीयनिर्दोषगुणोत्कर्षज्ञानाद्भवतीति लोकतो

"योमामेवमि"त्यादि भगवद्वचनैश्चाऽवधारितम् । अतः सर्वेषामपि वेदानां भगवतो निर्दोषाशेषगुणपूर्णत्व एव महातात्पर्यम् । तद्विरुध्यते ब्रह्मभेदश्रुतीनां स्वार्थपरत्वे भिन्नानां गुणतारतम्याग्रहानुग्राहकभावादिदर्शनेन ब्रह्मरूपेष्वपि तत्प्रसक्त्या निर्दोषगुणवत्वासिद्धेः। जीवब्रह्मभेदश्रुतीनां स्वार्थपरत्वे तु तन्न विरुध्यते । प्रत्युत तासामतत्परत्व एव विरुध्यते, जीवब्रह्माभेदे जीवदोषेण ब्रह्मणोऽपि सदोषत्वापत्तेः। तस्माद्ब्रह्मभेदश्रूतीनामेव स्वार्थपरित्यागो न जीवब्रह्मभेदश्रुतीनामिति विशेषो युक्त इति चेत्-

मैवम्; अन्नमयादीनां विश्वतैजसादीनां च ब्रह्मरूपाणां भेदश्रुत्यनुसारेण विरुद्धगुणवत्वानुसारेण च भेदे सत्यपि भगवदैश्वर्यबलादेव निर्दोषाशेषगुणपूर्णतोपपत्तेः । न हि भगवानशेषमपि स्वेच्छया कर्तुमकर्तुमन्यथा कर्तुमपि शक्त इति वदतस्तव लीलया भिन्नो भवन्नप्यहं निर्दोषाशेषगुणपूर्णः स्यामिति स्वसङ्कल्पेन भेदमास्थाय क्रीडितुं न शक्त इति वक्तुं शक्यम् । न च वाच्यं तथा सङ्कल्पमेव भगवान्न करोतीति । भेदश्रुत्या विरुद्धधर्माक्रान्त्या चाऽन्नमयादीनां विश्वतैजसादीनाञ्च स्वतः प्राप्तस्य भेदस्याऽपवादकाभावेन तस्याऽवश्यमङ्गीकर्तव्यत्वेन तथा संकल्पं करोतीत्येव वक्तव्यत्वात् । तस्माद्गत्यन्तराभावाद्भेदनिषेधश्रुतीनां प्रबलत्वेन भेदापवादकत्वमास्थायैव तथा सङ्कल्पं न करोतीति निर्वहणीयम् । प्राबल्यं च भवज्जीवब्रह्मभेदश्रुतिभ्योऽपि भवेत्। विशेषहेत्वभावात् । न च ब्रह्मनिर्दोषत्वश्रुत्यनुरोधविरोधौ विशेषहेतू । दुःखादिदोषाश्रयत्वं सदोषत्वं इत्यभ्युपगमे त्वन्मतेऽपि दुःखादीनामन्तःकरणधर्मत्वेन जीवस्याऽपि निर्दोषत्वात् । दुःखादिस्वामित्वं तदित्यभ्युपगमेऽपि त्वन्मते ब्रह्मण एव वा ब्रह्मणोऽपि वा दुःखादिस्वामित्वेन सदोषत्वानिवारणात् । दुःखादिमत्वाध्यासशालित्वं तदिति चेन्न । तस्याऽप्यशेषविशेषदर्शिनि ब्रह्मण्यसंभवाद्ब्रह्मणो विशेषदर्शनेनैव तदभिन्नस्याऽपि विशेषदर्शनवत्त्वेऽपि ब्रह्मतद्धर्माणां जीवं प्रति तदीयानन्दवदावृतत्वस्य तवाऽपि संमतत्वेन ब्रह्मणो विशेषदर्शनस्य जीवं प्रत्यसत्कल्पत्वात्। ब्रह्म प्रति स्वाभिन्नजीवगतदुःखाद्यभ्यासस्याऽनावृतत्वेऽपि देवदत्तमुखाभिन्नप्रतिमुखगतश्यामत्ववक्रत्वादेर्विशेषदर्शिनं देवदत्तं प्रतीव ब्रह्म प्रति हेयत्वाभावात् । मन्मते बिम्बप्रतिबिम्बौ भिन्नौ, प्रतिबिम्बगतवक्रत्वादयोऽपि सत्या इति चेन्न । येषां तावभिन्नौ ते च वक्रत्वादयोऽध्यस्ता इति मतं तेषामपि स्वप्रतिबिम्बगतवक्रत्वादिदर्शनेन विषादाद्यभावात्, प्रत्युत-

प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिविक्रियाः ।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्य विक्रियाः ।।

इति **कल्पतरूक्त**रीत्या हर्षदर्शनात् । एतेन जीवगतासर्वज्ञत्वाल्पशक्तिकत्वपारतन्त्र्यादिकं दोष इत्यपि निरस्तम् । जीवस्य ब्रह्माभेदसिद्धौ तस्य सर्वस्याऽप्यध्यस्तत्वोपपत्तेः । तस्मान्न भेदश्रुत्यवलम्बनेन भेदकश्रुत्यवलम्बनेन वा जीवब्रह्मभेदसिद्धिप्रत्याशा कर्तव्येति भावः ।।३०।।

यदत्राऽधुनिकोक्तं कर्ममीमांसासायं व्युत्पादितैःशब्दान्तरादिभेदप्रमाणैः जीवब्रह्मणोर्भेदस्सिध्यति । अस्ति "त्वेष एव जीवं प्रबोधयति एतस्माज्जीव उत्तिष्ठती"ति विरुद्धार्थधातुनिष्पन्नाख्यातरूपं **शब्दान्तरम्,** "नित्यः परो नित्यो जीवः" इत्यप्रत्यभिज्ञायमानपुनश्श्रुतिरूपो**ऽभ्यासः;** "द्वा सुपर्णे"त्यादि **संख्या,** "अनश्नन्नित्यादिको" **गुणः,** "यतोवाचो निवर्तन्त" इति **प्रकरणान्तरम्,** जीवेशावितिं **नामधेयभेदश्चेति,** तदिदं प्रत्यक्षादिषु भेदप्रमाणेषु पराहतेषु शब्दान्तराद्युपन्यसनं प्रतिग्रहलब्धं हस्तिनमविक्रीय स्वगृहे स्थापयितुकामस्य मुग्धश्रोत्रियस्य हस्तिपकेन तद्ग्रासे पृष्टे स्वगृहे सम्पादितान् सर्वान् दर्भमुष्टीन् क्रमेण तदग्रे निहितवतः तेषु कबलमात्रस्याऽप्यपर्याप्तेषु क्षणेन निगीर्णेष्वन्ततः स्वकरस्थितदर्भपवित्रनिधानमनुकरोतीति सोपहासं दूषयति-

शब्दान्तरादिकथनं त्विहभेदसिध्यै
हासास्पदं सदसि दर्भपवित्ररीत्या ।
पूर्वत्र तन्त्र इव काल्पनिकेऽपि भेदे
तेषां घटेत किमिहाऽपि न चारितार्थ्यम् ।।३१।।

कर्ममीमांसकैरिदं शब्दान्तरादिकं मुख्यभेदे प्रमाणतया नोपन्यस्तम् । न हि तैः शब्दान्तरादिकं प्रदर्श्योपपाद्यमानः तदभावं प्रदर्श्योपपाद्यमानश्च कर्मभेदः शास्त्रभेदो वा अन्योन्याभावादिरूपो मुख्यभेदः । "सप्पदश प्राजापत्यान्पशूनालभत" इत्यत्र "दधि मधु घृतमापो धानाः करम्भास्तण्डुलास्तत्संसृष्टं प्राजापत्यमि" त्यत्र

"ऐन्द्रं दध्यमावास्यायां ऐन्द्रं पयोऽमावास्यायामि" त्यत्र च प्राजापत्यपशूनां प्राजापत्यदध्यादीनां ऐन्द्रदधिपयसोश्च प्रदानयौगपद्येन प्रजापत्याद्युद्देशेन तत्तद्द्रव्यविषयसंकल्परूपाणां यागानामेकैकत्वेऽपि सप्ददश प्राजापत्ययागाः सप्त दध्यादियागाः द्वौ दधिपयोयागाविति भेदोपपादनात् । "सोमेन यजेते" त्यत्र इन्द्रवाय्वाद्युद्देशेन तत्तत्पात्रस्थितसोमरससंकल्परूपाणां त्यागानां भिन्नत्वेऽपि अग्निहोत्रञ्जुहुयादित्यत्राऽऽहवनीयादिषु हविःप्रक्षेपरूपाणां होमानां भिन्नत्वेऽपि भेदनिरासात् । सप्तदश प्राजापत्यानिति वाक्यरूपस्य शास्त्रस्यैकत्वेऽपि भेदोपपादनात् । "व्रीहिभिर्यजेत" "व्रीहीनवहन्ति" इत्यादिवाक्यरूपाणां शास्त्राणां भिन्नत्वेऽपि भेदनिरासाच्च । यद्यपि कर्माऽपि गोत्वादिवदेकमेव नित्यमेकमनेकानुगतं, न त्वाश्रयभेदेन भेदोऽस्ति। अयं चलत्ययमपि चलतीत्यादिप्रत्यभिज्ञया तदैक्यसिद्धेः । तद्भेदबुद्धेराश्रयभेदादुपपत्तेः । सन्ततानुपलब्धेश्च शब्दवद्व्यञ्जकाभावेनोपपत्तेः । एवमन्यत्र कर्मैक्येऽपि यत्र शब्दान्तरादिद्वैतीयकप्रमाणमस्ति तत्र कर्मभेदोऽङ्गीक्रियते । अतश्शब्दान्तरादिप्रमाणषट्कावधिः कर्मभेदः । ततः परन्तु तदभेद इति **कौमारिलानां** क्वचित्पक्षे "सोमेन यजेत" "अग्निहोत्रं जुहुयादि"त्यत्र शब्दान्तराद्यभावान्न यागहोमभेदः । किन्त्वेकस्यैव यागस्य होमस्य च देवताभेदेनाऽधिकरणभेदेन वाऽभ्यासमात्रमिति मुख्यो भेद उपपादयितुं शक्यते तथाऽपि "सप्तदश प्राजापत्या" नित्यादिषु तस्मिन्नपि पक्षे मुख्यभेद उपपादयितुं न शक्यत एवं ।

अत एवाऽस्वारस्यात्सर्वलोकसिद्धभेदप्रत्यक्षतोऽपि बलवती प्रत्यभिज्ञा शब्दान्तरादितः कथं बलवती न स्यादित्यस्वारस्याच्च सर्वत्र कर्मैक्यपक्षे शब्दान्तरादिस्थलेऽप्यमुख्यभेद एव **कौमारिलै**राश्रितः । "शब्दान्तरे कर्मभेदः" इत्यादिसूत्रस्वारस्यं स्वप्रौढ्या समर्थयितुं परं शब्दान्तरादिस्थले मुख्यः कर्मभेद इति कश्चित्पक्ष उपन्यस्तः । तस्मादनुष्ठानविशेषोपयोग्यपूर्वभेदाद्युपाधिकः काल्पनिको भेद इति शब्दान्तराद्यवसेय इत्येव सर्वेषामपि **कर्ममीमांसकानां** मतम् । उक्तं हि **तन्त्ररत्ने**- "क्रियाणामाश्रितत्वाद्द्रव्यान्तरे विभागस्स्यादि" त्यधिकरणे । अथाऽपि नाम सर्वत्रैलोक्यवर्तिन्येकैव कर्मव्यक्तिरनुष्ठानमात्रन्तु भिद्यते यावदेकापूर्वानुबन्धनमेकेन शास्त्रेण वियीकृतं तावदेकं कर्म, तदन्यत्तु भिद्यत इति भेदाभेदव्यहारसिद्धिरिति । उक्तं च **वरदराजीये**- शब्दान्तराधिकरणे- "भिन्नापूर्वानुबन्धप्रतिपादनयोग्यताज्ञानं

यत्तदेव शास्त्रभेदज्ञानमित्युच्यत" इति । तत्रैव संख्याधिकरणेऽप्युक्तम्- "न च सप्तदश प्राजापत्यानिति वाक्यस्यैकत्वान्न शास्त्रभेदः । न वाक्यभेदः शास्त्रभेदे तन्त्रम् । निरपेक्षभिन्नालौकिकार्थत्वमेव तत् । तच्चेहाऽप्यस्ती"ति ।

एवं च यथा पूर्वतन्त्रे शब्दान्तरादेर्वस्तुतो भेदरहितेऽपि काल्पनिकभेदविषयतयैव चारितार्थ्यं एवमिहाऽपि तस्य जीवब्रह्मणोर्वास्तविकभेदाभावेऽपि काल्पनिकभेदविषयतया चारितार्थ्यसंभवान्न तत् तयोर्मुख्यभेदासिद्धिरिति भावः ।।३१।।

एवं पूर्वमीमांसकमर्यादया शब्दान्तरादीनां काल्पनिकभेदविषयतयाऽपि चारितार्थ्यं संभवतीत्युक्तम् । परमर्यादया तु तैस्तथाभृतोऽपि भेदो न सिध्यतीत्याह।

निर्मर्यादप्रवृत्ते तव तु हतमते सोऽपि भेदो न सिध्ये-
द्यस्त्वं नानाधिकारश्रुतपरगुणसाङ्कर्यमिच्छस्युपास्तौ ।
अंशानां खल्वभेदेऽप्यपि च भगवता सन्ति शब्दान्तराद्याः
तत्स्यान्मत्स्यादिरीत्या सकलजनिमतां वासुदेवांशभावः ।।३२।।

दहरविद्या, शाण्डिल्यविद्या, वैश्वानरविद्या, षोडशकलविद्योपकोशलविद्या पर्यङ्कविद्येत्यादिसंज्ञाभेदेन प्रसिद्धाः परब्रह्मविद्या यथायथं शब्दान्तरादिभिः प्रमाणैः परस्परं भिन्नाः । भिन्नत्वादेव तत्तद्विद्याम्नाता उपास्यगुणा वाजपेयाश्वमेधादिकर्मणामङ्गकलापवद्यथाप्रकरणं व्यवस्थिता इति न तासु परस्परगुणोपसंहारः । किन्त्वेकैकस्यां विद्यायां नानाशाखाम्नातगुणोपसंहारमात्रम् । सर्वासामपि तासामुपास्यगुणतारतम्येन उपासनाकालतारतम्येन सहकारियज्ञादिकर्मतारतम्येन च फलभोगतारतम्यवती देवयानमार्गप्राप्या सगुणब्रह्मलोकावाप्तिरपरमुक्तिरूपा फलमित्यस्माकं मतम् ।

त्वया त्वत्रैवमङ्गीकृतम्- "सर्वविद्याम्नातानां कर्मकाण्डगताग्नेयसौरादिसूक्ताम्नातानां च सर्वेषां गुणानां उपासनायामुपसंहारः कार्यः इति न विद्याभेदेन गुणानां

प्रतिप्रकरणं व्यवस्था, किन्तु मानुषाद्या हिरण्यगर्भान्ता मुक्त्यधिकारिणः फलतारतम्येन मुक्तिभाज इत्यधिकारिभेदेनैव । तत्र हिरण्यगर्भः सर्वोत्कृष्टमुक्त्यर्हतया कर्मब्रह्मकाण्डाम्नातासंकुचितसकलगुणोपसंहारयोग्यः । अन्ये तु स्वस्वभाविमुक्त्यनुसारिगुणोपसंहारयोग्याः। यद्यप्यस्मदादिभिर्मुक्त्यधिकारिभिरुपासनारम्भसमये स्वस्वभाविमुक्तिस्वरूपं प्रतिपुरुषमनादियोग्यतानुसारेणव्यवस्थिततारतम्यमजानद्भिः स्वस्वोपासनायोग्या गुणा निश्चेतुं न शक्यन्ते । अयोग्यगुणोपसंहारप्रयत्नश्चाऽनर्थफलः।"अचेतनासत्यायोग्यान्यनुपास्यान्यफलत्वविपर्ययाभ्यामि"ति**संकर्षणसूत्रात्** ।

"अधिकाराधिको यत्नः प्रायशो नोपपद्यते ।
कथंचिदधिके यत्ने दोषः कश्चित्समापतेत् ।।

2529)

इति वचनाच्च । तथाऽपि स्वस्वगुरोरन्यस्माद्वा कुतश्चित्सर्वज्ञात् भाविस्वमुक्तिफलस्वरूपं ज्ञात्वा तदनुसारेण स्वस्वयोग्यगुणानपि तत एवाऽवगम्य तेषामुपसंहारः कार्यः । न च बह्वल्पगुणप्रतिपादकविद्याविशेषपरिग्रहेण मुक्त्यधिकारिणां फलोत्कर्षापकर्षनिर्वाहात्प्रकरणाद्युल्लङ्घनेन गुणोपसंहारो न कार्य इति वाच्यम् । सकलगुणोपासनयोग्यस्य हिरण्यगर्भस्य सकलगुणपरिग्रहायाऽन्येषामपि स्वस्वमुक्त्यनुरूपगुणविशेषपरिग्रहाय च नानाप्रकरणविप्रकीर्णगुणोपसंहारावश्यंभावात्। क्वचिदपि विद्यायां सर्वगुणाम्नानादर्शनात् तत्तन्मुक्त्यनुरूपगुणविशेषाम्नाननियमाभावाच्चेति। तदेतत्सर्वं "उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च" "प्राप्तेश्च समञ्जसम्" "इतरे त्वर्थसामान्यात्" "पुरुषविद्यायामपि चेतरेषामनाम्नादि"ति सूत्राणि लिखित्वा रचितेषु त्वदीयाधिकरणेषु स्पष्टम् ।

एवमङ्गीकृतवता त्वया शब्दान्तरादीनां भेदकत्वमेव त्यक्तं भवति । तेषां भेदकत्वे तैरापाततो विद्याभेदस्याऽनिवार्यत्वाद्विद्याभेदे सति तत्तद्विद्याव्यवस्थितगुणोपसंहारायोगात् । न ह्येकाग्निमुपासीनस्याऽऽयुरादिकमपेक्षितमिति "आयुराशास्ते । सुप्रजास्त्वमाशास्ते" इत्यादिसूक्तवाकमन्त्रार्पितायुरादिफलकं दर्शपूर्णमासाङ्गप्रस्तरप्रहरणे पुरुषापेक्षामात्रेणोपासनादिकर्मसूपसंहार्यं भवेत् ।

अपि च शब्दान्तरादयः कर्मणि भेदका भवन्तु मा वा भूवन् । ब्रह्मणि तु भेदका न भवन्त्येव । तथाहि- "एष ह्येव जीवं प्रबोधयति" "एतस्माज्जीव उत्तिष्ठती"ति विरुद्धार्थधातुनिष्पन्नमाख्यातरूपस्य शब्दान्तरस्य भेदकत्वम् । उद्बोधकत्वावच्छिन्नस्योद्बोध्यत्वावच्छेदो विरुद्ध इत्यन्ततो विरोधमूलमेव वाच्यम्। न तु तद्युक्तम् । ब्रह्मणि त्वया विरुद्धधर्मसमावेशस्य बहुधाऽङ्गीकृतत्वात् । "नित्यः परो नित्यो जीव" इति नित्यत्वाभ्यासस्य परजीवयोरेकत्वे परनित्यत्वश्रुत्यैव जीवस्याऽपि नित्यत्वसिद्धेः तत्पुनःश्रुतिरनर्थिका स्यादिति पुनःश्रुत्यानर्थक्यं मूलं वाच्यम् । तदपि न युक्तम् । कार्यकारणाभेदवादिना शक्तिव्यक्त्यभेदवादिना च त्वया नित्यत्वानित्यत्वादीनां साङ्कर्यस्याऽङ्गीकृततया तथैव परनित्यत्वेऽपि जीवानित्यत्वं स्यादिति शङ्कावारणेन तत्सार्थकत्वात् । संख्याया गुणस्य च भेदकत्वं "यस्मिन् पञ्च पञ्च जना" "अणोरणीयान् महतो महीयानि" त्यादौ त्वयैव प्रतिषिद्धम् । प्रकरणभेदो न भेदक इति स्पष्टमेव । **भारतादिषु** रामकृष्णादिचरितप्रतिपादकप्रकरणभेदेऽप्यभेदानपायात् । सृष्टिसंहारादिप्रतिपादकप्रकरणभेदेऽपि त्वया सृष्टिसंहारादिक्रियाणां अभेदस्याऽङ्गीकृतत्वाच्च ।

एतेन जीवेशाविति नामधेयस्याऽपि भेदकत्वं प्रत्याख्यातम् । तस्मात्परस्परविरुद्धधर्मादिमतामवतारादीनामिव जीवानामप्यभेदश्रुत्यनुसरणाय तदत्यन्ताभिन्नवासुदेवांशत्वं त्वया निवारयितुं न शक्यत इति भावः ।।३२।।

नन्वस्त्वेवं जीवब्रह्मणोरभेदः, तथाऽपि निर्दोषाशेषगुणपूर्णस्य ब्रह्मणो जीवं प्रत्यभेदेऽप्यावृतत्वोपपादनाद्विचार्यत्वं संभवतीति मन्मते शास्त्रमारम्भणीयमिति परसिद्धान्तस्य न किञ्चिद्दूषणमिति मन्दाशङ्कां निराकुर्वन् सिद्धान्तदूणमुपसंहरति-

इत्थं जीवब्रह्मभेदे निरस्ते शास्त्रारम्भस्थापनार्थं त्वदिष्टे ।
जीवाभेदेऽप्यावृतत्वाद्विचार्यं ब्रह्मेत्यस्मद्रीतिरेवाऽऽश्रयस्ते ।।३३।।

इति श्रीमदप्पयदीक्षितेन्द्रकृतिषु मध्वतन्त्रमुखमर्दने
प्रथमाधिकरणदूषणम् ।।

न वयं सर्वथैव ब्रह्ममीमांसाशास्त्रारम्भमाक्षेप्तुं प्रवृत्ताः । अस्माभिस्तदारम्भस्य स्थापनीयत्वात् । किन्तु जीवब्रह्मभेदमाश्रित्य ब्रह्मणो विषयत्वोपपादनेन तदारम्भमाक्षेप्तुम् । तदाक्षेपश्च सुस्थिर एव । त्वद्रीत्यैव जीवब्रह्मभेदस्य निराकृतत्वात् । अतस्तं पक्षं विहाय जीवाभेदेऽप्यावृतत्वात् ब्रह्म विचार्यमिति पक्ष आश्रीयते चेत्; साऽस्मद्रीतिरेव, न दूषणीया । न च सगुणस्यैव ब्रह्मणः परपक्षे जीवाभेदोपपादनाद्रीतिभेदोऽस्तीति शङ्कनीयम् । परमते गुणगुणिनोः भेदाभावाद्भेदप्रतिनिधेस्तदभिमतस्य विशेषस्य वाऽऽवश्यकब्रह्मशक्त्यैवोपपन्नतया निराकृतत्वात्। अस्मन्मतेऽप्यविद्याशक्तिवशाद्गुणगुणिभावप्रतीतेरिष्यमाणत्वात् । यदाहुः **पद्मपादाचार्याः** "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः पृथक्त्वेऽपि चैतन्यात्पृथगिवाऽवभासन्ते इति । इयांस्तु विशेषः- जीवे प्रत्यक्षतोऽवभासन्ते; ब्रह्मणि तु "आनन्दं ब्रह्मणो विद्वानि" ति श्रुतिबलादवभासन्त" इति । तस्मात्सिद्धमेतज्जीवब्रह्मभेदावलम्बनेन शास्त्रारम्भसमर्थनमयुक्तमिति ।।२३।।

अप्पदीक्षितसुधीविनिर्मिते मध्वदर्शनमुखावमर्दने ।
आदिमाधिकरणस्य दूषणं भूषणं भवतु धीमताभिदम् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणचणस्य
श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वतन्त्रमुखमर्दनव्याख्याने
मध्वमतविध्वंसने जिज्ञासाधिकरणदूषणाख्यं प्रथमं प्रकरणम् ।।

जन्मादिसूत्रे परकीयमिदमधिकणम्- यदुक्तं "तद्विजिज्ञासस्व । तद्ब्रह्मेति"इति विचारविधिवाक्ये ब्रह्मपदेन जीवविलक्षणस्य ब्रह्मणो विचार्यस्य समर्पणात्सविषयमिदं शास्त्रमिति, तन्न घटते । तत्र ब्रह्मपदस्य जीवपरत्वात् । तथा हि- ब्रह्मशब्दस्तावज्जीवस्याऽपि वाचकः । "बृह बृहि वृद्धा"विति धातोरिव बृहजातिजीवकमलासनशब्दराशिष्विति धातोरपि मनिन्प्रत्यये सति ब्रह्मशब्दस्य निष्पत्तेः । तस्य च जीववाचकत्वं रूढ्यैव जीवे गुणपूर्त्यादियोगासंभवात् । परब्रह्मवाचकत्वं तु योगेन । ततश्च रूढेर्योगतो बलवत्वादिह ब्रह्मशब्दस्य जीवपरत्वमेव युक्तमिति पूर्व-

पक्षे राद्धान्तः- सत्यं रूढिर्बलीयसी । इह त्वस्या बाधकं जागर्ति "यतो वा इमानि भूतानि जायन्ते"इत्यादौ श्रुतं ब्रह्मशब्दनिर्देश्यस्य जगज्जन्मादिकारणत्वं बोधयति । तद्धि विष्ण्वेकनिष्ठं तल्लक्षणमिति श्रुतिस्मृतिपुराणादिभ्योऽवगतम् । अतस्तदनुसारेण योगतः परिपूर्णगुणविष्णुपर एवाऽयं ब्रह्मशब्द इति तत्र पूर्वपक्षोक्ता जीवे रूढिरसिद्धा । शारीरबृंहकत्वादिक्लृप्तयोगेनैव तत्र वृत्त्युपपत्तेः धात्वन्तरस्य चाऽप्रामाणिकत्वादिति दूषणं स्पष्टमेवेति मत्वा सिद्धान्तं दूषयति-

तद्ब्रह्मेत्यस्य रूढ्या तनुधरपरतामुज्झतोऽनूक्त्ययोगात्
किं त्वन्नाद्येषु युक्ता भवति तव मते स्याद्यतो वेत्यनूक्तिः ।
ब्रह्मैक्यात्तेषु युक्ता यदि किमिति तदा जीववर्गे न युक्ता
जीवाद्भेदेऽप्यभिन्नानपि हि कथयसि ब्रह्मणा तद्गुणेद्धान् ।।३४।।

यदि जगत्कर्तृतानुवादस्य जीवे पर्यवसानायोगाद्विचारविधिवाक्यगतस्य ब्रह्मशब्दस्य रूढ्यर्थोऽपि जीवः परित्यज्यते तदा येष्वन्नप्राणमनोविज्ञानानन्देषु तस्य ब्रह्मशब्दस्य वृत्तिस्तवाऽभिमता तेष्वपि वृत्तिः तस्य परित्यक्तव्या स्यात् । जगत्कारणत्वानुवादपर्यवसानासंभवस्य तेष्वपि तुल्यत्वात् । तथाहि- वरुणेन ब्रह्मविद्यार्थमुपसन्नं भृगुं प्रति जगज्जन्मादिकारणं तद्ब्रह्म तद्विजिज्ञासस्वेत्युपदिष्टे सोऽपि तपसैवाऽन्नं जगत्कारणं ब्रह्मेत्यवगत्य पुनः पुनरुपसत्त्या क्रमेण प्राणं मनो विज्ञानमानन्दं तथाऽवगतवानिति भृगुवल्ल्यां श्रूयते । तत्र "आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्याद्यानन्दवाक्यमेकमेव प्रथमं सामान्यतो लक्षणामुखेनोपदिष्टस्य ब्रह्मणो निर्णयवाक्यमानन्द एव जगज्जन्मादिमूलकारणं ब्रह्म; अन्नादयस्तु चत्वारोऽपि कोशाः "अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते" इत्यादि स्थूलारुन्धतीन्यायेन प्रवृत्तानि इत्यस्माकं मतम्। तव तु अन्नादिवाक्यानि पञ्चाऽपि तन्निर्णयवाक्यानि अन्नादिषु पञ्चस्वपि ब्रह्मशब्दस्य जगत्कारणत्वलक्षणयोजनस्य च दर्शनात् । पुनःपुनरुपसत्तिस्तु अन्नमयादिकोशान्तरगतानां पञ्चानां ब्रह्मरूपाणां मध्ये पूर्वपूर्वरूपापरोक्षीकरणानन्तरमुत्तरोत्तररूपापरोक्षीकरणार्थतयाऽनुज्ञाप्राप्तये प्रतिपर्यायं "तद्विज्ञाय पुनरेव वरुणं पितरमुपससार" इति "तपसा ब्रह्म विजिज्ञासस्वे"ति च श्रवणादिति मतम् । एवं च तव मते

"एतन्नानावताराणां निधानं बीजमव्यय" मित्यादिपुराणप्रसिद्धेन मूलरूपेणैव ब्रह्मणश्चतुर्मुखादिसकलभूतजातजन्मादिकर्तृत्वम्, न तु प्रतिशरीरं तत्तत्कोशमात्राधिष्ठातृतयाऽभिव्यक्तैरन्नादिरूपैरिति तेष्वप्यनुवादाद्युक्तिस्तुल्यैव । यद्यपि तव मते सर्वाणि भगवद्रूपाणि सविशेषभिन्नानि तथाऽपि तत्तत्कृत्यानि व्यवस्थितान्येव । न हि रावणवधादिकं कंसशिशुपालवधादिकृष्णचरित्रमध्ये वर्ण्यते।

स्यादेतत्- तात्त्विकभेददृष्ट्या रूपान्तराविष्कृतोऽपि महिमा रूपान्तरे वर्णयितुं युक्तः । "अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तत" इत्यादिकृष्णवाक्यदर्शनात् । रावणवधादेः कृष्णरूपाविष्कृतचरित्रमात्रसंग्रहप्रस्तावेष्ववर्णनेऽपि सर्वरूपाभिमानिपरब्रह्मस्वरूपतया कृष्णवर्णनप्रस्तावेषु कृष्णेऽपि वर्णनदर्शनाच्च । अतोऽन्नादिरूपेषु मूलरूपाभेददृष्ट्या जगत्कर्तृत्वानुवादो युक्त इति चेत्; एवं तर्हि जीवेऽपि स युक्त एव । जीववर्गोऽपि ज्ञानानन्दादिब्रह्मगुणशालितया ब्रह्माभिन्न इति त्वयाऽङ्गीकृतत्वात् । 'तत्त्वमसी'ति जीवे प्रकृतजगत्कर्तृभावपरामर्शितत्पदोक्तब्रह्माभेदप्रतिपादनस्य ज्ञानानन्दादिगुणैकरूप्यप्रयुक्ताभेदविषयतया "सर्वं खल्विदं ब्रह्मे"ति ब्रह्मणि सर्वप्रपञ्चाभेदप्रतिपादनस्य "सर्वभूतगुणैर्युक्त"मिति स्मृतेः पृथिव्यादिगताधारत्वादिगुणा ब्रह्मणि सन्तीति तत्तद्गुणैकरूप्यप्रयुक्तपृथिव्याद्यभेदविषयतया च त्वया "तद्गुणसारत्वात्तु तद्व्यपदेशःप्राज्ञवदि"ति सूत्रे व्यवस्थापितत्वाच्चेति भावः।।३४।।

एवं यतो वेत्यादिनाऽनुवाद्यस्य ब्रह्मणि सतः तदभेददृष्ट्या जीवे वर्णनं युक्तमित्युक्तम् । इदानीं साक्षादपि जीवे तदनुवाद्यत्वं सम्भवतीत्याह-

यतो वेत्याद्युक्तिः कथमिव च जीवे न घटते ?
यतस्तद्ब्रह्मेति श्रुतिरपसरेद्रूढिविषयात् ।
जगत्स्रष्टुं सर्वं प्रभवति खलु ध्यानविषयं
समस्तोऽयं मानोरथिकमपि जीवस्तव मते ।।३५।।

इत्थं हि तव मतम्- स्वप्नध्यानमनोराज्येष्वनुभूयमानास्सरित्समुद्रगिरिनगरगजतुरगादयो न बहिस्सन्तः । नाऽपि भ्रान्तिविषयाः । किन्तु स्वप्नादिद्रष्टृपुरुषान्तः

करणगतानादिकालप्रवृत्ततत्तद्विषयानुभवजन्यवासनोपादानाः तदानीमेवाऽन्तरुत्पन्नाः तत्तद्ध्यानमनोरथविषयाः पुरुषप्रयत्ननिर्वर्त्याः, न तु स्वप्नविषया इति । तदुक्तं **न्यायसुधायां** "सन्ध्ये सृष्टिराह ही"त्यधिकरणे- यथा मनोरथे ध्याने च संस्कारयोनीनर्थान् मनसाऽनुभवत्येवं स्वप्नेऽपीति किमनुपपन्नम्? इयांस्तु विशेषः- मनोरथादौ प्रयत्नपूर्विका पदार्थसृष्टिः । स्वप्ने पुनरीश्वरेच्छाधीनैवेति । तथैव प्रथमसूत्रेऽपि ध्यानं मानसक्रियेति शङ्कानिराकरणार्थमुक्तम् । यदि क्रियापरिस्पन्दः स तर्हि अतीन्द्रियाश्रितोऽतीन्द्रिय इत्यपरोक्षावभासविरोधः । रूपरहितत्वेन तदवभासविरोधश्च । यदि च मानसी सृष्टिरिति मतम्, अनुमतमेव तत् । श्रवणदर्शनादिजनितमानसवासनामयस्य वस्तुनो मनसाऽवलोकनं ध्यानमित्यङ्गीकारात् । अतीन्द्रियोपादानकस्याऽपि द्रव्यस्यैन्द्रियकत्वं त्र्यणुकादेरिवोपपद्यते । नीरूपाद्वायोः रूपवतस्तेजसो जन्म वेदान्तिनां प्रसिद्धमेवेति । एवं ध्यानमनोरथयोरसंभावितो विषयः कोऽपि नास्तीति तद्विषयसर्वस्रष्टरि जीवे साक्षादप्यनुवाद्यान्वयस्संभवतीति भावः ।।३५।।

ननु "यतोवा इमानी"ति निर्देशाद्वक्तृश्रोतृसाधारणस्थूलप्रपञ्चस्रष्टृत्वमनुवाद्यम्। तत्तु न जीवे सम्भवतीत्याशङ्क्याऽऽह-

स्थूलप्रपञ्चो यदि चाऽनुवाद्यस्सोऽप्यस्तु ते ध्यानमनोरथोत्थः ।
सन्त्येव तत्र ह्यतिदुर्घटानि सर्वापरोक्ष्यादिषु को विरोधः ? ।।३६।।

स्थूलप्रपञ्चस्रष्टृत्वमपि जीवस्य संभवति । तस्य चिरन्तनहिरण्यगर्भादिजीवध्यानमनोरथप्रभवत्वोपपत्तेः । न चेश्वरस्य स्रष्टृत्वश्रुतिविरोधः । तस्याऽपि प्रपञ्चान्तरस्रष्टृत्वेन घटादिष्विव ध्यानजादिष्वपि स्रष्टृत्वेन च तदुपपत्तेः । न च वासनामयत्वेन सर्वापरोक्ष्यसर्वार्थक्रियाकारित्वादिविरोधः । अतिसूक्ष्मवासनोपादानत्वेऽपि स्वप्नध्यानमनोरथविषयाणां भूगोलकमहार्णवादीनां अतिमहत्वं तेषां च स्वल्पशरीरान्तरवस्थानं मुहूर्तमात्रावस्थितेषु स्वप्नध्यानमनोराज्येषु अनेकशतवर्षातिवाहनमित्यादेरतिदुर्घटस्य दर्शनेन तद्वदेव ध्यानमनोरथप्रभवे प्रपञ्चे सर्वापरोक्ष्यादेरप्यविरोधात् । **वासिष्ठरामायणे** भार्गवनन्दनमनोराज्यादिविषयप्रपञ्चेषु सर्वापरोक्ष्यादेर्वर्णितत्वेन मनोराज्यादिषु सृष्टिमङ्गीकुर्वतस्तव तदनुसरणौचित्याच्चेतिभावः।।३६।।

नन्विदं जीवेऽनुवाद्यसमर्थनप्रकारद्वयमप्ययुक्तम् । आद्ये हि प्रकारे महावाक्यार्थो गौणः । द्वितीये त्वनुवाद्यपरावान्तरवाक्यार्थः । तथा हि- ब्रह्मपदस्य जीवपरत्वे परजीवयोरभेदो महावाक्यार्थः । स च जगज्जन्मादिकारणत्वजीवत्वावच्छिन्नयोश्चेन्मुख्यो भवति । स च न संभवति । ताभ्यां रूपाभ्यां तयोर्भेदाङ्गीकारात् । यस्तु ज्ञानानन्दवत्वादिरूपेणाऽभेदः संभवतीत्युक्तः स तु गौणः शब्दानुपात्तधर्मावच्छिन्नत्वात् । अत एव प्रबलश्रुतिभिः भेदसिद्धेः तत्त्वमसिवाक्यं गौणभेदपरमित्येव "तद्गुणसारत्वादि" सूत्रे दर्शितम् । न चेह तथा गौणो वाक्यार्थः स्वीकार्यः । ब्रह्मपदमात्रस्य योगेन परब्रह्मपरत्वे मुख्यवाक्यार्थलाभात् । एवं जगत्कारणत्वमनुवाद्यपरोऽवान्तरवाक्यार्थः । तच्चाऽसंकुचितं वेदप्रसिद्धं च ग्राह्यं बलवत्संकोचाभावात् । वेदप्रसिद्धसत्वे तस्यैव वेदेनाऽनुवदितुं युक्तत्वात् । न च जीवानां ध्यानमनोरथादिविषयस्रष्टृत्वमसंकुचितम्। जीवान्तरध्यानादिविषये जीवान्तरस्य स्रष्टृत्वाभावात् । नाऽपि "तत्तेजोऽसृजत" इत्यादिवत् तद्वेदप्रसिद्धम् । न च ब्रह्मपदमात्रस्य रूढित्यागेन मुख्यानुवाद्यग्रहणसंभवेन त्यागो युक्त इत्याशंक्याऽऽह-

यद्येवं रोचयेथाः कथमपि न गतिं स्वेष्टिसंसिद्धिबुध्या
लब्धुं ते वृद्धिमृद्धां ध्रुवमभिलषतो मूलमेव प्रणश्येत् ।
अत्यन्ताभेद एवं परतनुधरयोरापतेत्तद्विरोधे
राजन्योक्त्यादिरीत्या बत विपरिणमेद्वाध्यमत्राऽनुवाद्यम् ।।३७।।

जीवे कथंचिद्योजितमिदं प्रकारद्वयमपि ब्रह्मपदरूढित्यागेन स्वेष्टं लब्धव्यमिति लोभाद्यदि न रोचयेथास्तदा वृद्धिमृच्छतो मूलमपि नष्टमिति न्याय एवाऽऽपतेत् । उक्तप्रकारद्वयानङ्गीकारे हि अनुवादब्रह्मपदस्वारस्यविषययोः जीवपरयोः विरुद्धधर्मवत्तया ताभ्यामुपस्थितयोरपि यतो वेत्यादिमहावाक्यप्रामाण्यादत्यन्ताभेदः प्राप्नोति । विरुद्धधर्मवत्वस्य तयोरभेदाविरोधितायाः प्रथमाधिकरणभङ्गे प्रपञ्चितत्वात् । अविरोधे च मुख्यार्थत्वायोगात् । यदि तु तस्य भेदविरोधित्वमेवेत्यभिमानस्तदाऽत्यन्तमेव तव मूलहानिः । तदा हि विधेयानुवाद्यरूपतया जीवब्रह्मसमर्पकस्य भागद्वयस्य महावाक्यार्थभूताभेदपरिपन्थिधर्मद्वयोपस्थापकतया विरोधे

सत्यविरोधाय कस्यचिद्भागस्याऽर्थबोधे कर्तव्ये विधेयभागस्य तात्पर्यवत्तया प्रबलत्वात् । न विधौ परश्शब्दार्थ इत्यनुवादस्य मुख्यतासिद्धये विधावमुख्यार्थपरिग्रहस्य न्यायविद्भिर्निराकृतत्वाच्च । अनुवादभागस्यैवाऽर्थबाधः प्राप्नुवन्जीवगतध्यानादिविषयस्रष्टृतागोचरत्वलक्षणस्य सङ्कोचरूपबाधस्य त्वदसंमततया गत्यन्तराभावाद्ब्रह्मण्येवाऽनुवाद्ये जीवाभेदपरिपन्थिजगत्कारणत्वोपमर्दात्मा स बाधः प्राप्नोति । दृष्टं च **पूर्वतन्त्रेऽपि** अनुवाद्यगतधर्मस्य विधेयविरोधेनोपमर्दः । तत्र हि "उक्थ्याग्निष्टोमस्तुतशस्त्रं स्यात् सति हि संस्थान्यत्वम्" इत्यधिकरणे "अप्यग्निष्टोमे राजन्यस्य गृह्णीयात् अप्युक्थ्य" इति राजकर्तृकयोरुक्थ्याग्निष्टोमयोर्विधीयमानः षोडशिग्रहः स्तुतशस्त्ररहितस्स्यात्। तद्वत्वे षोडशिसंस्थतयोक्थ्याग्निष्टोमसंस्थाभंगप्रसंगेनोक्थ्यस्याग्निष्टोमस्य च सतः षोडशिग्रहविध्ययोगादिति पूर्वपक्षं कृत्वा सिद्धान्तितम् - स्तुतशस्त्रवत्वेन निर्ज्ञातषोडशिग्रहोऽत्र विधीयमानस्तथैव प्राप्नोति । न च संस्थाभङ्गौ दोषः पूर्वसंस्थोपमर्देन संस्थान्तरविध्युपपत्तेः ।

"उक्थ्यसंस्थो हि यः प्राप्तस्तथाऽग्निष्टोमसंस्थकः ।
राजन्यस्य तथा नाऽसौ किन्तु षोडशिसंस्थकः ।।

इत्येव विधेः पर्यवसानादिति । एवं षोडशिग्रहविध्यर्थप्राप्तेनाऽपि स्तोत्रशस्त्रेण यदा तद्विरोधिनोरनुवाद्ययोरुक्थ्याग्निष्टोमसंस्थयोरुपमर्दः तदा किमु वक्तव्यं साक्षाद्विधीयमानेन जीवत्वेन तद्विरुद्धस्याऽनुवाद्यस्य जगत्कारणत्वस्योपमर्द इति । एवं पूर्वोक्तप्रकारद्वयानङ्गीकारे जीवपरयोरत्यन्ताभेदप्रसक्त्या त्वदभिमतभेदहानाद्विरुद्धधर्मवतोरत्यन्ताभेदो न संभवतीत्यनुशये ब्रह्मणो जगत्कारणत्वस्याऽपि हानात्त्वन्मतस्य मूलहानिरेव स्यादिति भावः ।।३७।।

स्यादेतत्- विरुद्धधर्मवतोरत्यन्ताभेदो न संभवत्येव । तथाऽपि नोक्थ्याग्निष्टोमन्यायेन जगत्कारणत्वबाधप्रसक्तिः तन्न्यायवैषम्यात् । राजन्ये प्राप्तयोरुक्थ्याग्निसंस्थयोर्बाधेऽपि हि न तदनुबन्धिविधीनामत्यन्तबाधः; वर्णान्तरे चरितार्थत्वात् । ब्रह्मणि जगत्कारणत्वबाधे तु सृष्टिप्रलयादिवाक्यानामत्यन्तबाधस्स्यात् । विषयान्तराभावात् । तस्मा "दानर्थक्यप्रतिहतानां विपरीतं बलाबलमि"ति न्यायाद्विधेयपरस्याऽपि ब्रह्मशब्दस्य रूढित्यागो लभ्यत इत्याशयवतीमाशङ्कामुद्भाव्य परिहरति-

उक्थ्याग्निष्टोमसंस्थापरिकरविधयो विप्रजाताविवैते
सर्वे स्रष्टृत्ववादाः परपरिपठिताः सन्तु कस्मिन् कृतार्थाः ।
तत्रैवाऽरोपबाधद्वितयमनुभवं त्वदि्द्वतीयत्वसिध्यै
चित्याग्रावग्निहोत्रे विधय इव पयःशस्तये जर्तिलादेः ।।३८।।

सृष्ट्यादिवाक्यानां विषयान्तराभावो न दोषः । ब्रह्मणोऽद्वितीयत्वसिध्यर्थं "अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रसिध्यति" इत्युक्तरीत्या ब्रह्मणि कर्तव्यप्रपञ्चापवादापेक्षितेन तदारोपेण चारितार्थ्यात् । दृष्टं च **पूर्वतन्त्रेपि** प्रयोजनान्तरसिध्यर्थार्थवादापेक्षितारोपमात्रे चारितार्थ्यमग्निचयनेऽग्निहोत्रे च जर्तिलयवाग्वादिविधिषु । तद्वदिहापि स्यादित्यर्थः ।।३८।।

स्यादेतत्- एकस्य ब्रह्मपदस्य रूढिपरिपालनाय यतो वेत्याद्यनुवादस्य तत्पुरोवादानां सृष्ट्यादिवाक्यानाञ्चैवमुपमर्दकल्पनमयुक्तमित्याशङ्क्याऽऽह-

तद्ब्रह्मेत्येक एव प्रभवति निखिलस्रष्टृतावादबृन्दं
विष्णोर्नानाश्रुतिस्थं विधिरपवदितुं त्वन्मते पूर्वरीत्या ।
सर्वाद्वैतश्रुतिभ्यो यदि हि स बलवान्यौगिके ब्रह्मशब्दे
सर्वद्वैतश्रुतिभ्यः कथमिव न भवेत्तत्र रूढिं प्रपन्ने ।।३९।।

सत्यम् एकानुरोधेन बहूनामुपमर्दो न युक्त इति । स तु न्यायस्त्वया तद्ब्रह्मेत्यत्र ब्रह्मशब्दे त्यक्तः । त्वया हि पूर्वाधिकरणे ब्रह्मशब्दस्य जीवब्रह्मभेदसाधकत्वमङ्गीकृत्य तेनैकेन पूर्वपराभिमतसकलाद्वैतश्रुतीनां बाधो वर्णितः । तद्रीत्यैवाऽत्र वक्तुं शक्यम् । तेनैव ब्रह्मशब्देन जीवे रूढिं न्यायतः प्राप्तेन जगत्कारणब्रह्माभेदबोधनपर्यन्तेन सृष्टिवाक्यादिसर्वद्वैतश्रुतीनामुपमर्द इति । न ह्ययं ब्रह्मशब्दो यौगिकत्वे बलवान्, न तु रूढत्व इति वक्तुं युक्तमित्यर्थः ३९।।

एवं विरुद्धगुणवत्त्वं न भेदविरोधीति परोक्त्यनुसारेण तथा सत्यनुवाद्यगतविरुद्धगुणवत्वस्यैवोपमर्दस्स्यात्, न तु विधेयस्याऽभेदस्येत्यापादितम् । **वस्तुतस्तु**

परमते जीवब्रह्मणोः विरुद्धधर्मवतोरप्यभेदबाधने लौकिकविरोधदृष्टिर्न परिपन्थिनी। तन्मते परमेश्वरस्याऽचिन्त्याद्भुतशक्तिमहिम्ना विरोधसमाधानादिति प्रथमाधिकरण-दूषणे प्रपञ्चितमेव । अधुना तमेवाऽर्थं युक्त्यन्तरेणाऽपि स्थापयति-

किञ्च श्रुत्येकगम्ये रव इव रसनं साधनं बाधकं वा
कर्तुं शक्तं न मानान्तरमखिलजगत्कर्तरीति स्वरीतिः ।
स्मृत्यारूढा कथं न व्यपगमयति ते लोकदृष्ट्या निरूढा-
मेकत्वायोगशङ्कां परतनुधरयोः वल्गसि त्वं यथैव ।।४०।।

इति श्रीमदप्पयदीक्षितेन्द्रकृतिषु मध्वतन्त्रमुखमर्दने
द्वितीयाधिकरणदूषणम् ।।

श्रोत्रैकगम्ये शब्दे रसनस्येव वेदैकगम्ये ब्रह्मणि मानान्तरस्य साधकत्वव-द्बाधकत्वमपि नाऽस्तीति त्वन्मतमर्यादा । सा च "श्रुतेस्तु शब्दमूलत्वादि" त्यधिकरणे त्वया दर्शिता । इत्थं किल तदधिकरणम्- ईश्वरो जगत्कर्ता चेत् क्षुद्र-कार्येषु कृत्स्नशक्त्या प्रवर्तते? तदेकदेशेन वा"? नाऽऽद्यः । क्षुद्रकार्येष्वपि कृत्स्न-शक्त्या प्रवृत्तौ तस्य प्रेक्षावत्वहानिप्रसङ्गात्। न द्वितीयः; तस्य निरवयत्वात्। तस्माज्जीवस्य स्वतन्त्रकर्तृत्वे यदुक्तं कृत्स्नप्रसक्त्यादिदूषणं तदीश्वरस्य स्वतन्त्रकर्तृ-त्वेऽपि तुल्यम् । न चेश्वरस्य निरवयवत्वेऽपि सांशतया बहुत्वशालित्वादेकदेशेन कर्तृत्वोपपत्तिः "व्यतिरेको गन्धादिवदि" त्यधिकरणे जीवानामपि सांशतायाः स्था-पितत्वेन तौल्याज्जीवस्यांऽशांशिभावेन बहुत्वाङ्गीकारे बहुत्वस्य भेदव्याप्तत्वेन भेद-स्याऽपि प्रसक्त्या पुनरपि स एव निरवयवत्शब्दव्याकोप इति तदपेक्षे ईश्वरेऽपि तथैवाऽक्षेपसंभवात् विशेष वशादीश्वरस्यांऽशांशिभावसंभवेन बहुत्वोपपादने जीवे-ऽपि तथैव तदुपपादनसंभवाच्च । भेदेनोपपादनीयस्यांऽशांशितया बहुत्वस्य चेतने विशेषेणोपपादने घटादावचेतनेऽपि तेनैवोपपादनप्रसङ्ग इति तदाक्षेपस्य परमेश्वर-साधारण्यादिति प्राप्ते राद्धान्तः- वेदैकगम्ये ब्रह्मणि यथाश्रुति यस्य कस्यचिदर्थ-स्याऽङ्गीकारे लौकिकाश्शुष्कतर्का न प्रतिभटीभवितुमीशते । न हि श्रोत्रैकगम्ये शब्दे चक्षुरादिकं साधकं बाधकं वा भवितुमर्हति । अत एव "योऽसौ विरुद्धोऽ-

विरुद्धो मनुरमनुर्वागवागिन्द्रोऽनिन्द्रः प्रवृत्तिरप्रवृत्तिरपरःपरमात्मे"ति श्रुतिरेव लोकदृष्ट्या विरुद्धानामपि धर्माणां परमात्मन्यविरोधं बोधयति । तस्मान्मानान्तरगम्यस्य जीवस्य स्वतन्त्रकर्तृत्वाङ्गीकार एव कृत्स्नप्रसक्त्यादिलौकिकतर्काः प्रवर्तेरन् नेश्वरस्येति यथाश्रुति निरवयवोऽपि परमेश्वरः कार्यानुरूपमेकदेशेन जगन्निर्माणे प्रवर्तते। जीवेनाऽपि निरवयवेनैव कार्यानुरूपमेकदेशेन कृत्स्नशक्त्या वा कारयतीत्यभ्युपगतौ न कश्चिद्दोष इति ।

एवमीश्वरस्य तर्कागोचरत्वेन तस्मिन्निरवयवत्वैकदेशकर्तृत्वयोर्विरोधमपह्नुवानः कथं तस्य जीवाभेदे तर्कागोचरत्वं विस्मरसि? येन तत्र लौकिकविरोधमूलान् पुनः पुनश्शुष्कतर्कानेवोद्घाटयसि । न च नैते शुष्कतर्काः, किन्तु जीवब्रह्मभेदाभेदश्रुत्योर्विरोधे भेदश्रुतिप्राबल्योपपादकतया वाक्यार्थनिर्णायकश्रुत्यनुग्राहकतर्का एव । न च तेऽप्युपेक्षणीयाः । मीमांसावैयर्थ्यापत्तेः । तत्रैव "श्रुतेस्तु शब्दमूलत्वादि"ति मदीयाधिकरणे

यद्वाक्योक्तं न तद्युक्तिर्विरोद्धुं शक्नुयात्क्वचित् ।
विरोधे वाक्ययोः क्वाऽपि किञ्चित्साहाय्यकारणम् ।।

इति स्मृतिमुदाहृत्य वाक्यार्थनिर्णायकतर्काणामुपादेयताप्रतिपादनाच्चेति वाच्यम् । तथा सति जीवब्रह्मभेदश्रुत्यनुग्राहकत्वेन त्वदभिमतानां विरुद्धधर्मत्वमूलकतर्काणामपवादकत्वेन तदभेदश्रुतिप्राबल्यापादका जीवे प्रत्यक्षसिद्धकर्मकर्तृत्वस्य ब्रह्मणि श्रुतिप्राप्तसृष्टिपालनसंहारादिकर्तृत्वस्य च प्रतिक्षेपकतया कर्तृत्वविशेषतदनुबन्धिगुणरूपान् जीवब्रह्मणोः सर्वानपि धर्मान् विचारासहान् मिथ्याभूतान्कुर्वन्तः कृत्स्नप्रसक्त्यादितर्का एव श्रुत्यनुग्राहका इत्युपादेयाः । विरुद्धधर्मवत्वमूलतर्कास्तु तदपोदिततया श्रुत्यनुग्राहकाः शुष्कतर्का उपेक्षणीया इति वैपरीत्यस्यैवाऽऽपत्तेः । तस्माद्ब्रह्मणः तर्कमात्रागोचरत्वाङ्गीकारे शुष्कतर्कागोचरत्वाङ्गीकारे च विरुद्धगुणवत्वमूलतर्कागोचरत्वमवश्यंभावि । ब्रह्मणस्तर्कागोचरत्वनिर्वाहाय त्वदुदाहृतश्रुतावपि हि इन्द्रोऽनिन्द्र इत्यपरः परमात्मेति च तस्याऽनीश्वरत्वावरत्वरूपविरुद्धधर्मवताऽपि जीवेनाऽभेदनिर्देशो दृश्यते । तेनाऽपि तस्य विरुद्धगुणवत्वमूलकजीवाभेदप्रतिक्षेपकतर्कागोचरत्वं स्पष्टमेव । अतो न तानुपादाय पुनः पुनर्वल्गनं युक्तमिति भावः ।

तस्मात्पूर्वपक्षे त्वयाऽङ्गीकृता ब्रह्मपदस्य रूढिः कथमपि सिद्धान्ते त्याजयितुं न शक्यत इति जन्मादिसूत्रसिद्धान्तोऽपि तवाऽसमञ्जस इति सिद्धम् ।।४०।।

इत्यप्पदीक्षितकृतौ मध्वमतारम्भमर्दनग्रन्थे ।
द्वैतीयाङ्काधिकृते दूषणमस्तु त्रयीविदां प्रीत्यै ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणचणस्य श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वतन्त्रमुखमर्दनव्याख्याने मध्वमतविध्वंसने जन्माद्यधिकरणदूषणाख्यं द्वितीयं प्रकरणम् ।।

"शास्त्रयोनित्वादि"ति, सूत्रे परस्येत्थमधिकरणम्- यदुक्तं जगज्जन्मादिकारणत्वं विष्ण्वेकनिष्ठं तल्लक्षणमिति, तन्न युक्तम्। जगदनेककर्तृकं,महाकार्यत्वात्। शिवो जगत्कारणम्, सर्वज्ञत्वात्; तत एव विरिञ्चोऽपि जगत्कारणम्। न च हेत्वसिद्धिः शिवस्य सर्वज्ञनाम्ना विरिञ्चस्य "ज्ञानमप्रतिघं यस्ये"त्यादि स्मृत्या च तत्सिद्धेरित्याद्यनुमानैरन्यत्राऽपि जगत्कारणत्वावधारणादिति चेत्; जगत्कारणत्वस्य धर्मादिवच्छास्त्रप्रमाणकत्वात् । शास्त्रस्य विष्ण्वेकनिष्ठजगत्कारणत्वप्रतिपादकत्वादनुमानस्य संभवदुपाधिप्रत्यनुमानादिदोषशङ्काकलङ्कितस्याऽदृष्टार्थे स्वतोनिश्चायकत्वाभावादिति। तत्र परमते शास्त्रमर्यादयाऽपि जगतोऽनेककर्तृकत्वमापतति । तथा तत्तात्पर्यनिर्णयकोपपत्तिरूपलिङ्गतयोदाहृतानुमानानामेव तदनुग्राहकत्वसंभवात् । अतस्तेषां दूषणमयुक्तमित्याह-

कथं निरस्या कथय त्वयाऽनुमा प्रसाधयन्तीदमनेककर्तृकम् ।
तथैव तात्पर्यमपि श्रुतेर्हि सा नयेत्तदैकार्थ्यनयत्यजस्तव ।।४१।।

त्वन्मते हि एकस्य श्रुतिवाक्यस्यैक एवाऽर्थ इति नाऽस्ति नियमः । अत 'स्सदेव सोम्येदमग्र आसीत्' इत्यादिसृष्टिवाक्यानामप्यनेकसृष्टिपरत्वं सम्भवति। तत्तश्च यदि जगतः सामान्यतोऽनेककर्तृकत्वसाधकानुमानं विशिष्य ब्रह्मविष्णुशिव-

कर्तृकसाधकानुमानानि चेति तथा तात्पर्यनिर्णायकान्युपपत्तिरूपतात्पर्यलिङ्गान्यवतरेयुः । तदा तत एवाऽऽपतत्सृष्टिवाक्यानामनेककर्तृपरत्वं दुर्वारम्। एवं च जगत्कारणे वस्तुनि साक्षादनिर्णायकान्यप्यनुमानानि तात्पर्यलिङ्गतया "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे" त्यादिश्रुतिदर्शितानुमानवत्तन्निर्णयोपयोगीनीति कथं त्वया निराकर्तुं शक्यन्त इत्यर्थः ।।४१।।

परमते श्रुतिवाक्यानां एकार्थत्वनियमाभावमेव तदङ्गीकृतानेकार्थश्रुत्युदाहरणैर्दर्शयति-

कर्मब्रह्मोभयार्थं खलु सकलमपि व्याकरोः कर्मकाण्डं
ब्रह्मस्वार्थोभयार्थानुपनिषदुदितानप्यतद्वाचिशब्दान् ।
अन्यांश्चोमादिवागाद्युभयविधपरान्वाङ्मनःप्राणमुख्यान्
केन स्याद्वाक्यमर्थत्रयपरममितार्थं च वह्न्यादिसूक्तम् ।।४२।।

"ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके"इत्यधिकरणे तावत्कृत्स्नः कर्मकाण्डस्त्वया कर्मब्रह्मोभयपरतया व्याख्यातः । उदाहृतं च तत्र तस्य ब्रह्मपरत्वं स्थालीपुलाकन्यायेन केषुचिद्वाक्येषु। तत्र वसन्तवाक्येषु यथा- वसतीति वसः। पचाद्यच्। तनोतीति तिः । औणादिको डिप्रत्ययः । पूर्वपदस्य च नकारागमः । वसंश्चासौ तिश्चेति वसन्तिः। सर्वत्र व्याप्तो वर्तमानो जगत्कर्ता चेत्यर्थः । तत्र सम्बुद्धिर्वसन्ते। द्विरुक्तिरादरार्था । जिर्जातम् । पूर्ववज्जनेर्डिप्रत्ययः । ओतिरोतम्। अवतेः क्तिः । जातं जगत् ओतं प्रविष्टं यस्मिन्स ज्योतिः । षःप्राणः । चेष्टकत्वात्, "षकारःप्राण आत्मे"ति श्रुतिः । ज्योतिश्चाऽसौ षश्चेति ज्योतिषः । तस्य सम्बुद्धिर्ज्योतिषेति । आयजेतेत्यपि सम्बुद्धिः। आसमन्ताद्यजैर्यज्वभिः इत प्राप्तेत्यर्थः । यजेर्घञर्थे कविधानमिति कप्रत्ययः । सम्प्रसारणाभावच्छान्दसः । "इन्द्र आगच्छे"त्यत्र इन्द्रेति आ इति गच्छेति संबोधनानि । गमेश्वछदेश्च डप्रत्यये सति गं गतं छं छादनं यस्मादसौ गच्छः । निरवद्य इत्यर्थः । स्वाहाशब्दे स्वमात्मीयं यज्ञादिषु दत्तं हविरादि आहरति स्वीकुरुत इति स्वाहः । हञो डप्रत्ययः । तदनन्तरं "अ" इति विष्णुनाम । तयोस्समासे सम्बुद्धिः । नमश्शब्दे नमतेरधिकरणार्थेऽसुन्प्रत्ययः । नमन्ति नियमेनाऽ-

स्मिन्वर्तन्ते कल्याणगुणा इत्यर्थ इति । एवं बहुषु स्थलेषूदाहृतानि, विस्तरभयान्न लिख्यन्ते । तथोपनिषत्स्वपि अब्रह्मवाचिशब्दा ब्रह्मस्वार्थोभयपरतया व्याख्याताः । तद्यथा "प्राणो वा आशाया भूयानि"ति प्रकरणे प्राणशब्दो भूमाधिकरणे ब्रह्मपरतया, व्यतीहाराधिकरणे मुख्यप्राणतया च भाष्ये व्याकृतः । उक्तार्थद्वयपरमिदं प्रकरणमिति च टीकायामुक्तम् । तथा "इन्द्रियेभ्यः परा ह्यर्था" इत्यादीनां तदधीनत्वन्यायेन ब्रह्मणि समन्वय उक्तः । इन्द्रियशब्दप्रवृत्तिनिमित्तस्येन्द्रवत्वस्य ब्रह्माधीनत्वादिन्द्रियशब्दो ब्रह्मपरः । इन्द्रियगतपरत्वावधित्वस्य पञ्चम्यर्थस्य ब्रह्माधीनत्वात् पञ्चम्यपि ब्रह्मपरेत्यादिप्रकारेणेन्द्रियदेवता तदुत्कर्षक्रमप्रतिपादकत्वं च तेषामङ्गीकृतम् । एवमन्यान्यपि भूयांस्युदाहरणानि । "वाङ्मनसि सम्पद्यते, मनः प्राणे, "प्राणस्तेजसि" इत्यादिवाक्ये वाङ्मनःप्राणशब्दानां उत्तरोत्तरस्मिंल्लीयमानो मारुतो हिरण्यगर्भपर इति मृतानुत्तरस्मिंल्लीयमानवागिन्द्रियादिपरा इति चाऽनेकार्थता "वाङ्मनसि दर्शनादि"त्यधिकरणे दर्शिता । "केन स्याद्येन स्यात्तेनेदृश एवे"ति बृहदारण्यकवाक्यं ज्ञानिनो विहितनिषिद्धसाधारण्येन नियन्त्रणयतेष्टाचरणविधिपरमिति, विहितमध्य एव केषाञ्चिदाचरणं केषाञ्चित्परित्याग इत्येतदनुज्ञापरमिति, सर्वमपि विहितमेव कर्म विधिबन्धं विना स्वेच्छया कार्यमित्येवं परमिति चाऽर्थत्रयशालि । अर्थत्रयस्य च हिरण्यगर्भतदितरदेवतामनुष्यविषयत्वेनाऽविरोध इति "स्तुतयेऽनुमितिर्वे"त्यधिकरणे निरूपितम् । ब्रह्मादिदेवताप्रतिपादकाः सूक्तमन्त्राः तत्तदुत्तमसकलदेवताविषयत्वेनाऽमितार्था इत्यङ्गावबद्धाधिकरणे प्रतिपादितम् । एवमनेकार्थत्वेन सकलामपि श्रुतिमाकुलयतस्तव सृष्टिवाक्येष्वनेकस्रष्टृपरत्वं सम्भवतीत्यर्थः ।।४२।।

ननु-केषुचिद्वाक्येषु अनेकार्थत्वाङ्गीकारमात्रेण सृष्टिवाक्येष्वपि तदापादने मतान्तरेष्वपि तदापद्यते । श्लिष्टकवित्वेषु सूत्रनिबन्धेषु अनेकत्र विनियुक्तेषु मन्त्रेषु चाऽनेकार्थत्वस्य सर्वैरप्यङ्गीकृतत्वादित्यत आह-

श्लेषप्राणे कवित्वे प्रमिततरतया श्लाघनीये च सूत्रे
नानाकर्मोपयोगश्रुतिसमधिगतानेकबोध्ये च मन्त्रे ।
एकार्थत्वव्यवस्थाप्यजनमनुमतं सर्वमीमांसकाना-
मन्यत्राऽपीच्छया तद्यदि तव भवति ब्रह्मवाक्येष्वपि स्यात् ।।४३।।

शब्दानां व्यवस्थितैकार्थपरत्वमौत्सर्गिकं वक्तृविवक्षया विनियोगेन वा क्वचित्क्वचित्तदपोद्यत इति **सकलमीमांसकमर्यादा** । तामतिलङ्घ्य स्वकल्पितार्थनिर्वाहाय स्वेच्छयैव श्रुतिवाक्येष्वनेकार्थत्वं कल्पयतस्तदर्थं शब्दानां यावन्तोऽर्था योगरूढ्यादिभिस्संभवन्ति तावदर्थपरत्वमौत्सर्गिकम् । पौरुषेयवाक्येषु तु वक्तृविवक्षावशादेकार्थनियतत्वमित्यभ्युपगच्छतस्तव वसन्तादिवाक्येष्विव सर्वेष्वपि ब्राह्मणवाक्येषु अन्यथापदविभागैर्योगरूढ्यादिभिश्चाऽनेकार्थप्रतीतिः सम्भवत्येवेत्यनिवार्यमनेकस्रष्टृपरत्वमित्यर्थः ।।४३।।

ननु "सदेव सौम्येदमग्र आसीत् " "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमेक एवाऽग्र आसीदि"त्यादिसृष्टिवाक्यगतानां सद्ब्रह्मादिपदानां "एको ह वै नारायण आसीदि"त्यादिविशेषवचनबलेन विष्ण्वेकनिष्ठत्वान्नाऽनेकस्रष्टृपरत्वं प्रसज्यत इत्याशङ्कां निराचष्टे-

सृष्ट्यादिश्रवणैर्विशेषवचनान्नारायणैकान्तिभिः
स्पृश्या नेतरदेवता इति वचस्त्वैकार्थ्यवादोचितम् ।
तस्मात्तत्परता भवेत्तव परं नाऽन्यार्थधीवारणं
स्रष्टॄणां च विमुक्तवत्तव मते नाऽऽशङ्क्यमीर्ष्यादिकम् ।।४४।।

इयं शङ्का श्रुतीनामैकार्थ्यवादिनश्शोभते । सृष्टिवाक्यानां विशेषवचनबलान्नारायणपरत्वावश्यंभावे सत्यर्थान्तराणामवकाशाभावेन निरासात् । तव तु श्रुतीनामनेकार्थपरत्वसम्भवं मन्वानस्य सृष्टिवाक्यानां नारायणपराणां सतामन्यपरत्वमपि सम्भवतीत्यबाधेन तेभ्यस्तद्धीरुदीयमाना वारयितुं न शक्या ।

नन्वन्यत्र श्रुतिवाक्यानामनेकार्थत्वसंभवेऽपि सृष्टिवाक्यानां नाऽनेकस्रष्टृपरत्वं सम्भवति । स्रष्टृबाहुल्ये कदाचित्तेषां परस्परमीर्ष्यादिना वैमत्येन प्रपञ्चसृष्ट्यनिर्वृत्तिप्रसङ्गादिति चेन्न । त्वन्मते मुक्तानामिव स्रष्टॄणामपि निर्दोषतयेर्ष्याद्यनुदयोपपत्तेः ।

इत्थं हि तव मतम्- सायुज्यमुक्तिभाजो हि देवाः स्वोत्तमदेवतानुप्रवेशक्रमेण भगवद्देहमनुप्रविश्य ग्रहावेशन्यायेन भगवद्देहेन्द्रियैः तद्भुक्तानेव भोगान् कदाचिद्बहिर्निर्गत्याऽऽत्मस्वरूपभिन्नैश्चिन्मात्रदेहेन्द्रियैस्स्वसङ्कल्पोपनतांश्च भोगान् भुञ्जाना **आनन्दवल्युक्त**क्रमेण स्वरूपानन्दे ज्ञानैश्वर्यभोगेषु चोत्तरोत्तरं ज्ञानगुणोत्कृष्टाः पूर्ववदेव मुक्तावपि यथास्वं ब्रह्मेन्द्रवरुणचन्द्रसूर्यादितत्तदधिकारिदेवतापदं तदनुसारिणमुत्तमाधमभावं पूज्यपूजकादिव्यवस्थां चाऽनुभवन्तो विहरन्ति । देवव्यतिरिक्तास्तु सालोक्यादिमुक्तिभाजो यथाधिकारं भूरादिषु सप्तसु लोकेषु भगवल्लोकेषु स्थितानि भगवतस्स्थानानि प्राप्य स्वेच्छागृहीतबाह्यदेहैश्चिन्मात्रदेहैर्वा स्वसङ्कल्पोपनतान् भोगान् भुञ्जानाः पूर्ववद्वर्णाश्रमादिभेदं तदनुसारिणीं पूज्यपूजकत्वादिव्यवस्थां ज्ञानानन्दैश्वर्यभोगतारतम्यञ्च प्राप्ता विहरन्ति । न चैवं मुक्तानां तारतम्यवत्त्वे तद्दर्शनकृतदुःखद्वेषेर्ष्यादिभिर्मुक्तेरपुरुषार्थत्वप्रसङ्गः । निर्दोषाणां तेषां गुरुशिष्यवत्तदप्रसक्तेरिति ।

यदैवं स्वाधिकज्ञानानन्दभोगैश्वर्यवतः पश्यतां स्वयं तत्सेवकत्वादिना ततो निकर्षमनुभवतामपि दुःखेर्ष्याद्यभावः तदा किमु वक्तव्यं नित्यनिर्धूतनिखिलदोषसकलकल्याणगुणाकरपरब्रह्मरूपाणामवाप्तसकलकामानां स्वाधिकानन्दादिकं क्वचिदप्यपश्यतां कुतोऽपि निकर्षमननुभवतामीश्वराणां ईर्ष्यादिना वैमत्यं न भवतीति? यदि त्वीर्ष्यादीनामन्तःकरणधर्मत्वान्मुक्तानां अन्तःकरणाभावात्तदभावः समर्थ्यते तदेश्वराणामपि तथाभूतान्तः- करणवत्वमनङ्गीकृत्यैव तदभावस्समर्थ्यतामिति भावः।।४४।।

ननु यदि सृष्टिवाक्यादिप्रतिपाद्यपरब्रह्मरूपा जगत्कर्तारो बहवस्तदा तेषां "परास्य शक्तिर्विविधैव श्रूयत" इति श्रुतिबलात्प्रत्येकमचिन्त्यापरिमितशक्तिमत्त्वमङ्गीकरणीयमित्यन्योन्यानपेक्षया निखिलजगत्स्रष्टुं शक्तानां तेषां संभूय स्रष्टृत्वकल्पनमयुक्तम् । लोके प्राकारगोपुरादिषु शिल्पिनां सम्भूयकारित्वस्य प्रत्येकशक्तिनिबन्धनत्वात्। अतस्सृष्टिवाक्यानां एकस्मिन्नेव स्रष्टरि पर्यवसानावश्यंभावे विशेषवचनबलान्नारायणे पर्यवसानं स्यादित्याशङ्क्याऽऽह-

स्त्रष्टुं प्रत्येकमीशास्सकलमपि परब्रह्मभृतास्त्रयश्चेत्
संभूयैते सृजेयुः किमिति भजति ते नाऽत्र शङ्कावकाशम् ।
स्त्रष्टुं शक्तो विनैव स्वयमुपकरणैरच्युतस्तद्व्यपेक्षा
सृष्टौ लीलाऽस्य दण्डग्रहणमिव गतौ जाङ्घिकस्येव मन्तुः ।।४५।।

इयमाशङ्का तव भवितुं नाऽर्हत्येव । त्वयेश्वरस्य जगत्सृष्टौ नियमेन प्रकृत्यादिकमपेक्षमाणस्य तत्राऽपि प्रकृतिमुपादानत्वेनैव कालादिकं निमित्तत्वेनैवाऽपेक्ष्य प्रकृत्यैव महान्तं, महतैवाऽहङ्कारं इत्यादिक्रमनियमं चाऽपेक्ष्य सृजतः किन्नाम स्वातन्त्र्यम्? । स्वातन्त्र्ये सति कदाचित्प्रकृत्यादिकमनपेक्ष्य निमित्तोपादानकार्यक्रमादिकं वाऽव्यक्तस्य सृष्टिप्रसङ्गादित्याशङ्क्य साधनान्तरतद्व्यवस्थाक्रमनियमापेक्षयाऽपि युक्तमेवाऽस्य स्वातन्त्र्यम् । तदपेक्षणस्य शक्त्यभावनिबन्धनत्वाभावात्। स्वयमेव गन्तुं शक्तस्याऽपि गमनसमये लीलया दण्डावष्टम्भवत् स्वेच्छामात्रनिबन्धनत्वादित्यारम्भणाधिकरणादिषु परिहततया तन्न्यायेन प्रत्येकमखिलजगत्सृष्टिशक्ता अपि परमेश्वराः केवलं लीलया सम्भूय जगत्सृजन्तीति वक्तुं शक्यत्वादिति भावः ।।४५।।

ननु च "द्यावाभूमी जनयन् देव एक" इत्यादिकर्त्रैक्यश्रुतिविरुद्धं सृष्टिवाक्यानामनेककर्तृपरत्वमित्याशङ्क्याऽऽह-

कर्त्रैकत्वं वदन्ती कलयतु भणितिर्वारणेनाऽर्थवत्ता-
मेकैकस्यैव कर्तुर्बहुभवनमुखानीतभेदप्रसक्तेः ।
येन त्वं नेह नानाप्रभृतिमुपनिषद्भारतीं विप्रलब्धुं
निर्द्वैतब्रह्मचौर्यव्यसनमनुभवन्नीहसे साहसेन ।।४६।।

कर्त्रैक्यश्रुतिः ब्रह्मविष्णुरुद्राणां मध्ये एकैकस्यैव कर्तुः "तदैक्षत बहु स्यां प्रजायेये" त्यादिषु श्रुतैर्बहुभवनमुखैः उपस्थापिताया: भेदप्रसक्तेर्निवारणेनाऽर्थवती स्यात् । एवमेव हि त्वया निष्प्रपञ्चब्रह्मापलापव्यसनिना "नेह नानाऽस्ति किञ्चन" "एकधैवाऽनुद्रष्टव्यमि" त्यादिश्रुतीनां विष्णोरन्नमयादीनि रूपाणि शिरःपक्षपुच्छाद्य-

वयवाः ज्ञानानन्दादयो गुणाः सृष्टिसंहरणादिक्रियाः सर्वगतत्वादयो भावरूपधर्माः अदृश्यत्वादयश्चाऽभावरूपधर्माः विष्णोस्सकाशात् परस्परस्माद्भिद्यन्ते इति शङ्का-वारणेनाऽर्थवत्ता दर्शितेत्यर्थः ।।४६।।

प्रकारान्तरेणाऽपि कर्त्रैक्यश्रुतिनिर्वाहस्सम्भवतीत्याह-

यो यस्योपास्तियोगस्स्फुरति नियमतस्तस्य कर्ता स एवे-
त्यर्थं तं वा तदैक्यश्रुतिरनुवदतु श्रोतृधीभेदभिन्ने ।
क्लृप्तो यस्याऽल्पभूयोऽधिकगुणकपरोपास्तियोग्यत्वभाजा-
मात्मेत्येवेत्युपासाविधिरवधृतिमानित्थमर्थान् ब्रुवाणः ।।४७।।

ईश्वराणां मध्ये यदुपासने यस्य पुरुषस्याऽनादिर्योग्यता स एव जगत्कर्ता, नाऽन्य इति तस्य स्फुरतीति तत्तदधिकारिबुद्धिर्विषयं तमेवाऽर्थं तस्य तस्याऽधि-कारिणः श्रवणकर्तुर्बुद्धिभेदेन भिन्नं भिन्नं कर्त्रैक्यश्रुतिरनुवदति इत्येवं वा तन्निर्वा-होऽस्तु । न च श्रुतीनामनेकार्थत्वसंप्रतिपत्तावपि श्रोतृभेदेन भिन्नभिन्नार्थबोधकत्वं न संप्रतिपन्नमिति वाच्यम् । "आत्मेत्येवोपासीते"ति विधौ तव तत्संप्रतिपत्तेः ।

इत्थं हि त्व मतम्- ब्रह्मोपासनायां ह्यधिकारिणस्तावदुपास्यगुणभेदेन त्रिविधाः । सत्यज्ञानानन्दादिभिः अल्पैर्गुणैर्मर्त्याः । सम्भृतिद्युव्याप्त्यादिभिः सहितैः भूयोभिर्गुणैरिन्द्रादिदेवताः । अखिलैर्गुणैश्चतुर्मुखादयश्च । देवेषु मर्त्येषु च स्वस्ववि-मुक्त्यर्थोपासनीयगुणविशेषोपसंहारानुपसंहाराभ्यां गुणभूयस्त्वाल्पत्वावान्तरभेदैस्त्व-तिबहवोऽधिकारिणः सर्वान्प्रति तत्तद्योग्यगुणविशिष्टब्रह्मोपासनाभेदानां विधायक "मात्मेत्येवोपासीते"ति वाक्यम् । तत्र देवेषु मर्त्येषु च यस्य यावद्गुणोपासने योग्य-ता तं प्रति तावद्गुणविशिष्टं ब्रह्म आत्मशब्दो विधत्ते । एवकारस्तदयोग्यगुणव्यव-च्छेदकः चतुर्मुखादीन्प्रति सकलगुणविशिष्टं ब्रह्माऽभिधत्ते । एवकारस्तदयोग-व्यवच्छेदक इति ।

स्यादेतत्- युक्तमुपासनाविधिवाक्यस्य पुरुषभेदेन विरुद्धानेकार्थप्रतिपादक-त्वं, न तु वस्तुपरवाक्यस्योपासनावाक्यस्य तत्तत्पुरुषं प्रति तत्तद्योग्यगुणविशिष्टमेव

ब्रह्मोपासनीयं नाऽयोग्यगुणविशिष्टमिति बोधकत्वे हि न प्रामाण्यं हीयते । हीयते तु "सदेव सोम्येदमि"ति वस्तुपरवाक्यस्य तत्तत्पुरुषं प्रति शिव एव जगत्कर्ता नाऽन्य इत्यादिबोधकत्वे। पुरुषभेदेनाऽनुष्ठानवद्वस्तुस्वरूपस्य भेदासंभवादिति चेत्; मैवम्। त्वया पुराणेषु रामकृष्णाद्यवताररूपाणां भेदश्रवणं लौकिकैर्भ्रान्त्या गृहीतस्य भेदस्याऽनुवादकमिति "सर्वथाऽपि तु त एवोभयलिङ्गादि" त्यधिकरणे**ऽनुव्याख्यानन्यायसुधयो**रुक्तत्वेन तथैव कर्मैक्य- श्रुतेरप्यनुवादकत्वोपपत्तेः । न च वाच्यमवतारेषु तत्कालवर्तिनां लौकिकानां केषाञ्चिद्भेददृष्टिस्सम्भवति । अन्येषां च बहुत्वादिलिङ्गकानुमानाभासेनेति युक्तस्तस्याऽनुवादः । न तु जगत्कर्त्रैक्यस्य । तस्य श्रुतिं विना लोकतः प्रत्येतुमशक्यत्वादिति। त्वया पुरुषाणां योग्यतावन्माहात्म्यज्ञानपूर्वकस्नेहरूपा भक्तिरप्यनादिरिति "स्थानविशेषात्प्रकाशादिवत् अनुबन्धादिभ्यः" इत्यधिकरणयोरुक्तत्वेन शिवादिभक्त्यन्तर्गतस्य शिव एव जगत्कर्ता नाऽन्य इत्यादिरूपेण तत्तन्माहात्म्यज्ञानस्याऽप्यनादित्वसम्भवात् । त्वया सर्वेषां मतानामनादित्वस्योक्ततया तत्तन्मताहितमाहात्म्यज्ञानपरम्परानादित्वसम्भवाच्चेति भावः ।।४७।।

परसम्प्रतिपन्नश्रुत्युदाहरणेनाऽपि कर्त्रैक्यश्रुतेरसदर्थबोधकत्वं संभवतीत्याह-

पूर्णत्वं ते निमित्तं निरवधिगमनं भूमशब्दस्य वृत्तौ
वैकुण्ठे तद्गुणानां तदपि किल ततः तारतम्येन वेद्यम् ।
इत्थं वस्तुस्वभावं क्वचिदपि गणयन्बोध्यधीवृत्तिभेदा-
द्भेदस्स्यादस्तिवादी यदि तव भवति व्यंसकः काऽत्रचिन्ता ।।४८।।

"यो वै भूमा तत्सुखमि"ति श्रुतौ भूमशब्दस्तावत्तवाऽपि ब्रह्मपरः । तत्राऽयं तावत्त्वन्मते विशेषः- **"बहोर्लोपो भू च बहोः"** इति भावे निष्पन्नोऽपि भूमशब्दो "यो वै भूमा तदमृतमि"त्यादिषु धर्मिण्येव प्रयोगाद्धर्मिणि रूढः । तस्य च परब्रह्मणि धर्मिणि वैकुण्ठे प्रवृत्तौ निमित्तमवधिविशेषगणनानिरपेक्षपूर्णत्वं न त्वस्मादेवाऽयं पूर्ण इति प्रतियोगिविशेषापेक्षम् । प्रकरणोपपदादिसङ्कोचकाभावात्। नामवागाद्युत्तरोत्तरोकृष्टनिरूपणे चरमकक्ष्यापन्नत्वान्नाऽल्पे सुखमस्तीति निरुपपदेनाऽल्पपदेन सर्वस्याऽप्यल्पस्य प्रतियोगित्वेन निर्देशाच्च । तत्तु निरवधिकं पूर्णत्वं न

धर्मिण एव परममहत्त्वरूपम्; किन्तु तत्तद्गुणानामानन्दादीनां निरतिशयत्वरूपं "वाग्वाव नाम्नो भूयसी"त्यादौ वैपुल्यरहितेषु वाक्सङ्कल्पध्यानादिष्वपि तत्तत्प्रकरणे भूमशब्दसमानार्थकभूयशशब्ददर्शनेनाऽत्रापि तदैकरूप्याय गुणतो वैपुल्यस्यैव तदर्थतौचित्यात् । तच्च पूर्णत्वं सर्वेषामधिकारिणां नैकप्रकारेण श्रवणमननध्यानसाक्षात्कारेषु प्रतीयते, किन्तु तद्योग्यतानुसारिणा तारतम्येन । न च पूर्णत्वे तारतम्यासम्भवः । आनन्त्य इव तदुपपत्तेः । अस्ति हि पूर्वोत्तरकल्पापेक्षयाऽतीतक्षणेषु सतोरानन्त्ययोस्तारतम्यमिति । तदेतत्सर्वं "भूमा सम्प्रसादादध्युपदेशात्, भूम्नः क्रतुवज्ज्यायस्त्वम् ब्रह्मदृष्टिरुत्कर्षात् नानाशब्दादिभेदात्" इति त्वदीयाधिकरणेषु स्पष्टम् । तत्रेदमुच्यते- इयत्तापरिच्छेदराहित्यमात्ररूपं सम्भवति तारतम्यमानन्त्ये । न तु निरतिशयत्वसर्वोत्तमत्वसर्वोत्कृष्टत्वापरपर्यायतया तेष्वधिकरणेषु त्वयोद्घोषिते भूमशब्दब्रह्मशब्दयोः प्रवृत्तिनिमित्ततया त्वदभिमते ब्रह्मानन्दादीनां पूर्णत्वे निरतिशयत्वादिस्वरूपव्याघातात् । न हि ये तारतम्यशालिनस्ते निरतिशयास्सर्वोत्तमा इति च युज्यते । तेषु यस्य यदपेक्षया निकर्षः तस्य तेन सातिशयत्वस्योत्तमत्वस्य चाऽवर्जनीयत्वात् ।

यद्युच्येत- परमेश्वरस्याऽचिन्त्यशक्तिमहिम्ना तदानन्दादिविशेषाणां परस्परं तारतम्यवतामपि निरतिशयत्वादि सम्भवतीति । तदा परमेश्वराणामचिन्त्यशक्तिमहिम्ना परस्परं भिन्नानामप्येकत्वं सम्भवतीति किमिति वक्तुं न शक्यम्? । तस्मात्परब्रह्मानन्दैकदेशान्सातिशयत्वेन भूम्न एव भूमरूपतया तत्तदधिकारिणं प्रति भूमशब्दः प्रतिपादयतीति त्वया वक्तव्यम् ।

ननु सातिशयानामपि ब्रह्मनन्दैकदेशानां वागादीनां भूयस्त्ववत् भूमरूपत्वमुपपद्यत एव । भूमशब्दस्य तन्निरतिशयत्ववाचकतोक्तिस्त्वशेषविशेषसहितब्रह्मानन्ददर्शनयोग्याधिकारिविशेषमपेक्ष्येति कल्प्यत इति चेन्न । त्वन्मते तथाभूताधिकारिण एवाऽसिद्धेः । हिरण्यगर्भपर्यन्तास्सर्वेऽप्यधिकारिणो मुक्त्यनन्तरमपि ब्रह्मानन्दैकदेशस्यैव द्रष्टारः । नित्यमुक्ता श्रीरपि तथैवेत्यभिमतमोक्षनिरूपणप्रस्तावेऽ**नुव्याख्यानन्यायसुधयो**रुक्तत्वात् । त्वदीयान्प्रति ब्रह्मानन्दैकदेशबोधकस्य भूमशब्दस्य तन्निरतिशयत्वबोधकत्वभावे त्वदीयग्रन्थेषु निरतिशयत्वापरपर्यायं भूमत्वमित्या-

दिव्यवहारायोगाच्च । तस्माद्यस्याऽधिकारिणो यावद्दर्शने योग्यता तं प्रति तावन्तमेव सातिशयं ब्रह्मानन्दैकदेशं निरतिशयतया भूमशब्दः प्रतिपादयतीत्यकामेनाऽपि त्वया स्वीकरणीयम् । तथा च यदि क्वचिद्वेदस्तत्तद्वादिनः प्रति स्यादस्ति स्यान्नाऽस्तीत्यादिविरुद्धप्रकारान् वदन् क्षपणक इव वञ्चकस्स्यात् तदा तद्वदेव सृष्टिवाक्यानामपि शैववैष्णवादीन्प्रति विरुद्धनानाप्रकारबोधकत्वं संभवतीति तत्र तव विशिष्य का विचिकित्सेति भावः ।।४८।।

एवं नारायणस्यैव स्रष्टृत्वे विशेषवचनानि सन्ति नाऽन्येषमित्यङ्गीकृत्य तथाऽपि परमते विरोधाभावात् 'सदेवे' त्यादिवाक्यान्यनुमानातीततात्पर्याणि शिवविरिञ्चयोरपि स्रष्टृत्वपराणि स्युरित्यापादितम् । तदुपपादनार्थं च परमते सृष्टिवाक्यानामनेकस्रष्टृपरत्वे शब्दतोऽर्थतश्च विरोधाभाव उपपादितः । इदानीं शिवविरिञ्चयोरपि स्रष्टृत्वे विशेषवचनानि सन्तीति सुतरां तानि तत्प्रतिपादकानि स्युरित्याह-

किञ्च स्थाणुविरिञ्चयोरपि जगत्कर्तृत्वमावेदय-
न्नस्त्येव श्रुतिमस्तकेषु बहुधा वैशेषिको गीर्गणः ।
ऐकार्थ्यं सहते स सृष्टिवचसां नैव त्वदीये मते
तत्तन्नामपदप्रसिद्ध्यतिगतौ हेतुश्च नाऽस्त्येव ते ।।४९।

इति श्रीमदप्पयदीक्षितेन्द्रकृतिषु मध्वतन्त्रमुखमर्दने
तृतीयाधिकरणदूषणम् ।।

"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चाऽसच्छिव एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी।।"

"प्रजापतिर्वा इदमेक आसीत् । नाऽहरासीन्न रात्रिरासीत् । सोऽस्मिन्नन्धे तमसि प्रासर्पदि" त्यादीनि शिवविरिञ्चयोरपि जगन्मूलकर्तृत्वमावेदयन्ति विशेषवचनानि सन्त्येव । न च तेषु स्थितानि शिवप्रजापतिपदानि प्रसिद्धस्वस्वार्थादपनीय नारायण एव स्थापयितुं तत्तन्नामपदानां अन्यत्र योगसम्भवासम्भवादिविचारस्तव

युज्यते । त्वन्मते सृष्टिवाक्यानामनेकस्रष्टृपरत्वस्याऽविरुद्धतया प्रसिध्यतिक्रमायोगात्। विरुद्धे खलु तेषामनेकस्रष्टृपरत्वे तत्तत्सृष्टिवाक्यस्थसृष्टिप्रतिपादकानां पदानामेकस्रष्टृपरत्वावश्यंभावेन सावकाशनिरवकाशादिन्यायविचारः प्रवर्तनीयस्स्यात् । तस्मात् त्वन्मते सृष्टिवाक्यानामनुमानविशेषवचनानुसारेणाऽनेकस्रष्टृपरत्वं भवेदेवेति न पूर्वपक्षोपन्यस्तानुमानदूषणं युक्तमिति भावः ।।४९।।

इत्यप्पदीक्षितकृतौ कृतिनां मतेऽस्मिन्नानन्दतीर्थकृतशास्त्रमुखावमर्दे ।
एतत्तृतीयमधिकृत्य नयं प्रवृत्तं दोषप्रदर्शनमुपस्करणीयमार्यैः ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणंचणस्य
श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वतन्त्रमुखमर्दनव्याख्याने
मध्वमतविध्वंसने शास्त्रयोनित्वाधिकरणदूषणाख्यं तृतीयं प्रकरणम् ।।

स्यादेतत्- यदुक्तं विशेषवचनानुसारेण शिवविरिञ्चयोरपि सृष्टिवाक्यानि पर्यवस्यन्तीति तन्न युक्तम् । समन्वयसूत्रेण तदाङ्गानिराकरणात् । तत्र हि वेदेऽपि क्वचिक्वचित्पशुपतिहिरण्यगर्भादीनां जगत्कर्तृत्वं प्रतीयत इति पूर्वाधिकरणाक्षेपे सम्यग्विचारितादुपक्रमादितात्पर्यलिङ्गरूपादन्वयाद्विष्णुरेव जगत्कर्तृतया वेदप्रतिपाद्य इत्यतोऽन्यथाप्रतीतिरज्ञानमूलेति स्थापितमित्याशङ्कां निराचष्टे-

रोद्धा नोपक्रमादिश्रुतिषु नयगणस्त्वन्मतेऽर्थान्तराणां
रोद्धा चेत्कर्मकाण्डे कथमपि न भवेद्ब्रह्मनिष्ठा पदानाम् ।
किं चाऽत्रोपक्रमादावपि तव विसरेद्भूमशब्दस्य रीति-
र्यस्मात्सर्वस्तमेव श्रयति नयगणं स्वस्वसिद्धान्तसिद्ध्यै ।।५०।।

यद्यप्युपक्रमादयो विष्णौ व्यवस्थितास्स्युस्तथाऽपि ते श्रुतीनां विष्णुपरत्वावगमनमेव कुर्युः न तु शिवविरिञ्चिपरतानिवारणमपि । अनेकार्थसहिष्णोस्तव मते विरोधाभावेन शिवविरिञ्चिपरत्वस्याऽपि संभवात् । न हि प्रबलं प्रबलमित्येव दुर्ब-

लस्य बाधकम्, अपि तु सति विरोधे । यदि तूपक्रमादयो विरोधाभावेऽपि स्वानीततात्पर्यादर्थादर्थान्तरं स्वभावादेव वारयेयुस्तदा त्वन्मते कर्मकाण्डस्थपदानां ब्रह्मपरता न स्यात् । अभ्युपगतं च त्वया "श्येनेनाऽभिचरन् यजेते" त्यादिवाक्येषु श्येनादिपदानां "यथा वै श्येनो निपत्याऽऽदत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्याऽऽदत्त" इत्याद्युपसंहारप्राबल्यादिन्यायैः कर्मनामधेयत्वं प्रापितानामपि वसन्तादिवाक्येषु प्रदर्शितया रीत्या ब्रह्मपरत्वमपि ।

ननु श्रुतीनां शिवपरत्वे विरिञ्चपरत्वे च तदेकवाक्यतापन्नोपक्रमादीनां विष्णौ व्यवस्थितानामन्वयो न स्यादिति चेत्; मा भूत्। विष्णुपरत्व एव तेषामन्वयोऽस्तु। न हि त्वन्मते क्वचिदर्थे यावतामेकवाक्यता तावतामर्थान्तरेऽप्येकवाक्यतेति नियमोऽस्ति श्येनादिपदानां ब्रह्मपरत्वे प्रसिद्धश्येनसादृश्यप्रतिपादकवाक्यशेषान्वयाभावात् । न च वाक्यशेषस्याऽपि ब्रह्मपरत्वेन तदेकवाक्यता सम्भवतीति वाच्यम्। कर्मकाण्डस्थपदानां पदविधयैव ब्रह्मणि समन्वयो न वाक्यविधयेति त्वया "वाक्यान्वय" सूत्रे वर्णितत्वात् । वसन्तादिवाक्यस्थपदानामपि तथैव तत्समन्वयस्य प्रदर्शितत्वाच्च ।

नन्वेवं सति श्येनपदस्य गुणपरत्वमपि स्यात्, वाक्यशेषस्य कर्मनामत्व एवाऽन्वय इति वक्तुमशक्यत्वादिति चेत्; तदपि दूषणं तव मतेऽस्माभिरापाद्यमेव । अस्माकं त्वनेकार्थत्वानङ्गीकारादेव तन्न प्रसज्यते । अपि चोपक्रमादीनां विष्णौ व्यवस्थितत्वमप्यसिद्धम् । शैवादयोऽपि ह्युपक्रमादीनेवाऽवलम्ब्य श्रुतीनां शिवादिपरत्वं वर्णयन्ति । उपपादयन्ति चोपक्रमादीनां शिवादिविषयत्वं तद्गतपदशक्त्यादिप्रदर्शनेन ।

ननु शैवाश्शिव एवोपक्रमादयो न विष्णौ विरिञ्चे वेति वर्णयन्ति । एवं वैष्णवा वैरिञ्चाश्च परपक्षप्रतिक्षेपेण वदन्ति । न चैतानि मतानि परस्परविरुद्धानि सर्वाण्यपि ग्राह्याणि । अतोऽत्र बलाबलविचारावश्यम्भावाद्बलवद्भिर्न्यायैरुपक्रमादीनां विष्णौ व्यवस्थितत्वसिद्धिरिति चेत्; मैवम् । यथा भूमशब्दस्तवाऽशेषविशेषसहितब्रह्मानन्दवाचकोऽपि तत्तदधिकारिणं प्रति योग्यतानुसारेण किञ्चित्किञ्चिद्ब्रह्मा-

नन्दांशमेव बोधयति तथैव सृष्ट्यादिश्रुतयस्तदुपक्रमादयश्चाऽनेककर्तृपरा अपि तत्तद्योग्यतानुसारेणैकैकमेव कर्तारं बोधयन्ति । श्रुतिवाक्येभ्यस्तेषां कर्त्रन्तरबोधानुदयात्तु श्रुतिवाक्यानां कर्त्रन्तपरत्वाभावाभिमान इत्युपपत्तेः । तस्मादुपक्रमादिबलान्न सृष्टिवाक्यानां विष्णौ व्यवस्थितत्वसिद्धिरिति भावः ।।५०।।

ननु तन्मतस्थानामभिमानमात्रं यथाकथंचिदुपपद्यतां नाम । शैववैष्णववैरिञ्चपुराणागमेषु शिवादीनां परस्परसृज्यत्वसंहार्यत्वाराधकत्वादिना भूयसी निकर्षोक्तिर्दृश्यमाना सर्वेषां समानकक्षतया जगत्कर्तृत्वेऽनुपपन्ना बलाबलविचारमन्तरेण न व्यवतिष्ठते । तद्विचारे वैष्णवपुराणागमानां बलवत्वात्तदनुसारेणोपक्रमादिसहितानां सृष्टिस्थित्यादीनां विष्णौ व्यवस्थितत्वं सिध्येदित्याशङ्क्याऽऽह-

स्फारात्तत्तत्पुराणागमवचनशतप्रापिता याऽन्यनिन्दा
तत्तद्भक्त्यादिसिध्यै भुवनविरचने सा भवेद्द्वारमात्रम् ।
कर्मानुष्ठापनार्थं किमु निरतिशयां ब्रह्मसंस्थादिनिन्दा-
मापस्तम्बादिवाक्ये न कलयसि ततः काऽस्य हानिस्तवेष्टा ।।५१।।

इति श्रीमदप्पयदीक्षितेन्द्रकृतिषु मध्वतन्त्रमुखमर्दने
चतुर्थं प्रकरणम् ।।

परस्परनिन्दावचनानि "नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु स्तुत्यं स्तोतु"मिति न्यायेनोदितानुदितहोमनिन्दादिषु दृष्टेन तत्तद्देवताविषयनिश्चलभक्तिसिद्धिप्रयोजने स्तुतिविरचने द्वारमात्रत्वेनोपपन्नानि । दृश्यते **ह्यापस्तम्बसूत्रे** "अथाऽप्युदाहरन्ती"त्यारभ्य "तस्माच्छ्रुतितः प्रत्यक्षबलत्वाच्च विशिष्टानाश्रयमानेतानेके ब्रुवत" इत्यन्तेन गार्हस्थ्यस्य निकर्षमूर्ध्वरेतसामाश्रमाणामुत्कर्षञ्च केषाञ्चिन्मतत्वेनोपन्यस्य "त्रैविद्यवृद्धानान्तु वेदाः प्रमाणमिति निष्ठा । तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसम्बद्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्धाचारोऽप्रमाणमिति मन्यन्ते" इति दर्शपूर्णमासादिकर्मानुष्ठानरहितोर्ध्वरेतसामाचारो वेदविरुद्धत्वादनाचार एवेति सकलत्रैविद्यवृद्धसम्मतत्वेन स्वमतप्रदर्शनम् । तत्र कर्माण्यनुतिष्ठतामेव

ब्रह्मलोकावाप्तिराश्रमान्तरं प्रशंसतामपि महान् प्रत्यवाय इत्यत्र सम्मतिवचनोदाहरणञ्च ।

"अथाऽपिप्रजापतेर्वचनम्-
त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो वेदमनुप्रदानम् ।
य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन्"इति ।

तथा **महाभारतेऽपि शान्तिपर्वणि** ज्ञातिवधनिर्वेदात्सन्यासोद्युक्तं युधिष्ठिरं प्रति तद्भ्रातॄणां महर्षीणां भगवतः श्रीकृष्णस्य च वचनेषु भूयसी सन्यासनिन्दा दृश्यते । एवं सत्यपि सन्यासादेराश्रमान्तरस्य ततो न काचन हानिस्तवाऽभिमता, प्रत्युत सन्यासस्य गार्हस्थ्यादुत्कर्ष एव त्वया "कृत्स्नभावात्तु गृहिणोपसंहार" इत्यधिकरणे समर्थितः, तत्र हि गृहस्थाश्रमः सन्यासादुत्कृष्टः ।

छान्दोग्योपनिषदि "कुटुम्बे शुचौ देशे स्वाध्यायमधीयान" इति गृहस्थाश्रममुपक्रम्य "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते । न च पुनरावर्तत" इति तन्मोक्षमुक्त्वोपसंहारात् । उपसंहारत्वेन च तत्र तात्पर्यावगमादिति पूर्वपक्षं कृत्वा सन्न्यास एव गार्हस्थ्यादधिकः । तन्मोक्षस्य गृहस्थमोक्षादधिककालसाध्यत्वेन तदतिशायित्वात् । गृहिणोपसंहारस्तु देवविषयो न मानुषविषयः । "कृत्स्ना ह्येव गृहिणो देवाः, कृत्स्ना ह्येते यतयः" इति पौत्रायणश्रुतौ "देवा एव ब्रह्मचारिणो देवा गृहस्था देवा वनस्था यथा ह्येते मुनयः एवं सर्ववर्णाः सर्वाश्रमाः सर्वे ह्येते कर्म कुर्वन्ती"ति कौण्ठख्यश्रुतौ च सर्ववर्णाश्रमाचारवत्तयोक्तानां देवानां गृहस्थानां सतामपि मनुष्यसन्यासिभ्योऽधिकत्वादिति सिद्धान्तितम् ।

न चाऽऽ**पस्तम्बादि**वचनान्यपि मनुष्यसन्यासिभ्यो देवोत्कर्षविषयाणि भवन्त्विति वाच्यम् । तैर्विरुद्धाचारोऽप्रमाणमित्या**पस्तम्बेन** सन्यासादेरनाचारत्वस्यैवोक्तत्वात् । कर्मानुष्ठानपुत्रदारादिपोषणव्यग्राणां गृहस्थानाममृतत्वं न सम्भवतीति सन्यासाद्युत्कर्षवाद्युक्तगार्हस्थ्यनिकर्षहेतूद्धारसमये "अथाऽप्यस्य प्रजातिममृतमाम्नायाऽऽह-" प्रजामनुप्राजयसे तदुते मर्त्यामृतमिति । अथाऽपि स एवाऽयं विरूढः ।

प्रत्यक्षेणोपलभ्यते दृश्यते चाऽपि सारूप्यन् देहत्वमेवाऽन्य"दिति श्रुतियुक्तिभ्यां गृहस्थानां पुत्रपौत्रादिरूपेणैवाऽमृतत्वव्यवस्थापनेन गार्हस्थ्योत्कर्षप्रतिपादनस्य मानुषगृहस्थविषयत्वस्फुटीकरणाच्च । न हि त्वन्मते देवानां पुत्रपौत्रादिरूपेणाऽमृतत्वं सम्भावनीयम् । त्वया 'न देवपदवी प्राप्ता ब्रह्मदर्शनवर्जिता' इति सर्वेषां देवानां ब्रह्मसाक्षात्कारवत्त्वस्य स्वीकृतत्वेन तेषां मोक्षरूपामृतत्वस्यैव सम्भवात् ।

महाभारतेऽपि-

पन्थानं पावनं हित्वा जनकं मौढ्यमास्थितम् ।
तं ददर्श प्रिया भार्या भैक्षवृत्तिमकिञ्चनम् ।।

इत्यादिवैदेहसन्यासनिन्दादिषु मनुष्यगार्हस्थ्यस्यैवोत्कर्षप्रतिपादनं स्पष्टमेव । तस्मान्मनुष्यलोके कर्माण्यनुष्ठापयितुं कल्पसूत्रं कृतवताऽऽ**पस्तम्बेन** कर्मप्ररोचनार्थं सन्यासाद्याश्रमं अनाचारत्वेन "बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम् । बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेते"ति ज्ञानसाध्यामृतत्वफलं मिथ्यात्वेन च दूषयित्वा गृहस्थानामेव स्वर्गोऽमृतत्वं चेति वर्णितम् । **महाभारते** च-

अथैककालिको वाऽहमेकैकस्मिन्दिनक्षये ।
चरन् भैक्षं मुनिर्मुण्डः क्षपयिष्ये कलेवरम् ।।

इत्युक्तवन्तं युधिष्ठिरं सन्यासोद्योगान्निवर्तयितुकामैस्तद्भ्रात्रादिभिर्गार्हस्थ्यप्ररोचनार्थं सन्यासं दूषयित्वा गार्हस्थ्यस्योत्कर्षो वर्णितः इत्येव गतिर्वक्तव्या ।

एवं पुराणागमेषु तत्तद्देवताराधनोपासनाद्यनुष्ठापनार्थं प्रवृत्तेषु तत्प्ररोचनार्थं देवान्तरनिकर्षो वर्णित इति किन्न सङ्गच्छते? । अङ्गीकृतञ्च त्वयाऽपि "द्वेषाच्चैद्यादयो नृपाः" इत्यादौ भगवतः कृपालुत्वातिशयतात्पर्येण द्वेषान्मुक्तिवर्णनं, न तु नरकसाधनेन भगवद्द्वेषेण मुक्तिरस्तीति वदता पुराणेष्वन्यार्थतात्पर्येणाऽसदर्थकथनम्। तत्र दृष्टान्तोऽप्यनुव्याख्याने दर्शितः-

यथा क्रुद्धः पिता पुत्रं मरेत्याक्षेपपूर्वकम् ।
प्रोक्तस्स्याद्यस्य कृत्यर्थं वदत्येवं पुराणगम् ।। इति ।

एवमेव ब्रह्मादिषु परस्परनिकर्षवचनानामपि अन्यपरतोपपत्तेः न तत्र बलाबलविचारापेक्षेति भावः ।

पुराणानां बलाबलविचारेऽपि परस्य न प्रत्याशेति उपपादितमस्माभिः **शिवतत्वविवेके** । यत्तु **शिवतत्वविवेके-**

क्वचिद्ब्रह्मा क्वचिद्विष्णुः क्वचिद्रुद्रः प्रशंस्यते ।
नाऽनेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ।।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः ।
पुराणानि प्रणीतानि विद्वांस्तत्र न मुह्यति ।।

इत्यादिवचनान्युदाहृत्य पुराणेषु त्रयाणां परस्परोत्कर्षापकर्षवचनानि कल्पभेदेन व्यवस्थितानि प्रतीतार्थपराण्येवेत्युक्तम् । तद्वस्तुगतिमनुरुध्योक्तम् । इह तु परमते त्रयोऽप्यनादयो विश्वकर्तारः स्युरित्यापादननिर्वाहाय पुराणेषु परस्परसृज्यत्वादिवचनान्यप्यर्थवादास्स्युरित्यापादितमिति न विरोधः । एतेन श्रुतिष्वपि त्रयाणां परस्परनिकर्षवचनानि दत्तोत्तराणि । दृश्यन्ते हि श्रुतिष्वप्याश्रमान्तरनिन्दावचनानि-

किन्नु मलं किमजिनं किमु श्मश्रूणि किं तपः ।
पुत्रं ब्रह्माण इच्छध्वं स वै लोकेऽवदावदः ।।
नाऽपुत्रस्य लोकोऽस्ति तत्सर्वे पशवो विदुः ।
तस्मान्नु पुत्रो मातरं स्वसारं चाऽधिरोहति ।।

इत्यादीनि । एवमेव तान्यप्युपपद्यन्त इत्यलमतिविस्तरेण ।। ५१।।

इत्यप्पदीक्षितकृतौ मध्वशास्त्रमुखार्दने ।
दृष्ट्वा सन्तोऽनुगृह्णन्तु चतुर्थनयदूषणम् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणचणस्य
श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वतन्त्रमुखमर्दनव्याख्याने
मध्वमतविध्वंसने समन्वयाधिकरणदूषणाख्यं चतुर्थं प्रकरणम् ।।

एवमुपक्रमादिलिङ्गैः पुराणाद्युपबृंहणैश्च सृष्ट्यादिश्रुतीनां विष्णौ व्यवस्थित्वसिद्धिरिति दर्शितम् । इदानीं परमतेऽपि विष्णुपरत्वमेव तासां कथञ्चिदपि न सिध्येदिति दर्शयितुमीक्षत्यधिकरणव्यवस्थापनीयत्वेन पराभिमतं ब्रह्मणो वाच्यत्वं दूषयति-

न ध्येयं ब्रह्म 'नेदं यदिद' मिति गिरा ह्यभ्युपेतं त्वयाऽतो
ध्येयार्थानां श्रुतीनां क्वचिदपि न च तद्वात्यमित्यभ्युपेयम् ।
नो चेन्न ध्येयमेतत्कथमिव भवति स्यादवार्यैव शङ्का
यद्वा चेति श्रुतिश्च क्षिपति तदसनायैव वाच्यत्वमस्य ।।५२।।

त्वया तावदत्यन्तमेवाऽव्यक्तं ब्रह्मेत्यभ्युपगम्य तस्य तदव्यक्तत्वामाक्षेपसमाधानाभ्यां स्थापितम् "तथान्यत्प्रतिषेधादि"त्यधिकरणे । तदित्थम्-यदुक्तं "तदव्यक्तमाह ही" त्यधिकरणे नित्याव्यक्तं ब्रह्मेति तदयुक्तम् । उपासकानां हृदयेष्वाविर्भूयोपासनाकाले तस्य स्फुरणात् । न हि परमात्मनोऽन्यदुपास्यम् । तदन्योपासनेन मुक्त्ययोगात् । न चोपासनाकाले तत्तद्धृदयस्थिततया प्रतीतस्य ब्रह्मत्वेन तत्तदुपासकबहुत्वेन तत्तद्बहुत्वापत्तिर्दोषः । स्वरूपभेदाभावेऽपि ब्रह्मरूपाणां विशेषबलेन नानात्वोपपत्तेरिति पूर्वपक्षे राद्धान्तः- यदा जीवानन्दादेरन्यद्ब्रह्म तथोपासनाकाले प्रतीतादपि "यन्मनसा न मनुते येनाऽहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुतौ ब्रह्मण उपास्यत्वप्रतिषेधात् । जीवानन्दादिषु अल्पत्वस्येवोपासनाकाले प्रतीतेऽपि व्यक्तत्वादेर्भेदहेतोस्सत्त्वाच्च । तस्मादुपासकानां हृदयेषु ब्रह्मणः प्रतिबिम्बविशेष एवोपासनालम्बनम् । तदुपसनयैव च प्रतिमोपासनयेव तद्गतं ब्रह्म प्रसन्नं सदव्यक्तमप्यचिन्त्यापरिमितस्वशक्तिबलादपरोक्षीभवतीति युक्तम् ।

तथैव ब्रह्मतर्कवचनम्-

पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम् ।
ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रदम् ।।
तदुपासनं च भवति प्रतिमोपासनं यथा ।
दृश्यते त्वापरोक्ष्येण ज्ञानेनैव परं पदम् ।। इति ।

तस्माद्युक्तमव्यक्तत्वं ब्रह्मण इति । एवमनुपास्यं ब्रह्मेत्यङ्गीकुर्वता त्वयोपासनाविधिप्रकरणेषूपास्यसमर्पकाणां श्रुतिवचनानां तद्वाच्यं न भवतीत्यप्यङ्गीकरणीयम् । तद्वाच्यत्वाङ्गीकारे कथं तदनुपास्यमिति शङ्काया अनिवार्यत्वात् । न हि सम्भवत्युपासनाविधिषूपास्यसमर्पकैः पदैःब्रह्मोपास्यतया विधीयते उपास्यं च न भवतीति। एतच्छङ्कानिरसनायैव हि "यन्मनसा न मनुत" इति मन्त्रसन्निधावाम्नायमानं-

"यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदसुपासते"

इति मन्त्रान्तरं ब्रह्मणो वाच्यत्वं प्रतिक्षिपति । तेन हि सर्ववागविषयभूतं ब्रह्मोपासनाविधिप्रकरणेषु "सर्वं खल्विदं ब्रह्मे" त्यादिवाक्यश्रुतानां उपास्यसमर्पकाणां ब्रह्मादिपदानामप्यर्थो न भवतीति प्रदर्शनेनैषा शङ्का निरस्ता भवतीति । तस्मादवाच्यमिति त्वयाऽभ्युपगन्तव्यम् । अनुपास्यं त्वदीयं ब्रह्म सृष्ट्यादिवाक्यस्थब्रह्मात्मनारायणादि पदानामपि वाच्यं न भवेदिति न तस्य जगत्कर्तृतादिसिद्धिरिति भावः।।५२।।

नन्वेतावता ध्यानविधिवाक्येषु ध्येयसमर्पकाणां पदानां ब्रह्म प्रतिपाद्यं न भवतीत्यापतितम्, न तु सृष्टिवाक्येषु स्रष्टृसमर्पकाणामपि तेषां तत्प्रतिपाद्यं न भवतीति । उपास्यसंमर्पकपदाप्रतिपाद्यत्वमात्रेण तस्याऽनुपास्यत्वनिर्वाहात् । तन्निर्वहणाय प्रवृत्तस्य "यद्वाचे" ति मन्त्रस्याऽपि तावन्मात्रविषयत्वोपपत्तेः । न च वाच्यमुपासनाविधिषूपास्यसमर्पकाणि यानि ब्रह्मनारायणादिपदानि तान्येव सृष्टिवाक्येषु स्रष्टृसमर्पकाणि । अतस्तेषां ब्रह्म क्वचिद्वाच्यं न भवतीति निर्णयेऽन्यत्राऽपि तद्वांच्य न स्यादिति । प्रसिध्यनुसारेण विष्ण्वाख्यस्य ब्रह्मणस्तद्वाच्यत्वेऽपि उपासनाविधिषु तेषामनुपपत्त्या वाच्यार्थमपहाय तत्प्रतिबिम्बलक्षकत्वोपपत्तेरित्याशङ्क्याऽऽह-

ध्येयार्था एव वाच्यास्तव निगमगिरस्त्स्रष्टृतादीन्वदन्त्य-
स्त्वं हि ध्यानैकनिष्ठां गुणगणभणितिं ब्रह्मणो वक्ष्यशेषाम् ।

तत्तासां ब्रह्मणस्स्यात्प्रतिफलनभिदा काऽपि वाच्या मते ते
यद्वाचेत्येवमाद्यैः कतिपयवचनैर्ब्रह्म शुद्धं तु लक्ष्यम् ।।५३।।

इति श्रीमदप्पयदीक्षितेन्द्रकृतिषु मध्वतन्त्रमुखमर्दने
पञ्चमाधिकरणदूषणम् ।।

त्वन्मते स्रष्टृत्वादिप्रतिपादकान्यप्युपास्यसमर्पकाण्येव वाक्यानि । त्वया सर्वत्राऽपि ब्रह्मगुणवर्णनं उपासनार्थमेवे "त्याध्यानाय प्रयोजनान्तराभावादि" त्यधिकरणे व्यवस्थापितत्वात् । तत्र हि सद्विद्याभूमविद्यादहरविद्यावैश्वानरविद्यादिषु सर्वासु विद्यासु ब्रह्मगुणवर्णनं सर्वविधोक्तगुणोपसंहारेणोपसना कर्तव्येत्यत्र प्रमाणम्। अन्यथा वैयर्थ्यादित्युपसंहाराधिकरणोक्तमयुक्तम् । तासु ब्रह्मगुणवर्णनस्य तत्तद्गुणकश्रवणद्वारा जनलोकादिफलविशेषार्थत्वोपपत्तेः । उपासनार्थश्चेत्सर्वगुणानामेकत्रैवोक्तिप्रसङ्गेन प्रकरणभेदायोगादित्याक्षिप्य समाहितम्- सर्वास्वपि ब्रह्मगुणवर्णनस्योपासनार्थतया निःश्रेयसरूपमहाफलप्रयोजनं चेत्सम्भवति जनलोकादिक्षुद्रफलप्रयोजनत्वायोगात्,

"गुणास्सर्वेऽपि वेत्तव्या ध्यातव्याश्चैव सर्वशः ।
नाऽन्यत्प्रयोजनं मुख्यं गुणानां कथने भवेत् ।।"

इति ब्रह्मतन्त्रवचनात् । विप्रकीर्णान्ब्रह्मगुणान्यत्नेनोपसंहृत्योपासीनस्य तदनुसारेण मुक्तावानन्दातिशयो भवेदिति तद्दौर्लभ्याय बहुषु प्रकरणेषु विप्रकीर्णतया गुणवर्णनोपपत्तेश्च सर्वमपि ब्रह्मगुणवर्णनमाध्यानार्थमेवेति सर्वविद्योक्तगुणोपसंहारः कर्तव्य इति निरूपितम् । तस्मात् स्रष्टृत्वादिप्रतिपादकानां श्रुतिपुराणेतिहासागमादीनां सर्वेषामप्युपास्यत्वेन त्वदभिमते ब्रह्मप्रतिबिम्बविशेष एव पर्यवासानं स्यादिति तत्रैव वाक्यशेषादिभिः यूपाहवनीयादिन्यायेन ग्राह्यव्युत्पत्तिकानां ब्रह्मनारायणादिपदानां शक्तिस्स्यात् । अन्येषां वादिनां साक्षाद्ब्रह्मण्येव ब्रह्मनारायणादिपदानां शक्तिरित्यभ्युपगमस्य तदेव सृष्टिवाक्यादिप्रतिपाद्यमिति भ्रममूलत्वेन भ्रान्तित्वोपपत्तेः ।

न चैवं सति "तदेव ब्रह्म त्वं विद्धि" इत्यादिष्वपि ब्रह्मपदादीनां बिम्बभूतब्रह्मविषयत्वाभावापातः। प्रतिबिम्बवाचिनां तेषां लक्षणया तत्र ब्रह्मविषयत्वोपपत्तेः। न च तत्र वैपरीत्यं शङ्कनीयम् । बिम्बविषयाणि ब्रह्मादिपदानि मुख्यानि । प्रतिबिम्बविषयाणि लक्षकाणीति प्रायस्सर्वेषां श्रुतिपुराणादीनामुपास्यस्रष्टृत्वपालकत्वसंहर्तृत्वान्तर्यामित्वशौर्यौदार्यादिगुणवर्णनपरतया प्रतिबिम्बविषयत्वावश्यंभावेन तेषां भूयसां लक्षकत्वकल्पनाया अयुक्तत्वात् । "यन्मनसा न मनुते" "यतो वाचो निवर्तन्ते" "एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत" इत्यादीनां त्वदभिमतवीक्षणीयबिम्बभूतब्रह्मविषयाणां कतिपयवचनानामेव लक्षकत्वकल्पनस्योचितत्वात् । तस्मादित्थमत्र तव मतं पर्यवस्येत्- वाङ्मनसपथातीतं नित्याव्यक्तमुपासनानन्तरं मुच्यमानानां मुक्तानां च साक्षात्कारस्यैव विषयभूतं परं ब्रह्म "तदेव ब्रह्मत्वं विद्धि" इत्यादिभिश्च कैश्चिदेव वचनैर्लक्षणया प्रतिपाद्यम् । तस्य ब्रह्मप्रतिबिम्बविशेषस्तु जीववदनादिः कर्तृत्वादिमानुपासकहृदयेषूपास्यरूपेणाऽभिव्यक्तिशाली सृष्टिश्रुत्यादिभिस्तदनुसारिपुराणादिभिश्च शक्त्या प्रतिपाद्यत इति ।

एवं च यद्यपि त्वदन्ये सगुणब्रह्मवादिनः स्वस्वाभिमतब्रह्मणि सृष्टिश्रुत्यादीनामुपक्रमादिकं योजयेयुः, तथाऽपि त्वन्मते तासां स्वोपक्रमादीनां स्वोपबृंहणानां त्वदभिमतब्रह्मप्रतिबिम्बमेव वाच्यं वक्तव्यमासीदिति ब्रह्मणि तव तद्योजनमत्यन्तनिरालम्बनमेवेति भावः ।।५३।।

मध्वशास्त्रमुखमर्दने मनागप्पदीक्षितकृताविदं बुधाः ।
पश्यत प्रणयवश्यचेतसः पञ्चमाधिकरणस्य दूषणम् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणचणस्य
श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वतन्त्रमुखमर्दनव्याख्याने
मध्वमतविध्वंसने ईक्षत्यधिकरणदूषणं नाम पञ्चमं प्रकरणम् ।।

एवं परमतमर्यादयैव तदीयपञ्चाधिकरणीदूषणं प्रतिज्ञातं निर्व्यूढमित्युपसंहरन्ननेनैव दूषणेनाऽग्रिमाधिकरणानामपि दुष्टत्वान्न पृथग्दूषणमिह क्रियत इत्याशयेनाऽऽह-

इत्थं त्वत्क्लृप्तयैव प्रतिहतिमयति न्यायमर्यादया ते
शास्त्रस्याऽप्यन्तरङ्गे मुखनयनिकटे दूषणीयं किमग्रे ?
तेनैवाऽग्रे नया हि स्फुटमतिशिथिलास्ते यदि स्युस्समर्थाः
त्वद्दृश्यैर्वेदवाक्यैर्जहिहि जड ! तदा न्यायचिन्तां दुरन्ताम् । ।५४।।

त्वया हि पञ्चाधिकरण्यनन्तरस्य प्रथमाध्यायशेषस्य प्रवृत्तिरित्थमुपपादिता "तत्तु समन्वयादि"ति विष्णोश्शास्त्रगम्यत्वेनोपक्रमादितात्पर्यलिङ्गसमन्वयस्सिद्धवदुपन्यस्तः। न तु तत्रोपक्रमादिर्विष्णावेव व्यवस्थित इति न्यायैः स्थापितम् । तद्यावत् तत्तद्वाक्यविशेषानुदाहृत्य पूर्वोत्तरपक्षग्रथनेन समन्वयो न प्रपञ्च्यते तावदयमनुपन्यस्तप्राय एव । अन्यथा शैवादयोऽपि समत्वादित्सेन सिद्धवद्धेतुमुपन्यस्य शिवादीनां शास्त्रगम्यत्वं प्रसाधयेयुः । अतस्समन्वयविभागेन तत्प्रपञ्चनार्थमध्यायशेष आरभ्यत इति तत्रोपरितनेषु सर्वेवधिकरणेषु विष्णौ समन्वयप्रपञ्चनरूपस्सिद्धान्तः सृष्ट्यादिप्रतिपादवाक्यरूपशास्त्रप्रतिपाद्यत्वं विष्णोर्न सम्भवतीति पञ्चमाधिकरणदूषणेन ग्रस्तौ नोन्मज्जनमर्हतीति स्पष्टमेव । तत्तद्वाक्यानां तत्तदधिकरणपूर्वपक्षोपपादितदेवतान्तरपरत्वस्य निराकरणमप्यनुपपन्नम् । विष्णौ समन्वितानामपि तत्तद्वाक्यानां तृतीयचतुर्थाधिकरणदूषणोक्तरीत्या देवतान्तरपरत्वस्याऽपि सम्भवादित्यपि स्पष्टमेव ।

यद्यपि तत्तदधिकरणविषयवाक्येषूपक्रमोपसंहारादिगतानां विष्णुविषयश्रुतिलिङ्गानां निरवकाशत्वेन प्राबल्यं, देवतान्तरविषयश्रुतिलङ्गानां विद्वद्रूढ्या महायोगेन प्रवृत्तिनिमित्ततादधीन्येन तत्तदन्तर्यामिगतत्वेन च विष्णौ सावकाशत्वेन दौर्बल्यं च तत्तदधिकरणेषु त्वयोपपादितम्, देवतान्तरविषयश्रुतीनां विद्वद्रूढ्यादिभिर्विष्णौ परं मुख्यतया प्राबल्यं प्रसिद्धार्थेष्वज्ञरूढ्या केवलयोगेन प्रवृत्तिनिमित्ताश्रयत्वेन च मुख्यमात्रतया दौर्बल्यं चोपपादितम्, तथाऽपि न प्रबलं प्रबलमित्येव बाधकं दुर्ब-

लस्य । दुर्बलमात्रस्याऽनुज्ञीवनप्रसङ्गात् । किन्तु सति विरोधे । न च त्वन्मते श्रुतिवाक्यानामनेकार्थत्वे विरोधोऽस्तीत्यसकृदावेदितं न प्रस्मर्तव्यम् ।

अपि च विद्वद्रूढ्यादयस्तव विष्णौ कुतो व्यवस्थितास्सिद्धाः? येन देवतान्तरविषयश्रुतिलिङ्गानां विष्णौ सावकाशत्वेन प्रसिद्धेषु स्वस्वार्थेषु परममुख्यत्वाभावेन च दौर्बल्यं भवेत् । विष्णुरेव जगत्कर्तृ परं ब्रह्मेति सावधारणनिश्चयाधीना हि तत्तद्व्यवस्थितत्वसिद्धिः । अन्यथा विरिञ्च एव विद्वद्रूढ्यादय इति वक्तारं को वारयेत् ?

तथा हि- "आनन्दमयोऽभ्यासादि" त्यधिकरणे जगत्कर्तृत्वादिना प्रतिपादितोऽन्नमयादिर्विष्णुरेवेति साध्ये ब्रह्मशब्दाभ्यासं हेतूकृत्य ब्रह्मशब्दस्य यद्यप्यन्यत्राऽपि रूढिरस्ति तथाऽपि तस्य विष्णौ "तदेव ब्रह्म परमं कवीनां" इति श्रुत्युपदर्शितविद्वद्रूढिः प्रबलेति निर्णयहेतुरिति त्वयोक्तम् । तत्र तदेव ब्रह्मेति श्रुतिः विष्ण्वेकपरेति कुतोऽवसेया? "यमन्तस्समुद्रे कवयो वदीन्ती"ति प्रसिद्धतालिङ्गादिति चेत्, न; "प्रजापतिश्चरति गर्भे अन्तः" "हिरण्यगर्भ इत्यष्टवि"ति प्रजापतिहिरण्यगर्भश्रुतिभ्यां विरिञ्चैकपरता कुतो नाऽवसेया? कुतश्च "हिरण्यगर्भ इत्यष्टावि" त्यनेन गृहीतात् "य ईशे अस्य द्विपदश्चतुष्पद" इति पशुपतित्वलिङ्गात् "पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमही"त्याद्युपसंहाराच्च सा शिवैकपरा नाऽवसेया? । तस्मादेतादृशवियवाक्येषु नानादेवत्यश्रुतिलिङ्गानां बलाबलविवेचनेन व्यवस्थितैकदेवतापरत्वमन्यैर्व्यवस्थापनीयम् । त्वया तु सर्वश्रुतिलिङ्गानुग्रहलाभाय तावद्देवतापरत्वमेवोपगन्तव्यम् । श्रुत्यार्थानैकान्त्यवादिनस्तव तत्तद्देवताविषयश्रुतिलिङ्गानां मुख्यार्थमपि परिगृह्य सर्वविषयत्वाङ्गीकारसम्भवे किञ्चिदनुरोधेन कस्यचित्प्रसिद्धार्थपरित्यागायोगात् ।

ननु तथा सति तत्तद्विषयवाक्यगतब्रह्मशब्दानामप्यनेकार्थत्वस्य वक्तव्यतया "तदेव ब्रह्म परमं कवीनामि" त्यवधारणां न घटत इति चेत्, न; तस्य त्वन्मते भूमशब्दरीत्या पुरुषभेदेन व्यवस्थितार्थबोधकत्वसम्भवात् ।

ननु कथमिह प्रजापतिरपि ब्रह्मशब्दार्थस्स्यात्? "ते ये शतं प्रजापतेरानन्दाः। स एको ब्रह्मण आनन्दः" इति ब्रह्मप्रजापत्योरानन्दोत्कर्षापकर्षश्रवणादिति चेत्- न; "ब्रह्मपुच्छं प्रतिष्ठे"ति ब्रह्मानन्दयोरवयवावयित्वश्रवणेऽपि आनन्दमयस्येव प्रजापतेरपि ब्रह्मत्वोपपत्तेः । त्वया ब्रह्मानन्द एव तारतम्यवदत्यन्तविशेषवत्वस्याऽङ्गीकृतत्वेन एकस्मिन्नुत्कृष्टापकृष्टानन्दवत्वं न संभवतीति वक्तुमश्कयत्वाच्च । "अन्योऽन्तर आत्मा प्रणमय" इत्यादिसाक्षाद्भेदश्रवणमविगणय्याऽन्नमयादीनामभेदमङ्गीकुर्वतस्तव भेदकश्रवणस्याऽत्यन्तमविगणनीयत्वाच्च ।

एतेनाऽग्रिमाधिकरणविषयवाक्येष्वपि तत्तत्प्रतिपाद्यत्वेन पूर्वपक्ष्यभिमतदेवतातो भेदव्यपदेशेन भेदकव्यपदेशेन वा तस्य तस्य विषयवाक्यस्य तत्तद्देवतापरत्वनिराकरणमपि प्रत्याख्यातम् । त्वन्मतेऽन्नमयादिष्विव ब्रह्मानन्दमययोरिव च भेदाभेदकव्यपदेशयोरुपपन्नतया तत्तद्देवताविषयप्रसिद्धश्रुतिलिङ्गादिस्वारस्यानुरोधेन तस्य तस्य विषयवाक्यस्य पूर्वपक्ष्यभिमततत्तद्देवतापरत्वस्याऽप्यनिवार्यत्वात् ।

अन्यश्चाऽयमग्रिमाधिकरणानां विष्णावेव तत्तद्विषयवाक्यसमन्वय इत्यस्यार्थस्य व्यवस्थापकानां निराकरणसंक्षेपः- प्रायस्सर्वेष्वपि तेष्वधिकरणेषु साधारणेन ब्रह्मलिङ्गादिना विष्णुपरत्वनिर्णयः पूर्वपक्ष्यभिमततत्तद्देवताविषयश्रुतिलिङ्गानां प्रवृत्तिनिमित्ततादधीन्यादिभिः सावकाशत्वेन निराकरणमिति । दृश्यते च यथा "आकाशस्तल्लिङ्गादि"त्यधिकरणे "अस्य लोकस्य का गतिरित्याकाश इति होवाचे" त्यादिविषयवाक्यस्य "स एव परो वरीयानुद्गीथः स एषोऽनन्त" इत्यादिवाक्यशेषश्रुतपरोवरीयस्त्वादिसाधारणब्रह्मलिङ्गेन विष्णुपरत्वनिर्णयः । आकाशश्रुतेस्तत्प्रवृत्तिनिमित्ततादधीन्यादिना विष्णुवाचकत्वसंभवेन सावकाशतया निराकरणम् ।

तथा "ज्योतिश्चरणाभिधानादि"त्यधिकरणे "वि मे कर्णा पतयतो विचक्षुर्वीदं ज्योतिर्हृदय आहितं यत्" इति मन्त्रस्य करणादिविरुद्धचरणेन कर्णाद्यपरिच्छेद्यवैभवत्वरूपेण साधारणेन ब्रह्मलिङ्गेन विष्णुपरत्वनिर्णयः । तत्तन्मन्त्रगतज्योतिःश्रुतेर्ज्योतिः प्रकरणसंपादकतत्पूर्वापरमन्त्रगताग्न्यादिश्रुतीनाञ्च पूर्ववद्विष्णौ सावकाशतया निराकरणञ्च । "छन्दोऽभिधानादि"त्यधिकरणे "गायत्री वा इदगुं सर्वं भूतं"

इत्यादिविषयवाक्यगतस्य गायत्रीशब्दस्य गानत्राणकर्तृत्वादिसाधारणब्रह्मलिङ्गादिभिर्विष्णुपरत्वनिर्णयः। गायत्रीश्रुतेः पूर्ववद्विष्णौ सावकाशतया निराकरणञ्च। "प्राणस्तथाऽनुगमा" दित्यधिकरणे "ता वा एताश्शीर्षन् श्रिताः चक्षुश्श्रोत्रं मनो वाक् प्राण" इत्याद्यैतरेयब्राह्मणे श्रुतस्य प्राणशब्दस्य "तं देवाः प्राणयन्त । तं भूतिरिति देवा उपासांचक्रिरे" इत्यादिवाक्यश्रुतदेवोपास्यत्वादिसाधारणब्रह्मलिङ्गैर्विष्णुपरत्वनिर्णयः । तत्र यन्मुख्यप्राणलिङ्ग "अहिसन्त अहमुक्थ्यं अहमुक्थ्यमस्मीति प्राण उदक्रामदि" त्यादौ श्रुतमिन्द्रियैस्सह कलह उत्क्रमणं प्रवेश इत्यादिश्च । तत्र "त्वामेव विजानीयामि" ति पृष्टवन्तं विश्वामित्रं प्रति "प्राणो वाऽहमस्मि" इतीन्द्रियवचनं तत्सर्वमन्तर्यामिविषयतया सावकाशमिति निराकरणञ्च ।

एवं द्वितीयपादाद्यधिकरणेष्वपि तत्तद्विषयवाक्यानां साधारणब्रह्मलिङ्गादिभिः विष्णुपरत्वनिर्णयः । अन्यविषयश्रुतिलिङ्गानां सावकाशतया निराकरणमित्येतदेव प्रायिकम् । तत्र सर्वत्राऽपि साधारणब्रह्मश्रुतिलिङ्गानां विष्ण्वेकविषयत्वं अन्यविषयश्रुतिलिङ्गानां प्रवृत्तिनिमित्ततादधीन्यादिभिः विष्णावेव सावकाशत्वमित्येतदद्याऽप्यसिद्धम्, शिवादिविषयत्वमपि सम्भवतीति शङ्काग्रस्तत्वात् । तन्निराकरणार्थमेव त्वया प्रथमाध्यायशेषस्याऽऽरब्धत्वात् । तथा चोपक्रान्तसाधनीयार्थविस्मरणेन सर्वत्र तस्यैव हेतूकरणमत्यन्तमयुक्तमिति स्पष्टमेव।

द्वित्रेष्वधिकरणेषु त्वया विष्णुसाधारणश्रुतिलिङ्गानि सन्तीति लिखित्वा तैर्निर्णयः कृतोऽपि दृश्यते । यथा 'अन्तस्तद्धर्मोपदेशादि'त्यधिकरणे "अन्तः प्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः । इन्द्रस्याऽऽत्मानं शतधा चरन्तम्" इत्यादिमन्त्रगतस्याऽन्तःप्रविष्टशब्दस्य विष्णुपरत्वे "अन्तस्समुद्रे मनसा चरन्तम्" । "यस्याऽण्डकोशं शुष्ममाहुः प्राणमुल्बं" इति समुद्रशायित्वब्रह्माण्डवीर्यत्वरूपं विष्णुलिङ्गमस्तीति । यथा वा "अत एव प्राण" इत्यधिकरणे "तद्वै त्वं प्राणो अभवः । महान्भोगः प्रजापतेः । भुजः करिष्यमाणः। यद्देवान्प्राणयो नवे"ति प्राणशब्दस्य विष्णुपरत्वे "श्रीश्च ते लक्ष्मीश्च पत्न्यावि"ति तत्पूर्वानुवाकश्रुतं लक्ष्मीपतित्वलिङ्गमस्तीति । यथा वा "शब्दादेव प्रमित" इत्यधिकरणे-

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य स एवाऽद्य स उ श्वः ।।"

इति मन्त्रे श्रुतस्याऽङ्गुष्ठमात्रशब्दस्य विष्णुपरत्वे-

"ऊर्ध्वं प्राण उन्नयत्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वे देवा उपासत ।।"

इति मन्त्रश्रुतवामनश्रुतिरस्तीति । अत्र समुद्रशायित्वादिविष्णुलिङ्गप्रतिद्वन्द्वि "अन्तश्चन्द्रमसि मनसा चरन्तं" "अन्तरादित्ये मनसा चरन्तं" इत्यष्टमूर्तेश्शिवस्याऽपि लिङ्गमस्तीति विष्णुपरत्वलिङ्गप्रतिपन्थिनी "प्रजापतिश्चरति गर्भे अन्तः" इति प्रजापतिश्रुतिरस्ति वामनश्रुतिप्रतिपक्षभूता ईशानश्रुतिरस्तीति कुत उदाहृतश्रुतिलिङ्गैर्विष्ण्वेकपरत्वनिर्णयः ? श्रुत्यर्थानेकान्त्यवादिनस्तव विष्णुपरत्वेन योजनायां शिवादिश्रुतिलिङ्गानामन्यथानयनवच्छिवादिपरत्वेन योजनायां विष्णुश्रुतिलिङ्गानामप्यन्यथानयनसम्भवात् ।

न च कठवल्लीमन्त्रे "ईशानशब्दो भूतभव्यस्ये"ति पदसमभिव्याहाराद्भूतभव्यप्रतियोगिकेशितृत्वपरो न तु शिवे रूढिमानिति वाच्यम् । तथा सति वामनशब्दोऽपि प्राणापानमध्यस्थतोक्त्या पूर्वापरमन्त्रेषु बहुधाऽङ्गुष्ठमात्रतोक्त्या च ह्रस्वत्वपरो न तु विष्णौ रूढिमानिति त्वदभिमतश्रुतेरपि हानिप्रसङ्गात् । यथा चेशानशब्दः शिवे रूढिमानेव, यथा च समुद्रशायित्वब्रह्माण्डवीर्यत्वलक्ष्मीपतित्वादिलिङ्गानि न भवन्ति तथा समर्थितं चाऽस्माभिः **शिवतत्त्वविवेके** ।

यत्तु त्वया चतुर्थपादे प्रवृत्तिनिमित्ततादधीन्यादिना सर्वशब्दानां विष्णौ परममुख्यत्वोपपादनं तदेव शिवस्य प्रजापतेश्चाऽन्तर्यामित्वे तयोरेव सर्वशब्दानां परममुख्यत्वोपपादनमिति न तेन समन्वयस्य विष्णौ व्यवस्थितत्वसिद्धिः । परन्तु प्रवृत्तिनिमित्ततादधीन्यादिकथैवाऽवितथा । तथा हि- यस्य शब्दस्य प्रवृत्तिनिमित्तं यदाश्रितं तस्यैवाऽर्थस्य स शब्दो वाचक इति न नियमः । किन्तु यस्य शब्दस्य प्रवृत्तिनिमित्ततयाऽऽश्रितत्वेन यथेष्टविनियोक्तृत्वरूपस्वातन्त्र्यविषयत्वेन वा यदधीनं तस्याऽर्थस्य स शब्दो वाचक इति । अत एव भृत्यगतस्य जयस्य राजानाश्रितत्वेऽपि तदधीनत्वमात्रेण राजा जयीत्यपि प्रयोगः ।

नचैवं सति रिपुगतदुःखबन्धमरणादीनां राजाधीनत्वमात्रेण राजा दुःखी बद्धो मृत इत्यादिप्रयोगप्रसङ्गः । तत्प्रयोगप्रयोजकसत्वेऽपि राज्ञोऽपि दुःखादियोग्यतया राज्ञि सदेव दुःखादिकमुच्यते इति वा राज्ञि तदानीं दुःखाद्यभावनिश्चयेऽपि तस्मिन्दुःखादिकमसदेवाऽऽरोप्य राजविरुद्धेनोच्यत इति संशयापादकत्वेनाऽमङ्गलतया स्वस्थादिशब्दवत्तदप्रयोगोपपत्तेः । यद्वा स्वातन्त्र्यमात्रं शब्दप्रवृत्तौ न प्रयोजकं,किन्तु स्वगतत्वयोग्यत्वविशिष्टदोषत्वरहितं प्रति स्वातन्त्र्यम् । एवञ्च जयस्य राजगतत्वयोग्यत्वेऽपि दोषत्वराहित्यात्तं प्रति राज्ञस्स्वातन्त्र्ये दयादिशब्दप्रवृत्तौ प्रयोजकम् । दुःखबन्धादीनां राजगतत्वयोग्यत्वद्दोषत्वाच्च तानि प्रति तस्य स्वातन्त्र्यं दुःखिबन्धादिशब्दप्रवृत्तौ न प्रयोजकम् । तेषां विष्णुगतत्वायोग्यताद्दोषत्वेऽपि तानि विष्ण्वपेक्षया स्वाश्रयत्वयोग्यताविशिष्टदोषत्वरहितानि भवन्तीति तानि प्रति तस्य स्वातन्त्र्यं दुःखिबन्धादिशब्दप्रवृत्तौ प्रयोजकमेव । आश्रयित्वमपि हि न तन्मात्रं प्रयोजकं, धनवोढरि भृत्ये धनाश्रयत्वेऽपि धनीत्यप्रयोगात् ।

एवञ्च 'जीवा एव दुःखिनः' "कार्यकारणबद्धौ ता"वित्यादिश्रुतिगतदुःखिबद्धादिशब्दा जीवगतदुःखबन्धादिस्वतन्त्रस्य विष्णोर्वाचकाः न तु लोके दुःखिबद्धादिशब्दाः रिपुगतदुःखबन्धादिस्वतन्त्रस्य राज्ञो वाचका इति व्यवस्था संघटत इति ।

इदं तावदयुक्तम्- विविधकृष्णप्रतिमानिर्माणचतुरे शिल्पिनि तत्तत्प्रतिमासु कृष्णादिशब्दप्रवृत्तिनिमित्तं कृष्णाद्याकारं प्रति स्वातन्त्र्ये सत्यपि तस्मिन्कृष्णादिशब्दप्रयोगादर्शनात् । न च प्रतिमासु कृष्णादिशब्दाः कृष्णाद्याकारसादृश्येन गौणा एव, न तु वाचका इति न तासु कृष्णाद्याकारः कृष्णादिशब्दप्रवृत्तिनिमित्तमिति वाच्यम् । "इवे प्रतिकृतावि" त्यधिकारविहितस्य कन्प्रत्ययस्य "जीविकार्थे चाऽपण्ये" इति लुपि सति कृष्णादिशब्दानां कृष्णादिसदृशाकारप्रतिमावाचकत्वात्।

न च प्रवृत्तिनिमित्ताश्रयत्वे सत्यपि धनवोढरि भृत्ये धनीति प्रयोगादर्शनात् तदपि शब्दप्रयोगे प्रयोजकं न स्यात् । प्रवृत्तिनिमित्तस्वातन्त्र्यस्याऽपि शब्दप्रयोगप्रयोजकत्वाभावे भृत्ये जयिनि राजनि जयशब्दप्रयोगश्च न स्यादिति वाच्यम् । यत

"स्तदस्याऽस्ती" त्यस्मिन्नर्थे विहिता मत्वर्थीयाः प्रत्ययाः स्वभावात्केभ्यश्चित्प्रातिपदिकेभ्योऽस्यास्तीति षठ्यर्थ एव भवन्ति, केभ्यश्चित्तस्मिन्नस्तीति सप्तम्यर्थ एव । षष्ठ्यर्था अपि एकशतं सम्बन्धास्सन्तीति तेभ्यस्तेभ्यः प्रातिपदिकेभ्यस्तत्सम्बन्धविशेष एव भवन्ति केभ्यश्चित्षष्ठ्यर्थे सप्तम्यर्थे च भवन्ति । इयं च व्यवस्था प्रयोगानुसारेण स्वयमेव लभ्यत इति लाघवार्थं 'तदस्यास्त्यस्मिन्नि"ति सामान्येन विधानम् । यथा- "पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु" इत्यादिसूत्रेषु हविस्सामिधेनीविशेषादिवाचकानामपि सान्नाय्यधाय्यादिशब्दानां सामान्येन हविराद्यर्थेषु विधानम् । एवञ्च धनप्रातिपदिकान्मत्वर्थीयप्रत्ययाः षष्ठ्यर्थ एव । तत्राऽपि स्वस्वामिभाव एव भवन्तीति न धनवोढरि धनीति प्रत्ययप्रसङ्गः । जयप्रातिपदिकात्तु ते स्वस्वामिभावरूपे षष्ठ्यर्थे आश्रयरूपे सप्तम्यर्थे च भवन्तीति न राज्ञि भृत्ये च जयशब्दप्रयोगानुपपत्तिः ।

यद्वा भृत्यगतजयस्य न फलभाजि राज्ञ्युपचारेण जयिशब्दप्रयोगोऽस्तु । अत एव **माघकाव्ये** द्वितीयसर्गे दृश्यते-

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवाऽऽत्मनि ।। इति ।

तस्मात्सर्वेषामपि रूढानां यौगिकानां च शब्दानां प्रवृत्तिनिमित्ताश्रयत्वं तत्स्वातन्त्र्यं चेत्युभयमपि वाचकताप्रयोजकमित्येतत्सकललौकिकपरीक्षकव्यवहारविरोधि तुच्छं वचः । न हि स्वस्थादिशन्दानामारोग्यादिमत्सु वाचकत्वे समाने सत्यपि स्वर्गस्थत्वाद्यर्थान्तरप्रयोजकत्वेनाऽमङ्गलत्वात् अप्रयोग इतिवद्रिपूर्णा मारके राज्ञि मृत्युशब्दस्य वाचके सत्यप्यमङ्गलत्वादेवाऽप्रयोग इति कश्चिदपि मन्यते । एवमादीनि प्रवृत्तिनिमित्ततादधीन्यादिदूषणान्यस्माभिर्ग्रन्थान्तरे वर्णयिष्यन्ते। परकल्पितमर्यादयैव परमतदूषणार्थं प्रवृत्तेऽस्मिन्प्रकरणे न तानि संगृहीतानि ।

इत्थं पञ्चाधिकरणीदूषणार्थं प्रदर्शितयैव त्वन्मतमर्यादया समन्वयायगताधिकरणानां शैथिल्येन त्वदभिमतस्य विष्णौ व्यवस्थितस्य समन्वयस्याऽसिद्धौ तस्मि-

न्सम्भावितयुक्त्यादिविरोधनिराकरणार्थानि द्वितीयाधिकरणान्यभित्तिचित्रायमाणान्यचिन्त्याद्भुतमहिम्नि तर्कागोचरे परमेश्वरे युक्तिविरोधान्न परिपन्थीनीति वदतस्तव मते तान्यकाण्डताण्डवरूपाणि चेति तेषां तदुभयोपजीवनेन प्रवृत्तानां साधनफलाध्यायगताधिकरणानां शैथिल्यं स्पष्टमेव ।

यदि त्वेतानि त्वच्छास्त्रगतान्यधिकरणानि त्वद्भाष्ये तत्तधिकरणेषु स्वनिर्णीतार्थे संवादतयोदाहृतैः त्वदेकदृश्यैः कमठमाठरकौण्ठरव्यादिश्रुतिवाक्यैस्तदुपबृम्हणैश्च समर्थनीयानि तर्हि तवाऽलं न्यायचिन्तनया । त्वन्मतानुसारेणैव परस्परव्याहततया प्रत्यधिकरणमनिर्व्यूढ्या च। नहि प्रत्यधिकरणं तव न्यायव्युत्पादनव्यसनिताऽस्ति "सम्भृतिद्युव्याप्त्यपि चाऽत" इत्यधिकरणानां वचनमात्रावलम्बनानामपि त्वन्मते दर्शनात् । सम्भृत्यधिकरणे हि सर्वमुमुक्षूणामानन्दो ज्ञानं निर्दोषित्वरूपं सत्वं चेति त्रयो गुणा नियमेनोपास्याः प्रधानफलसिद्धये प्रधानफलस्य मोक्षस्य निर्दोषज्ञानानन्दरूपतया "तं यथा यथोपासते" इति श्रुत्यनुसारेण फलानुसारिगुणोपसंहारावश्यंभावादि "त्यानन्दादयः प्रधानस्ये"त्यधिकरणप्रतिपाद्यत्वेन तवाऽभिमतमर्थं त एव सर्वमुमुक्षूपास्या इत्ययुक्तम् "रुक्षा सद्यावापृथिवी बिभर्ति" "एष हि सर्वेषु लोकेषु भाति" इति श्रुतस्योस्सम्भृतिद्युव्याप्त्योरपि सर्वमुमुक्षूपास्यत्वान्मोक्षे स्वाधमभरणस्य प्रकाशव्याप्तेश्च सर्वापेक्षितत्वेन तयोरपि तत्क्रतुन्यायविषयत्वादित्याक्षिप्य यद्यप्येवं तथाऽपि न ते सर्वोपास्ये,

देवादीनामुपास्यास्तु भृतिव्याप्त्यादयो गुणाः ।
आनन्दाद्यास्तु सर्वेषामन्यथाऽनर्थकृद्भवेत् ।

इति किञ्चिद्वचनमेव विलिख्य सिद्धान्तितम् । एवमन्यान्यप्यधिकरणानि उदाहरणीयानि । तस्माद्धूर्तकल्पितवचनैकावलम्बनं न्यायविधुरमिदं मध्वमतं सूक्ष्मदृशां न सूर्क्षणीयमिति भावः ।।५४।।

इत्यप्पदीक्षितेनेदं मध्वोपक्रममक्रमम् ।
तद्रीत्यैव मतं ध्वस्तं संक्षेपेण समन्ततः ।।

* * *

इत्थं कृतेन मध्वमतविध्वंसनेनाऽऽत्मनः पौरोभाग्यं पहिरन्नेव तत्र युक्तांशान् गृहीत्वा तैर्जीवब्रह्माभेदसिद्धिं प्रकरणस्याऽस्य तत्वनिर्णयफलकत्वेन वादकथारूपत्वसंपादनीं दर्शयति-

तस्माद्यत्तेऽनुपास्यं विमलसुखतनुब्रह्मकूटस्थमिष्टं
शास्त्रेऽप्यस्मिन्विचार्ये गमितमुपनिषल्लक्ष्यतां मुक्तभोग्यम् ।
सोऽसावानन्द एवेत्युचितमसुमतामावृतो यस्त्वयोक्त-
स्तद्भेदे नाऽस्ति मानं किमपि निगमतो लाघवेनैक्यसिद्धेः ।।५५।।

त्वया तावत्परब्रह्मोपासनाविषयादन्यद्विशुद्धसुखरूपं परिणामादिविकाररहितं मुक्तानां भोग्यताय निरतिशयपुरुषार्थरूपमिष्यते । तदेव चाऽस्मिन्शारीरशास्त्रे विचार्यं त्वयोपेयते । तत्सर्वं युक्तमेव । तथाऽनुपास्यं ब्रह्मोपनिषदां वाच्यं न भवतीति तल्लक्ष्यतां नीतमस्माभिः पञ्चमाधिकरणदूषणे । प्राणिनां च संसारदशायां अविद्यावृतो विशुद्ध आनन्दोऽस्तीति च त्वयोक्तम् । तदपि युक्तमेव । एवञ्च योऽसौ संसारदशायामावृतो जीवानामानन्दस्त्वयेष्यते तदेव विशुद्धसुखरूपं ब्रह्म । न ततोऽन्यदित्यप्यङ्गीकर्तुमुचितम् । उपनिषत्सु जीवब्रह्माभेदोद्घोषणात्तत्रैव तर्काणामानुकूल्याच्च । तथा हि-

ब्रह्मानन्दो देवदत्तजीवानन्दान्न भिद्यते, तं प्रत्यनादिभावावृतत्वात् तद्भोग्यत्वाच्च, देवदत्तजीवानन्दवत् । घटादीनां देवदत्तं प्रति कुड्यादिभावावृतत्वेऽपि ज्ञानप्रागभावरूपानाद्यभावावृतत्वेऽपि अनादिभावावृतत्वं नाऽस्तीति न तेषु व्यभिचारः । अनादिभावश्चाऽविद्यारूपः संसारदशायां जीवानन्दस्य ब्रह्मानन्दस्य च तं प्रत्यावारकस्तवाऽपि सम्मतोऽस्तीति प्रथमाधिकरणदूषणे दर्शितत्वान्न पक्षे हेत्वसिद्धिः । न वा दृष्टान्ते साधकवैकल्यम्। जीवानन्दवद्ब्रह्मानन्दोऽपि मुक्तिदशायामभिव्यक्तो मुक्तानां भोग्य इति "तदेतच्छ्रेयः पुत्रादि"ति श्रुतिं ब्रह्मविषयां वदतस्तवाऽपि सम्मत इति न द्विदीयहेतोरप्यसिद्धिः । अस्मन्मते यद्यपि संसारदशायामावृतो जीवानन्द एव ब्रह्मानन्दस्तथाऽपि तत्र साध्यनिश्चयाद्दृष्टान्तत्वमुचितम् साध्यनिश्चययोर्दृष्टान्तत्वे तन्त्रम्; न पक्षान्यत्वमपि।

यद्वा ब्रह्मजीवानन्दयोर्बिम्बप्रतिबिम्बभावेन व्याहारिकभेदसत्वात्पक्षदृष्टान्तभावः । प्रतिबिम्बे न चैतन्यांश एवाऽनावृतः आनन्दांशस्त्वावृत इत्यभ्युपगमात्र साधनवैकल्यमपि ।

नन्वत्र साध्यं जीवानन्दाभेदरूपं जीवानन्दाद्भेदप्रतिषेधरूपं वा ? नाऽऽद्यः, मया जीवब्रह्मानन्दयोरसाधारणरूपाभ्यां भेदस्येवाऽऽनन्दत्वादिसाधारणधर्मेणाऽभेदस्याऽपि स्वीकृतत्वेन सिद्धसाधनतापत्तेः । न द्वितीयः, त्वयाऽपि ब्रह्मजीवानन्दयोर्बिम्बप्रतिबिम्बयोर्व्यावहारिकभेदस्याऽङ्गीकृतत्वेन तत्प्रतिषेधे बाधापत्तेरिति चेत्, उच्यते- देवदत्तजीवानन्दगतासाधारणधर्मावच्छिन्नप्रतियोगिताकस्तदभेदस्साध्य इति नाऽभेदसाध्यपक्षे सिद्धसाधनम् । नाऽपि भेदप्रतिषेधपक्षेबाधः । त्वया ब्रह्म जीवाद्भिद्यते सर्वज्ञत्वादित्यनुमाने व्यावहारिकभेदेन सिद्धसाधनपरिहाराय यद्विशेषणं निवेश्यते तद्विशिष्टभेदप्रतिषेधस्याऽत्र साध्यत्वाङ्गीकारात्। त्वया हि तत्र धर्मिसमसत्ताकत्वं धर्मिज्ञानबाध्यत्वं वा विशेषणं निवेश्यते तद्विशिष्टप्रितषेधोऽत्र साध्यत इति न किञ्चिदनुपपन्नम् ।।

एवमग्रिमानुमानेष्वपि अभेदशब्दार्थो वर्णनीयः । ब्रह्म जीवाभिन्नं निर्दुःखत्वे सति सुखवत्त्वात्, निर्विकारत्वे सति ज्ञानत्वात्, जीववत् । मतद्वयेऽपि ब्रह्मणि जीवे च स्वरूपसुखस्य स्वरूपज्ञानस्य च धर्म्यभिन्नत्वेऽपि विशेषबलादविद्यावशाद्वा धर्मत्वमप्यस्तीति न पक्षदृष्टान्तयोर्विशेष्यासिद्धिः । नाऽपि विशेषणासिद्धिः । मतद्वयेऽप्यन्तःकरणस्यैव दुःखादिसकलविकाराश्रयत्वात् । यद्यप्याध्यासिकदुःखादिविकाराश्रयत्वं जीवस्य प्रपञ्चाश्रयत्वं च तदुपादानस्य ब्रह्मणोऽस्ति तथाऽपि वस्तुतो निर्दुःखत्वं निर्विकारत्वं च विशेषणम् । तच्च धर्मिसमसत्ताकदुःखविकारशून्यत्वरूपं वैषयिकसुखाश्रये वृत्तिज्ञानाश्रये चाऽन्तःकरणे व्यभिचारवारणाय रूपादिषु तद्वारणाय हेतुद्वयेऽपि विशेष्यभागः । ब्रह्म, देवदत्तजीवाभिन्नं तत्कर्मफलभोक्त्रभिन्नत्वात्, देवदत्तजीववत् । त्वया ब्रह्मणो जीवगतपुण्यफलभोकृत्वस्य गृहाधिकरणे व्यवस्थापितत्वेन त्वन्मते तस्य कर्मफलभोकृत्वेनाऽभिन्नत्वात्, अस्मन्मते तथाभूतेन जीवेन भिन्नत्वाच्च मतद्वयेऽपि हेतोर्नाऽसिद्धिः ।

न चाऽस्मन्मते हेतोस्साध्यावैशिष्ट्यम् । साध्ये जीवस्य जीवत्वेन हेतौ कर्मफलभोक्तृत्वेन निवेश इति विशेषणभेदेन तयोर्भेदात् । यद्यपि भोक्तृभिन्नत्वादित्येतावताऽपि न व्यभिचारस्तथाऽपि तत्कर्मफलभोक्तृत्वं तदभेदमन्तरेणाऽनुपपन्नमिति विपक्षबाधकतर्कोत्थापकतया व्याप्तिग्रहानुकूलत्वान्न विशेषणवैयर्थ्यम् । हिरण्यगर्भादिजीवा ब्रह्माभिन्नाः तदीयदिव्यदेहेन्द्रियैभोक्त्रभिन्नत्वात्, ब्रह्मवत् । "ब्राह्मेण जैमिनिरुपन्यासादिभ्य" इत्यधिकरणे त्वया-

आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति ।
गच्छेच्च हरिपादेन मुक्तस्यैषा स्थितिर्भवेत् ।।

इत्यादिवचनं लिखित्वा सायुज्यमुक्तिंगता हिरण्यगर्भादयो ब्रह्मणो देहं प्रविष्टास्तद्देवेन्द्रियैरेव भुञ्जत इति व्यवस्थापितत्वान्न त्वन्मते हेत्वसिद्धिः । नाऽप्यस्मन्मते तदसिद्धिः । अस्माभिरपि पर्यङ्कविद्यादिप्रतिपादितया रीत्या ब्रह्मणो देहेन्द्रियाणां भोगस्य च स्वीकृतत्वेन तद्देहेन्द्रियैर्भोक्त्रा ब्रह्मणा हिरण्यगर्भादीनामभिन्नत्वस्याऽङ्गीकृतत्वात् पूर्ववद्विशेषणभेदेन हेतुसाध्ययोर्भेदः । जीवा ब्रह्माभिन्नाः, तदिन्द्रियैर्भोक्त्रभिन्नत्वात्, आकाशादिप्रपञ्चस्रष्टृत्वात्, ब्रह्मवत् । यद्यपि मुक्तहिरण्यगर्भादीनामिव सर्वेषां जीवानां ब्रह्मदेहगतेन्द्रियैर्भोक्तृत्वं नाऽस्ति तथाप्यस्मदादिदेहगतान्यपीन्द्रियाणि ब्रह्मण एव करणानि । अस्मदादीनां तु स्वामिनः कुठारैर्भृत्यानामिव ब्रह्मकरणैरेव, व्यवहार इति त्वया "ज्योतिराद्यधिष्ठानं" इत्यधिकरणे व्यवस्थापितत्वात् त्वन्मते नाऽऽद्यहेतोरसिद्धिः । नाऽपि द्वितीयहेतोः । ध्यानमनोराज्यविषयप्रपञ्चेषु जीवानां स्रष्टृत्वस्य त्वयाऽङ्गीकृतत्वात् । अहमेव जगत्स्रष्ट ब्रह्मेति जीवानां ध्यानादिसंभवाच्च । **वासिष्ठरामायणे-** ऐन्दवोपाख्याने-

अन्तस्थेनैव मनसा चिन्तयामासुरादृताः ।
ब्रह्माऽहं जगतां स्रष्टा कर्ता भोक्ता महेश्वरः ।।
लोकपालपुरैस्सार्धं भुवनानि चतुर्दश ।
निर्मितानि मयैतानि तेषामन्तरहं स्थितः ।।

इतीन्दुनामकब्राह्मणपुत्राणां तथा ध्यानप्रतिपादनाच्च । अस्मन्मते तु पूर्ववद्धेतोरसिद्धिसाध्यावैशिष्ट्यनिरासः ।

न च ब्रह्मजीवयोर्गुणोत्कर्षापकर्षसत्वाविरुद्धगुणाक्रान्त्या भेदश्शङ्कनीयः । ब्रह्मगतगुणोत्कर्षस्य तदभिन्नजीवसाधारण्येऽपि जीवे त्वदभिमतस्य ज्ञानबलानन्दोत्कर्षस्येव संसारदशयामावृतत्वेनाऽप्रकाशसंभवस्य त्वन्मते ब्रह्मणोऽचिन्त्याद्भुतशक्तिमहिम्ना तर्कागोचरत्वमहिम्ना च विरुद्धगुणक्रान्तेस्तद्भेदासाधकत्वस्य च प्रथमद्वितीयाधिकरणदूषणावसरे प्रपञ्चितत्वात् ।

वस्तुतस्तु त्वदभिमते ब्रह्मणि जीवगुणविरुद्धत्वेनाऽऽशङ्कनीयः कोऽपि गुणः श्रुतिसिद्धो न लक्ष्यते । त्वया त्वस्मिञ्छारीरकशास्त्रे विचारणीयं विशुद्धं ब्रह्मोपास्यप्रतिबिम्बरूपस्य बिम्बभूतं न तु स्वयमुपास्यमिति निरूपितम् । "तथाऽन्यत्प्रतिषेधादि"त्यधिकरणे एवमङ्गीकुर्वतस्तव मते सृष्ट्यादिवाक्यमन्यच्च सकलं सगुणवाक्यमुपास्यप्रतिबिम्बपरमेव न तु विशुद्धब्रह्मपरम् । विशुद्धं तु ब्रह्म "यतो वाचो निवर्तन्ते" "यद्वाचाऽनभ्युदितं" इत्यादिभिः कैश्चिदेवाऽस्मदभिमतनिर्गुणवाक्यैर्लक्षणया प्रतिपाद्यमभ्युपगन्तव्यमित्युपपादितमस्माभिः पञ्चमाधिकरणदूषणे । ततश्च कुतो विशुद्धे ब्रह्मणि जगत्कर्तृत्वादिविरुद्धगुणसिद्धिः, येन तस्य जीवाद्भेदश्शङ्क्येत । न च तथा सत्याकाशादिप्रपञ्चस्रष्टृत्वादित्यादिजीवब्रह्माभेदसाधकानुमानानां दृष्टान्ते साधनवैकल्यं पक्षे हेत्वसिद्धिर्वा स्यादित्याशङ्कनीयम् । परमर्यादया पराभ्युपगन्तव्यार्थविरुद्धमपि पराभ्युपगममात्रमनुसृत्य हेतूकरणसम्भवात् । त्वं हि उपासनार्थमेव सर्वासु श्रुतिषु जगत्स्रष्टृत्वाद्याम्नातं विशुद्धं ब्रह्मोपास्यं च न भवतीति वदन्नपि विशुद्धस्य ब्रह्मणः स्रष्टृत्वं कर्मफलभोक्तृत्वं देहेन्द्रियादिमत्त्वं अस्मदादिकरणस्वामित्वमित्यादिकमुपासनाश्रुत्याम्नातत्वेन तवाऽभिमतं गुणजातमङ्गीकरोषि । त्वदभ्युपगन्तव्यार्थाविरुद्धास्त्वनादिभावावृतत्वादयश्चत्वार एव हेतवः । त एव चाऽऽवृतो यस्त्वयोक्त इति मुक्तभोग्यमिति कूटस्थमिति विमलतन्विति च विशेषणैर्मूलश्लोके सङ्गृहीताः ।

अथाऽपि स्यात्- जीवानां सुखादिव्यवस्थया भिन्नानां कथमेकेन ब्रह्मणा सममभेदस्स्यादिति । इदमपि दत्तोत्तरम् । अर्जुनाखण्डलादीनां सुखादिवैचित्र्ये सत्यपि त्वदीयाभेदाभ्युपगमप्रदर्शनेन त्वन्मते ब्रह्मशक्त्यादिमहिम्ना विरुद्धगुणवत्त्वस्य भेदसाधकत्वव्यवस्थापनेन च । एवं च-

"यथा ह्ययं ज्योतिरात्माविवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ।।"

इत्यादिश्रुतिभिर्जीवब्रह्मणोर्जीवानां चाऽभेदसिद्धिरप्रत्यूहैवेति न भेदशङ्कावकाशः ।

न च भेदश्रुतिष्वपि सतीषु कुतोऽयमभेदश्रुतिपक्षपात इति शङ्कनीयम् । विरुद्धगुणवत्वादेरकिञ्चित्करत्वे स्थिते लाघवतर्केणाऽभेदश्रुतीनां प्राबल्यात् । न चैवमपि जीवाभिन्नमखण्डं त्वदभिमतं ब्रह्म श्रुतिभिर्न सिध्येत् । वाक्यानां पदार्थसंसर्गपरत्वस्य पदानां प्रवृत्तिनिमित्तसंसर्गपरस्य च व्युत्पत्तिसिद्धत्वेन जीवपरवाक्यानां ब्रह्मवाक्यानां च तत्तत्पदार्थसंसर्गपरतायास्तदन्तर्गतपदानां प्रवृत्तिनिमित्तसंसर्गत्वपरत्वस्य च वक्तव्यतया सखण्डविषयत्वावश्यंभावादिति वाच्यम् । त्वया जीवे ब्रह्मणि च निर्विकारे गुणक्रियादीनां नित्यत्वेन धर्म्यभिन्नत्वेन समवायाश्रयाश्रयिभावादिसंसर्गरहितत्वेन चाऽभ्युपगतत्या त्वन्मतेऽपि श्रुतीनां तत्संसर्गविषयत्वप्रसक्त्यभावात् ।

न च तेषां संसर्गाभावेऽपि संसर्गव्यवहारनिर्वर्तकत्वेन मदभ्युपगतविशेष एव तत्र तत्र पदार्थविधया वाक्यार्थविधया वा भासमानस्सन्नखण्डत्वविरोधी स्यादिति वाच्यम् । विशेषस्याऽपि त्वया धर्मभेदस्योक्तत्वात् तदङ्गीकारस्य वैयर्थ्यस्य चाऽस्माभिः प्रथमाधिकरणभङ्गे व्यवस्थापितत्वात् ।

एतेन महावाक्यार्थोऽपि जीवब्रह्माभेदविषयत्वेन सखण्ड इति निरस्तम् । अभेदस्याऽपि धर्मिभिन्नत्वस्याऽभावात् । धर्मिण एव संसर्गविधयाऽपि प्रतीतिश्चेत्तावता द्वैतापत्त्यभावेनाऽविरोधाच्च । तस्मात्त्वदीयतत्तदधिकरणमर्यादया पर्यालोचनयैवाऽशेषोपनिषन्महातात्पर्यवेद्यं सच्चिदानन्दैकरसमद्वितीयं ब्रह्म सिध्यत्त्वया निवारयितुं न शक्यत इति भावः ।।५५।।

एवं पञ्चाधिकरणीभङ्गार्थं परकीयतत्तदधिकरणस्थितिपर्यालोचनया लब्धां स्वाभिमताद्वितीयब्रह्मसिद्धिं चोरापहृतरत्नप्रत्याहरणसादृश्यप्रदर्शनेनोपसंहरति-

मध्वादिभिर्मुषितमत्र सदद्वितीयं प्रत्याहृतं तदिदमागममौलिरत्नम् ।
आच्छाद्य गूहितमसारतरैस्तदर्थैस्तत्क्षुल्लकाधिकरणस्थलमर्दनेन ।।५६।।

यथा खलु त्रासादिदोषरहिततया सदृशान्तररहितं सम्राजः किरीटरत्नमासवसेविभिः किरातैर्मुषित्वा क्षुद्रेषु स्वगृहेषु तृणदारुशलाकादिभिरत्यन्तमसारैस्तदीयोपकरणैराच्छाद्य संगोपितं तदीयगृहभूम्याक्रमणेनाऽन्विष्य दृष्ट्वा राजकीयैः प्रत्याह्रियते तथैवाऽद्वितीयं अतएव भयरहितं निगमशिरसामलङ्कारभूतं परं ब्रह्म मध्वजयतीर्थादिभिर्मुषित्वा युक्त्यसहिष्णुभिः जीवब्रह्मणोः सविशेषभिन्नगुणादिभिर्भेदकवदवभासमानैः स्वकल्पितार्थैराच्छाद्य गूहितं तदीयनिर्युक्तिकाधिकरणिस्थतीनां मथनेन युक्तांशमन्विष्याऽस्माभिः प्रत्याहृतमित्यर्थः ।।५६।।

इत्थं मध्वमतदर्शनदूषणस्य तन्मतमर्यादयैवाऽद्वैतसिद्धेश्च मार्गप्रदर्शनमात्रं कृतम् । तच्च सद्भिरादरणीयम्, आप्तोक्तिमूलत्वादित्याह-

आद्रियध्वमिदमध्वदर्शनं व्यध्वगं त्यजत मध्वदर्शनम् ।
शाङ्करं भजत शाश्वतं मतं साधवस्स इह साक्ष्युमाधवः ।।५७।।

इदं मध्वदर्शनममार्गप्रवृत्तं त्यक्तव्यम् । शाङ्करमतन्तु शाश्वतं सेवनीयमित्यत्र स एव गौरीपतिस्साक्षी, यस्स्वयमेव शङ्कराचार्यरूपेणाऽवतीर्याऽद्वैतं व्यवस्थापितवानिति । "चतुर्भिस्सहितश्शिष्यैश्शङ्करोऽवतरिष्यति" इत्याद्याप्तवचनेषु प्रसिद्ध इत्यर्थः ।।५७।।

एते श्लोकाः परविजयोन्मुखस्य परीक्षकस्य मुखवर्तिततयोपकारकाः, पूर्वदेवविजयोद्युक्तस्येव सुपर्वनायकस्य नासीरवर्तितया मरुत इत्याह-

असुरान्विजिगीषोः स्वयमद्वैतब्रह्मदिव्यरत्नहरान् ।
विबुधेन्द्रस्य सखायः श्लोका मरुत इव सन्त्विमे मुख्याः ।।५८।।

असुराः खलु वैरोचिनीमुपनिषदमाश्रिता देहात्मवादिनः, प्रकृताः परेऽपि जीवस्यैव करचरणादिसकलकर्मज्ञानेन्द्रियसहितदेवरूपत्वं तेनैव देहेन स्वप्ने मुक्तौ च व्यवहारानपि वदन्तो देहात्मवादिन इति साम्यादसुरशब्देनाऽतिशयोक्त्या परे निर्दिष्टाः । मुख्याः मुखे वदने भवाः सेनामुखवर्तिनश्च ।।५९।।

अथ स्वनाम ग्रन्थनाम च कीर्तयन् प्रकरणसमाप्तिं दर्शयति-

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनश्श्रितचन्द्रमौलि-
रप्पय्यदीक्षित इति प्रथितस्तनूजः ।।५९।।

सोऽयं मितपदमकरोन्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः श्रीकामाक्षीसमेतस्य ।।६०।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि-
श्रीरङ्गराजाध्वरीन्द्रसूनोः चतुरधिकशतप्रबन्धनिर्माणचणस्य
श्रीमदप्पयदीक्षितेन्द्रस्य कृतिषु मध्वमतविध्वंसनसहितो
मध्वतन्त्रमुखमर्दनाख्यो ग्रन्थस्समाप्तः ।।

मूलश्लोकसूची

विषयाः	पृष्ठम्	विषयाः	पृष्ठम्
अग्रे वाच्यः	१४२	ध्येयार्था एव	१७९
अतः पञ्चा-	१०५	न ध्येयं	१७८
अद्वैते यद्य-	१२०	नाशङ्क्योत्प-	१२२
अपि च भगवा-	१२४	निर्मर्याद-	१५०
अभेदे दृढे	११५	पुंस्त्वादि-	११४
असुरान्वि-	१९५	पूर्णत्वं ते	१६९
आत्मा ब्रह्मे	१०७	प्राबल्यं	१४६
आद्रियध्वं	१९५	प्रामाण्यं	१०८
इति तव	११८	मध्वादिभिः	१९५
इत्थं जीव-	१५२	मुख्यो भेदः	११७
इत्थं त्वत्-	१८२	यतो वेत्या-	१५५
उक्थ्याग्नि-	१५९	यदि त्वेनं	१२०
एकं वाक्यं	११२	यद्येवं रोच-	१५७
एवं सुखित्व-	१४०	यो यस्यो-	१६८
ऐश्वर्यात्	१३०	रोद्धा नोप-	१७२
कथं निरस्या	१६२	वक्तव्यं ते	१२५
कर्मब्रह्मो-	१६३	विद्वद्गुरोः	१९६
कर्त्रैकत्वं	१६७	विशेषं	१२५
काचाऽत्रानु-	११४	विष्णो विश्वा-	१४१
किञ्च स्थाणु-	१७१	शब्दान्तारादि-	१४८
किञ्च श्रुत्यैक-	१६०	शिवं विष्णुं	१०३
किञ्चायं भेद-	१२८	श्रुत्यन्तानां	११०
किञ्चेशो गुण-	१२३	श्लेषप्राणो	१६४
तच्छास्त्रं चेत्	११३	साक्षी जीवः	१०९
तथाऽऽप्यानंद-	१०५	सिद्धेऽसिद्धे	१११
तद्ब्रह्मेति	१५४	सृष्ट्यादि-	१६५
तद्ब्रह्मेति	१५९	सोयं मित-	१९६
तस्मात्तुच्छं	१२०	स्थूलप्रप-	१५६
तस्माद्यत्ते	१९०	स्फारात्तत्-	१७४
दुःखित्वाद्येव	१३८	स्रष्टुं प्रत्ये-	१६७

व्याख्यामुद्धृतानां कारिकाणां सूची

विषयाः	पृष्ठम्	विषयाः	पृष्ठम्
अङ्गाङ्गित्वे	१२४	देवादीनामु-	१८९
अङ्गीकृत-	१३४	द्वैविध्येऽपि	१३६
अथैकका-	१७६	न जीवभेद-	१४२
अधिकारा-	१५१	नरकेऽपि	१३८
अनन्योऽप्य-	१४५	न विशेषा-	११६
अन्तस्थेनै-	१९२	पन्थानं	१७६
अप्पदीक्षित-	१५३	पश्यन्ति	१७८
अस्मत्पक्षे	१२९	पृथगेव	१३५
आदत्तेहरि-	१९२	प्रतिर्बिब-	१४८
आहूतस्य	१४०	प्रथमो	१०६
इत्यप्पदी-	१७२	प्रमाण-	१०८
इत्यप्पदी-	१७७	प्रमादात्म-	१३६
इत्यप्पदी-	१८९	ब्रह्मतर्क-	१०८
उक्थ्यसं-	१५८	भिन्नोचिन्त्यः	१४३
उद्घाट्य-	१०३	मध्वतन्त्र-	१०३
उपक्रमा-	११०	मध्वशास्त्र-	१८१
ऐश्वर्यात्	११७	मिथ्यात्वं	१३५
कार्यकारण-	१२१	यथा क्रुद्धः	१७६
क्वचिद्ब्रह्मा	१७७	यथाह्ययं	१९४
गुणास्सर्वे	१८०	यद्वाक्योक्तं	१६१
तत्तत्कल्पान्त-	१७७	लोकपाल-	१९२
तथाप्यान-	११७	विजयस्त्वयि	१८८
तदुपासनं	१७८	सत्यत्वं	१३८
		सर्वत्राशेष	१२१

।। श्रीः ।।

श्रीगणेशाय नमः

पाणिनितन्त्र वादनक्षत्रमाला ।।

उद्धाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः
श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ।।

पूर्वोत्तरतन्त्रयुगे रचिता नक्षत्रसंमिता वादाः ।
अधुना पाणिनितन्त्रे विदुषां तोषाय रच्यन्ते ।।

क्विलुगुपधात्वचङ्परनिर्ह्रासकृत्त्वेषूपसंख्यानम् ।।

अत्र 'क्वौ लुप्तं न स्थानिवत्' इत्यस्यार्थस्य क्वचिद्ग्रन्थेषु निषेधदर्शनात् क्वचिदङ्गीकाराच्च विप्रतिपत्त्या विचार आरभ्यते -

तत्र कश्चिदाह - **'क्वौ विधिं प्रति न स्थानिवत्'** इत्येवाश्रीयते; न तु **'क्वौ लुप्तं न स्थानिवत्'** इति । तथा हि - **'क्वौ लुप्तं न स्थानिवत्'** इत्यर्थाश्रयणे लुनातेर्णिजन्तात् क्विपि लू इ व् इति स्थिते णिलोपादन्तरङ्गत्वात् धातोर्वृद्ध्यावादेशयोः कृतयोः पश्चाण्णिलोपे वलि लोपात्परत्वात् ऊठि कर्तव्यो क्वौ कृतस्य णिलोपस्य स्थानिवत्त्वनिषेधात् ऊठः सिद्धावपि लवमाचष्टे लवयति लवयतेः क्विपि लव इ व् इति स्थिते णिलोपटिलोपयोः कृतयोः क्वौ कृतस्य णिलोपस्य स्थानिवत्त्वनिषेधेऽपि णौ कृतस्य टिलोपस्य स्थानिवत्त्वादूठोऽप्राप्तौ 'क्वौ विधिं प्रति न स्थानिवत्' इत्यस्यार्थस्यावश्यमाश्रयणीयत्वादनेनैव लावयतेः लौः लवमाचष्टे लौः इत्युभयोपपादनसंभवे अर्थान्तराश्रयणस्य निष्प्रयोजनत्वादेकस्मिन्वाक्ये अर्थद्वयस्यालाभाच्च । अत एव भगवता भाष्यकारेण तद्वार्तिकव्याख्यानप्रस्तावे नपदान्तसूत्रे **'नैवं विज्ञा-**

यते - **क्वौ लुप्तं न ये स्थानिवदिति**'इति कण्ठरवेणैव स पक्षो निरस्तः। तस्मात् लवमाचष्टे लावयतेर्वा लौः इत्येतद्रूपसिद्धिप्रयोजनकत्वात् भाष्यकाराभिमतत्वाच्च **'क्वौ विधिं प्रति न स्थानिवत्'** इत्येवाश्रीयते, नतु **'क्वौ लुप्तं न स्थानिवत्'** इति; इति प्रथमा कक्ष्या ।।

यदि **'क्वौ लुप्तं न स्थानिवत्'** इति नाश्रीयेत, तदा भाष्ये **'यू स्त्र्याख्यौ नदी'** इत्यत्र **'प्रथमलिङ्गग्रहणं च'** इति वार्तिकस्थप्रथमलिङ्गग्रहणस्य प्रयोजनकथनपरे **'प्रयोजनं क्विलुक्समासे'** इति वार्तिके क्विबन्तोदाहरणतया **'कुमार्यै ब्राह्मणाय'** इत्युदाहरणानुपपत्तिः । तथा हि - कुमारीशब्दस्य ङीबन्तस्याधातुत्वेन क्विबुत्पत्त्यसंभवात् क्यजन्तादुत्पत्तिर्वक्तव्या । अत एव तत्र कैयटेनापि **'कुमारीमिच्छति आत्मनः कुमारीयति । ततः कर्तरि क्विप्'** इति व्याख्यातम् । तथा च कुमारी य व् इति स्थिते **'वेरपृक्तस्य'** इति वलोपात्परत्वात् अल्लोपे कृते **'लोपो व्योर्वलि'** इति प्रथमं विधेयनिर्देशसामर्थ्यात् परं प्रतिपदविधिमपि विलोपं बाधित्वा प्रथमं यलोपे पश्चाद्विलोपे च कृते कुमारीति क्विबन्तः संपद्यते । स च **'क्वौ लुप्तं न स्थानिवत्'** इत्यनाश्रयणे नोपपद्यते, अल्लोपस्य क्वौ कृतस्य स्थानिवद्भावात् विलोपात्परत्वादीकारस्य यणि यलोपे कर्तव्ये **'न पदान्त-** 'इतिस्थानिवत्त्वनिषेधात् क्वौ वलि लोपे च कुमार इति रेफान्तत्वप्रसङ्गात् । अत एव हरदत्तेनापि **'ख्यत्यात्परस्य'** इत्यस्मिन्सूत्रे **'सह खेन वर्तत इति सखः ; सखमिच्छति सखीयति । सखीयतेः क्विप् सखीः । सख्युः'** इति काशिकायामुदाहृते सखीशब्दे अतो लोपस्य स्थानिवद्भावात् यणादेशं वलि लोपं चाशङ्क्य **'क्वौ लुप्तं न स्थानिवत्'** इति परिहृतम् । **'भोभगो -'** इति सूत्रेऽपि **'वृक्षं वृश्चति वृक्षवृट् । वृक्षवृश्चमाचष्टे वृक्षवयति । वृक्षवयतेरप्रत्ययः । वृक्षव् करोति'** इति काशिकायामुदाहृते वृक्षव्शब्दे, अश्राव्यप्रत्ययोऽयं विच्प्रत्ययः । क्विपि तु **'ग्रहिज्या-'** इति सूत्रेण संप्रसारणं वलि लोपो वा स्यादिति क्विप्प्रत्ययपक्षे दोषमुद्भाव्य **'स्थानिवत्त्वं तु णेरत्र क्वौ लुप्तत्वान्न विद्यते'** इत्युक्तं तेनैव । तस्मात् प्रयोजनसंभवात् **'क्वौ लुप्तं न स्थानिवत्'** इत्यप्याश्रयणीयम् । यत्तु- **'क्वौ लुप्तं न स्थानिवत्'** इति वाक्येनार्थद्वयालाभ इति, तन्न;क्वौ विषये न स्थानिवदित्यर्थकल्पनेनार्थद्वयस्यापि क्रोडीकारात्। यत्तु-भाष्यवाक्ये नैवं विज्ञायते क्वौ लुप्तं न स्थानिवदितीति, तदपि अनुपपत्त्या नैव-

मेव विज्ञायते क्वौ लुप्तं न स्थानिवदिति; किं तर्हि क्वौ विधिं प्रत्यपि न स्थानिवदिति पक्षद्वयाङ्गीकारपरतया योजनीयमिति द्वितीया ।।

यदि **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रीयेत; तदा पठितुमिच्छति पिपठिषति, पिपठिषतेःक्विप् पिपठीः ब्राह्मणकुलम्, पिपठिषि ब्राह्मणकुलानीति इष्यमाणं रूपं न स्यात् । **'नपुंसकस्य झलचः'** इति नुमि कर्तव्ये क्वौ कृतस्य अतो लोपस्य स्थानिवत्त्वनिषेधेन झलन्तत्वान्नुमि 'पिपठींषि' इति रूपप्रसङ्गात् । तदनाश्रयणेन **'क्वौ विधिं प्रति न स्थानिवत्'** इत्यर्थाश्रयणे तु नुमः क्विनिमित्तकत्वाभावेन स्थानिवत्त्वानिषेधात् स्थानिवद्भावे अङ्गस्य झलन्तत्वाभावात् नुमभावः सिध्यति। अत एव **'दीधीवेवीटाम्'** इति सूत्रे अतो लोपस्य स्थानिवत्त्वात् झलन्तत्वाभावान्नुमभाव इत्युक्त्वा, पिपठिषि ब्राह्मणकुलानीति रूपं साधयता कैयटेन **'क्वौ विधिं प्रति न स्थानिवदित्ययमर्थो व्यवस्थापयिष्यते, न तु क्वौ लुप्तं न स्थानिवदिति'** इति नपदान्तसूत्रस्थभाष्यं व्याख्यातम् । न च **'क्वौ लुप्तं न स्थानिवत्'** इत्यर्थानाश्रयणे **'यू स्व्याख्यौ नदी'** इत्यत्र भाष्ये कुमार्यै ब्राह्मणायेति क्विबन्तोदाहरणानुपपत्तिः,तत्र **'सर्वप्रातिपदिकेभ्यः-'** इति वार्तिकेन प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् कुमारीवाचरतीत्यर्थे क्विपि तदन्ताद्धातोः कर्तरि क्विब्विधानसंभवेन स्थानिवत्त्वशङ्काभावादेव तदुपपत्तेः । अत एव तत्र क्यजन्तात् धातोः कर्तरि क्विबिति व्याख्यानानन्तरम् **'क्वौ लुप्तं न स्थानिवत्'** इत्यर्थस्य **'दीधीवेवीटाम्'** इत्यत्र स्वेनैव निराकृतत्वात् स्थानिवत्त्वप्रसङ्गास्वारस्यात् **'अथ वा कुमारीवाचरतीत्याचारक्विबन्तात् कर्तरि क्विप्'** इचि पक्षान्तरमुक्तं कैयटेन । यत्तु- हरदत्तेन **'ख्यत्यात्परस्य'** इति सूत्रे सख्युरित्युदाहरणे **'क्वौ लुप्तं न स्थानिवत्'** इति स्थानिवत्त्वं परिहृतम्; यच्च **'भोभगो-'** इत्यत्र वृक्षव्शब्दस्य क्विबन्तत्वे संप्रसारणप्रसङ्गमुक्त्वा **'स्थानिवत्त्वं तु णेरत्र क्वौ लुप्तत्वान्न विद्यते'** इत्युक्तम् ; तदुभयमपि नपदान्तसूत्रे **'क्विलुगुपधात्व-'** इति वार्तिकव्याख्यानवसरे **'क्वौ यद्विधीयते तत्र कर्तव्ये यत्र कुत्रचित्कृतोऽजातदेशो न स्थानिवत्'** इति वार्तिकार्थमुक्त्वा तदुदाहरणानन्तरम् **'ये तु क्वौ लुप्तं न स्थानिवदिति पठन्ति, तेषामेतन्न स्यात्'**इत्यादिवाक्येन **'क्वौ लुप्तं न स्थानिवत्'** इत्यर्थाश्रयणे पिपठिषि ब्राह्मणकुलानीति रूपासिद्धिरूपदोषोद्भावनेन तं पक्षं निराकृत्य **'क्वौ विधिं प्रति न स्थानिवत्'** इत्यस्य पक्षस्य स्वेनैव समर्थि-

तत्वात् भाष्यकैयटविरुद्धम्, पिपठिषि ब्राह्मणकुलानीत्यत्रातिप्रसञ्जकम्, स्थलान्तरीयस्वव्याख्यानविरुद्धम्, पूर्वापरपर्यालोचनाविधुरमित्यनादरणीयमेव । यत्तु-सखीयतेः क्विप् सखीः, सख्युरिति तत्र काशिकायामुदाहृतम्; तदप्यनुपदोक्तभाष्यादिविरोधादेव **'क्वौ लुप्तं न स्थानिवत्'** इति नाश्रीयत इत्यतोऽनुपपन्नमेव। तस्मात् कुमार्यै ब्राह्मणायेति भाष्योदाहरणस्यान्यथोपपत्तेरुक्तत्वात् **'नैवं विज्ञायते क्वौ लुप्तं न स्थानिवदिति'** इति भाष्यस्य नैवमेवेत्यवधारणं परिकल्प्य तेन पक्षद्वयाङ्गीकारपरतया योजनमयुक्तमेवेति तृतीया ।।

यदि **'क्वौ लुप्तं न स्थानिवत्'** इति नाश्रीयेत; तदा **'ख्यत्वायात्परस्य'** इत्यत्र भाष्य एव विकृतनिर्देशप्रयोजनतया सखीयतेरप्रत्ययः सख्युः पत्युः लून्युरित्युदाहरणानुपपत्तिः, क्यचोऽतो लोपस्य स्थानिवद्भावेन विलोपात् परत्वाद्यणि वलि लोपप्रसङ्गात् । अत एव तत्र कैयटेनापि सख्युरित्युदाहरणे **'अत्र चोदयन्ति'** इत्यादिग्रन्थेन स्थानिकद्भावाद्यणादेशं वलि लोपं चाशङ्क्य **'क्वौ लुप्तं न स्थानिवत्'** इत्येव समाहितम् । तस्मादन्यथानुपपत्त्या **'नैवं विज्ञायते'** इति भाष्यं कथञ्चित्पक्षद्वयाङ्गीकारपरतयावश्यं योजनीयम् । अतस्तद्विरोधादेव **'दीधीवेवीटाम्'** इति सूत्रे **'क्वौ लुप्तं न स्थानिवत्'** इति पक्षस्य निराकरणेन पिपठिषि ब्राह्मणकुलानीति रूपसमर्थनं कैयटेन कृतं नपदान्तसूत्रे हरदत्तकृतं चानुपपन्नम्; उपपन्नं च 'ख्यत्यात्-' इति सूत्रे हरदत्तोक्तमिति चतुर्थी ।।

'ख्यत्यात्परस्य' इत्यत्र भाष्ये सखीयतेरप्रत्ययः सख्युः पत्युरित्युदाहरणान्यथानुपपत्त्या हि **'क्वौ लुप्तं न स्थानिवत्'** इत्यस्यार्थस्य कल्पनम्; तच्चान्यथोपपन्नम् । तथा हि - सखशब्दात् **'सुप आत्मनः क्यच्'** इति सुबन्तात्कर्मणो द्वितीयान्तात् क्यचि **'सनाद्यन्ता धातवः'** इति धातुसंज्ञायाम् **'सुपो धातुप्रातिपदिकयोः'** इति सुब्लुकि **'क्यचि च'** इति ईत्वे ततः कर्तरि क्विपि अल्लोपे यलोपे च विलोपात्परत्वात् क्यजल्लोपस्य स्थानिवत्त्वात् प्राप्तस्य यणो यलोपस्य च सुबन्तस्य पदसंज्ञायामङ्गकार्यत्वाभावेन **'न लुमताङ्गस्य'** इत्यप्रतिषेधात् **'सुप्तिङन्तं पदम्'** इति अन्तर्वर्तिविभक्तिमपेक्ष्य पदसंज्ञायां कानि सन्ति यानि सन्तीतिवत् **'न पदान्त-'** इति स्थानिवत्त्वनिधेधादेव निवृत्तिसंभवात् । न च वाच्यति तपस्यतीत्यादा-

विव **'नः क्ये'** नियमात्पदसंज्ञा न स्यादिति वाच्यम्, नान्ततुल्यजातीयस्य हलन्तस्य नियमेन पदसंज्ञानिवृत्त्यभ्युपगमात् । तस्मात् सख्युरित्युदाहरणे अनुपपत्त्यभावात् नपदान्तसूत्रे **'नैवं विज्ञायते'** इति भाष्यं क्लिष्टगत्या पक्षद्वयाङ्गीकारपरतया न योजनीयमिति स्थिते तद्भाष्यविरोधादेव सख्युरित्युदाहरणे **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रित्य समाधानं कैयटकृतमनुपपन्नम्, **'दीधीवेवीटाम्'** इत्यत्र स्वयंव्यवस्थापितार्थविरोधाच्च पूर्वापरपर्यालोचनाराहित्यस्य सुगमत्वात् । अतो न तदन्यथानुपपत्त्यापि तत्कल्पनमिति । अवश्यं च अन्तर्वर्तिविभक्त्यपेक्षपदान्तविषये **'न पदान्त-'**इति निषेधोऽङ्गीकर्तव्यः ;अन्यथा **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रयणेऽपि अमुमुईच इत्यादौ 'अचः' इत्यञ्चतेरल्लोपस्य स्थानिवत्त्वात् यण् स्यादिति पञ्चमी ।।

भवेदेवं हलादौ ; अजादौ तु **'आ कडारादेका संज्ञा'** इति नियमात्समानावधिकया **'यचि भम्'** इति भसंज्ञया पतसंज्ञाया निवृत्तत्वात् यणः पदान्तत्वेन विधानाभावात् **'न पदान्त-'** इति स्थानिवत्त्वनिषेधो न प्राप्नोति । न च स्वाद्युत्पत्त्यनन्तरं सखी अस् इत्यत्र असत्यपि स्थानिवत्त्वे यण एव प्राप्तिः। सा चेष्टैव । न तु वलि लोपस्य, स्वाद्युत्पत्तेः पूर्वमेव परत्वान्नित्यत्वादन्तरङ्गत्वाच्च विलोपस्य कृतत्वात् । अन्यथा तुल्यावधिकत्वाभावात् भसंज्ञया न पदत्वनिवृत्तिः स्यादिति वाच्यम्, 'लोपो व्योर्वलि' इत्यर्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यात् प्रत्यासत्त्या उत्तरसूत्रप्रतिपन्ने विप्रत्यये वलिलोपस्यावश्यकत्वसूचनेन कण्डूयतेः क्विपि परत्वात्प्राप्तमतो लोपं बाधित्वा अन्तरङ्गत्वाद्विलोपे कृते वर्णाश्रयस्यापि यलोपस्य प्रत्ययलक्षणेन प्रवृत्तिवदिहापि प्रत्ययलक्षणेन यलोपप्रसङ्गात् । न च प्रत्ययलक्षणेन वलि लोपाभ्युपगमे **'क्वौ लुप्तं न स्थानिवत्'** इति क्यचोऽतो लोपस्य स्थानिवत्त्वनिषेधात् तन्निमित्तस्य यणोऽभावेऽपि सख्युरितिं ङसि कृतस्य यणो लोपप्रसङ्ग इति वाच्यम्, अन्तर्भूतक्विबपेक्षे अन्तरङ्गे वलि लोपे बहिरङ्गस्य यणोऽसिद्धत्वेन लोपाप्रसङ्गात् । तथा च अजादौ क्यचोऽतो लोपस्य स्थानिवत्त्वनिषेधार्थं तदुदाहरणान्यथानुपपत्त्या **'क्वौ लुप्तम्-'** इत्यवश्यं कल्पनीयमिति षष्ठी ।।

यजादौ पूर्वमिति भसंज्ञायामल्लोपस्य स्थानिवद्भावात् भिन्नावधिकया भसंज्ञया पदसंज्ञाया बाधनाभावात् पदान्तत्वेन यणो विधानं प्रति 'न पदान्त-' इति स्थानिवत्त्वनिषेधादेव तदुदाहरणोपपत्तौ न त्वदुक्तकल्पनापेक्षेति सप्तमी ।।

'यचि भम्' 'तसौ मत्वर्थे' इत्यत्र पदपदमनुवर्त्य पदं सत् भसंज्ञं भवतीति भसंज्ञाया अपि जश्त्वादिवत् पदकार्यत्वमवश्यमभ्युपगन्तव्यं यजादौ मत्वर्थे च पूर्वस्य स्वरूपेण सिद्धस्यापि पदसंज्ञापूर्विकायां भसंज्ञायां कर्तव्यायां पदान्ततया विधानं प्रति न स्थानिकद्भवतीति स्थानिवत्त्वप्रतिषेधार्थम्; अन्यथा वेतस्वानित्यत्र **'कुमुदनडवेतसोभ्यो ड्मतुप्'** इति चातुरर्थिके ड्मतुपि डित्त्वात् टिलोपे **'मादुपधायाश्च-'** इति वत्वे **'तसौ मत्वर्थे'** इति भसंज्ञायां टिलोपस्य स्थानिवत्त्वात् सकारान्तभागे तदप्राप्तौ **'न पदान्त-'** इति स्थानिवत्त्वनिषेधात् स्वादौ पूर्वं पदमिति सान्तस्य पदत्वे रुत्वप्रसङ्गात् । सति च भसंज्ञायाः पदविधित्वे **'न पदान्त-'** इति स्थानिवत्त्वनिषेधात् सान्तस्य भसंज्ञाप्रवृत्तौ **'आ कडारादेका संज्ञा'** इति नियमात् पूर्वप्रवृत्तपदसंज्ञाबाधात् स्थानिवत्त्वनिषेधेन सकारान्तस्य भसंज्ञाप्रवृत्तिसंपादनमात्रेण चरितार्थायाः पदसंज्ञाया भसंज्ञया सह विकल्पासंभवाच्च वेतस्वानित्यत्र सर्वथा रुत्वाभावसिद्धिः । एवं च प्रकृतेऽपि भसंज्ञायां स्थानिवत्वषेधेदात् ईकारान्तभागस्य प्रवृत्तया भसंज्ञया प्रथमप्रवृत्तस्य पदत्वस्य बाधात् यणि स्थानिवत्त्वनिषेधाप्राप्तौ **'क्वौ लुप्तं न स्थानिवत्'** इत्यवश्यमाश्रयणीयमित्यष्टमी ।।

यदि भसंज्ञायाः पदकार्यत्वमभ्युपगम्येत, तदा अनुकम्पितः षडङ्गुलिदत्तः षडिक इति न सिध्येत् । तथा हि - षडङ्गुलिदत्तशब्दात् अनुकम्पार्थे **'बह्वचो मनुष्यनाम्नष्ठज्वा'**इति ठचि **'ठाजादावूर्ध्वं द्वितीयादचः'**इति ङ्गुलिदत्तशब्दस्य लोपे ठस्येकादेशे **'यस्येति च'** इत्यकारलोपे च भसंज्ञायां यस्येति लोपस्य स्थानिवत्त्वात् पदत्वानिवृत्त्या जश्त्वमिष्यते । तथा च वार्तिकम् **'यचि भम्'** इत्यत्र कात्यायनाचार्यस्य-**'भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः। सिद्धमचःस्थानिवत्त्वात्'**इति। पदत्वेन तुल्यावधिकत्वाभावान्न दोष इति तदभिप्रायः । तच्चास्मिन् पक्षे न युज्यते। न चैवं भसंज्ञायाः पदकार्यत्वानभ्युपगमे वेतस्वानिति रूपासिद्धिः,पदे अन्तःपदान्तः पदान्तविधिं प्रति न स्थानिवदित्यर्थाश्रयणात् भसंज्ञायामिव पदसंज्ञायामपि स्थानिवत्त्वानिषेधेन सान्तभागस्य पदत्वाभावेन रुत्वाप्रसङ्गात् । तस्मात् भसंज्ञायाः पदकार्यत्वानाश्रयत्वेन तस्यां स्थनिवत्त्वनिषेधाभावेन सखी अस् इत्यत्र भिन्नावधिकया भसंज्ञयापूर्वसिद्धस्य पदत्वस्याबाधनात्**'न पदान्त-'**इति स्थानिवत्त्वनिषेधादेव यणो वलि लोपस्य चाभावात् **'क्वौ लुप्तं न स्थानिवत्'** इति नाश्रयणीयमेवेति नवमी ।।

हन्तैवम् **'घट्टकुट्यां प्रभातम्'** । षडिकसिद्ध्यर्थं भसंज्ञायाः पदकार्यत्वमनभ्युपगच्छता त्वया वेतस्वानिति रूपसिद्धये पदे अन्तः पदान्तः पदान्तविधिं प्रति न स्थानिवदित्याश्रितम् । एवं च सख्युरित्यत्र यणि कर्तव्ये अल्लोपस्य स्थानिवत्त्वनिषेधालाभात् तदर्थम् 'क्वौ लुप्तं न स्थानिवत्' इत्यवश्यमाश्रयणीयमिति । **'उगिदचाम्-'** इति सूत्रे अधातुग्रहणप्रयोजनत्वेन गोमन्तमिच्छति गोमत्यति गोमत्यतेरप्रत्ययः गोमान् यवमानिति भाष्यकारेणोपन्यस्तस्योदाहरणस्यानुपपत्तिश्च ।।

एवं प्राप्ते ब्रूमः- सखीयतेः क्विपि सखी य व् इति स्थिते विलोपात्परत्वादल्लोपे अर्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यात् विलोपात्परस्मादपि पूर्वं यलोपे विलोपात्परत्वात् अल्लोपस्य स्थानिवत्त्वात् प्राप्ते यणि अन्तर्भूतक्यजकारपेक्षेऽन्तरङ्गे कर्तव्ये बहिर्भूतक्विबपेक्षस्य यलोपस्य बहिरङ्गस्यासिद्धतया व्यवधानादेव यणोऽप्राप्तौ न स्थानिवत्त्वप्रतिषेधापेक्षा ।।

अथ वा नपदान्तसूत्रेणैव स्थानिवद्भावनिषेधः । न च पदान्तस्य विधिं प्रति न स्थानिवदित्युच्यमाने वेतस्वानिति रूपासिद्धिः पदसंज्ञायां स्थानिवत्त्वनिषेधेन सान्तस्य पदत्वात् भसंज्ञायाश्च स्थानिवत्त्वेनाभावादिति वाच्यम्, पदं सत् भसंज्ञं भवतीति भसंज्ञायाः पदकार्यत्वाभ्युपगमे तस्यामपि स्थानिवत्त्वनिषेधेन प्रवृत्तया भसंज्ञया पदत्वस्य बाधात् । न चैवं षडिक इत्यत्रापि भसंज्ञया पदत्वबाधे जश्त्वाप्रसङ्ग इति वाच्यम्,**'शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्'**इत्यत्र **'सिद्धमेकाक्षरपूर्वपदानामुत्तरलोपवचनात्'** इत्युत्तरपदलोपवचनस्य द्वितीयादच ऊर्ध्वस्य लोपविषये भसंज्ञायां स्थानिवत्त्वज्ञापकत्वात् । तद्धि अनुकम्पितो वागाशीर्दत्तः वाचिक इत्यत्र अनुकम्पार्थे **'बह्वचो मनुष्यनाम्नष्ठज्वा'** इति ठचि **'ठाजादावूर्ध्वं द्वितीयादचः'** इति शीर्दत्तशब्दस्य लोपे **'यस्येति च'** इत्याकारलोपे च तस्य स्थानिवत्त्वेन गान्तभागस्य भसंज्ञाया अभावात् पूर्वसिद्धपदत्वानिवृत्त्या गकारश्रवणप्रसङ्गात् स्थानिवत्त्वाभावेन गान्तभागस्य भसंज्ञार्मुत्तरपदलोपवचनम् । तच्चानर्थकम्, भसंज्ञायाः पदकार्यत्वाभ्युपगमेन द्वितीयादच ऊर्ध्वस्य लोपे **'यस्येति च'** इति लोपेऽपि तस्य **'न पदान्त-'** इति स्थानिवत्त्वनिषेधेन गान्तस्य भसंज्ञायां पदत्वनिवृत्त्या कुत्वजश्त्वयोर्निवृत्तेः । अतस्तत् ज्ञापयतिद्वितीयादच ऊर्ध्वस्य लोपे भसंज्ञायां

पदत्वानिवृत्तये अस्ति स्थानिवत्त्वमिति । ततश्च वाचिकसिद्ध्यर्थमुत्तरपदलोपवचनम् । एवं च एकाक्षरपूर्वपदत्वेऽपि **'षषष्ठाजादिवचनात्सिद्धम्'** इति द्वितीयवचनेन द्वितीयादच ऊर्ध्वस्य लोपे भसंज्ञायां स्थानिवत्त्वेन षडिकसिद्धिर्निष्प्रत्यूहा। अत एव वाचिकषडिकसिद्धौ पाणिनीयसूत्रविन्यासादधिकयत्नस्यावश्यकर्तव्यत्वेन तत एव तत्सिद्धौ षडिकासिद्धिमगणयता भगवता भाष्यकारेणोक्तम् - 'अथवा यथैवान्यान्यपि पदकार्याण्युपप्लुवन्ते रुत्वं जश्त्वमिति, एवमिदमपि पदकार्यमुपप्लोष्यते । किम्? भसंज्ञा नाम' इति ।।

नन्वेवं स्वाद्युत्पत्तेः पूर्वम् **'न पदान्त-'** इति स्थानिवत्त्वनिषेधलाभेनापि वेतस्वानिति सिद्धये भसंज्ञायाः पदकार्यत्वस्यावश्यमभ्युपगन्तव्यत्वेन स्वाद्युत्पत्त्यनन्तरं सखी अस् इत्यत्र भसंज्ञायामपि स्थानिवत्त्वनिषेधेन ईकारान्तभागस्य प्रवृत्तया भसंज्ञया सह प्रवृत्तस्य प्रथमप्रवृत्तस्य च पदत्वस्य बाधादीकारस्य यणि कर्तव्ये **'न पदान्त-'** इति स्थानिवत्त्वनिषेधाभावात् तदर्थम् **'क्वौ लुप्तं न स्थानिवत्'** इति अवश्यमाश्रयणीयम् । न च परत्वान्नित्यत्वादन्तरङ्गत्वात्प्रतिपदविधित्वाच्च स्वादीनामुत्पत्तेः पूर्वमेव विलोपे स्थानिवद्भावात्तदनन्तरं सत्यपि यणि न दोषः, वलि यलोपस्य वर्णाश्रयत्वेन प्रत्ययलक्षणाभावादप्राप्तेः यणश्चेप्यमाणत्वादिति वाच्यम्, **'लोपो व्योर्वलि'** इत्यर्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यात् कण्डूर्लोलूरित्यत्रान्तरङ्गत्वात्प्रतिपदविधित्वाच्च परमप्यतो लोपं बाधित्वा विलोपे अतो लोपे च कृते वर्णाश्रयेऽपि प्रत्ययलक्षणेन वलि लोपवत् इहापि यलोपप्रसङ्गात् भगवता भाष्यकारेण अतो लोपं बाधित्वा विलोपे अतो लोपे च कृते वर्णाश्रये च प्रत्यये **'लोपो व्योर्वलि'** इत्यत्र **'यदि पुनर्वर्णाश्रयाण्यपि कानिचित्कार्याणि प्रत्ययलक्षणेन भवन्ति'** इत्यादिग्रन्थेन क्वौ प्रत्ययलक्षणेनैव वलि लोपस्याश्रितत्वादिति चेत्; उच्यते- अर्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यक्लृप्तेन क्वौ वलि लोपस्यावश्यकत्वेनानुपपद्यमानेन 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यत्र श्रुतस्य **'वर्णाश्रये नास्ति प्रत्ययलक्षणम्'** इत्येतदर्थप्रतिपादकस्य द्वितीयस्य प्रत्ययग्रहणस्य बाधकल्पनात् वरं विलोपात्परस्मान्नित्यादपि वलि लोपस्य बलवत्त्वेन पूर्वप्रवृत्तिकल्पनम्, अबाधेनैवोपपत्तौ बाधकल्पनस्यान्याय्यत्वात् । एवं च कण्डूर्लोलूरित्यत्र वार्णादाङ्गस्य बलवत्त्वेन अन्तरङ्गात्प्रतिपदविधेरपि विलोपात्पूर्वमतो लोपे विलोपयलोपयोर्युगपत्प्राप्तयोः

परस्मान्नित्यादपि विलोपात्पूर्वं यलोपः, ततो विलोप इति सिद्धं कण्डूर्लोलूरिति । तस्मात् क्वौ वलि लोपे प्रत्ययलक्षणस्यानाश्रयणात् परत्वादिहेतुभिः स्वाद्युत्पत्तेः पूर्वं विलोपे कृते तदनन्तरं भसंज्ञया पदत्वनिवृत्तौ स्थानिवद्भावात्सत्यपि यणि न दोषः। भाष्यकारेण क्वौ प्रत्ययलक्षणाश्रयणं तु **'व्योर्लोपे क्वावुपसंख्यानम्'** इति वार्तिक-प्रत्याख्यानदिक्प्रदर्शनमात्रम् । अत एव **'यदि पुनर्वर्णाश्रयाणि-'**इति यद्यर्थोक्तिः। तस्मात् सख्युरिति भाष्योदाहरणे स्वाद्युत्पत्तेः पूर्वम् **'न पदान्त-'** इति स्थानिव-त्त्वनिषेधेन यण्यलोपयोरभावेन तदनन्तरं यजादौ भसंज्ञया पदत्वनिवृत्तौ स्थानिव-त्त्वेन सत्यपि यणि यलोपाप्रसङ्गात् न तदुदाहरणान्यथानुपपत्त्या **'नैवं विज्ञायते-'** इति भाष्यं पक्षद्वयाङ्गीकारपरतया योजनीयमिति स्थितम् ।।

अथवा **'तसौ मत्वर्थे'** इति भसंज्ञैव पदकार्यमभ्युपगम्यते, आकाङ्क्षावशा-न्मण्डूकप्लुत्या वा तत्रैव पदसंज्ञानुवृत्तौ तावतैव वेतस्वानिति रूपसिद्धेः । एवं च **'यचि भम्'** इति भसंज्ञायां स्थानिवत्त्वानिषेधेन षडिकसिद्धावुत्तरपदलोपवचनस्य न ज्ञापकत्वकल्पनापेक्षा । प्रकृतेऽपि सखी अस् इत्यत्र भसंज्ञायां स्थानिवद्भावात् तुल्यावधिकत्वाभावेन पूर्वसिद्धपदत्वानिवृत्त्या **'न पदान्त-'** इति स्वाद्युत्पत्त्यन-न्तरमपि क्यजकारलोपस्य स्थानिवत्त्वनिषेधात् तदपेक्षस्य यणोऽभावः ।।

भवतु वा **'यचि भम्'** इति भसंज्ञाया अपि पदकार्यत्वम् । तथापि तस्यां स्थानिवत्त्वानिषेधः । **'न पदान्त-'** इत्यत्र हि पदान्तस्य विधानं प्रति न स्थानिव-दिति भावसाधनो विधिशब्द आश्रितः । पदान्तस्य च विधानं द्वेधास्वरूपतोऽसिद्ध-स्यैव पदान्तस्य क्वचिद्विधानात्; यथा कानि सन्ति कौ स्त इत्यत्र । क्वचित्तु स्वरू-पतः सिद्धस्यैव अपूर्वपदसंज्ञाविधानात्; यथा वेतस्वानित्यत्र स्वरूपतः सिद्धस्यैव सकारस्यापूर्वपदसंज्ञाविधानात्; यथा वेतस्वानित्यत्र स्वरूपतः सिद्धस्यैव सकार-स्यापूर्वपदसंज्ञाविधानात् विशेषणविधानादपि विशिष्टविधानमिति पदान्तस्य विधान-मिति । इह तूभयरूपाभावः ; षडिकः सख्युरित्यत्र षकारेकारयोरन्तर्वर्तिविभक्त्या स्वरूपतः पदान्तत्वेन च सिद्धयोः 'यचि भम्' इति भसंज्ञायां पदसंज्ञापूर्विकायामपि कर्तव्यायां पदान्तविधानाभावात्स्थानिवत्त्वानिषेधेन भिन्नावधिकया भसंज्ञया पूर्व-सिद्धपदत्वस्याबाधात् जश्त्वानिवृत्त्या षडिकसिद्धिः, **'न पदान्त-'** इति स्थानिव-

त्त्वनिषेधाच्च यणभावः। एवं च **'यू ख्याख्यौ नदी'** इत्यत्रोपन्यस्ते **'कुमार्यै ब्राह्मणाय'** इत्युदाहरणे **'क्यजन्तात्कर्तरि क्विप्'** इति यत्प्रथमव्याख्यानं कैयटस्य, तदप्युपपद्यते । एवं सति **'लोपो व्योर्वलि'** इत्यत्र क्वौ प्रत्ययलक्षणेन यलोपाश्रयणेऽपि न दोषः, क्यजकारलोपस्य स्थानिवद्भावाभावात् विभक्तिनिमित्ते सत्यपि यणि क्विप्प्रत्ययनिमित्ते वलि लोपे यणोऽसिद्धत्वेन वलि लोपाप्रसङ्गात् ।।

नन्वेवमपि **'क्वौ लुप्तं न स्थानिवत्'** इत्यनङ्गीकारे कुमार्यै ब्राह्मणायेति क्यजन्तात् क्विबन्तोदाहरणानुपपत्तिः, यणि कर्तव्ये **'न पदान्त-'** इति निषेधेऽपि **'आण्नद्याः'** इति आड्विधेरपदान्तविधित्वेन स्थानिवत्त्वानिषेधात् पूर्वस्मादुत्तरस्य विधिं प्रत्यपि बेभिदिता 'मातिथिकः' अपीपचन्नित्येतत्सिद्ध्यर्थ स्थानिवद्भावस्य भाष्यकारेण तत्राश्रितत्वात् आड्विधौ क्यजकारलोपस्य स्थानिवत्त्वेन व्यवधानान्नद्या उत्तरस्य ङितो विधीयमानस्याटोऽप्राप्तेः । न च नद्यन्तादङ्गाद्विहितस्य ङिद्वचनस्य आडागम इति नदीग्रहणस्य षष्ठ्यन्तस्य विहितविशेषणत्वविज्ञानेन नद्युत्तरत्वानाश्रयणात् आटि कर्तव्ये सत्यपि स्थानिवत्त्वे आट् भवत्येवेति वाच्यम्, **'ङ्याप्प्रातिपदिकात्'** इत्यधिकृत्य स्वादिविधानेऽपि पूर्वस्मादुत्तरस्य विधिं प्रति स्थानिवद्भावात् नद्यन्ताद्विधानाभावेन नदीग्रहणस्य विहितविशेणत्वपक्षेऽपि आटोऽप्राप्तेरिति चेत्, उच्यते- पूर्वस्मादुत्तरस्यापि विधिं प्रति स्थानिवद्भावस्य प्रयोजनाभावेनानाश्रयणात् । न तावत् बेभिदितेत्यत्र बेभिद्यशब्दात् यडन्तात् तृचि परमपीटं बाधित्वा नित्यत्वादल्लोपयलोपयोः कृतयोः तृच्प्रत्ययस्य **'एकाच उपदेशेऽनुदात्तात्'**इति इट्प्रतिषेधः स्यात्, अल्लोपस्य स्थानिवद्भावात् व्यवधानात् तन्निवृत्तिः प्रयोजनम्, कृतयोरप्यल्लोपयलोपयोः तृचो वलादित्वेन स्वत एव इटः प्राप्तेरविघातात् इटोऽपि नित्यत्वेन परत्वादल्लोपयलोपाभ्यां पूर्वमेव इट्सिद्धेः, तस्यां दशायाम् **'एकाच उपदेशेऽनुदात्तात्'** इति इट्प्रतिषेधस्य प्राप्त्यभावात्, **'पूर्वं ह्यपवादाः प्रवर्तन्ते पश्चादुत्सर्गाः'** इति न्यायः प्रकृते अङ्गीक्रियते, न तु **'परिहृत्यापवादविषयं तत उत्सर्गोऽभिनिविशते'** इति कृतयोरल्लोपयलोपयोः **'एकाच उपदेशेऽनुदात्तात्'** इति इट्प्रतिषेधात् इट् नित्य इति, **'यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम्'**इति न्यायात् । नापि मथितं पण्यमस्य मातिथिक इत्यत्र ठस्येकादेशे **'यस्येति च'** इति लोपे च इकादेशस्य **'स्थानिवदादेशः-'** इति स्थानिवद्भावात्

'इसुसुक्तान्तात्कः'इति प्राप्तवतः कादेशस्य तान्तात्पूर्वस्मात्परस्य ठस्य कादेशं प्रति **'यस्येति च'** इति लोपस्य स्थानिवद्भावात् निवृत्तिः प्रयोजनम्, अजादिसंनिपातनिमित्तः **'यस्येति च'** इति लोपस्तदविघातकस्य कादेशस्य निमित्तं न भवतीति संनिपातपरिभाषयैव कादेशनिवृत्तिसंभवात् **'ठस्येकः'** इत्यत्र वर्णनिर्देशपक्षे तान्तादङ्गात्परस्य ठकारस्य कादेशविधानेन अल्विधित्वेन स्थानिवत्त्वाभावाच्च । नापि अपीपचन्नित्यत्र पचेर्णिजन्तात् लुङि चङि णिलोपे चङ्कारान्त्यकारयोरेकादेशे तस्यादिवद्भावात् **'सिजभ्यस्तविदिभ्यश्च'** इति प्राप्तवतो झेर्जुसादेशस्य णिलोपैकादेशयोः स्थानिवद्भावेन निवृत्तिः प्रयोजनम्; अभ्यस्तग्रहणस्य सिच्साहचर्येऽपि परत्वाद्बलवतो लङ्नियतविदिसाहचर्यात् लङ्विषयत्वविज्ञानादेव जुसादेशनिवृत्तिसिद्धेः लङोऽन्यत्र विदेश्च अव्यवहितस्य झेरसंभवात्, अन्यथा अबोभूवन्नित्यत्र यङ्लुगन्तात् लुङि झेर्जुसादेशप्रसङ्गात् । न च तत्र परत्वात् **'यस्य हलः'** इत्यत्र **यस्येति** योगविभागाद्वा अन्तरङ्गं प्रतिपदविधिम् अपवादमपि लुकं बाधित्वा अतो लोपे तस्य स्थानिवद्भावात् व्यवधानात् झेर्जुसभाव इति वाच्यम्, **'यस्येति'** इति योगविभागात् यङ्लुकि अतो लोपाङ्गीकारे तस्य स्थानिवद्भावादेव जङ्गमः, जङ्घनः, चङ्खनः दरीदृशः, देद्यः, सनीस्रंसः, दनीध्वंसः, इत्यादिषु **'गमहनजनखनघसां लोपः क्ङित्यनङि' 'ऋदृशोऽङि गुणः' 'दीङो युडचि क्ङिति' 'अनिदितां हल उपधायाः क्ङिति'** इत्यादिभिः सूत्रैः उपधालोपगुणयुडुपधानकारलोपादिप्रसङ्गात् । अतएव धातुवृत्तौ विदिसाहचर्यात् अभ्यस्तग्रहणस्य लङ्विषयत्वविज्ञानादेव अबोभूवन्नित्यत्र लुङि जुसभावः समर्थितः । नापि तन्वन्तीत्यत्र उप्रत्ययस्य यणि कृते प्राप्तस्य वलादिलक्षणस्येटो निवृत्तिः पूर्वस्मात्परस्यापि विधौ स्थानिवद्भावाश्रयणस्य फलम् **'आर्धधातुकस्येड्वलादेः'** इत्यत्र अङ्गाधिकारात् अङ्गात्परस्यार्धधातुकस्य इड्विधानेन पूर्वस्मादङ्गात्परस्यार्धधातुकस्य इड्विधिं प्रति अजादेशस्य यणः स्थानिवद्भावेन वलादित्वाभावादिण्निवृत्तेः सुवचत्वादिति वाच्यम्, अन्तरङ्गे इटि कर्तव्ये बहिर्भूतप्रत्ययापेक्षस्य बहिरङ्गस्य यणोऽसिद्धत्वेन वलादित्वाभावादेवइण्निवृत्तेः। **'अचः परस्मिन् पूर्वविधौ'** इत्यत्र भाष्ये बेभिदितेत्यादिप्रयोजनोपन्यासेन पूर्वस्मादप्युत्तरस्य विधिं प्रति स्थानिवद्भावाश्रयणं तु निस्तात्पर्यकमेव । तथा हि - तत्र विधिग्रहणस्य प्रयोजनप्रश्ने बेभिदितेत्यादिसिद्धये सर्वविभक्त्यन्तसमासविज्ञानेन पूर्वस्मादपि विधौ स्थानिवद्भावः प्रयोजनमुपन्यस्तम् । ततश्च तत्प्रयोजनप्रत्याख्या-

नपरे **'नैतानि सन्ति प्रयोजनानि'** इत्युत्तरग्रन्थे बेभिदितेत्यादीनामन्यथासिद्धत्वेऽपि तत्परीक्षां विनैव, यदि पूर्वस्मादपि विधौ स्थानिवद्भाव इह शास्त्रे अपेक्षितः तदा **'अचः परस्मिन्पूर्वस्य'** इति संबन्धसामान्ये षष्ठीसमाश्रयणेनापि तल्लाभात् नैतद्विधिग्रहणस्य प्रयोजनं भवितुमर्हतीति पूर्वस्मादपि विधौ स्थानिवद्भावाश्रयणस्य कृत्वाचिन्तयैव प्रवृत्तत्वात्; अन्यथा उक्तप्रयोजनानामन्यथासिद्धत्वेन गौरवमात्रफलकस्य तस्याश्रयणानुपपत्तेः ।।

भवतु वा पूर्वस्मादप्युत्तरस्य विधिं प्रति स्थानिवद्भावः। न च कुमार्यै ब्राह्मणायेत्यत्र स्थानिवद्भावेन व्यवधानात् आटोऽप्राप्तिः, नदीग्रहणस्य षष्ठ्यन्तत्वेन विहितविशेषणत्वविज्ञानात् । न च प्रत्ययविधानेऽपि स्थानिवत्त्वम्, **'अचः परस्मिन्पूर्वविधौ'** इत्यत्र निमित्तादादेशाद्वा पूर्वत्वविज्ञाने वैयाकरणः सौवश्व इत्यत्र यणः स्थानिवत्त्वात् आयावोः प्राप्तिमाशङ्क्य भगवता वार्तिककारेण **'अचः पूर्वत्वविज्ञानादैचोः सिद्धम्'** इति अनादिष्टादचः पूर्वत्वस्य समाश्रितत्वात् तत्र अजादेशस्य स्थानिवद्भावदशायामचः पूर्वस्य विधानासंभवेन कर्मसाधनविधिशब्दस्यावश्यमाश्रयणीयत्वात् प्रत्ययविधानकाले अचः पूर्वस्मादुत्तरस्य विधीयमानकार्याभावेन स्थानिवत्त्वाप्रसक्तेर्नद्यन्तादेव प्रत्ययविधानात् । तस्मात् न कुमार्यै ब्राह्मणायेत्यत्र क्यजन्तात् क्विबिति व्युत्पादनानुपपत्तिः; नापि सख्युरित्युदाहरणान्यथानुपपत्त्या **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रयणीयम् ।।

न च **'उगिदचां सर्वनामस्थानेऽधातोः'** इति सूत्रे अञ्चतिग्रहणस्य नियमार्थत्वादेव धातुव्यावृत्तिसिद्धौ अधातुभूतपूर्वस्य संप्रति धातोर्नुमर्थमधातुग्रहणं व्यवस्थाप्य भाष्यकारेणोपन्यस्तस्य गोमन्तमिच्छति गोमत्यति गोमत्यतेरप्रत्यये गोमान् यवमान् इति रूपस्यानुपपत्तिः, **'क्वौ लुप्तं न स्थानिवत्'** इत्यानाश्रयणेन नुमि **'अत्वसन्तस्य-'** इत्युपधादीर्घे च क्यचोऽतो लोपस्य स्थानिवद्भावादिति वाच्यम्, अधातुभूतपूर्वस्य नुमर्थमारब्धाधातुग्रहणसामर्थ्यादेव स्थानिवद्भावबाधनात् । न च गोमानिवाचरति गोमतति, गोमततेरप्रत्ययः गोमान् यवमानित्यत्र स्थानिवद्भावबाधनं विना चरितार्थस्याधातुग्रहणस्य क्यजन्तधातौ न तद्बाधकत्वमिति वाच्यम्, अञ्चुधातुतुल्यजातीयस्य औपपदेशिकधातोः उखास्रत् इत्यादावेव नियमाश्रयणादपि

प्रत्ययान्तधातुमात्रस्य नुमागमव्यावृत्त्यभावेन स्वविषये स्थानिवद्भावबाधनं विना तस्य प्रयोजनान्तराभावात् । न चैवमपि क्यजन्ते गोमानित्यत्र **'अत्वसन्तस्य-'** इत्युपधादीर्घविधौ स्थानिवद्भावभावाय **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रयणीयमिति वाच्यम्, **'न पदान्त-'** इति दीर्घविधौ स्थानिवत्त्वनिषेधात् । न च **'न पदान्त-'** इति सूत्रे पापच्यतेः पापक्तिः यायष्टिरित्यादौ कुत्वादिषु कर्तव्येषु स्थानिवत्त्वनिषेधार्थम् **'पूर्वत्रासिद्धे न स्थानिवत्'** इति वार्तिकमाश्रित्य वरेयलोपस्वरवर्जं द्विर्वचनादिषु स्थानिवत्त्वनिषेधारम्भस्य प्रत्याख्याततवादाष्टमिकदीर्घादन्यत्र स्थानिवत्त्वनिषेधो न भविष्यतीति वाच्यम्,**'द्विर्वचनादीनि च प्रयोजनानि न पठितव्यानि भवन्ति। पूर्वत्रासिद्धेनैव सिद्धानि भवन्ति'** इत्यत्र आदिग्रहणस्य पूर्वोत्तरसंदर्भेण प्रकारार्थत्वसूचनेन पूर्वत्रासिद्धीयानामेव प्रत्याख्यानेन दीर्घविधौ स्थानिवत्त्वनिषेधप्रत्याख्यानतात्पर्यावश्यंभावाभावात्। **'मपर्यन्तस्य'**इति सूत्रे भाष्यकारेण**'मान्तस्येत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवैते आदेशाः स्युः'** इति ग्रन्थेन युष्मदस्मदोः **'तत्करोति तदाचष्टे'** इति णिचि तदन्तात् क्विपि णिलोपे च मान्तयोस्त्वाहाद्यादेशान्यथानुपपत्त्यापि न **'क्वौ लुप्तं न स्थानिवत्'** इत्याश्रयणीयम्, मान्तयोर्युष्मदस्मदोस्त्वाहाद्यादेशा इति वचनसामर्थ्यादेव स्थानिवद्भावबाधस्य प्रतिपत्तुं शक्यत्वात् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीमहाव्रतयाजिश्रीमदप्पयमखिवरविरचितायां पाणिनीयवादनक्षत्रमालायां क्वौ लुप्तं न स्थानिवदित्यर्थस्य निराकरणसमर्थः श्रवणनक्षत्रवादः समाप्तः ।।

।। श्रीः ।।

अथ यदुक्तम्- अन्तर्भूतक्यजकारापेक्षेऽन्तरङ्गे यणि कर्तव्ये बहिर्भूतक्विबपेक्षस्य बहिरङ्गस्य वलि लोपस्य असिद्धत्वाद्यणभाव इति; तन्नोपपद्यते, **'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः'** इति परिभाषया बहिरङ्गपरिभाषाया निषेधादित्येतत्प्रसङ्गात्कथान्तरं प्रस्तूयते--

'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः' इत्येतस्याः परिभाषायाः क्वचिद्ग्रन्थे, यत्रान्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यमाश्रीयते तत्र बहिरङ्गपरिभाषा न प्रवर्तत इत्यर्थो व्याख्या-

यते; क्वचित्तु यत्रान्तरङ्गे अचोरानन्तर्ये तत्र बहिरङ्गं नासिद्धमिति प्रतीयते । अतो विप्रतिपत्तिः । तत्र अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गं नासिद्धमिति न्याय्यम्, **'न धातुलोप आर्धधातुके'** इत्यत्र भाष्यकारेण आर्धधातुकग्रहणस्य लोपविशेषणत्वे उपेद्धः प्रेद्ध इत्यत्र अनार्धधातुकनिमित्तस्यापि आद्गुणस्य प्रतिषेधः स्यादित्याशङ्क्य एकपदाश्रयत्वादन्तरङ्गे प्रतिषेधे कर्तव्ये पदद्वयाश्रयस्य बहिरङ्गस्य गुणस्यासिद्धत्वा-त्प्रतिषेधाभाव इति परिहृतत्वात् । अन्तरङ्गबहिरङ्गयोर्यत्र क्वचिदजानन्तर्याश्रयण-मात्राश्रयणेन बहिरङ्गपरिभाषानिषेधे हि तत्समाधानानुपपत्तिः । अत एव कैयटेनापि **'नाजानन्तर्ये-'** इति निषेधात्कथं परिभाषाप्रवृत्ति' इत्याशङ्क्य **'यत्र कार्यविधौ-'** इत्यादिना 'अस्मिंस्तु प्रतिषेधसूत्रे नास्त्यचोरानन्तर्याश्रयणमित्यदोषः' इत्यन्तेन ग्र-न्थेन अक्षद्यूरिति दृष्टान्तमुपन्यस्य, अन्तरङ्ग एवाजानन्तर्याश्रयणे बहिरङ्गपरिभाषा-निषेधो नान्यत्रेत्यभिप्रायेण समाहितमिति प्रथमा कक्ष्या ।।

यदि अन्तरङ्गबहिरङ्गयोरजानन्तर्याश्रयणमात्रेण बहिरङ्गपरिभाषानिषेधो न स्यात्, तदा **'अदसो मात्'** इत्यत्र 'मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेश-प्रतिषेधः'इति वार्तिककारेणोपन्यस्तम् 'मात्' इति सूत्रविन्यासे अमी अत्र अमू अत्र अमी आसते अमू आसाते इत्युदाहरणेषु मुत्वमीत्वयोरसिद्धत्वात् अयादिप्रसञ्जन-मनुपपन्नं स्यात्,एकपदाश्रितत्वेन अन्तरङ्गेषु मुत्वादिषु पदद्वयाश्रयत्वेन बहिरङ्गाणा-मयादीनामसिद्धत्वेन पूर्वाभावेन 'पूर्वत्रासिद्धम्' इत्यस्याप्रवृत्तेः । अतस्तदन्यथानुप-पत्त्या बहिरङ्गेऽप्यजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधोऽवश्यमभ्युपगन्तव्यः।अत एव तत्र कैयटेनापि इममर्थमाशङ्क्य, **'नाजानन्तर्ये-'** इति बहिरङ्गपरिभाषानिषेधात्' इत्येव परिहृतः । अत एव हरदत्तेनापि **'च्छ्वोः शूडनुनासिके च'** इत्यत्र प्रसङ्गात् 'यत्रान्तरङ्गे बहिरङ्गे वा अचोरानन्तर्यमाश्रीयते तत्र बहिरङ्गपरिभाषा न प्रवर्तते' इति **'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः'** इत्येतत्परिभाषार्थो व्याख्यातः । 'षत्वतुकोरसिद्धः' इत्यत्रापि 'यत्रान्तरङ्गस्य बहिरङ्गस्य वा अचोरानन्तर्यं निमित्तत्वेनाश्रितम्, तत्र बहि-रङ्गपरिभाषा न भवति' इति तेनैव तत्परिभाषार्थो व्याख्यातः । धातुवृत्तावपि श्य-न्विकरणादौ एवंविध एतत्परिभाषार्थो व्याख्यातः- 'अचोरानन्तर्यं यत्रान्तरङ्गे बहि-रङ्गे वा विधावाश्रीयते,न तत्र असिद्धं बहिरङ्गमन्तरङ्ग इति परिभाषा प्रवर्तते' इति। यत्तु- **'नधातुलोपे-'** इत्यत्र भाष्यकृता बहिरङ्गे अजानन्तर्याश्रयणेऽपि बहिरङ्गपरि-

भाषया गुणनिषेधपरिहारः कृतः, तदहृदयवचनमेव; न हि तत्र अन्तरङ्गे गुणनिषेधे कर्तव्ये बहिरङ्गस्यासिद्धत्वात् गुणसिद्धिः, गुणशास्त्रस्यासिद्धत्वान्निषेध्याभावान्निषेधानिर्वृत्तावपि गुणशास्त्रस्यासिद्धत्वेनैव स्वकार्याप्रवर्तनात्, यावद्गुणशास्त्रप्रवृत्ति निषेधशास्त्रस्यापि प्रवृत्त्या तस्यासिद्धत्वात् । न च गुणशास्त्रं निषेधशास्त्रदृष्ट्या हि असिद्धम्; स्वतस्तु सिद्धमेवेति वाच्यम्, प्रतिपत्तुर्वैयाकरणस्य गुणशास्त्रोपस्थितिसमये निषेधशास्त्रस्याप्युपस्थित्या तत्काले तया बहिरङ्गपरिभाषया गुणशास्त्रस्यासिद्धत्वज्ञानेन गुणनिर्वृत्तिबुद्ध्यभावादसाधुत्वभ्रमापत्तेः । तस्मान्नैव विशेषः- गुणशास्त्रस्य निषिद्धत्वेन वा असिद्धत्वेन वा बाधात् तच्छास्त्रं स्वकार्यं न प्रवर्तयतीति । दृश्यते हि तत्र सूत्रस्यैवोपरि प्रत्याख्यास्यमानत्वात् सूत्रार्थवेलायामेवंजातीयकमेव परीक्षारहितमनादराधिकं वचनं भाष्यकारस्य । यथा- तत्रानुपदमेवार्धधातुकग्रहणस्य प्रयोजनप्रश्नानन्तरम् **'त्रिधा बद्धो वृषभो रोरवीति'** इति प्रत्युदाहरणम्; तदपरीक्ष्यैव 'किं पुनः-' इत्यादिविचारान्तरारम्भश्च । तत्र आर्धधातुकग्रहणस्य लोपगुणवृद्ध्युभयविशेषणत्वाभ्युपगमेऽपि भेद्यत इत्येतदर्थमवश्याश्रयणीयेन अन्यपदार्थनिर्देशकस्य आर्धधातुकपदस्याभावेऽपि **'एकाचो द्वे प्रथमस्य'** इत्यत्र एकाच्पद इव वक्तुं शक्येन बहुव्रीहिनिर्देशेनैव रोरवीतीत्यत्र निषेधाप्रसक्तेः **'क्ङिति च'** इत्युत्तरसूत्रे च 'अथ वा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं तदनवकाशम्' इति आर्धधातुकग्रहणानर्थक्यस्य स्वयमेव वक्ष्यमाणत्वाच्च तत्र परीक्षाराहित्स्यावगन्तुं शक्यत्वात् । भाष्यप्रदीपस्थमाक्षेपसमाधानमपि यथामूलहृदयमेव प्रवृत्तमिति । अत एव 'न धातुलोपे-' इत्यत्र हरदत्तेन उपेद्ध इत्यत्र गुणनिषेधे गुणस्यासिद्धत्वमाशङ्क्य **'नाजानन्तर्ये-'** इति निषेधादसिद्धत्वाभाव उक्त इति द्वितीया ।।

अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधः, न बहिरङ्गे । न च **'अदसो मात्'** इत्यत्र **'मात्प्रगृह्यसंज्ञायाम्-'** इति वार्तिकेन अमी आसत इत्यादौ अयादिप्रसञ्जनानुपपत्तिः, अमी अत्रेत्यादौ अयादीनां मुत्वादीनां च युगपत्प्रसक्तिसमये समकालमुपस्थितयोः **'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे'** **'पूर्वत्रासिद्धम्'** इत्यनयोर्विप्रतिषेधे **'विप्रतिषेधे परं कार्यम्'** इति परत्वात्प्रवृत्तेन पूर्वत्रासिद्धत्वेन बहिरङ्गासिद्धत्वस्य बाधनात् । बहिरङ्गासिद्धत्वं हि **'वाह ऊठ्'** इत्यत्र ज्ञापितत्वात्पूर्वम् । यथा बहिरङ्गासिद्धत्वे पूर्वाभावात् **'पूर्वत्रासिद्धम्'** इत्यस्या-

संभवः, तथा पूर्वत्रासिद्धत्वे अन्तरङ्गाभावाद्बहिरङ्गासिद्धत्वस्याप्यसंभव इत्युभयासंभवरूपविप्रतिषेधस्यापि सत्त्वात् । न च 'पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य' इति न्यायात् बहिरङ्गासिद्धत्वे कर्तव्ये पूर्वत्रासिद्धत्वस्यैवासिद्धत्वात् अयादिप्रसञ्जनानुपपत्तिः, 'पूर्वत्रासिद्धमधिकारः परस्य परस्य पूर्वत्र पूर्वत्रासिद्धत्वविज्ञानार्थम्' इति वार्तिककारेण तस्याधिकारत्वव्यवस्थापनात्तत उत्तरसूत्राणामेवासिद्धत्वेन तस्यैवासिद्धत्वाभावात् स्वात्मनि क्रियाविरोधाच्च । अतो न तत्रायादिप्रसञ्जनान्यथानुपपत्त्या बहिरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधकल्पनं युक्तम्। यत्तु तत्र कैयचेन **'नाजानन्तर्ये-'** इति बहिरङ्गपरिभाषाया निषेध इति परिहृतम्, तत् **'न धातुलोपे-'** इत्यत्रत्यभाष्यविरोधात् तत्रत्यस्वव्याख्यानविरोधाच्चोपेक्ष्यम्। न धातुलोपसूत्रे हरदत्तवचनमपि तद्भाष्यविरोधादनादरणीयमिति तृतीया।।

मा भूत् **'अदसो मात्'** इत्यत्र अयादिप्रसञ्जनान्यथानुपपत्त्या बहिरङ्गाजानन्तर्याश्रयणे बहिरङ्गपरिभाषनिषेधस्य तत्परिभाषार्थत्वकल्पनम् तदुपपत्तेरुक्तत्वात्। किं तु ज्ञापकस्याप्यनुसरणेन तमर्थं कल्पयामः । तथा हि - **'नाजानन्तर्ये-'** इत्यस्या हि परिभाषायाः **'षत्वतुकोरसिद्धः'** इत्यसिद्धत्ववचनं ज्ञापकमुपन्यस्तम् **'विप्रतिषेधे परं कार्यम्'** इत्यत्र भाष्यकारेण । ज्ञापकं हि नाम तदुच्यते- यद्दृष्टं श्रुतं वानुपपद्यमानं स्वार्थोपपादकमर्थान्तरं कल्पयति । यथा- शतवर्षजीविनो देवदत्तस्य गृहासत्त्वं दृष्टं श्रुतं वा अनुपपद्यमानं स्वोपपादकं बहिःसत्त्वं कल्पयति । यथा - धूमो वह्निं विना अनुपद्यमानः स्वोपपादकमेव वह्निं कल्पयति । यथा वा इह व्याकरणे प्रष्ठौह इत्यत्र संप्रसारणमात्रविधानेऽपि पूर्वरूपत्वे ण्वित्प्रत्ययापेक्षया पुगन्तलघूपधगुणे च **'वृद्धिरेचि'** इति वृद्ध्या रूपसिद्धावानर्थक्यादनुपपद्यमानं वृद्ध्यर्थमूड्विधानं स्वोपपादकमेव अन्तरङ्गे बहिरङ्गासिद्धत्वं कल्पयति, अन्तरङ्गे गुणे कर्तव्ये बहिर्भूतशस्निमित्तकभसंज्ञापेक्षत्वेन बहिरङ्गस्य संप्रसारणस्यासिद्धत्वादूड्विधानानर्थक्याभावात्तदुपपत्तेः । तथा कोऽसिचत् अधीत्येत्यादौ षत्वे तुकि च कर्तव्ये एकादेशस्य पदद्वयाश्रितत्वेन बहिरङ्गस्य 'असिद्धं बहिरङ्गमन्तरङ्गे' इत्येवासिद्धत्वे, लक्षणमुखेनानेनाल्पेनोपायेन महतो महतः शब्दौघान् प्रतिपादयितुं प्रवृत्तस्य वर्णमात्रमप्यनर्थकमप्रयुञ्जानस्य पाणिनेराचार्यस्य **'षत्वतुकोरसिद्धः'** इति शास्त्रारम्भोऽनुपपद्यमानः स्वोपपादकमेवार्थं कल्पयेत्; स च बहिरङ्गे अजानन्तर्या-

श्रयणे बहिरङ्गपरिभाषानिषेध एव । एतेनैव ह्यर्थेन कोऽसिचत् अधीत्येत्यादौ बहिरङ्गे एकादेशे अजानन्तर्याश्रयणात् षत्वे तुकि च कर्तव्ये तस्यासिद्धत्वालाभात् शास्त्रारम्भ उपपादितो भवेत्; न तु अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधेन, सत्यपि तस्मिन्नन्तरङ्गे षत्वे तुकि च अजानन्तर्याश्रयणाभावेन बहिरङ्गपरिभाषाया अनिषेधात् असिद्धत्वलाभे तच्छास्त्रारम्भानुपपत्तेर्वज्रलोपायमानत्वात् । तस्माद्बहिरङ्गाजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेध एव प्रामाणिकः ; स एव तत्परिभाषार्थ इति युक्तम् । न चैवं त्वया ज्ञापकभूम्यनुसारणेन बहिरङ्गाजानन्तर्याश्रयणे बहिरङ्गपरिभाषाया निषेधकल्पने अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषाया निषेधालाभात् अक्षद्यूरित्यादौ अन्तरङ्गे यणि बहिरङ्गस्योठोऽसिद्धत्वात् यणभावप्रसङ्गः; **'विप्रतिषेधे परं कार्यम्'** इत्यत्र भाष्यकारेण नाजानन्तर्यपरिभाषया अक्षद्यूरित्यत्र यणादेशसमर्थनं चानुपपन्नं स्यादिति वाच्यम्, **'षत्वतुकोरसिद्धः'** इति शास्त्रारम्भेण लाघवादन्तरङ्गबहिरङ्गरूपविशेषौदासीन्येन अजानन्तर्याश्रयणमात्रेण बहिरङ्गपरिभाषानिषेधकल्पनात् तावतैव तच्छास्त्रारम्भोपपादकत्वसंभवेनातिरिक्तविशेषकल्पने गौरवाच्च । न च बहिरङ्गे अजानन्तर्याश्रयणेऽपि बहिरङ्गपरिभाषानिषेधाभ्युपगमे पचावेदं पचामेदमित्यत्र एकादेशस्य बहिरङ्गस्यासिद्धत्वाभावात्तस्य च पूर्वं प्रत्यन्तवद्भावेन लोड्ग्रहणेन ग्रहणात् **'एत ऐ'** इति ऐत्वप्रसङ्गः, विप्रतिषेधसूत्रे भाष्यकारेण पचावेदं पचामेदमित्याद्यर्थं बहिरङ्गपरिभाषाश्रयणं चानुपपन्नं स्यादिति वाच्यम्, अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधमभ्युपगच्छतस्तवापि स्योनः स्योनेत्यत्र सिवेरौणादिके नप्रत्यये ऊठि अन्तरङ्गे यणि कर्तव्ये बहिरङ्गस्य लघूपधगुणस्यासिद्धत्वाभावात्परत्वाल्लघूपधगुणे स्योन इति रूपासिद्धिप्रसङ्गात्; **'विप्रतिषेधे परं कार्यम्'** इत्यत्रैव भाष्ये बहिरङ्गपरिभाषयैव स्योनः स्योनेत्यत्र यणि कर्तव्ये लघूपधगुणस्यासिद्धत्वप्रतिपादनं चानुपपन्नं स्यादिति तस्योभयसमाधेयत्वादिति चतुर्थी ।।

यदुक्तम्- अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गपरिभाषानिषेधाभ्युपगमपक्षेऽपि स्योनः स्योनेत्यत्र यणि कर्तव्ये बहिरङ्गलघूपधगुणस्य असिद्धत्वाभावात् परत्वाल्लघूपधगुणप्रसङ्ग इति, तन्न ; नाजानन्तर्यपरिभाषया गुणशास्त्रस्यासिद्धत्वनिषेधेऽपि सिद्धस्यैव गुणशास्त्रस्य परस्यापि अन्तरङ्गेण यण्शास्त्रेण वृक्षेभ्य इत्यादौ परेण पूर्व-

स्येव बाधनात् यणादेशोपपत्तेः । न च **'अन्तरङ्गं बलीयः'**इति लोकसिद्धो न्यायः। **'विप्रतिषेधे परं कार्यम्'** इत्येतत्तु एतच्छास्त्रासाधारणः संकेतः । तथा च लोकशास्त्रीयवचनयोर्विरोधे प्रत्यासत्त्या शास्त्रीयवचनमेव अङ्गीकर्तुं युक्तमिति शास्त्रीयस्य बहिरङ्गासिद्धत्वस्य निषेधे परत्वात् गुणः स्यादेवेति वाच्यम्, **'विप्रतिषेधे परं कार्यम्'** इत्यत्र विप्रतिषेधे परमित्येव सिद्धे कार्यग्रहणसामर्थ्यात् अर्हार्थे कृत्यप्रत्ययविज्ञानात् विप्रतिषेधे परं यत् कर्तुमर्हं तत् भवतीति सूत्रार्थपर्यवसानेन अनित्यबहिरङ्गोत्सर्गेभ्यो लोकन्यायादेव बलवत्सु नित्यान्तरङ्गापवादेषु कर्तव्येषु अनित्यादीनां कृत्यर्हत्वाभावादेव तच्छास्त्रस्य तत्राप्रवृत्तेः । तदुक्तं जयादित्येन- **'उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति नायमस्य शास्त्रस्य विषयः'** इति । अत एव भगवता वार्तिकाचार्येणापि अनेनैवाभिप्रायेण 'अन्तरङ्गं च- अन्तरङ्गं बलीयो भवतीति वक्तव्यम्। किं प्रयोजनम्?यणेकादेशेत्वोत्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः' इति विप्रतिषेधसूत्रे लोकसिद्धमेवान्तरङ्गबलीयस्त्वमिह शास्त्रे परत्वापेक्षयापि समर्थितम् । **'अचः परस्मिन्पूर्वविधौ'** इत्यत्र भाष्यकारेणापि 'प्रत्यङ्गवर्ती लोको लक्ष्यते' इत्यादिना लोकदृष्टान्तोपन्यासेन पङ्व्या मृद्व्या इत्यत्र परस्मात्परयणादेशादन्तरङ्गस्य पूर्वयणादेशस्य बलवत्त्वं समर्थितमिति मत्पक्षे तावन्न दोषः । त्वत्पक्षे बहिरङ्गेऽपि अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधे पचावेदं पचामेदमित्यत्र प्रथमप्रवृत्तमाद्गुणं निमित्तीकृत्य पश्चात्प्रवर्तमानेन ऐत्वेनान्तरङ्गेणापि प्रथमप्रवृत्तस्य बहिरङ्गस्य बाधितुमशक्यतया बहिरङ्गस्यासिद्धत्वमन्तरेण अन्तरङ्गबलीयस्त्वमात्रेण आदेशलक्षणप्रतिषेधानिर्वाहादैत्वप्रसङ्गो दुर्वारः । किं च उपेयाय उपेयाज उपोह्यते प्रोह्यते अम्बात्र कुमारीदम् आराशस्त्रीदं धानाशुष्कुलीदं युगवरत्रार्थं निष्कौशाम्बीदं निर्वारणसीदम् इत्यादिषु एकादेशस्यान्तादिवद्भावात् अभ्यासस्य 'ह्रस्वः' **'उपसर्गाद्ध्रस्व ऊहतेः'** **'अम्बार्थनद्योर्ह्रस्वः'** **'ह्रस्वो नपुंसके प्रातिपदिकस्य'** **'गोस्त्रियोरुपसर्जनस्य'** इत्येते विधयः प्राप्नुवन्ति, त्वन्मते बहिरङ्गे अजानन्तर्याश्रयणेऽपि बहिरङ्गासिद्धत्वनिषेधेन अन्तरङ्गे ह्रस्वे कर्तव्ये एकादेशस्यासिद्धत्वाभावात् । तथा दध्यत्र मध्वत्र कात्र्यर्थं वास्यर्थमित्यत्र बहिरङ्गे यणि कृते अन्तरङ्गः संयोगान्तलोपः संयोगादिलोपश्च पूर्वोक्तादेव हेतोः प्राप्नुतः । 'यञेकादेशदीर्घेत्वेषु बहिरङ्गलक्षणत्वात्सिद्धम्' 'उपसर्जनह्रस्वत्वे च' 'नाभ्यासादीनां ह्रस्वत्वे । न वा बहिरङ्गलक्षणत्वात्' 'संयोगान्तलोपे यणः प्रतिषेधः । न वा झलो लोपात् ।

स्येव बाधनात् यणादेशोपपत्तेः । न च **'अन्तरङ्गं बलीयः'**इति लोकसिद्धो न्यायः। **'विप्रतिषेधे परं कार्यम्'** इत्येतत्तु एतच्छास्त्रासाधारणः संकेतः । तथा च लोकशास्त्रीयवचनयोर्विरोधे प्रत्यासत्त्या शास्त्रीयवचनमेव अङ्गीकर्तुं युक्तमिति शास्त्रीयस्य बहिरङ्गासिद्धत्वस्य निषेधे परत्वात् गुणः स्यादेवेति वाच्यम्, **'विप्रतिषेधे परं कार्यम्'** इत्यत्र विप्रतिषेधे परमित्येव सिद्धे कार्यग्रहणसामर्थ्यात् अर्हार्थे कृत्यप्रत्ययविज्ञानात् विप्रतिषेधे परं यत् कर्तुमर्हं तत् भवतीति सूत्रार्थपर्यवसानेन अनित्यबहिरङ्गोत्सर्गेभ्यो लोकन्यायादेव बलवत्सु नित्यान्तरङ्गापवादेषु कर्तव्येषु अनित्यादीनां कृत्यर्हत्वाभावादेव तच्छास्त्रस्य तत्राप्रवृत्तेः । तदुक्तं जयादित्येन- **'उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति नायमस्य शास्त्रस्य विषयः'** इति । अत एव भगवता वार्तिकाचार्येणापि अनेनैवाभिप्रायेण 'अन्तरङ्गं च- अन्तरङ्गं बलीयो भवतीति वक्तव्यम्। किं प्रयोजनम्?यणेकादेशेत्वोत्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः' इति विप्रतिषेधसूत्रे लोकसिद्धमेवान्तरङ्गबलीयस्त्वमिह शास्त्रे परत्वापेक्षयापि समर्थितम् । **'अचः परस्मिन्पूर्वविधौ'** इत्यत्र भाष्यकारेणापि 'प्रत्यङ्गवर्ती लोको लक्ष्यते' इत्यादिना लोकदृष्टान्तोपन्यासेन पट्व्या मृद्व्या इत्यत्र परस्मात्परयणादेशादन्तरङ्गस्य पूर्वयणादेशस्य बलवत्त्वं समर्थितमिति मत्पक्षे तावन्न दोषः । त्वत्पक्षे बहिरङ्गेऽपि अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधे पचावेदं पचामेदमित्यत्र प्रथमप्रवृत्तमाद्गुणं निमित्तीकृत्य पश्चात्प्रवर्तमानेन ऐत्वेनान्तरङ्गेणापि प्रथमप्रवृत्तस्य बहिरङ्गस्य बाधितुमशक्यतया बहिरङ्गस्यासिद्धत्वमन्तरेण अन्तरङ्गबलीयस्त्वमात्रेण आदेशलक्षणप्रतिषेधानिर्वाहादैत्वप्रसङ्गो दुर्वारः । किं च उपेयाय उपेयाज उपोह्यते प्रोह्यते अम्बात्र कुमारीदम् आराशस्त्रीदं धानाशुष्कुलीदं युगवरत्रार्थं निष्कौशाम्बीदं निर्वारणसीदम् इत्यादिषु एकादेशस्यान्तादिवद्भावात् अभ्यासस्य 'ह्रस्वः' **'उपसर्गाद्ध्रस्व ऊहतेः' 'अम्बार्थनद्योर्ह्रस्वः' 'ह्रस्वो नपुंसके प्रातिपदिकस्य' 'गोस्त्रियोरुपसर्जनस्य'** इत्येते विधयः प्राप्नुवन्ति, त्वन्मते बहिरङ्गे अजानन्तर्याश्रयणेऽपि बहिरङ्गासिद्धत्वनिषेधेन अन्तरङ्गे ह्रस्वे कर्तव्ये एकादेशस्यासिद्धत्वाभावात् । तथा दध्यत्र मध्वत्र काक्यर्थं वास्यर्थमित्यत्र बहिरङ्गे यणि कृते अन्तरङ्गः संयोगान्तलोपः संयोगादिलोपश्च पूर्वोक्तादेव हेतोः प्राप्नुतः । 'यञेकादेशदीर्घेत्वेषु बहिरङ्गलक्षणत्वात्सिद्धम्' 'उपसर्जनह्रस्वत्वे च' 'नाभ्यासादीनां ह्रस्वत्वे । न वा बहिरङ्गलक्षणत्वात्' 'संयोगान्तलोपे यणः प्रतिषेधः । न वा झलो लोपात् ।

बहिरङ्गलक्षणत्वाद्वा' इति 'ह्रस्वो नपुंसके प्रातिपदिकस्य' 'गोस्त्रियोरुपसर्जनस्य' 'अन्तादिवच्च' 'संयोगान्तस्य लोपः' इति सूत्रेषु बहिरङ्गासिद्धत्वेनैव परिहृतत्वात्तद्विरोधापत्तिश्च । यत्तु- अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधस्य स्वोपपादकत्वाभावात् न **'षत्वतुकोरसिद्धः'**इति शास्त्रारम्भो ज्ञापक इति, तन्न; अन्तरङ्गे षत्वे तुकि च अजान्तर्याश्रयणाभावेन बहिरङ्गस्यैकादेशस्य असिद्धत्वनिषेधाभावात् कोऽसिचत् अधीत्येत्यादौ स्वविषये तस्य फलवत्त्वोपपादनेन तदारम्भोपपादकत्वासंभवेऽपि अक्षद्यूरित्यादिस्वफलेन तस्य फलवत्त्वोपपादनात्तदारम्भोपपादकत्वोपपत्तेः। सन्ति ह्येवंजातीयकान्यपि ज्ञापकानि भाष्यकारेणोपन्यस्तानि । यथा- **'स्वं रूपं शब्दस्याशब्दसंज्ञा'** इत्यत्र रूपग्रहणम् **'अर्थवद्ग्रहणे नानर्थकस्य'** इति परिभाषायां ज्ञापकम् । तत्र हि 'स्वं शब्दस्याशब्दसंज्ञायाम्' इतीयत्युच्यमाने यद्यप्यग्न्यादेः शब्दस्य अग्निशब्दादिवत् अङ्गारादिकमपि साधारण्येनात्मीयत्वात् स्वम्, तथापि प्रतीतावुपदेशानपेक्षत्वादन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च स्वशब्देनाग्निशब्दत्वादिकं रूपमेव गृह्यते,न त्वर्थ इति व्यावर्त्याभावेन आनर्थक्यादनुपपद्यमानं रूपग्रहणम्, प्रतीतावुपदेशापेक्षं बहिरङ्गं हेयं साधारणमप्यर्थस्वरूपं शब्दस्य स्वं शब्दग्रहणेषु स्वरूपतुल्यकक्ष्यतया गृह्यत इत्येतस्यार्थस्य 'अर्थवद्ग्रहणेनानर्थकस्य' इति परिभाषाप्रतिपाद्यस्य सत्यप्यन्तरङ्गत्वादिहेतौ 'स्वं रूपम्-' इत्यत्र स्वशब्देन अग्निशब्दत्वादितुल्ययोगक्षेमतया ग्रहीतुं योग्यस्याप्यर्थस्य शब्दं प्रत्यज्ञाततत्वेन विधियोगासंभवात् अर्थव्यावृत्तिसिद्धेः स्वविषये फलमसंपादयतोऽपि काशे कुशे वंशे इत्यत्र 'शे' इति प्रगृह्यसंज्ञानिवृत्तिरूपस्वफलेनैव फलवत्त्वापादनात्स्वारम्भोपपादकस्य ज्ञापकमिति समर्थितम् । अतो मत्पक्षेऽपि न **'षत्वतुकोरसिद्धः'** इति शास्त्रारम्भस्य ज्ञापकत्वविरोध इति पञ्चमी ।।

यदुक्तम्- स्योनः स्योनेत्यादौ अन्तरङ्गेऽजानन्तर्याश्रयणात् बहिरङ्गासिद्धत्वनिषेधेऽपि लोकसिद्धेन अन्तरङ्गबलीयस्त्वेन यणादेशो गुणं बाधत इति, तन्न; विप्रतिषेधसूत्रे भाष्यकारेण 'उभे तर्हि कर्तव्ये । नेत्याह । अनयैव सिद्धं परिभाषया-इहापि स्योनः स्योनेति'इत्यादिग्रन्थेन बहिरङ्गस्य गुणस्यासिद्धत्वादेव यणादेशसिद्धिमुक्त्वा, 'अन्तरङ्गं च । किं प्रयोजनम्' 'यणेकादेशोत्वोत्वानि गुणवृद्धिद्विर्वचनाल्लोपस्वरेभ्यः' इत्यादिवार्तिके बहुप्रयोजननिर्वाहकत्वेन वार्तिककारेणोपन्यस्तस्याप्यन्त-

कारात् 'अन्तरङ्गं बलीयः' इति लोकदृष्टान्तसमर्थितन्यायेन स्योनः स्योनेत्यादौ यणगुणयोरुभयोरनित्यत्वेन व्यवस्थित्यसिद्धेः शास्त्रीयपरिभाषायाश्च निषेधे त्वन्मतेऽपि तत्र दोषो दुर्वारः । किं च त्वत्पक्षे रियति धियति अदुद्रुवत् असुस्रुवत् इतयत्र सार्वधातुकगुणात्परत्वात् शचङोः कृतयोः इयङुवङोर्लघूपधगुणस्य च प्राप्तौ अन्तरङ्गयोरियङुवङोरजानन्तर्याश्रयणात् बहिरङ्गासिद्धत्वनिषेधे लोकन्यायस्य च परित्यागात्परत्वात् गुणप्रसङ्गः । तस्मादुभयसमाधेया बहवो दोषाः । ज्ञापकभूम्यनुरोधस्तु मत्पक्षे विशेष इति षष्ठी ।।

यदुक्तम्- विप्रतिषेधसूत्रे अन्तरङ्गबलीयस्त्वस्य लौकिकन्यायसिद्धस्य भाष्यकारेण परित्यागात् अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेदमभ्युपगच्छतस्तवापि मते स्योनः स्योनेत्यादौ दोषो दुर्वार इति, तन्न; अद्य आऊढा अद्य आ ऋश्यादित्यादौ **'यस्य च निमित्तं लक्षणान्तरेण विहन्यते न तदनित्यम्'**इति न्यायादुभयोरपि नित्ययोर्गुणसवर्णदीर्घत्वयोः **'धातूपसर्गयोः कार्यमन्तरङ्गम्'** इति न्यायेन गुणस्यान्तरङ्गत्वेऽपि तत्रैवाजानन्तर्याश्रयणात् नाजानन्तर्यपरिभाषया बहिरङ्गस्य सवर्णदीर्घस्यासिद्धत्वनिषेधेन परत्वात् पूर्वं सवर्णदीर्घत्वे पश्चादाद्गुणेनैव सिद्धौ **'ओमाङोश्च'** इति पररूपारम्भादिह शास्त्रे सूत्रकारेणैवान्तरङ्गबलीयस्त्वज्ञापनात् **'आद्गुणात्सवर्णदीर्घत्वमाङभ्यासयोः'** इत्यादिना अद्योढेत्यादौ गुणात्परत्वात आङि पूर्वं सवर्णदीर्घत्वमुक्त्वा,'स्वरदोषस्तु' इति पूर्वं दीर्घप्रवृत्तौ स्वरदोषम् आङि पररूपारम्भानर्थक्यं चाशङ्क्य, 'आङि पररूपवचनं तु ज्ञापकमन्तरङ्गबलीयस्त्वस्य' इति पररूपारम्भस्य तस्य अन्तरङ्गबलीयस्त्वज्ञापकत्वमुक्त्वा, 'प्रयोजनं पूर्वसवर्णपूर्वत्वतहिलोपटेनङेर्यङिस्मिन्ङिणलौत्वमन्तरङ्गं बहिरङ्गलक्ष्णाद्वर्णविकारात्' इत्यन्तरङ्गबलीयस्त्वाश्रयणस्य वार्तिककारोक्तकतिपयप्रयोजनदूषणानन्तरम् 'वृक्षा अत्र प्लक्षा अत्र' इत्युदाहरणे बहिरङ्गम् **'अतो रोरप्लुतादप्लुते'** इति उत्वं बाधित्वा **'प्रथमयोः पूर्वसवर्णः'** इति पूर्वसवर्णसिद्धिप्रयोजनमुपन्यस्य 'न चावश्यमिदमेव प्रयोजनम् । आद्ययोगे बहूनि प्रयोजनानि । तदर्थमेषा परिभाषा कर्तव्या । प्रतिविधेयं दोषेषु' इति भाष्यकारेणापि विप्रतिषेधसूत्रोपन्यस्तस्योनाद्यनेकप्रयोजनसिद्ध्यर्थं तत्रैवोपन्यस्तकतिपयदोषसद्भावेऽपि दोषप्रतिविधानपूर्वकमन्तरङ्गबलीयस्त्वस्य अवश्याश्रयणीयत्वव्यवस्थापनाच्च । न च तत्रापि 'तदर्थमेषा परिभाषा कर्तव्या' इति

परिभाषापदेन व्यवहारात् बदिरङ्गासिद्धपरिभाषैव विप्रतिषेधसूत्रोपन्यस्तानेकप्रयोजनसिद्ध्यर्थं व्यवस्थापितेति वाच्यम्, बहिरङ्गासिद्धत्वपरिभाषायाः **'वाह ऊठ्'** इत्यत्र ज्ञापितत्वेन **'ओमाङोश्च'** इति ज्ञापकान्तरानपेक्षणात्; त्वन्मतेनापि यत्र बहिरङ्गासिद्धत्वम् 'नाजानन्तर्ये-' इति प्रतिषिद्धम्- वृक्षा अत्रेति, तत्र अन्तरङ्गबलीयस्त्वस्य पचावेदमित्यादौ बहिरङ्गासिद्धत्वस्य चावश्यकतया फलभेदस्य च सुगमत्वेन ऐक्यानुपपत्तेश्च; विप्रतिषेधसूत्रे अन्तरङ्गबलीयस्त्वस्य अनेकप्रयोजनोपन्यासानन्तरम् 'एतान्यस्याः परिभाषायाः प्रयोजनानि' इति अत्र परिभाषापदप्रयोगदर्शनाच्च । तस्मात् बहुप्रमाणविरोधात् विप्रतिषेधसूत्रे 'उभे तर्हि कर्तव्ये । नेत्याह। अनयैव सिद्धं परिभाषया स्योनः स्योना' इत्यन्तरङ्गबलीयस्त्वाश्रयणनिराकरणपरं भाष्यकारवचनं वार्तिककारोपन्यस्तान्तरङ्गबलीयस्त्वेन सकलप्रयोजनानिर्वाहात् ऊड्विधानज्ञापितस्वोपन्यस्तबहिरङ्गासिद्धत्वपरिभाषाया अवश्याश्रयणीयत्वोपन्यासोपयोगितया स्तुत्यर्थं वार्तिककारोक्तस्योनादिसकलप्रयोजननिर्वाहयोग्यताशालित्वमात्रप्रतिपादनपरमिति नेतव्यम्; अन्यथा तत्रैव बहिरङ्गासिद्धत्वस्य अक्षद्यूरित्यत्रातिव्याप्त्युपन्यासानन्तरं तत्परिजिहीर्षया 'नाजानन्तर्ये-'इति परिभाषाश्रयणानुपपत्तिः. अक्षद्यूरित्यत्र अन्तरङ्गे यणि अजानन्तर्याश्रयणस्येव स्योनः स्योनेत्यत्र अन्तरङ्गे यणि अजानन्तर्याश्रयणस्य सत्त्वात्; अन्तरङ्गबहिरङ्गयोर्यत्र क्वचिदजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधमभ्युपगच्छतस्तवापि स्योनादिसिद्धये एवमेव कल्पनीयत्वात् । तस्मादन्तरङ्गबलीस्त्वस्य शास्त्रे परित्यक्तुमशक्यत्वात् स्योनः स्योनेत्यादौ शचङन्ते च मत्पक्षे न कश्चिद्दोषः । त्वत्पक्षे तु उक्तरीत्या स्योनादौ शचङन्ते च दोषपरिहारेऽपि पचावेदमित्यादौ दोषो दुष्परिहर इति । एतेनेदं निरस्तम्- न धातुलोपसूत्रे 'यत्र कार्यविधौ अचोरानन्तर्येणाश्रयणम्, तत्र निषेधादनुपस्थानं परिभाषायाः । यथा अक्षद्यूः' इत्यादिवाक्ये कार्यविधाविति विशेषणात् कर्तव्यत्वेनोपस्थिते विधौ अचोरानन्तर्याश्रयणे बहिरङ्गासिद्धत्वं नेत्येव सिध्यति; न त्वन्तरङ्ग इति विशेषः, साक्षादश्रवणात् । तच्चान्तरङ्गे बहिरङ्गे वा उपपद्यते । एवं तु उपेद्ध इत्यादौ गुणशास्त्रप्रवृत्तिपूर्वकत्वान्निषेधशास्त्रप्रवृत्तेस्तत्रैव कर्तव्यत्वेनोपस्थितिपर्यवसानात् तत्र अजानन्तर्याश्रयणाभावात् असिद्धत्वनिषेधाभावोपन्यासश्च संगच्छते । **'अदसो मात्'** इत्यत्रापि अमी अत्रेत्यादौ ईत्वादीनामयादीनां च युगपत्प्रवृत्तावपि अयादिष्वजानन्तर्याश्रयणेन कर्तव्यत्वेनोपस्थिते विधावचोरानन्तर्याश्रयणानपायात् तत्र बहिरङ्गा-

सिद्धत्वनिषेधेनायादिप्रसञ्जनसमर्थनं च कैयटकृतं संगच्छत इति नधातुलोपसूत्रे अदसोमात्सूत्रे च न क्वापि भाष्यवार्तिककैयटेषु विरोधः । पचावेदमित्यादौ अभ्यासोहाम्बार्थनदीनपुंसकोपसर्जनह्रस्वत्वविधौ च एकादेशप्रवृत्त्युत्तरकालमेव एत ऐत्वस्य ह्रस्वस्य च प्राप्त्या कर्तव्यत्वेनोपस्थिते तत्राजानन्तर्याश्रयणाभावात् असिद्धत्वनिषेधाभाव इति कर्तव्यत्वेनोपस्थिते विधौ यत्रान्तरङ्गे बहिरङ्गे वाचोरानन्तर्याश्रयणम्, तत्र बहिरङ्गपरिभाषासिद्धत्वनिषेध इति कैयटाशयानुरोधेनाभ्युपगते मत्पक्षे न क्वापि शास्त्रे दोषः- इति, स्योनादौ रियतीत्यादौ च शचङन्ते यणियङुवङां गुणस्य च युगपत्प्रसक्तौ कर्तव्यत्वेनोपस्थिते यणादौ अजानन्तर्याश्रयणसत्त्वेन बहिरङ्गासिद्धत्वनिषेधतादवस्थ्यात्बहिरङ्गपरिभाषातिरिक्तस्य अन्तरङ्गबलीयस्तवन्यायस्यशास्त्रे क्वाप्यनभ्युपगमाच्च कर्तव्यत्वेनोपस्थिते षत्वेतुकि च अचोरानन्तर्यानाश्रयणेन ज्ञापकभूम्यननुरोधस्य त्वत्पक्षेऽपि तुल्यत्वाच्चानुपपन्न एव त्वत्पक्ष इति सप्तमी ।।

यदुक्तम्- षष्ठश्रुतान्तरङ्गबलीयस्त्वसमाश्रयणपरानेकप्रमांणविरोधात् विप्रतिषेधसूत्रश्रुतमन्तरङ्गबलीयस्त्वसमाश्रयणनिराकरणपरं वचनमन्यथा नेतव्यमिति, तदनुपपन्नम् ; प्रथमचरमश्रुतप्रमाणद्वयविरोधे प्रथमश्रुतप्रमाणस्यानुपसंजातविरोधित्वेन प्राबल्यात् तदनुरोधेनैव चरमश्रुतप्रमाणस्य नेतव्यत्वात् । तथा हि- विप्रतिषेधसूत्रे श्रुतमन्तरङ्गबलीयस्त्वाश्रयणनिराकरणपरं वचनमनुपसंजातविरोधित्वेन स्वार्थोल्लङ्घने कारणाभावात् स्वार्थमेवोपस्थापयति । **'संप्रसारणाच्च'** इत्यत्र श्रुतं तु अन्तरङ्गबलीयस्त्वसमाश्रयणपरं वचनं तन्निराकरणे प्रथमश्रुतप्रमाणोपस्थिते बुद्धिस्थे सति तद्विरोधात् तत्समाश्रयणमुपस्थापयितुं नेष्टे; येन चरमश्रुतप्रमाणोपस्थितिविरोधात् प्रथमश्रुतप्रमाणस्य स्वार्थोल्लङ्घनेन बहिरङ्गपरिभाषास्तुत्यर्थता भवेत् । अत एव 'उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चैः साम्ना' इति वाक्ये श्रुतानां सपादबद्धापादबद्धमन्त्रगीतिविशेषवाचिनाम् ऋगादिपदानां स्वार्थोपस्थापकत्वे 'तेभ्यस्तपस्तेपानेभ्यस्त्रयो वेदा अजायन्त । अग्नेर्ऋग्वेदः । वायोर्यजुर्वेदः । आदित्यात्समामवेदः' इत्युपक्रमगतार्थवादश्रुतेन मन्त्रब्राह्मणसमुदायात्मककाठकादिग्रन्थविशेषवाचकेन असंजातप्रतिपक्षत्वान्निरङ्कुशमुपस्थापितस्वार्थेन वेदपदेन वेदानभिष्टुत्य ऋगादीनामुच्चैःस्वरादिगुणविधाने स्तुतिविधानयोरन्वयासंभवेनैकवाक्यत्वासंभवात् उभयोरेकविधित्वावश्यंभावेन प्रथममुपस्थापितस्वार्थवेदपदाविरोधाय स्वार्थमुल्लङ्घ्य ऋगादिपदानां

लक्षिततलक्षणया तत्तद्वेदपदार्थोपस्थापकत्वात् यत् ऋग्वेदेन क्रियते विधीयते तत् उच्चैरित्यादिप्रकारेण ऋग्वेदादिविहितकर्मबृन्दस्य उच्चैस्त्वादिकं कर्तव्यतया प्रतीयते। न च तत्र ऋगादिपदानां स्वार्थोपस्थापने प्रथमोपस्थितवेदपदार्थविरोधेन प्रतीतैकवाक्यताभङ्गभिया स्वार्थोल्लङ्घनमस्तु; अत्र तु तयोरनेकप्रकरणव्यवहितयोरिह शास्त्रे अन्तरङ्गबलीयस्त्वाश्रयणपरवाक्यस्य चरमश्रुतस्यापि स्वार्थोपस्थापकत्वसंभवाच्चरमश्रुतोपस्थापितस्वार्थानेकप्रमाणविरोधात् प्रथमश्रुतस्याप्यन्यथानयनं स्यादिति वाच्यम्, अनेकप्रकरणव्यवहितयोरप्यनयोरेकार्थत्वेन एकवाक्यत्वसंभवात् **'अर्थैकत्वादेकं वाक्यम्-'** इत्युक्तत्वात् **'ङ्याप्प्रातिपदिकात्'** इति सूत्रे 'एकं वाक्यं तच्चेदं च । यद्येकं वाक्यम्, किमर्थं नानादेशस्थं क्रियते? कौशलमात्रमेतदाचार्यो दर्शयति' इति ग्रन्थेन भाष्यकारेणापि अनेकप्रकरणव्यवहितानामपि **'कर्मणि द्वितीया' 'बहुषु बहुवचनम्'** इत्यादीनां स्वादिविधायकवाक्येनाकाङ्क्षावशादेकवाक्यतासमर्थनाच्च । तस्माच्चरमश्रुतस्यान्तरङ्गबलीयस्त्वाश्रयणपरस्य ग्रन्थस्य प्रथमश्रुतस्यैकवाक्यतापन्नतन्निराकरणपरग्रन्थविरोधेन स्वार्थोपस्थापकत्वाभावात्तद्विरोधेन प्रथमश्रुतवाक्यस्यान्यथानयनं न युक्तिमत् । अतोऽन्तरङ्गबलीयस्त्वाश्रयणनिषेधात् स्योनः स्येनित्यादौ त्वत्पक्षेऽपि दोषो दुर्वार इत्यष्टमी ।।

'उभे तर्हि कर्तव्ये । नेत्याह' इति प्रथमश्रुतवाक्ये अभावश्रवणेन 'अवश्यमेषा परिभाषा कर्तव्या' इति चरमश्रुतस्य च षोडशिग्रहवाक्यवत् भावप्रतिपादकत्वेन सर्वथैव विरोधात् एकवाक्यत्वासंभवेन पूर्वप्रवृत्तमविगणय्यैव उपस्थापितस्वार्थचरमश्रुतानेकप्रमाणविरोधात् प्रथमश्रुतस्याप्यन्तरङ्गबलीयस्त्वनिराकरणस्य पूर्वोक्तप्रकारेण अन्यथानयनं युक्तम् । न च षोडशिग्रहवदेव अन्तरङ्गबलीयस्त्वाश्रयणस्य विकल्प एव स्यात्; न पूर्ववाक्यस्य अन्यथानयनमिति वाच्यम्, तन्निराकरणस्य बहिरङ्गासिद्धत्वपरिभाषास्तुत्यर्थतयोपपत्तौ अष्टदोषदुष्टविकल्पस्यातिगौरवग्रस्तत्वेनाश्रयितुमशक्यत्वात् । उभयोरेकवाक्यत्वेऽपि अल्पप्रमाणादुपक्रमात् बहुप्रमाणस्योपसंहारस्यैव प्रबलत्वात्तदनुरोधेनैवोपक्रमस्य नेतव्यत्वात् । तथा हि - उपक्रमे कस्मिंश्चिदर्थे येन केनचित्प्रमाणेन उपस्थापिते सति तदेकवाक्यतापन्नोपसंहारगतमेकमवश्यं प्रमाणं पूर्वप्रतीताविरोधेन स्वार्थमुल्लङ्घ्याप्यन्वयबोधमादधाति; नानेकम्, बहूनां स्वार्थपरित्यागस्य व्युत्पत्तिविरुद्धत्वात् । तादृशमुपसंहारगतानेक-

प्रमाणं तु पूर्वप्रतीतविरोध्यनुसंधीयमानमुपक्रमगतमपि स्वाविरुद्धे अर्थे व्यवस्थाप्य एकान्वयबोधमादधाति । अत एव 'ऐन्द्राग्नमेकादशकपालं प्राजापत्यं दधि मधु घृतमापो धाना:' इत्यत्र पञ्चानां हविषामाद्ययोरैन्द्राग्रसांनाय्यविकारत्वेनामावास्यविध्यन्तप्राप्तानुपांशुयागविकाराणां मधूदकघृतानां चरमश्रुतानामपि भूयस्तया पौर्णमासविध्यन्तप्रतीतिः । एवं च चरमश्रुतानेकप्रमाणविरोधात् पूर्वश्रुतग्रन्थस्यान्यथानयनादन्तरङ्गबलीयस्त्वाश्रयणमप्रत्यूहमिति तेनैव स्योनः स्योनेत्यादौ यणादिसिद्धेर्मत्पक्षे तावन्न दोषः । त्वत्पक्षे तु पचावेदमित्यादौ दोषो दुष्परिहर इति नवमी ।।

यदुक्तम्- **'ओमाङोश्च'** इति सूत्रकारेण ज्ञापितम् । **'संप्रसारणाच्च'** इति सूत्रे 'आङि पररूपवचनं तु ज्ञापकमन्तरङ्गबलीयस्त्वस्य' इत्युक्त्वा, 'नावश्यमिदमेव प्रयोजनम् । आद्ये योगे बहूनि प्रयोजनानि । तदर्थमेषा परिभाषा कर्तव्या' इति तत्रैव सूत्रे विप्रतिषेधसूत्रोपन्यस्तानेकप्रयोजनसिद्ध्यर्थमिह शास्त्रे समाश्रयणीयत्वेन भाष्यकारेणापि समर्थितमिति; तत्र विप्रतिषेधसूत्रे पूर्वं निराकृतस्य पुनः किं प्रयोजनमुद्दिश्य समर्थनमित्येतद्विवेचनीयम्- न तावद्यत्र अन्तरङ्गबहिरङ्गयोरजानन्तर्याश्रयणाभावः; यथा- स्योनः स्योनेत्यत्र ऊडादेशलघूपधगुणयो; तदर्थमिति शक्यं वक्तुम्, तत्र बहिरङ्गस्य गुणस्यासिद्धत्वादेव ऊठः सिद्धेः । नापि बहिरङ्गमात्रे यत्राजानन्तर्याश्रयणम्; यथा- वानीयमित्यादौ आत्वायादेशयोः; तदर्थम्, तत्रापि त्वन्मते बहिरङ्गासिद्धत्वेनैव सिद्धेः । यत्र तर्हि अन्तरङ्गमात्रे अजानन्तर्याश्रयणम्; यथा- रियति धियति प्रादुद्रुवतु प्रासुस्रुवत् इत्यत्र इयङ्गुणयोरुवङ्गुणयोश्च अन्तरङ्गमात्रेऽजानन्तर्याश्रयणम्; यत्र चान्तरङ्गबहिरङ्गयोरजानन्तर्याश्रयणम्;यथा अयज इन्द्रं वृक्ष इन्द्रं त इन्द्रमित्यत्र वाक्यसंस्कारे विभज्यान्वाख्यानपक्षे आद्गुणसवर्णदीर्घयोरुभयत्रापि अजानन्तर्याश्रयणम्; तत्र बहिरङ्गासिद्धत्वनिषेधात् तदर्थमन्तरङ्गबलीयस्त्वसमर्थमिति चेत्, तर्हि **'क्ङिति च'** इत्यत्र भाष्ये अन्तरङ्गबलीयस्त्वं परित्यज्य **'असिद्धं बहिरङ्गमन्तरङ्गे'**इति परिभाषया रियतीत्यादौ इयङुवङ्समर्थनानुपपत्तिः। तथा **'अचः परस्मिन्पूर्वविधौ'** इत्यत्रापि पद्व्या मृद्व्या इत्यत्र **'असिद्धं बहिरङ्गमन्तरङ्गे'** इति पूर्वयणादेशसमर्थनानुपपत्तिः । तथैव च **'आद्गुणः'** इत्यत्रापि वृक्ष इन्द्रमित्यादौ बहिरङ्गासिद्धत्वपरिभाषयैव आद्गुणसमर्थनानुपपत्तिश्च । तस्मात् 'संप्रसारणाच्च' इत्यत्र अन्तरङ्गबलीयस्त्वाश्रयणपरस्य ग्रन्थस्य चरमश्रुतस्यैव स्वप्रति-

पक्षप्रथमश्रुतानेकप्रमाणविरोधात् अन्यथानयनं वक्तुं युक्तम् । वस्तुतस्तु **'अन्तरङ्गं च'** इति वार्तिककारेणोपन्यस्यमानमन्तरङ्गबलीयस्त्वमपि न लौकिकमन्तरङ्ग-बलीयस्त्वमात्रम्; किं तु बहिरङ्गाशास्त्रासिद्धत्वापादकत्वलक्षणमेतच्छास्त्रासाधारणं विलक्षणमेव बलीयस्त्वम्; अन्यथा **'ह्रस्वो नपुंसके प्रातिपदिकस्य' 'गोस्त्रियोरु-पसर्जनस्य'** इत्यत्र युगवरत्राय अतिखट्वायेत्यादौ यञेकादेशदीर्घेत्वेषु नपुंसकोप-सर्जनह्रस्वत्वप्राप्तौ तत्प्रतिषेधं चोदयित्वा 'यञेकादेशदीर्घेत्वेषु बहिरङ्गलक्षणत्वा-त्सिद्धम्' 'उपसर्जनह्रस्वत्वे च' इति बहिरङ्गलक्षणत्वादतिखट्वायेत्यादिसिद्ध्यु-पन्यासानुपपत्तेः । न हि तत्र यञेकादेशदीर्घेत्वेषु कृतेषु प्राप्नुवतो नपुंसकोपसर्जन-ह्रस्वत्वस्य बहिरङ्गशास्त्रासिद्धत्वं विना विप्रतिषेधसूत्रे इह शास्त्रे समाश्रयणीयत्वेन स्वोपन्यस्तान्तरङ्गबलीयस्तवमात्रान्निवृत्तिः लिध्यति । तेन हि समकालप्रवृत्तयोरन्त-रङ्गबहिरङ्गयोर्बहिरङ्गं प्रतिबध्य अन्तरङ्गस्य प्रवृत्तिमात्रं सिध्येत्, न तु बहिरङ्ग-शास्त्रासिद्धत्वमपि । तथा षष्ठे **'अन्तादिवच्च'** त्यत्रापि उपेयाज उपोवापेत्यादावेका-देशे कृते एकादेशस्यादिवद्भावात् अभ्यासाहाम्बार्थनदीनपुंसकोपसर्जनह्रस्वत्व-प्रसङ्गात् अन्तादिवद्भावप्रतिषेधं चोदयित्वा 'न वा बहिरङ्गलक्षणत्वात्' इति समा-धानानुपपत्तिश्च । तच्च विलक्षणमन्तरङ्गबलीयस्त्वमुपन्यस्यमानमाङिपररूपमारभ-माणस्य सूत्रकारस्याशयगतमिति ज्ञात्वैवोपन्यस्यते; अन्यथा तादृशस्य अपूर्व-स्यान्तरङ्गबलीयस्त्वस्य 'अन्तरङ्गं बलीय इत्युपसंख्यानम्' इत्युपसंख्यातव्यव-त्वापत्तेः; तादृशस्यैवान्तरङ्गबलीयस्त्वस्य सूत्रकाराशयस्थत्वपरिज्ञानं वार्तिककारस्य आङि पररूपारम्भादित्येव कल्पनीयम् 'आङिपररूपवचनं तु ज्ञापकमन्तरङ्गबलीय-स्त्वस्य' इति स्वयमेवोपन्यासदर्शनात्, वार्तिककारं प्रति वाह ऊड्वचनस्य ज्ञापक-त्वकल्पने प्रमाणाभावाच्च, 'वाह ऊड्वचनानर्थक्यं संप्रसारणेन कृतत्वात् । गुणः प्रत्ययलक्षणत्वात् । ऐज्ग्रहणाद्वृद्धिः' इति वार्तिककारेण सर्वथैव ऊड्विधानस्य प्र-त्याख्यातत्वात्, ऊड्विधानेन वार्तिककारस्य बहिरङ्गासिद्धत्वस्य सूत्रकाराशय-स्थत्वपरिज्ञाने हि अस्मान्प्रत्यपि ज्ञापकत्वेनैवोपन्यसनीयत्वात् सर्वथैव प्रत्याख्या-नानुपपत्तेः। एवमुक्तप्रमाणबलवत्त्वात् विप्रतिषेधसूत्रे 'संप्रसारणाच्च' इत्यत्र च वार्ति-कारेणापन्यस्यमानमन्तरङ्गबलीयस्त्वं बहिरङ्गासिद्धत्वापादकत्वलक्षणमेव । भाष्य-कारेण तु 'अन्तरङ्गं च ' इत्यत्र भवतीत्यध्याहारेण अन्तरङ्गं भवतीति प्रतीत्या यथा विप्रतिषेधे पूर्वं बाधित्वा परं भवति तथा विप्रतिषेधे पूर्वं परं वा बहिरङ्गं बाधित्वा

अन्तरङ्गं भवतीति अन्तरङ्गबलीयस्त्वमात्रं प्रतीयते । तथा च कतिपयप्रयोजननिर्वाहेऽपि पचावेदमित्यादौ प्रथमप्रवृत्तबहिरङ्गासिद्धत्वालाभात् न अन्तरङ्गबलीयस्तवमात्रम् 'अन्तरङ्गं च' इत्यत्र विवक्षितम्, किं तु बहिरङ्गशास्त्रासिद्धत्वापादकत्वलक्षणमेव बलीयस्त्वं विवक्षितमित्यन्योऽप्यर्थः विप्रतिषेधसूत्रे 'यदि सन्ति प्रयोजनानि-' इत्यादिग्रन्थेन आक्षेपसमाधानभङ्ग्या प्रदर्शितः । तस्मादन्तरङ्गबलीयस्त्वस्य क्वापीह शास्त्रे उपक्षेपः । विप्रतिषेधसूत्रे क्व भ्रमप्रसक्तस्य निराकरणमात्रं कृतम् । अतोऽन्तरङ्गबलीयस्त्वेन स्योनादौ परिहर्तुमशक्यत्वात् त्वत्पक्षेऽपि दोषो दुर्वारएव। ज्ञापकभूम्यनुरोधस्तु मत्पक्षे विशेष इति दशमी ।।

अन्तरङ्ग एवाजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधः । न चैवं स्योनः स्योनेत्यादौ यणि कर्तव्ये गुणस्यासिद्धत्वनिषेधप्रसङ्गः,अन्तरङ्गे अजानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधाभ्युपगमात् । पचावेदमित्यादौ बहिरङ्गशास्त्रस्य प्रथमप्रवृत्तत्वेऽपि अन्तरङ्गे अजानन्तर्याश्रयणाभावात् नासिद्धत्वनिषेधः । स्योनः स्योनेत्यत्र अन्तरङ्गे यणि अजानन्तर्याश्रयणेऽपि गुणशास्त्रस्य प्रथमप्रवृत्तत्वाभावान्नासिद्धत्वनिषेधः । एवम् अक्षद्यूरित्यादौ प्रथमप्रवृत्तमूठं निमित्तीकृत्य प्रवर्तमाने अन्तरङ्गे यणि अजानन्तर्याश्रयणादूठोऽसिद्धत्वनिषेध इति क्वापि दोषः । स्योन इत्यत्र ऊड्गुणयोर्बहिरङ्गत्वाविशेषेऽपि अन्तरङ्गे यणि कर्तव्ये गुणस्यासिद्धत्वम्, न तूठ इति वैषम्यस्य सर्वथाप्यन्यथोपपादयितुमशक्यत्वात्; **'षत्वतुकोरसिद्धः'** इत्यत्रापि प्रथमप्रवृत्तबहिरङ्गासिद्धत्वस्यैव बहिरङ्गपरिभाषासिद्धस्यारम्भेण तदनुरोधेन तादृशबहिरङ्गासिद्धत्वनिषेधस्यैव ज्ञापनादित्येकादशी ।।

भवेदेवम्, यद्यन्तरङ्गे अचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधः प्रामाणिको भवेत् । अस्य हि **'षत्वतुकोरसिद्धः'** इति सूत्रारम्भो ज्ञापको भवितुं नार्हति । ज्ञापकं हि यद्विना स्वस्यानुपपत्तिः, येन च स्वस्योपपत्तिः, तमर्थं ज्ञापयति; अन्यथातिप्रसङ्गात् । यथा शतवर्षजीविनो देवदत्तस्य गृहासत्त्वं बहिःसत्त्वेन विनानुपपद्यमानं बहिःसत्त्वमेव कल्पयति; न गृह एव कुत्रचित्कोणे सत्त्वम्; तेन विनापि बहिःसत्त्वेन गृहासत्त्वोपपत्तेः, कोणे सत्त्वस्य गृहासत्त्वोपपादकत्वाभावाच्च। यथा वा धूमो वह्निमात्रं कल्पयति, न त्वयःपिण्डसंक्रान्तवह्निम् एवमिहापि षत्वतु-

कोरसिद्धत्वारम्भः अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधस्यैव कल्पकः ; न तु त्वदुक्तस्य, अन्तरङ्गे अचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधं विनापि अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधेनैव **'षत्वतुकोरसिद्धः'** इति शास्त्रारम्भोपपत्तेः ; सत्यपि तस्मिन् कोऽसिचदित्यादौ बहिरङ्गासिद्धत्वनिषेधाभावात्पुनरसिद्धत्वारम्भवैयर्थ्यस्य तदवस्थतया तदुपपत्त्यभावाच्च । अतः **'षत्वतुकोरसिद्धः'** इत्येकादेशासिद्धत्वारम्भः कोऽसिचदित्यादौ स्वविषयेऽन्यतोऽसिद्धत्वमप्रतिबध्नतोऽस्य न ज्ञापकः । यत्तु - अक्षद्यूरित्यादौ यणादेशसिद्ध्या स्वफलेनैव फलवत्त्वोपपादनात्तदारम्भोपपादकत्वमिति, तदपि न; न हि षत्वतुकोरेकादेशासिद्धत्वविधानस्य अक्षद्यूरित्यत्र यणादेशसिद्धिःसाक्षात्परंपरया वा फलं भवितुमर्हति । न च **'षत्वतुकोरसिद्धः'** इत्येकादेशासिद्धत्वविधानेन ज्ञापित एव अन्तरङ्गे अचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधः अक्षद्यूरित्यादौ यणं साधयतीति पारंपर्येण तत्फलत्वमस्तीति वाच्यम्, अन्योन्याश्रयणात्तज्ज्ञापितत्वसिद्धौ पारंपयेण फलत्वापादनादारम्भोपपादकत्वसिद्धिः ; आरम्भोपपादकत्वसिद्धौ च तदुपपादकत्वात्तज्ज्ञापितत्वसिद्धिरिति । अजानन्तर्याश्रयणमात्रे बहिरङ्गासिद्धत्वनिषेधस्य तु षत्वतुकोरेकादेशस्यासिद्धत्वविधानात् ज्ञापितत्वसिद्धेः पूर्वं कोऽसिचदित्यत्र एकादेशासिद्धत्वस्यान्यतः सिद्धिप्रतिबन्धकत्वेनानर्थक्यनिरासात्तदारम्भोपपादकत्वसिद्ध्या वैषम्यस्य स्फुटत्वात् । तस्मादनुपपन्नैषा वाचोयुक्तिः- यत्स्वफलेनैव फलवत्त्वापादनेन आरम्भोपपादकत्वात् तस्य ज्ञापकमेकादेशस्यासिद्धत्वविधानमिति । यत्तु- **'स्वं रूपम्-'** इत्यत्र स्वविषये फलमसंपादयतोऽपि अर्थवद्ग्रहणपरिभाषार्थस्य रूपग्रहणं ज्ञापकमित्युक्तम्, तदपि न; तत्र हि आत्मीयवचनत्वेन स्वरूपवाच्यार्थसाधारणस्यापि स्वशब्दस्य अन्तरङ्गत्वादिहेतुभिः स्वरूपमात्रपरत्वसिद्धौ अर्थव्यावृत्त्यर्थं क्रियमाणं रूपग्रहणमनर्थकं सत् शब्दस्वरूपग्रहणे सत्यप्यन्तरङ्गत्वादिहेतौ तुल्यकक्ष्यतया तदर्थोऽपि गृह्यत इति **'अर्थवद्ग्रहणे नानर्थकस्य'** इति परिभाषाप्रतिपाद्यं सत्यप्यन्तरङ्गत्वादिहेतौ प्रकृते स्वशब्दस्य साधारणीकरणसमर्थमेतदर्थं विनानर्थक्यात् अनुपपद्यमानं तस्यार्थस्य ज्ञापकमित्युच्यते; स चार्थः स्वशब्दस्य साधारणीकरणसमर्थत्वात्स्वविषये फलसंपादनक्षम एव । **'अपृक्त एकाल्प्रत्ययः'** इत्येकग्रहणं ज्ञापकत्वे चिन्त्यम्? अर्थस्य शब्दं प्रति संज्ञात्वेन विनियोक्तुमशक्यत्वात् पुनरप्यानर्थक्यप्रतीतावपि येनान्तरङ्गत्वादिहेतुना पूर्वं स्वस्यानर्थक्यं प्रतीतम्,

तन्निकारकरणक्षममर्थं ज्ञापयेदेवेति न तावता तस्य ज्ञापकत्वहानिः । पुनरपि हेत्वन्तरेण चेत्तदानर्थक्यप्रतीतिः, तन्निरसनक्षममर्थं ज्ञापयत्येव; यथा - **'न ङिसंबुद्ध्योः'** इति ङौ नलोपप्रतिषेधः आर्द्रचर्मन् इत्यादौ सुपो लुका लुप्तत्वेन पदत्वाभावान्नलोपाप्राप्तावानर्थक्यप्रतीतौ प्रत्ययलक्षणेन पदसंज्ञाया ज्ञापकः, अप्रत्यय इति प्रातिपदिकसंज्ञानिषेधाभावस्य च । पुनः प्रत्ययलक्षणेनैव भसंज्ञया पदत्वनिवृत्तावानर्थक्यप्रतीतौ प्रत्ययलक्षणेन भसंज्ञाभावस्यापि ज्ञापकः। एवमिहापि येन येन हेतुना रूपग्रहणस्यानर्थक्यं प्रतीतम्, तत्तन्निरसनसमर्थमर्थं ज्ञापयत्येवेति न तावता तस्य ज्ञापकत्वहानिः । किं तु द्वितीयज्ञापनफलस्यानुपयोगान्नोपपन्यस्यते । यद्वा **'रथाद्यत्'** इत्यादौ रथरूपं यस्य रथशब्दस्य यस्य वा शब्दस्य रथवस्तु वाच्यम्, तदुभयोरपि संज्ञा मा विज्ञायीति रूपग्रहणम् । प्रकृते **'षत्वतुकोरसिद्धः'** इति वचनस्य यया बहिरङ्गपरिभाषया कोऽसिचदित्यादावसिद्धत्वसिद्धावानर्थक्यं प्रतीतम्; ततस्त्वत्परिकल्प्यमानो नाजानन्तर्यपरिभाषार्थो गन्धेनापि तन्निरसनक्षमो न भवतीति कथं ज्ञाप्येत । तन्नाजानन्तर्यपरिभाषाज्ञापकत्वेन भाष्यकारोपन्यस्तः षत्वतुकोरसिद्धत्वारम्भो न त्वदुक्तार्थज्ञापक इति नासौ परिभाषार्थ इति द्वादशी ।।

येन बहिरङ्गशास्त्रेण निर्वर्तितमचमानन्तर्येणाव्यवधानेन निमित्तत्वेनाश्रित्य यदन्तरङ्गशास्त्रं प्रवर्तितम्, तत्र कर्तव्ये बहिरङ्गं नासिद्धमिति परिभाषार्थः । एवं च **'आदेशप्रत्ययोः'** इति सूत्रे **इण्कोरिति** पञ्चमीनिर्देशात् **'तस्मिन्निति निर्दिष्टे पूर्वस्य'** **'तस्मादित्युत्तरस्य'** इत्यत्र निर्दिष्टग्रहणस्यानन्तर्यार्थकत्वात् कोऽसिचदित्यादौ बहिरङ्गशास्त्रनिर्वृत्तमचमानन्तर्येण निमित्तत्वेनाश्रित्य षत्वशास्त्रे कर्तव्ये बहिरङ्गासिद्धत्वनिषेधात् स्वविषये फलवत्त्वापादनेन तदारम्भोपपादकत्वात् न षत्वतुकोरसिद्धत्वारम्भस्य ज्ञापकत्वविरोधः । अक्षद्यूरित्यादौ बहिरङ्गशास्त्रनिर्वृत्तमूठम् **'इको यणचि'** इत्यत्र अचीति सप्तमीनिर्देशादानन्तर्येण निमित्तत्वेनाश्रित्य यणि कर्तव्ये बहिरङ्गासिद्धत्वनिषेधसिद्धिः । स्योनः स्योनेत्यादावपि यत्र यत्रान्तरङ्गबहिरङ्गयोः समकालप्रवृत्तिः, तत्र तत्र बहिरङ्गशास्त्रनिर्वृत्तस्याच आनन्तर्येणानाश्रयणाद्बहिरङ्गासिद्धत्वनिषेधाभावः । पचावेदमित्यादौ एत ऐत्वे अभ्यासोहाम्बार्थनदीनपुंसकोपसर्जनह्रस्वत्वेषु च बहिरङ्गशास्त्रनिर्वृत्तस्याचः कार्यित्वादानन्तर्येण निमित्तत्वेनानाश्रयणात् असिद्धत्वनिषेधाभाव इति सर्वं समञ्जसमिति त्रयोदशी ।।

स्यादेतत् - षत्वासिद्धत्वारम्भस्य त्वदुक्तार्थज्ञापकत्वेऽपि तुक्यसिद्धत्वारम्भो न त्वदुक्तार्थज्ञापकः, **'ह्रस्वस्य पिति-'** इत्यत्र पञ्चमीनिर्देशाभावात् अधीत्येत्यादौ बहिरङ्गशास्त्रनिर्वृत्तस्याचः स्थानिबुद्ध्या कार्यित्वेनैवाश्रयणेन निमित्तत्वेनानाश्रयणात् बहिरङ्गासिद्धत्वनिषेधाभावेन तुकि असिद्धत्वारम्भवैयरर्थ्यस्य तदवस्थत्वेन तदारम्भोपंपादकत्वाभावात् । न च उरित्यत्र वेञः क्विपि संप्रसारणे पूर्वरूपत्वे च **'ह्रस्वस्य पिति कृति तुक्'** क्विन्निमित्ते बहिरङ्गे तुकि अन्तरङ्गस्य पूर्वरूपस्य बहिरङ्गपरिभाषया असिद्धत्वालाभात्त्वन्मतेऽपि तुक्यसिद्धत्वारम्भस्य विध्यर्थत्वेन ज्ञापकत्वायोग इति वाच्यम्, तत्र शकहूषु परिवीष्वित्याद्यर्थमाश्रितेन **'संप्रसारणङीट्सु सिद्धः'** इति वार्तिकेन पूर्वरूपत्वस्यासिद्धत्वनिषेधात् उत् इत्येव तुका भवितव्यत्वात् संप्रसारणङीट्सु प्रतिषेधमनाश्रित्य शकहूष्वित्याद्यर्थं पदान्तपदाद्योरेकादेशस्य असिद्धत्वव्यवस्थापनेऽपि **'एकः पूर्वपरयोः'** इत्यतः पूर्वपरग्रहणम् **'अन्तादिवच्च'** इत्यन्तादिग्रहणं चानुवर्त्य **'षत्वतुकोः-'** इत्यत्र पदग्रहणमधिकं कृत्वा पूर्वस्य पदान्तस्य उत्तरस्य पदादेरेकादेशस्यासिद्धत्वबोधनेन प्रकृतेऽसिद्धत्वाभावेन तुका भवितव्यत्वात्। अन्यथा केवलपदान्तपदाद्योरेकादेशस्यासिद्धत्वाश्रयणे हि प्रथमैकवचने सौ पूर्वस्य पदत्वात् तदेकादेशस्यासिद्धत्वात् तुगभाववत् सप्तमीबहुवचने उ सु इति स्थिते स्वादौ पूर्वस्य पदत्वात् तदेकादेशस्यासिद्धत्वात् षत्वाभावोऽप्यङ्गीकर्तव्यः स्यादिति उभयत्र षत्वकोर्बहिरङ्गयोरन्तरङ्गस्यैकादेशस्य बहिरङ्गपरिभाषया असिद्धत्वालाभात् उभयत्र तु विध्यर्थत्वे सूत्रं नाजानन्तर्यपरिभाषाज्ञापकमेव न स्यात् । तस्मात् क्विपि तुका भवितव्यत्वात् नास्मन्मते तुक्यसिद्धत्वारम्भो विध्यर्थः किं तु ज्ञापनार्थ एव । त्वन्मते तु त्वया नाजानन्तर्यपरिभाषार्थत्वेन कल्प्यमानस्यार्थस्य अज्ञापकत्वात् विध्यर्थत्वायोगाच्च तुक्यसिद्धत्वारम्भवैयर्थ्यमेव स्यादिति चतुर्दशी ।।

बहिरङ्गशास्त्रनिर्वृत्तमचमानन्तर्येण निमित्तत्वेनवा कार्यित्वेनवा यस्य कस्यचिदानन्तर्येणाश्रित्य अन्तरङ्गशास्त्रे प्रवर्तिते तत्र कर्तव्ये बहिरङ्गं नासिद्धमिति परिभाषार्थः । तुक्छास्त्रे च कृतीति सप्तमीनिर्देशेन ह्रस्वस्यानन्तर्याश्रयणात् अधीत्येत्यादौ तुकि बहिरङ्गस्यैकादेशस्यासिद्धत्वनिषेधादस्यार्थस्य तुक्यसिद्धत्वारम्भोपपादकत्वात् न ज्ञापकत्वविरोधः । न चात्र तुक्छास्त्रे बहिरङ्गशास्त्रप्रवर्तितस्याचो न कृतानन्तर्याश्रयणम्, किं तु ह्रस्ववचनात्तत्स्थानिन एवेति वाच्यम्, बहिरङ्गशास्त्र-

प्रवर्तितस्यैव दीर्घस्य स्थानिबुद्ध्या कृतानन्तर्यमाश्रित्य तुक्छास्त्रप्रवृत्तेः ; अन्यथा बहिरङ्गासिद्धत्वस्याप्यप्राप्तेः, तुक्यन्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वम्, असिद्धे च बहिरङ्गे ह्रस्वसद्भावात्तुक्प्राप्तिरित्यन्योन्याश्रयात् । न च तुक्चिकीर्षार्थमेवासिद्धत्वम्, प्राप्त्यभावे चिकीर्षाया अप्यनुदायात् एवम् **'षत्वतुकोरसिद्धः'** इति शास्त्रादपि तुक्यसिद्धत्वाभावप्रसङ्गाच्च । एवं च बहिरङ्गशास्त्रप्रवर्तितताजानन्तर्यनिमित्ते अन्तरङ्गे बहिरङ्गं नासिद्धमिति परिभाषार्थ इति स्थितम् । प्रोह्यत इत्यादौ **'उपसर्गाद्ध्रस्व ऊहतेः'** इति उपसर्गादूहतेरेवानन्तर्याश्रयणम्, न बहिरङ्गप्रवर्तितस्याचः । अम्बात्र कुमारीदमित्यादौ **'अम्बार्थनद्योर्ह्रस्वः'** इति अम्बार्थनद्योरेव संबुद्ध्यान्तर्याश्रयणम्, न बहिरङ्गनिर्वृत्तस्याच इत्यसिद्धत्वनिषेधाभावाद्ध्रस्वाभाव इति पञ्चदशी ।।

यद्यचोरानन्तर्यामित्यनाश्रित्य बहिरङ्गशास्त्रप्रवर्तितताजानन्तर्यनिमित्ते अन्तरङ्गे बहिरङ्गासिद्धत्वनिषेधः परिभाषार्थः कल्प्येत, तदा ग्रामणिकुलम्, सेनानिकुलमित्यत्र औत्तरपदिके **'इको ह्रस्वः-'** इति ह्रस्वत्वे कृते **'ह्रस्वस्य पिति कृति तुक्'** इति तुक्प्रसङ्गः, बहिरङ्गशास्त्रप्रवर्तितताजानन्तर्यनिमित्तके तुक्यन्तरङ्गे बहिरङ्गस्यासिद्धत्वनिषेधात् । किं च वैयाकरणः सौवश्व इत्यत्र बहिरङ्गस्य यणोऽसिद्धत्वात् आयावौ प्राप्नुतः अन्तरङ्गयोरायावोर्बहिरङ्गशास्त्रप्रवर्तितजानन्तर्याश्रयणाभावेन बहिरङ्गस्य यणोऽसिद्धत्वनिषेधाभाव एव ऐचोऽसिद्धत्वनिषेधात्। न च ग्रामणिकुलमित्यत्र पूर्वोत्तरपदसंनिपातलक्षणं ह्रस्वत्वं तद्विघातकस्य तुको न निमित्तं तुकि सति पूर्वोत्तरपदयोरानन्तर्यविघातादिति संनिपातपरिभाषयैव तुङ्निवृत्तिरिति वाच्यम्, ह्रस्वस्य सत्यपि तुकि अवयवावयवस्यापि समुदायावयवत्वेन तस्य पूर्वपदावयवत्वेनाव्यवधानात्संनिपातपरिभाषया तन्निवर्तनानुपपत्तेः । कथंचिदेतत्समर्थनेऽपि ग्रामणि कुलं सेनानि कुलमित्यत्र नपुंसकह्रस्वत्वे तस्यासिद्धत्वनिषेधात् प्राप्तस्य तुकः संनिपातपरिभाषया निवृत्त्यसंभवादिति षोडशी ।।

बहिरङ्गशास्त्रनिर्वृत्तमचमानन्तर्येण निमित्तत्वेनाश्रित्य यदन्तरङ्गं प्रवर्तितम्,तत्र कर्तव्ये बहिरङ्गं नासिद्धमित्येष परिभाषार्थः । एवं च त्रयोदशकक्ष्योक्तप्रकारेण अक्षद्यूःस्योनः पचावेदमित्यादिसर्वसिद्धिः। अधीत्येत्यादौ बहिरङ्गनिर्वृत्तस्याचः कार्यित्वेनाश्रयणादसिदधत्वनिषेधाभावात् तुक्येकादेशस्यासिद्धत्वारम्भवैयर्थ्यं परमवशि-

ष्यते । तत्रैवं व्यवस्थापनीयम्- वाह ऊड्विधानेन अन्तरङ्गे कर्तव्ये बहिरङ्गस्यासिद्धत्वं ज्ञापितम् । तत्र कार्यासिद्धत्वे विज्ञायमाने पचावेदमित्यादौ एत ऐत्वे कर्तव्ये गुणलक्षणकार्यस्यासिद्धत्वादैत्वाभावसिद्धावपि स्योनः स्योनेत्यत्र यण्गुणयोः प्रसङ्गे शास्त्रासिद्धत्वाभावेन परत्वात् बलीयसा शास्त्रेण स्वकार्ये गुणे प्रवर्तिते पश्चाद्यणि कर्तव्ये गुणस्यासिद्धत्वेऽपि इकारस्य गुणेन निवृत्तत्वात् यणभावप्रसङ्ग इति शास्त्रासिद्धत्वमन्तरेण सर्वप्रयोजनानिर्वाहात् शास्त्रासिद्धत्वमेवाश्रयणीयम् । शास्त्रासिद्धत्वे चाश्रीयमाणे यत्र अन्तरङ्गबहिरङ्गयोर्युगपत्प्रवृत्तिः स्योनादौ, तत्र बहिरङ्गशास्त्रस्यासिद्धत्वात्स्वकार्याप्रवर्तनाद्यणादिसिद्धिः। प्रथमप्रवृत्तबहिरङ्गविषये तु पश्चादन्तरङ्गे कर्तव्ये बहिरङ्गशास्त्रासिद्धत्वात् स्वकार्यप्रवर्तनार्थं बहिरङ्गशास्त्रप्रवर्तितादेशलक्षणकार्याभावः, तत्प्रवर्तितादेशस्थानिलक्षणकार्यप्रवृत्तिश्चेति द्वयमिदं बहिरङ्गासिद्धत्वविधानाद्भवति । तथा च यथा पचावेदमित्यादावादेशलक्षणकार्याभावः, एवमक्षद्यूरित्यादावप्यन्तरङ्गे यणि ऊठो बहिरङ्गस्यासिद्धत्वादादेशलक्षणकायार्प्राप्तौः षत्वे कोऽसिचदित्यादौ एकादेशस्यासिद्धत्वारम्भो बहिरङ्गशास्त्रनिर्वृत्तमचमानन्तर्येण निमित्तत्वेनाश्रित्य यदन्तरङ्गं प्रवर्तते तत्र कर्तव्ये बहिरङ्गं नासिद्धमित्येतदर्थस्य ज्ञापकत्वेन व्यवस्थाप्यते । तथा च वैयाकरण इत्यादौ बहिरङ्गस्य यणोऽसिद्धत्वादायावोःप्राप्तयोः, तथैव सखीयतेरप्रत्यये सख्युरित्यादौ बहिरङ्गस्य क्यजकारलोपस्यासिद्धत्वाद्यणि च प्राप्ते षत्वे असिद्धत्वारम्भेण ज्ञापितार्थेनात्र बहिरङ्गासिद्धत्वनिषेधालाभात् तुक्येकादेशस्यासिद्धत्वारम्भः प्रथमप्रवृत्तबहिरङ्गासिद्धत्वेन स्थानिलक्षणं कार्यं न भवतीत्येतदर्थस्य ज्ञापकत्वेनाश्रीयते इति न तुक्यसिद्धत्वारम्भस्यापि मन्मते वैयर्थ्यमेष्टव्यम् । यत्तु भाष्ये **'अचः परस्मिन्-'** इत्यत्र **'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे'** इत्यसिद्धत्वात्परयणादेशस्य पूर्वयणादेशो भविष्यतीति **पङ्क्या मृद्व्या** इत्यत्र पूर्वयणादेशसमर्थनम्, न तत्र प्रथमप्रवृत्तबहिरङ्गस्यासिद्धत्वात् स्थानिलक्षणं कार्यं विवक्षितम्, किं तु पूर्वपरयणादेशयोर्युगपत्प्रसङ्गे परयणादेशस्यासिद्धत्वात्पूर्वयणादेशः समर्थितः । अत एव तत्र नित्यादन्तरङ्गबलीयस्त्वसमर्थनम् ; पूर्वं परयणादेशप्रवृत्तौ हि तस्यासिद्धत्वात् पूर्वयणादेशो भविष्यतीति किं नित्यादन्तरङ्गस्य बलवत्त्वसमर्थनेन । एवं च **पङ्क्या मृद्व्या** इत्येतदर्थं तत्र भाष्यकृता कृतं नित्यादन्तरङ्गस्य बलवत्त्वसमर्थनं प्रथमप्रवृत्तबहिरङ्गासिद्धत्वेन स्थानिलक्षणं कार्यं न भवतीत्ययमर्थोभाष्यकारस्यापि संमत इत्येतदर्थस्य ज्ञापकम्;

अन्यथा तस्य तत्रानुपयोगात् । न च वैयाकरणः सौवश्व इत्यत्र आयावादेशयोः कर्तव्ययोर्यणादेशवदैचोऽपि बहिरङ्गत्वेनासिद्धत्वादप्राप्तिः । सख्युरित्यादौ च अन्तरङ्गे यणि क्यजकारलोपस्येव वलिलोपस्यापि असिद्धत्वात् व्यवधानाद्यणादेशाप्राप्तिरिति बहिरङ्गासिद्धत्वेन स्थानिलक्षणं कार्यं न प्रवर्तत इत्यस्य न किंचित्प्रयोजनमस्तीति वाच्यम्, एतत्प्रयोजनोपन्यासस्य दिक्प्रदर्शनमात्रत्वात् । तथा हि - बिम्ब्याः फलं बिम्बम्, बदर्याः फलं बदरम् बिम्बीबदरीशब्दाभ्याम् **'अनुदात्तादेश्च'** इत्यञि तस्य **'फले लुक्'** इति लुकि **'लुक्तद्धीतलुकि'** इति स्त्रीप्रत्ययलुकि तस्य **'क्लिलुगुपधात्व-'** इति स्थानिवत्त्वनिषेधेपि बहिर्भूततद्धितलुङ्निमित्तस्य स्त्रीप्रत्ययलुकोऽसिद्धत्वात् **'यस्येति च'** इति लोपप्रसङ्गः, सोऽप्यस्माज्ज्ञापकान्न भवति । तथा आमलक्याः फलम् आमलकमित्यत्र **'नित्यं वृद्धशरादिभ्यः'** मयटि तस्य फले लुकि स्त्रीप्रत्ययस्य लुकि तस्यासिद्धत्वात् **'यस्येति च '** इति लोपप्रसङ्गः ; सोऽप्यस्माज्ज्ञापकान्न भवति । तथा पञ्चभिः पट्वीभिः क्रीतः पञ्चपटुरित्यत्र **'आर्हात्-'** इति ठकि **'अध्यर्ध-'** इति लुकि स्त्रीप्रत्ययलुकि तस्यासिद्धत्वात् यण्प्रसङ्गः ; सोऽप्यस्माज्ज्ञापकान्न भवति । न च दध्यत्रेत्यादौ द्विर्वचनविधिं प्रति स्थानिवत्त्वनिषेधसामर्थ्याद्यथा यणादेशस्य बहिरङ्गासिद्धत्वमपि न भवति, तथात्रापि लुकि स्थानिवत्त्वनिषेधसामर्थ्यादसिद्धत्वस्यापि निरास इति वाच्यम्, वार्तिकप्रणयनस्योत्तरकालत्वेन तदपेक्षया सौत्रज्ञापनानर्थक्यस्य वक्तुमशक्यत्वात् । किं च अक्राष्टामक्राष्टेत्यत्र सिज्लोपस्य बहिरङ्गस्यासिद्धत्वात् **'षढोः कः सि'** इति कत्वं प्राप्नोति । न चात्र कत्वसिज्लोपयोर्युगपत्प्राप्तौ तत्कालप्रवृत्तयोः **'असिद्धं बहिरङ्गमन्तरङ्गे'** **'पूर्वत्रासिद्धम्'** इत्यनयोःपरत्वाद्बहिरङ्गासिद्धत्वं बाधित्वा पूर्वत्रासिद्धत्वप्रवृत्त्या सिज्लोपे कृते सकृद्गतिन्यायाश्रयणान्न पुनर्बहिरङ्गासिद्धत्वप्रवृत्तिः । अथ वा **पपुषः पश्य चिच्युषः पश्य लुलुवुषः पश्येत्यादौ** आल्लोपयणियङुवङादेशेषु कर्तव्येषु बहिरङ्गपरिभाषया वसुसंप्रसारणस्यासिद्धत्वे कर्तव्ये बहिरङ्गपरिभाषायाः **'वाह ऊठ्'** इत्यत्र ज्ञापितत्वेन आभीयत्वेन **'असिद्धवदत्राभात्'** इत्याल्लोपादीनां वसुसंप्रसारणस्य चासिद्धत्वेन युगपदन्तरङ्गबहिरङ्गशास्त्रद्वयासंनिधानात् बहिरङ्गपरिभाषाया अप्रवृत्तिवत् इहापि **'षढोः कः सि'** इति कत्वे कर्तव्ये **'झलो झलि'** इति सलोपस्य बहिरङ्गपरिभाषया असिद्धत्वे कर्तव्ये बहिरङ्गपरिभाषायाः **'वाह ऊठ्'** इत्यत्र ज्ञापितत्वेन पूर्वकार्यत्वे **'पूर्वत्रासिद्धम्'** इति कत्वसिज्लोपयोरसिद्धत्वेन युगपदन्तरङ्गबहिरङ्ग-

शास्त्रद्वयासंनिधानान्निमित्ताभावेनापि बहिरङ्गपरिभाषाया अप्रवृत्तिरिति वाच्यम्, **'झलो झलि'** इत्यादिसप्तमीनिर्देशादीनामसिद्धत्वेन **'तस्मिन्निति निर्दिष्टे पूर्वस्य'** इत्यादि- परिभाषाणामप्रवृत्तिप्रसङ्गभिया असिद्धकाण्डे संज्ञापरिभाषयोः कार्यकालत्वव्यव- स्थापनात् पूर्वपरव्यवस्थाभावेन **'विप्रतिषेधे परं कार्यम्'** इति पूर्वत्रासिद्धत्वेन बहिरङ्गासिद्धत्वस्याबाधनात् बहिरङ्गपरिभाषायां च कत्वसिज्लोपयोः **'पूर्वत्रा- सिद्धम्'** इत्यसिदधत्वाभावेन तस्या अप्रवृत्तिशङ्काभावाच्च । किं च **संनीस्त्रंसो दनीध्वंस** इत्यादौ यङन्तात्पचाद्यचि **'यङोऽचि च'** इति लुकि यङ्लुको बहिरङ्ग- स्यासिद्धत्वात् **'अनिदिताम्-'** इति नलोपः स्यात्; सोऽप्यस्माज्ज्ञापकान्न भवति । नियामकान्तराभावे लक्ष्यानुरोधेन समाश्रयणीयात्सकृद्गतिन्यायात् ज्ञापनवैयर्थ्यस्य वक्तुमशक्यत्वाच्च, प्रतीचः प्रतीचा अमुमुईच इत्यादौ भसंज्ञापेक्षत्वेन बहिर्भूतशस- पेक्षस्य बहिरङ्गस्य 'अचः' इत्यल्लोपस्यासिद्धत्वात् **'इको यणचि'** इति यणादेशस्य एतज्ज्ञापकाश्रयणेन परिहरणीयत्वाच्च । न च प्रतीचः पशयेत्यादौ सुबुत्पत्तेः पूर्वम- न्तरङ्गत्वाद्यणादेशेसुबुत्पत्त्यनन्तरम् **'अचः'** इत्यकारलोपे सति यथैव अजन्तपूर्व- पदस्य **'चौ'** इति विधीयमानं दीर्घत्वमनवकाशं स्यादिति सामर्थ्यादन्तरङ्गमपि यणादेशं पूर्वप्रवर्तमानं बाधते; तथा प्रतीच इत्यादौ **'अचः'** इति लोपानन्तरमपि तस्यासिद्धत्वाद्यदि यणादेशः स्यात्, पुनरपि **'चौ'** इति दीर्घविधानं व्यर्थं स्यादिति सामर्थ्यादसिद्धत्वमपि बाधिष्यत इति वाच्यम्, **'अचश्च'** इति परिभाषायां पदोप- स्थापनपक्षस्य व्यवस्थापिततया नपुंसकह्रस्वाकृत्सार्वधातुकनाम्दीर्घादिषु यत्र अङ्ग- प्रातिपदिकपूर्वपदादेरजन्तत्वसंभवः, तत्र अचा प्रातिपदिकादेर्विशेषणेऽपि यत्राजन्त- त्वसंभवो नास्ति, तत्र शमादिष्ठिवादीन्हनादिदीर्घविधानेष्विव इहापि चौ पूर्वपदस्या- न्तरङ्गेण यणावष्टब्धत्वादजन्तत्वासंभवेन उत्तरपदाक्षिप्तेन पूर्वपदेनैवाचो विशेषणीय- तया पूर्वपदस्थस्य यत्र क्वचन स्थितस्याचो दीर्घविधानेन 'चौ'इत्यस्य चरितार्थत्वात्। न च तृतीय इत्यत्र **'हलः'** इति दीर्घनिवृत्त्यर्थम् **'ढ्रलोपे-'** इत्यतोऽण्ग्रहणानुवृत्तेरा- वश्यकतया **'चौ'** इति सूत्रेऽपि तदनुवृत्त्या **'अचश्च'** इत्येतत्परिभाषानुपस्थानात् **'तस्मिन्निति निर्दिष्टे-'** इति निर्दिष्टग्रहणस्यानन्तर्यार्थकत्वाच्चौ समनन्तरपूर्वस्याणो दीर्घविधानसामर्थ्यात्तद्विधानात्पूर्वमन्तरङ्गो यणादेशस्तदनन्तरं बहिरङ्गासिद्धत्वं च बाधिष्यत इति वाच्यम्; **'हलः'** इति सूत्रे भाष्य एव द्वितीयतृतीयचतुर्थेति निपात- नादेव तत्र दीर्घत्वाभावसमर्थनेन **'अथ वोभयं निवृत्तम्'** इत्यण्ग्रहणस्य **'इकः**

काशे' इत्यत इग्ग्रहणस्य च निवृत्तिपक्षसमाश्रयणेन च कर्तारमञ्चन्तीति कर्तृचः पश्येत्यादावनणोऽपि **'चौ'** इति दीर्घत्वे भाष्यकृदभ्युपगमप्रतीतेः **'चौ'** इत्यत्र अच्परिभाषोपस्थानावश्यंभावात्, अण्ग्रहणानुवृत्तिमाश्रित्याच्परिभाषानुपस्थानकल्पनेऽपि 'चौ' इत्यत्र उत्तरपदाधिकाराक्षिप्तपूर्वपदसंनिधानावश्यंभावेन अण्ग्रहणस्य च विशेषणविशेष्यभावे कामचारेण अन्तरङ्गेण यणादेशेनावष्टब्धविषयतया चावणन्तपूर्पदासंभवेन यणादेशाविषये प्राचोऽवाच इत्यादावन्तरङ्गतया प्रवृत्तेन सवर्णदीर्घेण कृतकार्यतया गौरवमात्रफलकस्य **'अचः'** इत्यल्लोपस्य **'चौ'** इति दीर्घत्वस्य चानपेक्षणात् प्रथमप्रवृत्ते सवर्णदीर्घत्वे **'अल्लोपोऽनः'** इत्यत्र तपरकरणेन **'अचः'** इत्यल्लोपस्य तत्र प्राप्त्यभावाच्च यथासंभवं पूर्वपदेनैवाण्ग्रहणस्य विशेषणीयतया पूर्ववदेव **'चौ'** इत्यस्यानर्थक्यायोगात्, अण्ग्रहणमनुवर्तयतो मते प्रतीचः पश्येत्यादावुक्तरीत्या चौ दीर्घविधानानर्थक्यकल्पनया सामर्थ्याद्यणादेशनिवर्तनेऽपि कर्तृचः पश्येत्यादिदीर्घानारम्भविषये यणादेशनिवर्तनायोगेनानिष्टरूपप्रसङ्गात् । न च कानि सन्ति कौस्त इत्यत्रेव पदान्तविधिं प्रति न स्थानिवदिति स्थानिवत्त्वनिषेधसामर्थ्यादेव प्रतीच इत्यादावसिद्धत्वमपि बाधिष्यत इति वाच्यम्, दिवमाचष्टे, **'प्रकृत्यैकाच्'** देवयति, देवयतेरप्रत्ययो विच् । द्यौः द्युभ्यामित्यादौ पदान्तविधिं प्रति न स्थानिवदित्यस्य चारितार्थ्येन सामर्थ्यविघातात् । तत्र हि परमवाक् परमवाचावित्यादिसिद्धये **'न लुमताङ्गस्य'** इत्यत्र भाष्यकारेण **'स्वादिष्वसर्वनामस्थाने' 'यचि भम्'** इत्यत्र योगविभागाश्रयणेन सावपि पदत्वाश्रयणात् **'दिव औत्'** इत्यौत्वस्य, **'दिव उत्'** इत्युत्वस्य च णिलोपस्य स्थानिवद्भावाद्प्राप्तस्य प्रवृत्तये पदान्तविधिं प्रति न स्थानिवदिति स्थानिवत्त्वनिषेधस्यापेक्षणात् । अयं च परिभाषाया अक्षरार्थः- प्रकल्प्यते कार्यमनयेति प्रक्लृप्तिः अङ्गं निमित्तम् । बहिः प्रक्लृप्तिः यस्य सः बहिष्प्रक्लृप्तिः बहिरङ्ग इत्यर्थः । अच आनन्तर्यमव्यवधानं यस्मिन्नन्तरङ्गे पञ्चमीनिर्देशेन सप्तमीनिर्देशेन वाश्रीयते, तत्रैव 'तस्मिन्निति निर्दिष्टे-' इति निर्दिष्टग्रहणेन अच आनन्तर्येण निमित्तत्वेनाश्रयणात् तदन्तरङ्गम् अजानन्तर्यम्; तच्चार्थादचमव्यवहितं पूर्वत्वेन परत्वेन वा निमित्तत्वेन आश्रित्य प्रवर्तमानम्, न तु कार्यित्वेन । अच्चासौ प्रत्यासत्या बहिरङ्गकृत आश्रियते । तथा चायमर्थः संपन्नः- बहिरङ्गशास्त्रनिर्वृत्तमचं निमित्तमाश्रित्य अन्तरङ्गे कर्तव्ये बहिरङ्गं नासिद्धमिति । ततश्च ग्रामणि कुलमित्यादौ बहिरङ्गनिर्वृत्तस्याचः कार्यित्वेन आश्रयणादसिद्धत्वनिषेधाभावः । बहिरङ्गशास्त्रनिर्वृत्त-

स्याचोऽन्तरङ्गे पञ्चमीनिर्देशेन सप्तमीनिर्देशेन वा पूर्वत्वेन परत्वेन वा निमित्तत्वेनाश्रयणादेव अन्तरङ्गे अजानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेध इत्युच्यते, पञ्चमीनिर्देशेन सप्तमीनिर्देशेन वा पूर्वत्वेन परत्वेन वा निमित्तत्वेनाश्रयणेऽपि निर्दिष्टग्रहणेन आनन्तर्याश्रयणात् तदेवं मत्पक्षे न ज्ञापकभूमिविरोधः, क्वचिदप्रसङ्गो वा । त्वत्पक्षे तु ज्ञापकभूम्यनुरोधेऽपि बहवो दोषा इति । यच्च- च्छ्वोः शूठ्-, इत्यत्र 'षत्वतुकोः-' इत्यत्र च हरदत्तेन कृतं परिभाषार्थविवरणम्- यत्रान्तरङ्गे बहिरङ्गे वेत्यादि; यदपि माधवाचार्येण धातु वृत्तौश्यान्विकरणादौ तत्परिभाषार्थविवरणं कृतम्, तदुभयमपि कथंचिदप्युपपादयितुमशक्यत्वाच्चिन्त्यम्, पचावेदमित्यादौ बहिरङ्गासिद्धत्वनिषेधप्रसङ्गात् । न च तत्रापि पक्षे यत्र अन्तरङ्गे बहिरङ्गे वाचोरानन्तर्यमाश्रीयते, तत्र बहिरङ्गशास्त्रनिर्वृत्तमचं निमित्तीकृत्यान्तरङ्गे कर्तव्ये बहिरङ्गं नासिद्धमिति परिभाषार्थकल्पनात् पचावेदमित्यादौ स्योनः स्योनेत्यादौ यण्गुणयोः समकालप्रवृत्तौ च न दोषः, बहिरङ्गनिर्वृत्तस्याचो निमित्तत्वेनानाश्रयणात्, एवमक्षद्यूरित्यत्र च तस्य निमित्तत्वेनाश्रयणान्न दोषः । ज्ञापकभूम्यनुरोधश्चास्तीति सोऽपि पक्ष उपपादयितुं शक्यत इति वाच्यम्, बहिरङ्गकृताजानन्तर्याश्रये अन्तरङ्गे बहिरङ्गं नासिद्धमिति मदुक्तार्थस्य त्वत्पक्षे त्यक्तुमशक्यत्वात् तत्संग्रहे च तेनैवोपपत्तावतिरिक्तांशवैयर्थ्यात् । एवं सति **'न धातुलोपे-'** इति सूत्रे उपेद्धः प्रेद्ध इत्यत्र गुणतन्निषेधयोः समकालप्रवृत्तावपि **'नाजानन्तर्ये-'** इति बहिरङ्गासिद्धत्वनिषेधेन 'न धातुलोपे-' इत्यत्र आर्धधातुकग्रहणस्य लोपविशेषणत्वपक्षे गुणनिषेधप्रसञ्जनं हरदत्तेन कृतं चानुपपन्नम् अन्तरङ्गबहिरङ्गयोः क्वचिदजानन्तर्याश्रयणमात्रेण समकालप्रवृत्तयोरसिद्धत्वनिषेधाङ्गीकारे स्योनः वृक्ष इन्द्रमित्यादिषु बहुषु दोषप्रसङ्गात् । यच्च- **'अचः परस्मिन्पूर्वविधौ'** इत्यत्र हरदत्तेन अनादिष्टादचः पूर्वत्वविज्ञानाभावेऽपि वैयाकरणः सौवश्व इत्यत्र सत्यपि यणः स्थानिवत्त्वे बहिरङ्गस्यैचोऽसिद्धत्वादेवायावोरप्राप्तिमाशङ्क्य **'नाजानन्तर्ये-'** इत्यैचोऽसिद्धत्वनिषेधमाश्रित्यायावादेशयोः प्रसञ्जने कृतम्, तदप्यनुपपन्नमेव; अन्तरङ्गबहिरङ्गयोः क्वचिदजानन्तर्याश्रयणमात्रेण बहिरङ्गासिद्धत्वनिषेधाङ्गीकारे स्योनादौ दोषप्रसङ्गात् अन्तरङ्गबहिरङ्गयोः क्वचिदचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधाभ्युपगमेऽपि पचावेदमित्यादौ दोषप्रसङ्गात्, अन्तरङ्ग एवाचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधस्य ज्ञापकभूमिविरोधेन तस्य परिभाषार्थत्वायोगात् स्वासंमतत्वाच्च, बहिरङ्गशास्त्रनिर्वृत्तमचं कार्यित्वेन निमित्तत्वेन

वा यस्य कस्यचिदानन्तर्येणाश्रित्य अन्तरङ्गे कर्तव्ये बहिरङ्गासिद्धत्वनिषेधोपगमे हि ग्रामणि कुलमित्यत्र दोषप्रसङ्गात्, बहिरङ्गशास्त्रनिर्वृत्तमचं निमित्तत्वेनाश्रित्य अन्तरङ्गे कर्तव्ये बहिरङ्गनिषेधाभ्युपगमे हि ऐचः कार्यित्वेनाश्रयणे वैयाकरण इत्यादौ निषेधप्राप्त्यभावात् । यत्तु- **'अचः परस्मिन्पूर्वविधौ'** इत्यत्रैव भाष्ये वैयाकरणः सौवश्व इत्यादावायावोः प्राप्तिर्यणः स्थानिवत्त्वेन आशङ्किता, तत्रापि 'अचः पूर्वविज्ञानादैचोः सिद्धम्' इति वार्तिकावतरणोपयोगितया अनाश्रित्य बहिरङ्गपरिभाषां तत्प्राप्तिराशङ्कितेति न दोषः । वार्तिककारेणापिनिमित्तादादेशाद्वा पूर्वत्वे विज्ञायमाने द्वाभ्यां देयं लवनमित्यादौ दोषप्रसङ्गादचः पूर्वत्वमवश्यमाश्रयणीयम्; तेनैव वैयाकरणः सौवश्व इत्यादावायावोर्निवृत्तिसंभवे तदर्थं बहिरङ्गपरिभाषा नाश्रयितव्येति प्रदर्शनार्थमनाश्रित्यैव बहिरङ्गपरिभाषामैजागमस्यायावोः प्राप्तिमाशङ्क्य 'अचः पूर्वविज्ञानादैचोः सिद्धम्' इत्युक्तम् । यदपि **'षत्वतुकोरसिद्धः'** इत्यत्र कैयटोनोक्तम् 'अचोरानन्तर्याश्रयणे बहिरङ्गस्यापि नासिद्धत्वम्' इति, तदप्यनुपपन्नम्; अन्तरङ्गे अचोरानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधस्य स्वविषये फलसंपादकत्वाभावेन 'षत्वतुकोः-' इति शास्त्रेण ज्ञापयितुमशक्यत्वात्, बहिरङ्गे उभयत्र वा अचोरानन्तर्याश्रयणे बहिरङ्गासिद्धत्वनिषेधे स्योनः स्योना पचावेदमित्यादौ दोषप्रसङ्गात्। तथैव **'अदसो मात्'** इति सूत्रे अमी अत्रेत्यादावयादिप्रसञ्जने 'नाजानन्तर्ये-' इत्ययादीनामसिद्धत्वनिषेध इति यदुक्तं कैयटेन, तदप्यनुपपन्नमेव; अन्तरङ्गे बहिरङ्गशास्त्रकृतस्याचो निमित्तत्वेनानाश्रयणात्, प्रकारान्तरस्य चोक्तरीत्या दोषदुष्टत्वात् । तत्रत्यवार्तिकोपपत्तिस्तु तृतीयकक्ष्यायामेव समर्थिता । नधातुलोपसूत्रे उपेद्धः प्रेद्ध इत्यत्र गुणनिषेधे गुणस्यासिद्धत्वनिषेधो नास्त्येव, बहिरङ्गकृतस्याचोऽन्तरङ्गे निमित्तत्वेनानाश्रयणात् । किं तु 'यत्र कार्यविधावचोरानन्तर्यं निमित्तत्वेनाश्रीयते-' इति कैयटेन कृतं परिभाषार्थकथनमेवोक्तरीत्या उपपन्नम् । यत्तु द्वितीयकक्ष्यायामुक्तम्- उपेद्ध इत्यत्रान्तरङ्गे निषेधे कर्तव्ये बहिरङ्गस्य गुणस्यासिद्धत्वकथनेन भाष्ये गुणसमर्थनमनुपपन्नम्, असिद्धत्वेनैव गुणशास्त्रस्य स्वकार्याप्रवर्तनेन गुणाभावप्रसङ्गादिति; तन्न; यद्यपि गुणशास्त्रोपस्थितिसमये निषेधशास्त्रस्याप्युपस्थित्या तत्कालोपस्थितया बहिरङ्गपरिभाषया गुणशास्त्रस्यासिद्धत्वं प्रतीयते, तथापि 'अन्तरङ्गे' इति विषयनिर्देशात् अन्तरङ्गकर्तव्यतायामेवासिद्धत्वप्रतिपत्तिः, न सर्वथा । अतो गुणनिषेधविषय एव गुणशास्त्रस्यासिद्धत्वप्रतिपत्त्या निषेध्यापेक्षनिषेधस्यैवाभावः प्रतिपद्यते । गुण-

कर्तव्यतायां गुणशास्त्रस्यासिद्धत्वप्रतिपत्त्यभावाच्च गुणप्रवृत्तिरप्रत्यूहा। यद्वा अन्तरङ्गे कर्तव्ये बहिरङ्गमसिद्धं भवतीत्यसिद्धत्वविधानेन हि न बहिरङ्गस्य स्वकार्याप्रवर्तकत्वं प्रतिपाद्यते; किं तु अब्रह्मदत्ते ब्रह्मदत्तशब्दप्रयोगादिव परत्र परशब्दप्रयोगात् वत्यर्थावगतो अन्तरङ्गे कर्तव्ये बहिरङ्गमसिद्धवदित्यनेन असिद्धे बहिरङ्गे यथान्तरङ्गं भवति, तद्वत् सिद्धे स्वकार्यं प्रवर्तत्यपि बहिरङ्गे भवति । तथैवासिद्धे बहिरङ्गे यथान्तरङ्गं न भवति, तद्वत्सिद्धे स्वकार्यं प्रवर्तयत्यपि बहिरङ्गे न भवतीति असिद्ध इव सिद्धेऽपि बहिरङ्गे अन्तरङ्गं भवति न भवतीत्यन्तरङ्गस्य भावाभावौ विधीयेते; यथा **'उशीनरवन्मद्रेषु यवाः'** **'मातृवदस्याः कलाः'** इति वाक्येन । तथा चाधीत्येत्यत्र यथा बहिरङ्गे एकादेशे असिद्धे स्वकार्यप्रवर्तयति सति ह्रस्वस्य श्रवणात् तुक्छास्त्रं भवति; तथा सिद्धेऽपि तस्मिन्प्रवर्तितकार्ये बहिरङ्गे अन्तरङ्गं तुक्छास्त्रं दीर्घस्यापि तुकं प्रवर्तयतीत्युक्तं भवति । तथा कोऽसिचदित्यत्रापि यथा असिद्धे बहिरङ्गे एकादेशशास्त्रे स्वकार्यमप्रवर्तयति सति इणोऽभावात् षत्वशास्त्रमन्तरङ्गं न भवति, तथा सिद्धे तस्मिन्प्रवर्तितकार्ये बहिरङ्गे एकादशशास्त्रे सत्यपि अन्तरङ्गशास्त्रं न भवति, स्वकार्यं षत्वं न प्रवर्तयतीत्युक्तं भवति । एवं ग्रामणि कुलमित्यादौ; अत्राप्यादेशलक्षणप्रतिषेध उन्नेयः । एवम् उपेद्ध इत्यत्रापि **'असिद्धं बहिरङ्गमन्तरङ्गे'** इत्यनेन यथा बहिरङ्गे गुणशास्त्रे असिद्धे स्वकार्यमप्रवर्तयति सति **'न धातुलोप आर्धधातुके'** इत्यन्तरङ्गशास्त्रं न भवति; तथा सिद्धेऽपि तस्मिन्बहिरङ्गे गुणशास्त्रे स्वकार्यं प्रवर्तयति अन्तरङ्गं निषेधशास्त्रं न भवतीति निषेधेन गुणनिषेधाभाव एव प्रतिपाद्यते । एवं च सखीयतेः क्विपि सखीः सख्युरित्यत्र क्यजकारलोपस्य स्थानिवद्भावात् यणि अन्तरङ्गे बहिरङ्गस्य वलिलोपस्य नासिद्धत्वनिषेधः, बहिरङ्गनिर्वृत्तमचमाश्रित्य अन्तरङ्गप्रवृत्त्यभावात् ।।

* * * * *

तदेतद्द्विविधमसिद्धत्वं निरूपितम् । तत्र कतरः पक्षः श्रेयानिति संशये तन्निर्णयार्थं कथान्तरं प्रस्तूयते-

इह **'षत्वतुकोरसिद्धः'** **'असिद्धवदत्रा भात्'** **'असिद्धं बहिरङ्गमन्तरङ्गे'** **'पूर्वत्रासिद्धम्'** इत्येतैः सूत्रैःषत्वादिषु एकादेशादिशास्त्राणामसिद्धवद्भावो विधीयते।

तच्च तेषां शास्त्राणामसिद्धसादृश्यं स्वकार्याकरणादपि संभवति, **'अणुदित्सवर्णस्य चाप्रत्यय'** इत्यस्य वर्णोपदेशादिषु स्वाङ्गेषु असिद्धस्य स्वकार्यकरणादर्शनात् । स्वकार्यं कुर्वतोऽपि स्वनिवर्त्यनिमित्तककार्यसद्भावस्वनिमित्तककार्याभावाभ्यां चासिद्धसादृश्यं भवति, नवाभिषिक्ते राजपुत्रे यथाशक्ति दुष्टनिग्रहादिकं कुर्वाण एव सम्यगरूढमूलत्वादत्युपप्लवाद्यनुवृत्त्या असत्कल्पोऽयमिति व्यवहारदर्शनात्। तथा च तेषामसिद्धवद्भावे तत्किं स्वकार्याकरणं विधीयते? तेषु कुर्वत्स्वेव स्वकार्यं स्वनिवर्त्यनिमित्तककार्यसद्भावःस्वनिमित्तककार्याभावो वा विधीयत इति विचारःप्रवर्तते । तत्र एकादेशादिशास्त्राणां स्वनिमित्तककार्याभावः स्वनिवर्त्यनिमित्तककार्यसद्भावो वासिद्धत्वविधानेन विधीयते । तथा हि- **'षत्वतुकोरसिद्धः'** इत्यनेन कोऽसिचदित्यःदौ एकादेशस्य स्वनिमित्तककार्याभावः; अधीत्येत्यादौ स्वनिवर्त्यनिमित्तककार्यसद्भावः । **'असिद्धवदत्रा भात्'** इत्यनेन जङ्गहि जहीत्यत्र अनुनासिकलोपस्य जादेशस्य स्वनिमित्तककार्याभावः ; एधि शाधीत्यत्र स्वनिवर्त्यनिमित्तककार्यसद्भावः । **'असिद्धं बहिरङ्गमन्तरङ्गे'** इत्यनेन पचावेदमित्यादौ बहिरङ्गस्य स्वनिमित्तककार्याभावः; पङ्क्त्वा मृद्वा इत्यादौ बहिरङ्गस्य स्वनिवर्त्यनिमिककार्यसद्भावः । **'पूर्वत्रासिद्धम्'** इत्यनेन राजभ्यां तक्षभ्यामित्यादौ नलोपस्य स्वनिमित्तककार्याभावः; सुपर्वा इत्यादौ स्वनिवर्त्यनिमित्तककार्यसद्भाव इति । न त्वेकादेशादिशास्त्राणां स्वकार्याप्रवर्तकत्वमपि, तथा सति नधातुलोपसूत्रे भाष्यकारेण उपेद्धः प्रेद्ध इत्यत्रान्तरङ्गे निषेधे गुणस्यासिद्धत्वाद्गुणसमर्थनानुपपत्तिः। न चासिवद्धद्भवतः शास्त्रस्य स्वकार्यप्रवर्तकत्वाङ्गीकारे स्योनः स्योनेत्यत्र लघूपधगुणे कृते इगभावात् यणादेशो न स्यात्; तथा प्रस्फोर्यमवगोर्यमित्यत्र **'हलि च'** इति दीर्घे लघूपधत्वाभावात् गुणो न स्यादिति वाच्यम्, एधि शाधि अधीत्येत्यादौ प्रथमचरमप्रवृत्तशास्त्रद्वयविषय इव स्योनः स्योनेत्यादौ युगपत्प्रवृत्तशास्त्रद्वयविषयेऽपि असिद्धीभवता शास्त्रेण स्वकार्ये प्रवर्तित एव स्वकार्येऽपि स्वनिवर्त्यनिमित्तककार्यसद्भावरूपासिद्धत्वविधानेन स्योनः स्योनेत्यादौ गुणे कृते एकारस्यैव यणादेशस्य प्रस्फोर्यमित्यादौ ऊकारस्यैव लघूपधगुणस्य चोपपत्तेः । न चासिद्धवद्भवतः शास्त्रस्य स्वकार्यप्रवर्तकत्वे नधातुलोपसूत्रे भाष्यकृता उपेद्धं इत्यादावसिद्धत्वाद्गुणप्रवर्तनं न नियामकम्, सूत्रस्यैव प्रत्याख्यास्यमानत्वात् आर्धधातुकग्रहणस्य रोरवीतीति प्रत्युदाहरणोपन्यासवत् तात्पर्याभावेनैव तद्ग्रन्थप्रवृत्तेरिति वाच्यम्, तद्ग्रन्थस्य तात्पर्याभावेऽपि **'क्ङिति च'**

इत्युत्तरसूत्रे भाष्यकारेण रोरवीतीत्युदाहरणे याङ्ङिनमित्तेऽन्तरङ्गे गुणनिषेधे कर्तव्ये तिङ्ङिनमित्तस्य गुणस्यासिद्धत्वाद्गुणसमर्थनस्य नियामकत्वोपपत्तेः । पचावेदमधीत्य राजभ्यां कोऽसिचदित्यादिप्रथमप्रवृत्तबहिरङ्गाद्यसिद्धत्वविषये स्वकार्याप्रवर्तकत्वरूपासिद्धत्वस्य बाधितत्वेन विधातुमशक्यत्वाच्चेति प्रथमा कक्ष्या ।।

षत्वादिषु एकादेशादिशास्त्राणां स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वमेव विधीयते; न तु सत्येव स्वकार्ये स्वनिवर्त्यनिमित्तककार्यसद्भावस्वनिमित्तककार्याभावरूपम्; तथा सति अक्राष्टामित्यादौ **'षढोः कः सि'** इति कत्वे परकार्ये सत्येव **'झलो झलि'** इति लोपः स्यात् । वृक्ष इन्द्रमित्यादौ सवर्णदीर्घे बहिरङ्गकार्ये सत्येवाद्गुणः स्यात्। अत एव वामनादिभिः **'असिद्धं कार्यं न करोतीत्यर्थः'** इति स्वकार्याप्रवर्तकत्वमेव व्याख्यायते । न च कोऽसिचत् अधीत्य पचावेदम् एधि शाधि राजभ्यामित्यादौ एकादेशादिशास्त्राणां स्वकार्यप्रवर्तनानन्तरमेव षत्वादीनां प्राप्तेस्तत्र षत्वादिषु कर्तव्येषु प्रवर्तितकार्याणामेकादेशादिशास्त्राणां स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वं बाधितत्वाद्विधातुमशक्यमिति वाच्यम्; मृजेरक्ङिति प्रत्यये वृद्धिर्भवतीतिवत् अज्झल्भिन्नं तुल्यास्यप्रयत्नं सवर्णसंज्ञं भवतीतिवच्च विधिपरिभाषान्यायेन उत्सर्गापवादन्यायेन वा **'षत्वतुकोरसिद्धः'** इत्यादिशास्त्राणाम् **'एङः पदान्तादति'** इत्यादिशास्त्रैरेकवाक्यतया पदान्तादेङोऽति परे पूर्वपरयोः षत्वकर्तव्यतां विना पूर्वरूपमेकादेशो भवतीत्याद्युक्तिभङ्ग्या षत्वादिकर्तव्यतायामेकादेशादिशास्त्राणामनारम्भानुमानात् **'एकविभक्ति चापूर्वनिपाते'** इतिवत् इममेकादेशमाश्रित्य षत्वं न भवति इत्यादिप्रतीतौ कोऽसिचत् जङ्घहि पचावेदं राजभ्यामित्यादौ आदेशलक्षणकार्याभावसिद्धेः, अधीत्य प्रेत्य एधि शाधिपङ्क्त्या मृद्धा सुपर्वा राजेत्यादौ 'षत्वतुकोः-' इत्यादिशास्त्राणां पूर्ववदेव **'अकः सवर्णे दीर्घः'** इत्यादिशास्त्रैरेकवाक्यत्वेन अकः सवर्णे अचि परे पूर्वपरयोस्तुकोऽकर्तव्यतायां दीर्घ एकादेशो भवतीत्याद्युक्तिभङ्ग्या दण्डाग्रमित्यादौ तुकोऽकर्तव्यत्वात् झटिति दीर्घप्रतीतावपि अधीत्येत्यादौ तुकः कर्तव्यत्वेन तुक्प्रवृत्तिपर्यन्तं दीर्घविलम्बस्य तुकः पश्चाद्दीर्घस्य च प्रतीत्या उत्सर्गलक्षणकार्यसिद्धेश्च । अत एव कैयटेन 'एकादेशशास्त्रं तुक्छास्त्रे असिद्धम्' इति भाष्यस्य 'ततश्च पूर्वं तुक्छास्त्रं प्रवर्तते, पश्चादेकादेशशास्त्रमित्युक्तं भवति' इत्यभिप्रायो व्याख्यातः । न च बहिरङ्गादीनां स्वकार्याप्रवर्तकत्वे भाष्ये

'क्ङिति च' इति सूत्रे रोरवीतीत्यत्र सार्वधातुकनिमित्तस्य गुणस्य प्राप्तस्य बहिरङ्गस्य तन्निमित्तग्रहणाभावे यङ्निमित्ते **'क्ङिति च'** इति निषेधेऽन्तरङ्गे कर्तव्ये असिद्धत्वात् गुणसमर्थनानुपपत्तिः स्वकार्याप्रवर्तकत्वलक्षणासिद्धत्वनिषेधयोरविशेषादिति वाच्यम्, उक्तरीत्या बहिरङ्गपरिभाषाया विध्येकवाक्यत्वावश्यंभावेन अङ्गस्य गुणो भवत्यन्तरङ्गकर्तव्यताभाव इत्युक्तिभङ्ग्या **'एकविभक्ति चापूर्वनिपाते'** इतिवत् इमं गुणमाश्रित्य अन्तरङ्गं न भवतीति तस्य स्थानिनमाश्रित्य तु प्रवर्तमानमन्तरङ्गं भवतीत्युत्सर्गलक्षणभावादेशलक्षणप्रतिषेधयोरेव प्रतीत्या अन्तरङ्गगुणनिषेधाभावमात्रप्रतीतेर्गुणबुद्धेर्निष्प्रत्यूहत्वादिति द्वितीया ।।

यदि विधिपरिभाषयोरेकवाक्यत्वेन अन्तरङ्गनिषेधादिकर्तव्यतां विना गुणो भवतीत्युक्तिभङ्ग्या गुणनिषेधाभावमात्रप्रतीतिरिति; तर्हि **'क्ङिति च'** इति परिभाषाया अपि विध्येकवाक्यत्वेन क्ङित्परभिन्नस्य अन्तरङ्गकर्तव्यतां विना गुणो भवतीति विधिपर्यवसानात्सर्वथैव रोरवीतीत्यत्र गुणाप्राप्तिप्रसङ्गः । **'क्ङिति च'**इति सूत्रे भाष्यकारेण 'कार्यकालं संज्ञापरिभाषम् । यत्र कार्यं तत्र द्रष्टव्यम् सार्वधातुकार्धधातुकयोः । उपस्थितमिदं भवति क्ङिति चेति' इत्यनेन ग्रन्थेन **'क्ङिति च'** इत्यस्य परिभाषात्वाङ्गीकारात् । एवं मन्दमध्यमप्रतिपत्रपेक्षयथोद्देशपक्षे वाक्यभेदाङ्गीकारे च **'क्ङिति च'** इति परिभाषावत् बहिरङ्गपरिभाषाया अपि भिन्नवाक्यत्वात् तत्रत्यभाष्यपर्यालोचनायाम् 'अथ वा बहिरङ्गो गुणः' इत्यादिपरिहारग्रन्थस्य यथोद्देशपक्षावलम्बनेन प्रवृत्त्यवगतेश्च वाक्यभेदात् रोरवीतीत्यत्र 'सार्वधातुक-' इति गुणोपस्थितिसमये **'क्ङिति च'** इत्यत्र तन्निमित्तग्रहणाभावे क्ङिति परे इको गुणवृद्धी नेति निषेधशास्त्रस्याप्युपस्थित्या तत्कालोपस्थितया बहिरङ्गपरिभाषया गुणशास्त्रस्य स्वकार्याप्रवर्तकत्वलक्षणासिद्धत्वज्ञानेन गुणाभावबुद्धिप्रसङ्गो दुर्वारः। अतः सत्येव स्वकार्यप्रवर्तने स्वनिवर्त्यनिमित्तककार्यसद्भावस्वनिमित्तककार्याभावरूपमसिद्धत्वमेवाश्रयणीयम्; न तु स्वकार्याप्रवर्तकत्वलक्षणमिति तृतीया ।।

षत्वादिषु एकादेशादिशास्त्राणां स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वमेव विधीयते; न तु सत्येव स्वकार्ये स्वनिवर्त्यनिमित्तककार्यसद्भावस्वनिमित्तककार्याभावरूपम्, तथा सति अक्राष्टां वृक्ष इन्द्रमित्यादौ परबहिरङ्गकार्यप्रवृत्तिदोषस्येदानीमप्य-

परिहारात् । न च **'क्ङिति च'** इति सूत्रे रोरवीतीत्यत्रान्तरङ्गगुणनिषेधे कर्तव्ये बहिरङ्गस्य गुणस्यासिद्धत्वात्तत्समर्थनानुपपत्तिः, **'मृजेर्वृद्धिः' 'कर्मण्यण्'** इत्यादिना प्रतिषेधापवादविषये क्ङिति आकारान्ते च मृष्टः गोद इत्यादौ वृद्धेरणश्च साधुत्वप्रतिपत्तौ आचार्यवचनस्य भ्रमजनकत्वेनाप्रामाण्यप्रसङ्गात् सिद्धान्ते विधिनिषेधयोरुत्सर्गापवादयोश्चैकवाक्यतावश्यंभावेन **'क्ङिति च'** इत्यत्र तन्निमित्तग्रहणाभावे अक्ङित्परस्याङ्गस्येको गुणो भवतीति विधिपर्यवसानेन अन्तरङ्गबहिरङ्गशास्त्रद्वयाभावाद्बहिरङ्गासिद्धत्वेन परिहारस्यासंभवदुक्तिकत्वेन त्वन्मतेऽपि तत्रत्यभाष्यवचनस्य कौशल्याय व्युत्पादनमात्रपरत्वस्यावश्यमभ्युपगन्तव्यत्वादिति चतुर्थी ।।

'क्ङिति च' इत्यत्र तन्निमित्तग्रहणाभावे इकः क्ङिति परे गुणवृद्धी न भवत इति सूत्रार्थे विज्ञायमाने रोरवीतीत्यत्र यङ्माश्रित्य प्रत्ययलक्षणेन प्राप्तं गुणनिषेधम् **'न लुमताङ्गस्य'** इति प्रथमं परिहृत्य, **'न लुमताङ्गस्य'** इत्यत्र अङ्गाधिकारकार्यस्य प्रत्ययलक्षणस्य प्रतिषेधपक्षेऽपि कार्यकालपक्षाश्रयणे **'क्ङिति च'** इति प्रतिषेधस्याङ्गाधिकारकार्यत्वात् प्रत्ययलक्षणप्रतिषेधेन परिहृत्य प्रवर्तितस्य ' अथ वा बहिरङ्गो गुणः । अन्तरङ्गः प्रतिषेधः' इत्यनन्तरग्रन्थस्य **'न लुमताङ्गस्य,** इत्यङ्गाधिकारनिर्देशे यथोद्देशपक्षे गुणनिषेधप्रसङ्गेन तत्पक्षाभिप्रायेण प्रवृत्त्यौचित्यात् यथोद्देशपक्षे च शास्त्रद्वयसंभवेन बहिरङ्गासिद्धत्वेन परिहारस्यासंभवदुक्तिकत्वाभावात्सत्येव स्वकार्यप्रवर्तने स्वनिमित्तककार्याभावरूपमसिद्धत्वमभ्युपगच्छतो मम पक्षे तावन्न दोषः । न च परिभाषान्तराणां यथोद्देशपक्षसंभवेऽपि **'क्ङिति च'** इति निषेधरूपपरिभाषाया न यथोद्देशपक्षसंभवः, वाक्यभेदे विधिशास्त्रस्य निषेधविषये भ्रमजनकत्वेनाप्रामाण्यप्रसङ्गादिति वाच्यम्, बुद्ध्युन्मज्जननिमज्जनाभ्यां सूक्ष्मब्रह्मप्रतिपत्त्युपायतयान्नमयादीनां ब्रह्मत्वप्रतिपादकस्य श्रुतिवाक्यस्येव लोके सूक्ष्मारुन्धतीप्रतिपत्त्युपायतया स्थूलनक्षत्रे अरुन्धतीत्वप्रतिपादकस्य आप्तवाक्यस्येव च इहापि साधुशब्दप्रतिपत्त्युपायतया तत्र कार्यविशेषप्रतिपादकस्य शास्त्रस्याप्रामाण्यदोषाभावात् यथोद्देशपक्षेऽपि इक एव गुणवृद्धी क्ङिति न गुणवृद्धी इति परिभाषार्थे प्रथमं बुद्धिस्थे सति पश्चात् **'मृजेर्वृद्धिः'** इत्यादिविधिशास्त्रस्य तदनुरोधेनैव प्रतिपत्त्या अनिकः क्ङिति च गुणवृद्धिप्रसक्त्यभावेन भ्रमप्रसङ्गाभावात् । तदुक्तम्- **'परिभाषाः पुनरेकदेशस्थाः सर्वं शास्त्रमभिज्वलयन्ति'** इति । तथा च यथोद्देशेऽपि संज्ञापरि-

भाषे रोरवीतीत्यत्र न मत्पक्षे गुणसमर्थनानुपपत्तिः । स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वमभ्युपगच्छतस्तव मते गुणसमर्थनानुपपत्तिस्तदवस्थैवेति त्वत्पक्षएव दोषः। किं च बहिरङ्गपरिभाषाया विध्येकवाक्यत्वेन सार्वधातुकार्धधातुकयोर्गुणो भवति अन्तरङ्गकर्तव्यत्वाभाव इत्युक्तिभङ्ग्या **'एकविभक्ति चापूर्वनिपाते'** इतिवत् गुणाश्रयान्तरङ्गकार्याभावमात्रप्रतीत्या गुणप्रवृत्त्यङ्गीकारे **'षढोः कः सि'** इत्यादावपि षढोः सकारे परे को भवति पूर्वकर्तव्यत्वाभावे इत्युक्तिभङ्ग्या ककाराश्रयं पूर्वकार्यं न भवतीति स्वाश्रयकार्याभावस्य तत्र प्रतीत्या ककारप्रवृत्त्यङ्गीकारापत्तेस्तावतापि प्रत्यक्षप्रवेशादक्राष्टां वृक्ष इन्द्रमित्यादौ दोषो दुर्वारः । अथ पूर्वकार्यकर्तव्यत्वाभावे कत्वं भवतीत्युक्त्या 'झलो झलि' इति लोपस्य प्रथमं प्रवृत्तौ पुनर्निमित्ताभावान्न कत्वप्रवृत्तिरित्युच्येत; तर्हि इहापि सार्वधातुकार्धातुकयोरङ्गस्य गुणो भवत्यन्तरङ्गकर्तव्यत्वाभाव इत्युक्त्या प्रथमं प्रसक्तस्य गुणस्य अन्तरङ्गे निषेधे सति पश्चान्निषिद्धत्वान्न पुनर्गुणप्रवृत्तिरित्यपि तुल्यमिति पञ्चमी ।।

स्वकार्याप्रवर्तकत्वलक्षणमेव षत्वादिषु एकादेशादिशास्त्राणामसिद्धत्वं विधीयते । न च कोऽसिचदित्यादौ प्रवर्तितकार्यस्य शास्त्रस्य स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वं बाधितत्वाद्विधातुमशक्यमिति वाच्यम्, यथा एकादेशादिशास्त्रस्य सिद्धस्य असिद्धत्वं विधातुमशक्यमिति स्वकार्याप्रवर्तकत्वलक्षणमसिद्धसादृश्यं प्रतीयते तथा व्युत्पन्नं प्रति स्वार्थोपस्थितिजनकस्वभावस्य शास्त्रस्य स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वमपि विधातुमशक्यमिति स्वकार्याप्रवर्तकत्वलक्षणमसिद्धत्वं विधीयमानमनुपपत्त्या षत्वादिष्वेकादेशादिशास्त्राणामनारम्भमनुमापयति; यथा व्यक्तिपदार्थपक्षे सर्वव्यक्त्युद्देशेन प्रतिपदं शास्त्रप्रवृत्तौ वृक्षेभ्य इत्यत्र युगपत्प्रवृत्तयोः **'सुपि च'** **'बहुवचने झल्येत्'** इत्यनयोरन्यत्राचरितार्थयोः पर्यायेण उभयत्र प्रसङ्गे **'विप्रतिषेधे परं कार्यम्'** इति सूत्रेण विप्रतिषेधे परमेव भवति न पूर्वमिति पूर्वस्याचरितार्थस्य निषेधोऽनुपपद्यमानः पूर्वशास्त्रस्य तस्मिन्विषये अनारम्भमेवानुमापयति । एवं च षत्वादिष्वेकादेशादिशास्त्राणामनारम्भप्रतीत्या षत्वादिषु कर्तव्येषु एकादेशाद्यभावप्रतीत्या एकादेशादिप्रयुक्तषत्वादिकार्याभावस्य एकादेशादिस्थानिप्रयुक्ततुगादिकार्यस्य च प्रतिपत्त्या कोऽसिचत् योऽसिचत् अधीत्य प्रेत्य जङ्गहि जहि एधि शाधि पचावेदं पचामेदं पक्त्वा मृद्वा राजभ्यां तक्षभ्यां राजा सुपर्वा इत्यादिरूपसिद्धिः । न च

कोऽसिचत् जहि पचावेदं राजभ्यामित्यादावादेशलक्षणकार्याभावप्रतीतिस्थले षत्वादिषु एकादेशादिशास्त्रानारम्भप्रतीत्या एकादेशाद्यभावप्रतीतौ षत्वादिशास्त्रप्राप्त्यभावात् षत्वाद्यभावबुद्ध्यनन्तरं षत्वादिकर्तव्यत्वाभावादेकादेशादिसास्त्रारम्भप्रतीत्या एकादेशादिकार्यप्रतीत्यनन्तरमपि षत्वादिशास्त्रप्राप्त्या षत्वादिकर्तव्यतोपस्थितौ एकादेशादिशास्त्रानारम्भप्रतीत्या पूर्ववदुपस्थितिक्रमेण चक्रकप्रससङ्गः, **'चक्रकेष्विष्टतो व्यवस्था'** इति परिभाषया पुनः पुनः प्रसक्तानेकशास्त्रप्रयुक्तप्रतीतेश्चक्रकप्रसङ्गे **'न ह्यव्यवस्थाकारिणा शास्त्रेण भवितव्यम्'** इति न्यायेनोत्थापितया इष्टरूपप्रतीतावेव पर्यवसानव्यवस्थापनात् । स्योनः स्योना वृक्ष इन्द्रं प्लक्ष इन्द्रं प्रस्फोर्यम् अवगोर्यम् अक्राष्टाम् अक्राष्ट इत्यत्र युगपत्प्रसक्तयोर्यणगुणयोः पूर्वयोर्गुणसलोपयोश्च प्रवृत्तौ बहिरङ्गयोर्गुणसवर्णदीर्घयोः परयोर्दीर्घकत्वयोश्च प्राप्त्यभावादेवाभावः । एवं षत्वादिष्वेकादेशादिशास्त्राणामनारम्भानुमाने तत्कार्याभावप्रतीतौ यथायोगं षत्वादीनां प्रवृत्तिनिवृत्ती भवत इति न क्वापि दोषः । एवं च उपेद्धः प्रेद्धः रोरवतीत्यत्रापि अन्तरङ्गे गुणनिषेधे कर्तव्ये बहिरङ्गस्य गुणस्यासिद्धत्वादादेशलक्षणकार्यस्य गुणप्रसक्तिप्रयुक्तगुणनिषेधस्याभावप्रतीत्यनन्तरं कोऽसिचदित्यत्र षत्वाभावबुद्ध्या पर्यवसानवत् **'चक्रकेष्विष्टतो व्यवस्था'** इति परिभाषया गुणबुद्ध्या पर्यवसानमिति न दोषः । 'असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं च' इति वार्तिकस्य असिद्धत्वप्रयोजनोदाहरणमात्रत्वेन परिगणनार्थत्वाभावात् अक्राष्टां वक्ष इन्द्रमित्यादौ उत्सर्गलक्षणकार्याभावस्यापि प्रयोजनत्वविरुद्धमिति सर्वं समञ्जसम् ।।

इति

श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यमहाव्रतयाजि श्रीमदप्पयमखिवरविरचितायां पाणिनितन्त्रवादनक्षत्रमालायाम्

।। असिद्धत्वसमर्थनवादः ।।

।।श्रीः।।

अथ यदुक्तम्- उपेद्ध इत्यत्र 'नधातुलोपे-' इति सूत्रे बहिरङ्गत्वाद्गुणसमर्थने भाष्यकारस्य तात्पर्याभावः, सूत्रस्यैव प्रत्याख्यास्यमानत्वादिति; तत्प्रसङ्गात्कथान्तरं प्रस्तूयते-

किं तत्सूत्रप्रत्याख्यान एव तात्पर्यमस्ति न वेति प्रत्याख्यानोपपत्त्यनुपपत्तिभ्यां संशयः । तत्प्रत्याख्याने तात्पर्यमस्त्येव, तत्रानुपपत्त्यभावात् । तथा हि - बेभिदिता चेच्छिदिता कुषुभिता समिधिता इत्यादौ अल्लोपस्य स्थानिवत्वादेव न पुगन्तलघूपधगुणप्रसङ्ग इति न तदर्थं नधातुलोपसूत्रापेक्षा । लोलुवः पोपुव इत्यत्रापि **'अतो लोपः' 'यस्य हलः'** इत्यत्र यस्येति योगविभागात् यप्रत्ययस्य चातो लोपविधानात् प्रतिपदविधिमपवादमपि यङ्लुकं बाधित्वा प्रथममतो लोपे सति पश्चादवशिष्टस्य यकारस्य **'यङोऽचि च'** इति लुकि **'सार्वधातुकार्धधातुकयोः'** इति प्राप्तस्य गुणस्य स्थानिवत्त्वादेव निवृत्तिसंभवात् । न च **'सार्वधातुकार्धधातुकयोः'** इति प्राप्तस्य गुणस्य स्थानिवत्त्वान्निवृत्तावपि लोलुवः पोपुव इत्यादावुवङादेशे उकारस्य आदिष्टादचः पूर्वविधिं प्रति स्थानिवत्त्वाभावाल्लघूपधगुणप्रसङ्ग इति तन्निवृत्तये नधातुलोपसूत्रापेक्षेति वाच्यम्, लोलुव इत्यत्र उवङि सति प्राप्नुवतो लघूपधगुणस्य **'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य'** इति परिभाषया निवृत्तेः । न च लोलुवादिषु यस्येति योगविभागादतो लोपाभ्युपगमे तस्य स्थानिवद्भावात् **'सार्वधातुकार्धधातुकयोः'** इति गुणवत् व्यवधानादचि प्रत्यये उवङादेशोऽपि न स्यादिति वाच्यम्, स्थानिवद्भावात् यङकार एवोवङादेशसंभवात् गुणस्य तु **'क्ङिति च'** इति प्रतिषेधात् । न च यङ्लुकि अतो लोपाभ्युपगमे जङ्गमः चङ्खनः दरीदृशः देद्यः सनीस्रंसः दनीध्वंस इत्यादौ अतो लोपस्य स्थानिवद्भावात् **'गमहनजन-' 'ऋदृशोऽङिगुणः' 'दीङो युडचि क्ङिति' 'अनिदिताम्-'** इत्युपधालोपगुणयुडुपधानकारलोपाः प्राप्नुवन्तीति वाच्यम्, जङ्गमः चङ्खन इत्यत्र अनङीत्युपधालोपप्रतिषेधात् दरीदृश इत्यत्रापि **'संज्ञापूर्वको विधिरनित्यः'** इति गुणाभावसिद्धेः । देद्य इत्यत्रापि अजादेः क्ङित एव युड्विधानात् पूर्वस्य विधीयमानकार्याभावात् स्थानिवत्त्वाभावः; आगमशासनस्यानित्यत्वाद्वा युडभावः । सनीस्रंसो दनीध्वंस इत्यत्रापि वार्तिककारमते **'ऊतोऽचि'** इति वचनादूकारान्तात्परस्यैव यङोऽचि लुग्विधानात्तत्र लुगभावेन अतो लोपे **'यस्य हलः'** इति यलोपे च प्रत्ययलक्षणेन उपधानकारलोपे सनीस्रसो दनीध्वस इत्येव भवितव्यम् । भाष्यकारमतेन यङो लुक्पक्षेऽपि यङ्लुकि अतो लोपाभ्युपगमेन स्थानिवत्त्वात्प्राप्तोऽप्युपधानलोपः अङ्गवृत्तपरिभाषयैव निवर्त्यते । अतो यङ्लुकि अतो लोपाभ्युपगमे न कोऽपि दोषः ।

लोलुवादिषु च स्थानिवद्भावात् उवङादेशो गुणाभावश्च सिद्ध इति नधातुलोपसूत्रस्य नोपयोग इति प्रथमा ।।

यदुक्तम्- लोलुवादिषु उवङि कृते प्राप्नुवतो लघूपधगुणस्य अङ्गवृत्तपरिभाषयैव निवृत्तेर्नधातुलोपसूत्रानर्थक्यमिति, तन्न; नधातुलोपसूत्रं परित्यज्य लोलुवादिसिद्धये अङ्गवृत्तपरिभाषाश्रयणे विशेषाभावात्, लोलुवादिषु नधातुलोपसूत्रेणैव सिद्धौ अङ्गवृत्तपरिभाषावैयर्थ्यमिति वैपरीत्यस्यापि वक्तुं शक्यत्वात् । न च युष्मभ्यमस्मभ्यमित्यादौ **'बहुवचने झल्येत्'** इत्येत्वस्य **'सुपि च'** इति दीर्घत्वस्य च निवृत्तये अङ्गवृत्तपरिभाषा अवश्यमाश्रयणीया, **'भ्यसोऽभ्यम्'** इत्यभ्यमादेशाश्रयणेनाप्येत्वदीर्घत्वयोर्निवृत्तेः **'शेषे लोपष्टिलोपः'**इति पक्षे अभ्यमादेशस्यावश्याश्रयणीयत्वाच्च। न च स्थूलमाचष्टे स्थवयति दूरमाचष्टे दवयतीत्यत्र **'तत्करोति तदाचष्टे'**इति णिचि **'णाविष्ठवत्प्रातिपदिकस्य'** इति इष्ठवद्भावात् 'स्थालदूर-' इत्यादिना यणादिपरलोपे पूर्वस्य गुणे अवादेशे च **'अत उपधायाः'** इति वृद्धिप्रसङ्गात् तन्निवृत्त्यर्थमङ्गवृत्तपरिभाषा अवश्यमाश्रयणीयेति तत एव लोलुवादिसिद्धौ नधातुलोपसूत्रानर्थक्यमिति वाच्यम्; **'तत्करोति तदाचष्टे'** 'तेनातिक्रामति' इत्यादीनाम् **'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च'** इति सामान्यगणसूत्रप्रपञ्चार्थत्वेन तत्रत्यबहुलग्रहणादेव वृद्ध्यभावोपपत्तौ तदर्थमङ्गवृत्तपरिभाषानपेक्षणात्, स्थवयति दवयतीत्यादौ यणादिपरलोपे गुणे च कृते अवादेशात्पूर्वम् **'अचो ञ्णिति'** इति वृद्धिप्रसङ्गस्य बहुलग्रहणन्तरेण अङ्गवृत्तपरिभाषया परिहर्तुमशक्यत्वात्, प्रियमाचष्टे प्रापयतीत्यौद 'प्रियस्थिर-' इत्यादिना अङ्गकार्ये प्रादेशे प्रवृत्तेऽपि वृद्धिपुगागमयोरकृतयोः प्र इत्यस्य प्रयोगसमवायिरूपत्वाभावेन अङ्गस्य प्रयोगार्हत्वलक्षणनिष्ठितत्वाभावादङ्गवृत्तपरिभाषाया अप्रवृत्त्या वृद्धिपुगागमप्रवृत्तिवत् स्थवयतीत्यत्र गुणे कृते अवादेशात्पूर्वं स्थो इति रूपस्य प्रयोगसमवायित्वाभावेन अङ्गस्यानिष्ठितत्वादवादेशवत् वृद्धेरप्यङ्गवृत्तपरिभाषया निवर्तयितुमशक्यत्वात्। तस्मात् स्थवयतीत्यत्र अवादेशात्पूर्वं वृद्ध्यभावार्थमवश्याश्रयणीयेन बहुलग्रहणेनैव तदनन्तरम् **'अत उपधायाः'** इति वृद्ध्यभावस्याप्युपपादयितुं शक्यत्वेन अङ्गवृत्तपरिभाषाया लोलुवादेरन्यत्र प्रयोजनाभावः । न च पिबतीत्यत्र **'प्राघ्राध्मा-'** इत्यादिना पिबादेशे कृते लघूपधगुणाभावार्थमङ्गवृत्तपरिभाषाश्रयणमावश्यकमिति वाच्यम्, पिबेरदन्ततत्वविज्ञानादेव लघूपधगुणाप्रसक्तेः

स्थानिवत्सूत्रे भाष्यकारेणापि **'पिबिरदन्तः'** इत्यदन्तत्वप्रतिज्ञानेनैव लघूपधगुणस्य परिहृतत्वात् । न च पिबेरदन्तत्वविज्ञाने धातोरन्त उदात्तो भवतीत्युदात्तत्वमकारस्यैव स्यात्; नेकारस्येति वाच्यम्, **'धातोः'** इति सूत्रे भाष्य एव पिबेरदन्तत्वेऽप्याद्युदात्तत्वनिपातनेन इकारे उदात्तत्वस्य समर्थितत्वात् । तस्मादङ्गवृत्तपरिभाषाया लोलुवादेरन्यत्र प्रयोजनाभावात् लौकिकप्रयोगदर्शनसापेक्षाङ्गवृत्तपरिभाषाश्रयणेन लोलुवादिकं प्रसाध्य तन्निरपेक्षस्य नधातुलोपसूत्रस्य प्रत्याख्यानं नटभार्यावलम्बनेन कुलभार्यापरित्यागमनुसरति । किं च लोलुवादिषु उवङादेशात्पूर्वम् 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य गुणस्य स्थानिवद्भावान्निवृत्त्युपपादनाय **'अतो लोपः''यस्य हलः'** इत्यत्र यस्येति योगविभागः;उवङादेशानन्तरं प्राप्तस्य लघूपधगुणस्य निवृत्तये अङ्गवृत्तपरिभाषाकरणमिति महद्गौरवम् । नधातुलोपसूत्रकरणे तु न योगविभागः,न वा अङ्गवृत्तपरिभाषाकरणमिति महद्वैषम्यमुभयोः पक्षयोः । किं च लोलुवादिषु स्थानिवद्भावात् गुणनिवृत्तये योगविभागादतो लोपाङ्गीकारे दरीदृश इत्यत्र स्थानिवद्भावादेव **'ऋदृशोऽङि गुणः'** इति गुणप्रसङ्गः । न च **'संज्ञापूर्वको विधिरनित्यः'** इति गुणाभावः शक्यः प्रतिपत्तुम्, गत्यन्तराभावे कथंचित् स्वायंभुवमित्यादिलक्ष्यानुरोधादाश्रयणीयेन **'संज्ञापूर्वको विधिरनित्यः'** इत्यनेन कृतसूत्रप्रत्याख्यानायोगात्; अन्यथा लोलुवादिष्वपि तेनैव गुणाभावसिद्धौ स्थानिवद्भावार्थमतो लोपे योगविभागस्यापि वैयर्थ्यप्रसङ्गात् । एवं सनीस्रंसो दनीध्वंस इत्यत्र अङ्गवृत्तपरिभाषाप्रत्याख्यानात् अतो लोपाङ्गीकारे स्थानिवत्त्वादुपधानकारलोपप्रसङ्ग इति न शक्यं नधातुलोपसूत्रं प्रत्याख्यातुम् । भाष्यकारेण तु 'अल्लोपस्य स्थानिवत्त्वात्' 'अनारम्भो वा' 'उक्तं शेषे'इति सूत्रप्रत्याख्यानपरवार्तिकानुरोधात् यथामूलं व्याख्याय, उवङादेशानन्तरं लघूपधगुणनिवृत्त्यर्थं सूत्रस्यावश्यकत्वं वक्तव्यमपि स्वतन्त्रेच्छत्वादुपेक्षितमिति न तत्प्रत्याख्याने भगवतस्तात्पर्यमस्ति । अत एवोक्तहेतुभ्यां नधातुलोपसूत्रस्यावश्यकतां मन्यमानेन भाष्यकारेण **'कृन्मेजन्तः'** इत्यत्र **'उदुपधत्वमकित्त्वस्य निकुचिते'** इति नधातुलोपसूत्रप्रत्याख्यानाभिप्रायेण वार्तिककारोपन्यस्तस्य संनिपातपरिभाषाप्रयोजनस्य नधातुलोपसूत्रेणान्यथा- सिद्धिरुक्ता, सर्वथैव सूत्रप्रत्याख्याने तत्प्रयोजनान्यथासिद्ध्युपन्यासानुपपत्तेरिति द्वितीया ।।

यदुक्तम्- अङ्गवृत्तपरिभाषाया लोलुवादेरन्यत्र प्रयोजनाभावात् लोलुवाद्यर्थमङ्गवृत्तपरिभाषामाश्रित्य नधातुलोपसूत्रप्रत्याख्याने विशेषाभावः । लौकिकप्रयोगदर्शनसापेक्षत्वाज्जघन्या चाङ्गवृत्तपरिभाषेति, तन्नः; नह्यस्माभिरङ्गवृत्तपरिभाषा लोलुवाद्यर्थमारभ्यते; तर्हि नधातुलोपसूत्रारम्भादविशेषः, लौकिकप्रयोगदर्शनसापेक्षत्वाज्जघनन्यत्वदोषश्च स्यात् । किं तु **'ज्यादादीयसः'** इति सूत्रे **'वहोर्लोपो भू च बहोः'** इत्यतो लोपग्रहणमनुवर्त्य ज्यापरस्य ईयसो लोपविधाने **'आदेः परस्य'** इति ईकारस्य लोपे कृते **'अकृत्सार्वधातुकयोर्दीर्घः'** इति दीर्घत्वे च ज्यायानिति रूपसिद्धौ **'ज्यादादीयसः'** इत्यात्वारम्भात् सूत्रकारेणैव ज्ञापिता सा; भाष्यकारेणापि तस्मिन्सूत्रे ज्ञापितत्वेनोपन्यस्ता; लौकिकप्रयोगदर्शनसापेक्षत्वेऽपि अल्पयत्नसाध्यत्वाज्ज्यायसी न जघन्या । अतोऽङ्गवृत्तपरिभाषैव लोलुवाद्यर्थमाश्रयणीया; न तु नधातुलोपसूत्रं यत्नाधिक्यदोषादित्युच्यते । एवं च लोलुवादिषु 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य गुणस्याल्लोपस्य स्थानिवत्त्वान्निवृत्तिः; उवङादेशानन्तरं प्राप्तस्य लघूपधगुणस्य दरीदृशः दनीध्वंस इत्यत्राल्लोपस्य स्थानिवत्त्वात्प्राप्तस्य गुणस्य उपधानकारलोपस्य च अङ्गवृत्तपरिभाषयैव निवृत्तिरिति नधातुलोपसूत्रस्य नोपयोगः; न वा यङ्लुकि अतो लोपाङ्गीकारे क्वचिद्दोष इति तृतीया ।।

अथ यदुक्तम्- **'ज्यादादीयसः'** इत्यात्वविधानात्सूत्रकारेणैव ज्ञापिता अङ्गवृत्तपरिभाषा लोलुवाद्यर्थमल्पयत्नसाध्यत्वादाश्रयणीया; न तु नधातुलोपसूत्रमिति, तन्न; सिद्धे विधिरारभ्यमाणो ज्ञापको भवति । न च ज्यात्परस्येयसो लोपविधाने ज्यायानिति रूपं सिध्यति; **'अकृत्सार्वधातुकयोर्दीर्घः'** इत्यस्य दीर्घस्य क्ङित्येव विधानात्, अन्यथा उरुया धृष्णुया इत्यादौ **'सुपां सुलुक्-'** इत्यादिना यादेशे कृते दीर्घत्वप्रसङ्गात्, 'अयङ् यि क्ङिति' इत्यतः क्ङितीत्यनुवृत्त्या उरुया इत्यादौ दीर्घत्वनिवर्तनसंभवे च्छान्दसत्वेन परिहारस्य जघन्यत्वात् । तथापि यदि च्छान्दसत्वेन उरुया इत्यादौ दीर्घत्वाभावप्रतिपत्तिसंभवात् **'क्ङिति'** इत्यनुवृत्त्यनाश्रयणेन **'अकृत्सार्वधातुकयोर्दीर्घः'** इति दीर्घत्वसिद्धावात्वारम्भवैयर्थ्यमुच्यते; एवमपि स्वविषये फलसंपादकत्वाभावात् अङ्गवृत्तपरिभाषायामात्वारम्भस्य ज्ञापकत्वानुपपत्तिः; न ह्यङ्गवृत्तपरिभाषासत्त्वेऽपि ज्यायानित्यत्र ज्यादेशे ईयस ईकारलोपे 'अकृत्-' इति दीर्घप्रवृत्तेर्व्याहतिरस्ति, ज्य इति ह्रस्वान्तस्याङ्गस्य निष्ठितत्वाभावात् । अनर्थकमपि

वचनं स्वविषये फलमापादयत एवार्थस्य ज्ञापकम्, नान्यस्येत्युपपादितमधस्तात् । किं च **'बहोर्लोपो भू च बहोः'** **'इष्ठस्य यिट् च'** **'ज्यादादीयसः'** इति सूत्रक्रमात् **'ज्यादादीयसः'** इत्यात्वारम्भाभावे यिटा व्यवहितत्वादपि लोपोऽशक्यः प्रतिपत्तुमिति कुत एवानर्थक्यम्? एतेनेदं निरस्तम्- **'ज्यादादीसयः'** इत्यात्वारम्भस्य ज्ञापकत्वानुपपत्तावपि **'ज्ञाजनोर्जा'** इति दीर्घोच्चारणम् अङ्गवृत्तपरिभाषासत्त्वे लिङ्गम् । जानाति जायत इत्यत्र ह्रस्वान्तादेशविधानेऽपि **'अतो दीर्घो यञि'** इति दीर्घस्य सिद्धत्वात्- इति; ह्रस्वान्तस्य निष्ठितत्वाभावेन अङ्गवृत्तपरिभाषासत्त्वेऽपि दीर्घप्रवृत्तेरव्याघातात् स्वविषये फलसंपादकत्वाभावेन ज्ञापकत्वानुपपत्तेः, **'ज्ञाजनोर्जा'** इति दीर्घोच्चारणस्य स्वविषये फलसंपादनक्षमत्वादौचित्यात् **'आ गणान्तात् प्वादयः'** इत्येतदर्थज्ञापकत्वात् । तस्मिंश्च ज्ञापिते सति जानातीत्यत्र ज इति ह्रस्वान्तादेशे **'अतो दीर्घो यञि'** इति दीर्घत्वे त्यपि **'प्वादीनां ह्रस्वः'** इति ह्रस्वप्रसङ्गातन्निवृत्त्यर्थं दीर्घोच्चारणमर्थवद्भवति । तस्मान्न किंचिदप्यङ्गवृत्तपरिभाषाज्ञापकं संभवति । भाष्यकारेण तु स्थलत्रये अङ्गवृत्तपरिभाषाप्रयोजनत्वेनोपन्यस्ते पिबतीति प्रयोगे 'पिबिरदन्तः' इत्यदन्तत्वप्रतिज्ञानेन लघूपधगुणाभावस्य स्वयमेव स्थानिवत्सूत्रे समर्थनेन तात्पर्याभावस्य स्फुटावगमत्वात् । किं च **'अङ्गवृत्ते पुनरर्वृत्तावविधिः-'** इत्यस्य कोऽर्थः? किम् **'ज्यादादीयसः'** इत्यत्र कैयटेनोक्तः 'अङ्गे वृत्तं निष्पन्नं कार्यम् अङ्गवृत्तम्, तस्मिन्सति पुनरन्यस्याङ्गकार्यस्य प्रवृत्तावविधानं भवति' इति? किं वा **'टेः'** इत्यत्र हरदत्तेनोक्तः 'अङ्गाधिकारविहिते कस्मिंश्चित्कार्ये प्रवृत्ते पुनः कार्यान्तरस्य प्रवृत्तौ प्राप्तायामविधिस्तस्य कार्यस्य' इति? किं वा अङ्गस्य अङ्गाधिकारकार्ये प्रवृत्ते पुनरङ्गस्यैवाङ्गाधिकारकार्यान्तरप्रवृत्तौ प्राप्तायामविधिरिति? आद्ये पक्षे अङ्गवृत्त इति विवक्षणात् अस्मै इत्यत्र इदंशब्दाच्चतुर्थ्येकवचने त्यदाद्यत्वे **'अतो गुणे'** इति पररूपत्वे **'सर्वनाम्नः स्मै'** इति स्मैभावे च प्रत्ययवृत्ते अङ्गकार्यस्य **'हलि लोपः'** इति इदो लोपस्याविधिव्यावृत्तिसिद्धावपि आभ्यामित्यत्र त्यदाद्यत्वे अङ्गस्य यञादौ सुपि दीर्घात्पूर्वमन्तरङ्गत्वात् नानाश्रयत्वेन वार्णादाङ्गस्य बलवत्त्वाभावात् **'अतो गुणे'**इति पररूपत्वेऽङ्गवृत्ते सति पुनरङ्गकार्यस्य **'सुपि च'** इति दीर्घस्याविधिः स्यात् । द्वितीये पक्षे **'अतो गुणे'** इति पररूपस्याङ्गाधिकारकार्यत्वाभावात् अङ्गवृत्तपदेन आभ्यामित्यत्र यञि दीर्घत्वस्याविधिव्यावृत्तावपि तत्रैव त्यदाद्यत्वे अङ्गाधिकारकार्ये कृते **'अतो गुणे'** इति पररूपत्वस्य कार्यान्तरस्या-

विधिः स्यात् । तृतीयापक्षे तत्रैव **'अतो गुणे'** इति पररूपत्वस्य अङ्गाधिकार-कार्यत्वाभावादवधिव्यावृत्तावपि प्रापयतीत्यत्र प्रियमाचष्टे इत्यर्थे **'तत्करोति तदाचष्टे'** इति णिचि **'णाविष्ठवत्'** इचि इष्ठवद्भावात् **'प्रियस्थिर-'** इत्यादिना प्रादेशेऽङ्गाधिकारकार्ये प्रवत्ते पुनरङ्गकार्यस्य **'अचो ञ्णिति'** इति वृद्धेरविधिः स्यात्, अङ्गस्य वृद्धेरङ्गाधिकारकार्यत्वात् । अथ निष्ठितस्याङ्गस्य पुनर्वृत्तावविधिरित्युच्येत; तर्हि अङ्गवृत्ते पुनरिति व्यर्थम्, अस्मै आभ्यां प्रापयतीत्यादौ अङ्गस्य निष्ठितत्वाभावादेव इद्रूपलोपाद्यविधिव्यावृत्तिसिद्धः **'निष्ठितस्य वृत्तावविधिः'** इत्येतावतैव युष्मभ्यमस्मभ्यं स्थवयति दवयति पिबति लोलुवः पोपुव इत्यादावेत्वाद्यविध्युपपत्तेश्च । तस्मादविचारितरमणीयेयमङ्गवृत्तपरिभाषा । किंच लोलुवः पोपुवः युष्मभ्यमस्मभ्यमित्यादौ गुणादिरहितस्याङ्गस्य प्रयोगार्हत्वलक्षणनिष्ठिततत्वपरिज्ञानमङ्गवृत्तपरिभाषया गुणाद्यभावस्य साधुत्वज्ञानात्; गुणाद्यभावस्य साधुत्वप्रतिपत्त्युपयोगिपरिभाषाज्ञानं च तद्घटकीभूतनिष्ठिततत्वपरिज्ञानादित्यन्योन्याश्रयः । नापि गुणाद्यभावस्य साधुत्वप्रतिपादकशास्त्रान्तरन्निष्ठिततत्वज्ञानम्, तादृशस्य नधातुलोपसूत्रस्य त्वया प्रत्याख्यानात् अभ्यमादेशस्य चानङ्गीकारात् । शिष्टप्रयोगान्निष्ठिततत्वपरिज्ञानदर्शनमिति चेत्, तर्हि शिष्टप्रयोगान्निष्ठिततत्वेन ज्ञाते प्राप्तकार्यान्तराभावस्याङ्गवृत्तपरिभाषयैव साधुत्वप्रतिपत्तिसंभवे तिसृणामित्यादौ नामि दीर्घत्वाद्यभावप्रतिपत्तये 'न तिसृचतसृ' 'न ल्यपि' 'इदमो मः' इत्याद्यनेकशास्त्रारम्भवैयर्थ्यप्रसङ्गात् । अथ शिष्टप्रयोगदर्शनसापेक्षेण शास्त्रेण न शास्त्रान्तरणामानर्थक्यं पृषोदरादिसूत्रे भाष्यकारेण शिष्टानां शब्देषु प्रामाण्ये अष्टाध्याय्या वैयर्थ्यमाशङ्क्य 'शिष्टपरिज्ञानार्था अष्टाध्यायी' इत्यभिहितत्वात् शिष्टपरिज्ञानार्थत्वेन **'न तिसृचतसृ'** इत्यादिशास्त्राणामावश्यकत्वात् प्रातिस्विकवचनाभावे अगत्या कथंचित्पृष्टोदरादिसूत्रवत् अङ्गवृत्तपरिभाषाया आश्रयणीयत्वादिति चेत्, तर्हि किमपराद्धं तव नधातुलोपसूत्रेण । किं च लोलुवादिषु उवङादेशानन्तरं प्राप्तस्य लघूपधगुणस्य अङ्गवृत्तपरिभाषया निवृत्तिसंभवेऽपि ततः पूर्वं प्राप्तस्य सार्वधातुकगुणस्य न तया निवृत्तिः, अङ्गस्य निष्ठितत्वाभावात्; किं तु **'अतो लोपो यस्य'** इति योगविभागाद्विहितस्यातो लोपस्य स्थानिवद्भावात्। ततश्च यथा स्थानिन्यकारे सति गुणस्यादर्शनात्तल्लोपेऽपि गुणे कर्तव्ये तदभावातिदेशः; तथा उवङोऽपि स्थानिन्यदर्शनादकारलोपे उवङोऽप्यभावातिदेशः स्यात् । न च स्थानिन्यकारे यकारेण व्यवधानात् उवङोऽदर्शनेऽपि स्थान्यकारस्याजादित्वेन

उवङः संभवमात्रेणातिदेशः; गुणस्य च **'क्ङिति च'** इति प्रतिषेधेनासंभवादभावातिदेश इति वाच्यम्, **'यङोऽचि च'** इति यङ्लुकः पूर्वं यकारे विद्यमान एव अतो लोपविधानात्तस्यां दशायां प्रत्ययत्वार्थवत्त्वयोः समुदायनिष्ठत्वेन अकारमात्रस्य प्रत्ययत्वार्थवत्त्वयोरभावात् अर्थवत्यजादौ प्रत्यये विधीयमानस्य उवङोऽपि स्थानिन्यकारे असंभवेनाभावातिदेश एव स्यात् । न च 'यङोऽचि च' इति यकारस्य लुकोऽनन्तरम् अकारश्चेद्वर्तेत, स्यात्प्रत्ययोऽर्थवांश्च, तस्मिन्नुवङ्पि संभवेदिति कृत्वाचिन्तया संभवमात्रेणातिदेश इति वाच्यम्, एवमप्यनन्तर्भूतयङ्कारनिमित्तेऽन्तरङ्गे उवङि कर्तव्ये बहिर्भूतमच्प्रत्ययं निमित्तीकृत्य विहितस्य बहिरङ्गस्य यङ्लुकोऽसिद्धत्वात् यकारेण व्यवधानादुवङ् न स्यात् । न चान्तरङ्गे उवङि अचोरानन्तर्याश्रयणात् नाजानन्तर्यपरिभाषया न बहिरङ्गासिद्धत्वम्, अन्तरङ्गे अचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधस्य ज्ञापकाभावेन नाजानन्तर्यपरिभाषार्थत्वायोगात् येन बहिरङ्गशास्त्रेण निर्वृत्तमचं निमित्तीकृत्य यदन्तरङ्गं प्रवर्तते तस्मिन्नन्तरङ्गे कर्तव्ये तत् बहिरङ्गं नासिद्धमित्येव परिभाषार्थव्यवस्थापनात् प्रकारान्तरेण नाजानन्तर्यपरिभाषार्थकल्पने पचावेदमित्यादौ दोषप्रसङ्गस्योक्तत्वात् व्यवस्थापितेन चार्थेन लोलुवादावुवङि कर्तव्ये यङ्लुकोऽसिद्धत्वनिषेधालाभात् । लोलुवादौ यङ्लुकि अतो लोपानाश्रयणेन समुदायस्यैव लुकि तस्य हलचोरादेशत्वेन स्थानिवत्त्वाभावादच्प्रत्ययमपेक्ष्यैव उवङि कर्तव्ये यङ्लुकः समानाश्रयत्वेन उवङपेक्षया बहिरङ्गत्वाभावादच्प्रत्ययमपेक्ष्यैव उवङि कर्तव्ये यङ्लुकः समानाश्रयत्वेन उवङ्पेक्षया बहिरङ्गत्वाभावादसिद्धत्वाभावेन उवङ् सिध्यति । एवं च स्थानिवत्त्वाभावात् **'सार्वधातुकार्धधातुकयोः'**इति गुणनिषेधार्थं नधातुलोपसूत्रमवश्यं कर्तव्यमिति चतुर्थी ।।

नधातुलोपसूत्रे आरभ्यमाणे अभाजि राग इत्यत्र **'भञ्जेश्च चिणि'** **'रञ्जेश्च'** **'घञि च भावकरणयोः'** इत्युपधानकारलोपे **'अत उपधायाः'** इति प्राप्ताया वृद्धेः **'न धातुलोपे-'**इति निषेधप्रसङ्गात् इगन्तलक्षणयोर्गुणवृद्ध्योर्निषेध इत्याश्रयणीयम्। एवं च सति पापचकः पापठक इत्यत्र यङन्ताण्वुलि अतो लोपे **'यस्य हलः'**इति यलोपे च **'अत उपधायाः'** इति वृद्धेः नधातुलोपसूत्रेण निषेधाभावात् अतो लोपस्य स्थानिवद्भावात् वृद्ध्यभावो वक्तव्यः । एवं च बेभिदिता मरीमृजकः कुषुभिता

समिधितेत्यादौ यङ्लुक्क्यजन्तेभ्यस्तृचि अतो लोपे **'यस्य हलः'** इति यलोपे च अतो लोपस्य स्थानिवत्त्वादेव लघूपधगुणस्य मृजेर्वृद्धेश्चाप्रसङ्गात् नधातुलोपसूत्रानर्थक्यम् । बेभिदः चेच्छिदः मरीमृज इत्यादौ भिदादिभ्यो यङि पचाद्यचि अतो लोपे 'यस्य' इति योगविभागात् लुकं बाधित्वा अतो लोपे **'यङोऽचि च'** इति यकारस्य लुकि स्थानिवद्भावादेव गुणवृद्ध्योरप्रसङ्गः । वेव्यः जेज्यः नेन्यः देद्यः चेक्षियः चेक्रियः लोलुवः पोपुव इत्यादीवर्णोवर्णान्तेभ्यो यङि अचि अतो लोपे यङ्लुकि च प्राप्तस्य **'सार्वधातुकार्धधातुकयोः'** इति गुणस्य स्थानिवत्त्वादेव निवृत्तिः । अतो लोपविधानदशायाम् अकारस्य स्थानिनो यकारे सति प्रत्ययत्वार्थवत्त्वयोरभावात् अर्थवत्यजादौ प्रत्यये विधीयमानानां यणियङुवङामप्राप्तौ तस्मिन्संभवस्याप्यभावेन स्थानिवत्त्वेनाभावातिदेशात् यङ्लुको बहिरङ्गस्यासिद्धत्वेन यकारेण व्यवधानात् यणियङुवङामप्राप्तौ **'इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलमुपसंख्यानम्'** इति वार्तिकेन यणियङुवङ्षु कृतेषु प्राप्तस्य लघूपधगुणस्य च्छान्दसत्वात् तत्रत्यबहुलग्रहणादेव निवृत्तिरिति न क्वापि नधातुलोपसूत्रस्योपयोगः । न चोक्तरीत्या च्छन्दसि कथंचित् लोलुवादिसमर्थनेऽपि भाषायाम् 'यस्य' इति योगविभागाद्विहितस्य अतो लोपस्य स्थानिवद्भावात् 'सार्वधातुक-' इति गुणस्याभाववत् इयङुवङादीनामप्यभावप्रसङ्ग उक्तरीत्या प्रत्ययत्वाभावेन इयङुवङादीनां तत्रासंभवात् बहिरङ्गस्य यङ्लुकोऽसिद्धत्वेन व्यवधानाच्चेति वाच्यम्, **'यङोऽचि च'** इति यङ्लुकश्छन्दस्येव विधानेन भाषायामभावात् **'यङोऽचि च'** इति चकारेण बहुलग्रहणस्येव **'बहुलं छन्दसि'** इत्यतश्छन्दोग्रहणस्याप्यनुकर्षणात् **'हुश्नुवोः सार्वधातुके'** इत्यत्र वार्तिककारेण 'यङ्लुगर्थमिति चेदार्धधातुकत्त्वात्सिद्धम्' इति यङ्लुकि रोरुवतीत्यादौ तिङामार्धधातुकत्वाभ्युपगमेन हुश्नुग्रहणस्य प्रत्याख्यातुं शक्यत्वात्। यत्तु तत्रैव भाष्यकारेण हुश्नुग्रहणमेव यङ्लुको भाषायां सत्त्वे ज्ञापकत्वेनोपन्यस्तम्; तदपि 'किमेतस्य ज्ञापने प्रयोजनम्' इति प्रयोजनप्रश्नानन्तरम् 'बेभिदीति चेच्छिदीतीत्येतत्सिद्धं भवति' इति आदिग्रहणं विना रूपद्वयस्यैव प्रयोजनत्वेन उपन्यासदर्शनात् तद्रूपद्वय एव भाषायां यङ्लुकः सत्त्वे ज्ञापकम्, न सर्वत्र; अन्यथा **'क्ङिति च'** इति सूत्रे भाष्यकारेण 'अथ वा पूर्वस्मिन्योगे यदार्धधातुकग्रहणं तदनवकाशम्' इति आर्धधातुकग्रहणानर्थक्योपन्यासानुपपत्तेः; पूर्वसूत्रे आर्धधातुकग्रहणप्रयोजनत्वेनोपनयस्ते **'त्रिधा बद्धो वृषभो रोरवीति'** इति प्रत्युदाहरणे यङ्लुकोऽनैमित्तिक-

संस्कृत संस्थान पुस्तकालय 25291

त्वेन धातोर्लोपो यस्मिन्निति बहुव्रीह्याश्रयणाद्गुणनिषेधस्याप्रवृत्तिसिद्धावपि तोत्रीति मोमोर्ति इत्यादौ तुर्वीमुर्च्छाप्रभृतिभ्यो यङ्लुगन्तेभ्यस्तिब्निमित्ते **'सलोपः'** इति धात्वेकदेशयोः च्छ्वोर्लोपे प्राप्तस्य लघूपधगुणस्य निषेधप्रसङ्गेनार्धधातुकग्रहणस्यावश्यकत्वात् । अत एव कैयटेनाप्येवमेव व्याख्यातम्- 'एतच्च यङ्लुकछान्दसत्वमभ्युपगम्य भाष्यकारेणोक्तम् । भाषाविषयत्वे हि बहूनि प्रयोजनान्यार्धधातुकग्रहणस्य सन्ति' इति । यत्तु जयादित्येन **'यङोऽचि च'** इत्यत्र च्छन्दोग्रहणानुवर्तनं न प्रदर्शितम्; तदपि भाषायां क्वचिद्यङ्लुकः सत्त्वस्य हुश्नुग्रहणेन ज्ञापितत्वात् ज्ञापितस्थलादन्यत्र यङ्लुगभावस्य बहुलग्रहणेनैव प्रतिपत्तुं शक्यत्वाभिप्रायेण,न तु भाषायामपि यङ्लुकः सत्त्वाभिप्रायेण, एवं च भाषायां यङ्लुकः सत्त्वे प्रमाणाभावेन लोलुवादेश्छान्दसत्वेन इयङादिप्रकरणश्रुतबहुलग्रहणादेव इयङुवङ्विधानानन्तरं लघूपधगुणस्य निवृत्तिरिति नधातुलोपसूत्रस्य नोपयोग इति पञ्चमी ।।

यदुक्तम्- बेभिदीति चेच्छिदीतीत्युदाहरणद्वयादन्यत्र भाषायां यङ्लुकः सत्त्वे प्रमाणाभाव इति, तन्न; न हि तत्र भाष्यकारेण उदाहरणद्वय एव भाषायां यङ्लुकः सत्त्वे हुश्नुग्रहणं ज्ञापकमुपन्यस्तम्, किं तु यथाप्रयोगमन्यत्रापि । न ह्युदाहृतरूपद्वय एव भाषायां यङ्लुकः सत्त्वं ज्ञापयित्वा हुश्नुग्रहणमर्थवद्भवति, अनेकाचोऽसंयोगपूर्वोवर्णान्तस्याङ्गस्य यण्विधानादुदाहृतरूपद्वये च यणः प्राप्त्यभावेन तन्निवृत्त्यर्थत्वायोगात् बेभिदीति चेच्छिदीतीत्युदाहरणद्वयस्य रोरुवति योयुवतीत्याद्यनेकोदाहरणोपलक्षणार्थत्वस्यावश्यमभ्युपगन्तव्यत्वात्। किं च लोलुवादेः केवलच्छन्दोविषयत्वे हि नधातुलोपसूत्रप्रत्याख्याने तत्र स्थानिवत्त्वाद्गुणवृद्ध्यभावसमर्थनाय अतो लोपे 'यस्य इति योगविभागनर्थक्यप्रसङ्गः, **'यङोऽचि च'** इत्यत्रानुवृत्तात् छान्दसाद्बहुलग्रहणादेव गुणवृद्ध्यभावस्योपपादयितुं शक्यत्वात् । दृश्यते हि सूत्रप्रत्याख्यानसमये च्छन्दोविषये क्वचित्प्रयोजनदर्शनेऽपि च्छान्दसत्वादेव तत्समर्थनमन्यत्रापि; यथा **'आङजादीनाम्'** इत्येतत्प्रत्याख्याने 'छन्दोर्थ बहुलं दीर्घः' इति 'सुरुचो वेन आवः' इत्यत्र च्छान्दसबहुलग्रहणादेव दीर्घसमर्थनम् । यत्तु- **'क्ङिति च'** इति सूत्रे भाष्यकारेण यङ्लुकश्छान्दसत्वाभिप्रायेण पूर्वसूत्रे आर्धधातुकग्रहणानर्थक्यमुक्तम्; तदपि 'क्ङिति प्रतिषेधे तन्निमित्तग्रहणं कर्तव्यम्' इति वार्तिकप्रत्याख्यानप्रस्तावे वार्तिककारमतमभ्युपगम्यैव वक्तुमुचितमिति नानुपपन्नम् । अत एव कैयटेनापि तत्र

'छान्दसत्वमभ्युपगम्य' इति व्याख्यातम् । एवं चोक्तप्रमाणबलाल्लोलुवादेर्भाषाविषयत्वसंप्रतिपत्तौ **'इयङादिप्रकरणे तन्वादीनां छन्दसि बहुलम्'**इति वार्तिकेन यणियङुवङां लघूपधगुणाभावस्य च समर्थनानुपपत्तेरतो लोपे योगविभागात् यङ्लुकि स्थानिवद्भावसमर्थनमात्रेण न शक्यं नधातुलोपसूत्रं प्रत्याख्यातुमिति षष्ठी ।।

यदुक्तम्- लोलुवः पोपुव इत्यादौ यङ्न्तात्पचाद्यपि 'यस्य' इति योगविभागादतो लोपे यङ्लुकि च प्राप्तस्य **'सार्वधातुक-'** इति गुणस्य स्थानिवद्भावान्निवृत्तिवत् इयङादीनामप्यभावप्रसङ्गः, यकारे सति लुप्तस्याकारस्य प्रत्ययत्वाभावात्प्रत्यये विधीयमानानामियङादीनां स्थानिनि संभवस्याप्यभावादिति,तन्न ; यकारलोपात्पूर्वं लुप्तेऽप्यकारे प्रत्ययत्वस्योक्तरीत्या बुद्ध्या परिकल्पनादियङादीनां तत्र संभवेनातिदेशोपपत्तेः ; अत एव नपदान्तसूत्रे भाष्यकारेण वरे यलोपविधिं प्रति न स्थानिवदित्युच्यमाने यायावर इत्यत्र यातेर्यङन्तात् **'यश्च यङः'** इति वरचि अतो लोपो **'लोपे व्योर्वलि'**इति यलोपविधिं प्रति स्थानिवत्त्वनिषेधेन यलोपे **'आतो लोप इटि च'** इत्याल्लोपं प्रति स्थानिवत्त्वादतो लोपस्य अजाद्यार्धधातुके विधीयमानस्य आतो लोपस्य प्राप्तिमाशङ्क्य, **'वरे लुप्तं न स्थानिवत्'** इत्याश्रयणात्समाहितम् । यच्चोक्तम्- स्थानिवद्भावात् यङकारमाश्रित्य इयङादिविधानानुपपत्तिः, बहिरङ्गस्य यङ्लुकोऽसिद्धत्वात् यकारेण व्यवधानादिति, तदपि न; इयङादीनामन्तर्भूतयङकारपेक्षत्वेऽपि धात्वङ्गसंयोगाद्यनेकसंज्ञासापेक्षत्वेन यङलुगपेक्षया अन्तरङ्गत्वस्य वक्तुमशक्यत्वात् । यत्तु- लोलुवादिष्वियङुवङ्विधानानन्तरं लघूपधगुणनिवृत्तये नधातुलोपसूत्रं कर्तव्यमिति, तदपि न; अङ्गवृत्तपरिभाषयैव तन्निवृत्तेः । न चाङ्गवृत्तपरिभाषाया लोलुवादेरन्यत्र प्रयोजनाभावादेतदर्थमेवाङ्गवृत्तपरिभाषाकरणे नधातुलोपसूत्रारम्भादविशेषः, लौकिकप्रयोगदर्शनसापेक्षत्वाज्जघन्यत्वदोषश्च स्यादिति वाच्यम्; **'ज्यादादीयसः'** इत्यात्वारम्भेण ज्ञापितत्वात्, अल्पप्रयत्नसाध्यत्वेन लोलुवाद्यर्थमङ्गवृत्तपरिभाषाया एवाश्रयितुमुचितत्वात्, **'भ्यसो भ्यम्' 'पिबजिघ्रधमतिष्ठ-'**इत्यत्र युष्मभ्यं पिबतीति शिष्टप्रयोगदर्शनात् अकारप्रश्लेषादन्तत्वाद्युदात्तत्वनिपातनव्याख्यानगौरवनिरासेन युष्मभ्यमित्याद्यनेकप्रयोजननिर्वाहकत्वाच्च । न च **'ज्यादादीयसः'** इत्यात्वारम्भस्य स्वविषये पुनःफलवत्त्वाभावेन अङ्गवृत्तपरिभाषाज्ञापकत्वानुपपत्तिः, 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' इति परिभाषासत्त्वेऽपि ज्यायानित्यत्र ज्य इति

ह्रस्वान्तस्य निष्ठितत्वाभावेन **'अकृत्सार्वधातुकयोर्दीर्घः'** इति दीर्घप्रवृत्तेरव्याघातादिति वाच्यम्, **'अङ्गवृत्ते पुनरङ्गवृत्तावविधिः'** इत्येतावन्मात्रस्य ज्ञापनात् तेन ज्ञापितेनार्थेन ज्यादेशे सति **'अकृत्सार्वधातुकयोर्दीर्घः'** इति दीर्घत्वस्य प्रतिषेधादात्वारम्भस्य फलवत्त्वोपपत्तेः । तदनन्तरं ताभ्यां तेषु इत्यादिशिष्टप्रयोगेषु त्यदाद्यत्वे अङ्गवृत्ते सत्यपि पुनरङ्गकार्यस्य **'सुपि च'** इति दीर्घत्वस्य **'बहुवचने झल्येत्'** इत्येत्वस्य च दर्शनादिहापि **'पूर्वौ तु ताभ्यामैच्'** इत्यादिनिर्देशाल्लिङ्गाच्च **'अङ्गवृत्ते पुनर्वृत्तावविधिः'**इति परिभाषा पिबतीत्यादिनिष्ठिताङ्गविषये उपसंह्रियते ; यथा **'षत्वतुकोरसिद्धः'** इत्यसिद्धत्वमारभ्यमाणं बहिरङ्गासिद्धपरिभाषयैव सिद्धावनर्थकं प्रथमं बहिरङ्गान्तरङ्गरूपविशेषौदासीन्येन अचोरानन्तर्याश्रयणे प्रथमप्रवृत्तबहिरङ्गासिद्धत्वनिषेधं ज्ञापयति; पश्चात् 'तस्मादित्युत्तरस्य' **'यज्ञकर्मण्यजपन्यूङ्खसामसु'** इत्यादिनिर्देशाल्लिङ्गात् बहिरङ्गे यणि अचोरानन्तर्याश्रयणेऽपि संयोगान्तलोपे कर्तव्ये यणोऽसिद्धत्वेन संयोगान्तलोपाभावस्य वक्तव्यतया अक्षद्यूः हिरण्यद्यूः द्यूत्वा स्यूत्वा पपुषः चिच्युषः लोलुवुष इत्यादौ अन्तरङ्गे अजानन्तर्याश्रयण एव न प्रथमप्रवृत्तबहिरङ्गासिद्धत्वमिति विशेषे बहिरङ्गासिद्धत्वनिषेध उपसंह्रियते । अत एव **'ज्यादादीयसः'** इति सूत्रे भाष्यकारेण **'ज्यादात्-'** इत्यात्वारम्भस्य अङ्गवृत्तपरिभाषाज्ञापकत्वोपन्यासससमये **'अङ्गवृत्ते पुनरङ्गवृत्तावविधिः'** इत्येतावन्मात्रमुपन्यस्तम्, न तु निष्ठितस्येति; अत एव तत्र सूत्रे कैयटेनापि 'निष्ठितस्य' इति विशेषोपसंहारो लिङ्गान्तरेण ज्ञायमानत्वान्न प्रदर्शितः । एवं च 'ज्ञाजनोर्जा' 'रीङृतः' इत्यत्र दीर्घोच्चारणस्याप्यङ्गवृत्तपरिभाषासत्त्वे लिङ्गत्वमप्रत्यूहम्, दीर्घोच्चारणलिङ्गेन परिभाषाप्रतिपत्तिसमये 'पूर्वौ तु ताभ्यामैच्' इत्यादिलिङ्गान्तरसत्त्वात् । यत्तु- 'ज्ञाजनोर्जा' 'रीङृतः' इत्यत्र दीर्घोच्चारणस्य अङ्गवृत्तपरिभाषाज्ञापकत्वोपन्यासससमये **'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य'** इति विशेषोपसंहारस्यापि सहप्रदर्शनम्; तत् ज्ञापनानन्तरं लिङ्गान्तरात्प्रतिपत्तव्यविशेषोपसंहाराभिप्रायेण, न तु निष्ठितत्वरूपविशेषयुक्तपरिभाषार्थस्य दीर्घोच्चारणज्ञाप्यत्वाभिप्रायेण । एतेनेदं निरस्तम्- **'अङ्गवृत्ते पुनर्वृत्तावविधिः'** इति परिभाषाङ्गीकारे आभ्यामित्यत्र कैयटोक्तार्थाङ्गीकारे **'अतो गुणे'** इति पररूपत्वे सति **'सुपि च'** इति दीर्घत्वस्याविधिः स्यात् । हरदत्तोक्तार्थाङ्गीकारे त्यदाद्यत्वे सति पररूपत्वस्याविधिः स्यात् । अङ्गस्य अङ्गाधिकारकार्ये कृते पुनरङ्गाधिकारकार्यान्तरस्याविधिरित्यर्थाङ्गीकारे प्रापयति स्थापयतीत्यत्र **'प्रिय-**

स्थिर-' इत्यादिना प्रस्थादेशे अङ्गस्याङ्गाधिकारकार्ये कृते पुनरङ्गसय अङ्गाधिकारकार्यं वृद्धिर्न स्यात् । अथ निष्ठितस्याङ्गस्य वृत्ते पुनर्वृत्ताविधिरित्युच्येत, तर्हि **'ज्यादादीयसः'** इत्यात्वारम्भस्य ज्ञापकत्वानुपपत्तिः, **'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य'** इति परिभाषासत्त्वेऽपि ज्यायानित्यत्र ज्यादेशस्य कृतत्वेऽपि अङ्गस्य निष्ठितत्वाभावेन **'अकृत्सार्वधातुकयोर्दीर्घः'** इति दीर्घप्रवृत्तेरव्याघातात् स्वविषये फलवत्त्वापादनाभावात् **'निष्ठितस्य वृत्तावविधिः'** इत्येतावतैवानतिप्रसङ्गेन पिबतीत्यादिप्रयोगोपपादनसंभवे **'अङ्गवृत्ते पुनः'** इत्यस्य वैयर्थ्यप्रसंङ्गाच्च- इति; **'अङ्गवृत्ते पुनर्वृत्तावविधिः'** इत्येतावन्मात्रस्य परिभाषात्वात्, निष्ठितपदाप्रवेशे उक्तरीत्या **'ज्यादादीयसः'** इत्यात्वारम्भस्य **'ज्ञाजनोर्जा'** इति दीर्घोच्चारणस्य परिभाषायाः स्वविषये फलसंपादकत्वेन ज्ञापकत्वोपपत्तेः, अङ्गवृत्ते पुनरिति पदस्य अस्मै अस्मादित्यादि प्रत्ययवृत्तस्थले व्यावृत्त्यर्थत्वेन वैयर्थ्यशङ्काभावात् । यच्चोक्तम्- शिष्टप्रयोगदर्शनसापेक्षेण शास्त्रेण शास्त्रान्तराणां नानर्थक्यम्; तथात्वे **'न तिसृचतसृ'** इत्यादिशास्त्रान्तरमपि किमिति न प्रत्याख्यायत इति, तदपि न; एवं हि नधातुलोपसूत्रारम्भे अङ्गवृत्तपरिभाषा **'ज्यादादीयसः'** इत्यादिभिर्ज्ञापिता किं प्रयोजनमासाद्य विश्राम्यतु, पिबतीत्यादेरन्यथासिद्धत्वेन प्रयोजनत्वानुपपत्तेः । न च तिसृणां चतसृणामित्यादिकमेव अङ्गवृत्तपरिभाषाप्रयोजनं परिकल्प्य **'न तिसृचतसृ'** इत्यादिकमेव प्रत्याख्यायताम्; न नधातुलोपसूत्रमिति कुतो न वैपरीत्यमिति वाच्यम्, वैषम्यात् । नधातुलोपसूत्रस्य हि बहूनि प्रयोजनानि अन्यथासिद्धानि, बेभिदिता मरीमृजकः कुषुभिता समिधितेत्यादेरल्लोपस्य स्थानिवद्भावादेव सिद्धत्वात्। बेभिदः चेच्छिदः इत्यादियङ्लुक्यपि स्थानिवद्भावादेव सिद्धिः, निकुचित इति संनिपातपरिभाषया । एवं च लोलुवादिकमप्यङ्गवृत्तपरिभाषयैवान्यथासिद्धमिति नधातुलोपसूत्रं प्रत्याख्यायते; न तद्वत् **'न तिसृचतसृ'** इत्यादिशास्त्राणां किंचिदपि प्रयोजनं शास्त्रान्तरेणान्यथासिद्धम् । किं च **'यङोऽचि च'** इति च्छन्दसि बहुलं विधीयमानस्य यङ्लुको बहुलग्रहणेन हुश्नुग्रहणात् ज्ञापकाद्वाभाषायामपि साधुत्वस्य शिष्टप्रयोगानुरोधेन क्वचिदेव प्रतिपत्तव्यत्वेन सार्वत्रिकत्वाभावान्नधातुसूत्रारम्भेऽपि लोलुवादौ यङ्लुकः साधुत्वप्रतिपत्त्यर्थं शिष्टप्रयोगस्यावश्यमनुरोध्यत्वेन शिष्टप्रयोगदर्शनसापेक्षया अङ्गवृत्तपरिभाषया लोलुवादेरन्यथासिद्धिर्वक्तुमुचिता; न तिसृणामि-

त्यादेः, लोकप्रयोगमनपेक्ष्यैव लक्षणवशादेव साधुत्वस्य प्रतिपत्तुं शक्यत्वादिति **'न धातुलोप आर्धधातुके'** इति सूत्रस्यैव प्रत्याख्यानमुचितम्; न त्वन्यस्य ।।

इति

श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यमहाव्रतयाजि श्रीमदप्पयमखिवरविरचितायां पाणिनितन्त्रवादनक्षत्रमालायाम्

।। नधातुलोपसूत्रप्रत्याख्यानसमर्थनवादः ।।

।। श्रीः ।।

अथ यदुक्तम् - लोलुवादिषु नाप्राप्ते लोपे यङ्लुगारभ्यमाणस्तस्य बाधकः स्यादिति स्थानिवद्भावेन गुणाभावसमर्थनार्थम् अतो लोपे 'यस्य' इति योगविभागः क्रियत इति, तदनर्थकम्; असत्यपि योगविभागे अतो लोपस्य यङ्लुकश्च विरोधाभावेनोभयोः प्रवृत्तिसंभवात् विरोधे सत्येव सामान्यशास्त्रस्य विशेषशास्त्रेण बाधादित्येतत्प्रसङ्गात् किं विरोधे सत्येव सामान्यविशेषयोर्बाध्यबाधकभावः? उत सत्युभयोः प्रवृत्तिसंभव इति संशये तन्निर्णायकं कथान्तरं प्रस्तूयते-

तत्र 'सत्यपि संभवे बाधनं भवति' इत्येव युक्तम्, लोके 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानस्यादर्शनेन सत्यपि संभवे विविक्तविषयाभावमात्रेण विशेषेण सामान्यबाधनस्य लोकव्युत्पत्तिसिद्धत्वात्; अन्यथा पयांसि यशांसीत्यत्र **'नपुंसकस्य झलचः'** इति झलन्तस्याङ्गस्येति षष्ठ्या अन्त्येऽल्युपसंहारात् सकारस्य स्थाने भवत एव नुमागमस्याचोऽन्त्यात्परत्वसंभवेन **'मिदचोऽन्त्यात्परः'** इति शास्त्रेण स्थानेयोगत्वस्याबाधप्रसङ्गात् । सत्यपि संभवे बाधनाङ्गीकारे च **'मिदचोऽन्त्यात्परः'** इत्यनेन स्थानषष्ठीत्वस्य बाधनादङ्गस्येति षष्ठ्या अन्त्येऽल्युपसंहाराभावे अजपेक्षयावयवषष्ठीत्वविज्ञानेऽङ्गावयवादन्त्यादचः परो मिद्भवति न त्वङ्गसय स्थान इति सिद्धमिष्टम् । अत एव **'मिदचोऽन्त्यात्परः'** इति सूत्रे भाष्यकारेण तक्रकौण्डिन्यन्यायप्रदर्शनेन सत्यपि संभवेऽपवादेनो-

त्सर्गस्य बाधनं भवतीति व्यवस्थापनेन पयांसि यशांसि इति रूपं समर्थितमिति प्रथमा कक्ष्या ।।

विरोधे सत्येव विशेषशास्त्रस्य बाधकत्वं युक्तम्; निरवकाशत्वं हि विशेषशास्त्रस्य बाधकत्वे प्रयोजकम्; तच्च सामान्यविशेषशास्त्रयोर्विरोधेन युगपदेकत्रासंभव एव भवति; न तु संभवेऽपि, तत्र सामान्यविषयेणैव विशेषशास्त्रस्यापि सविषयत्वान्निरवकाशत्वहानेः । न च विविक्तविषयाभावमात्रेण सत्यपि संभवे बाधकत्वं युक्तम्, 'पदे जुहीति' इत्यादीनामिव 'उत्तरार्धे जुहोति' इत्यादीनामप्याहवनीयशास्त्रबाधकत्वप्रसङ्गात् । चिचीषति तुष्टूषति अरार्यते सास्मर्यते इत्यादौ नाप्राप्ते'सन्यङोः' इति द्विर्वचने आरभ्यमाणेन 'अज्झनगमां सनि' इति दीर्घत्वेन 'यङि च' इति गुणेन च द्विर्वतनबाधप्रसङ्गात् । न च सत्यपि संभवे बाधनाभावे पयांसि यशांसीत्यादौ **'मिदचोऽन्त्यात्परः'** इत्यनेन स्थानेयोगत्वस्याबाधनात्सकारस्य स्थाने **'नपुंसकस्य झलचः'** इति नुम्प्रसङ्ग इति वाच्यम्, झलन्तस्य नपुंसकस्य नुम् भवतीत्यत्र मिद्ग्रहणाल्लिङ्गात् **'मिदचोऽन्त्यात्परः'** इति परिभाषोपस्थाने सति **'ऊदुपधाया गोह'** **'शासइदङ्हलोः'** इत्यादाववयवरूपप्रतिसंबन्धिनिर्देशेनेवेहापि **'अचोऽन्त्यात्'** इत्यवयवरूपप्रतिसंबन्धिसंनिधानान्नपुंसकस्येत्यस्यावयवषष्ठीत्वनिश्चयेनासंदिग्धत्वात् सकृच्छुतायाः षष्ठ्या अर्थद्वयालाभाच्च अनियमप्रसङ्गे नियमार्थायाः **'षष्ठी स्थानेयोगा'** इति परिभाषाया अनुपस्थानात् पयांसि यशांसीत्यत्रान्त्यादचः परत्वेन सकारस्य स्थाने नुमो निर्वृत्तिसंभवेऽपि सामान्यविशेषशास्त्रयोरैकमत्यासंभवस्य तु सत्त्वात् **'मिदचोऽन्त्यात्परः'**इत्यनेन **'षष्ठी स्थानेयोगा'**इतिपरिभाषाबाधनोपपत्तेः। अत एव **'इको गुणवृद्धी'**इत्यत्र भाष्यकारेण क्रोष्ट्रीयमतदूषणावसरे मेद्यति मेद्यतः मेद्यन्तीत्यत्र इक्परिभाषया अलोन्त्यपरिभाषया च इकारदकारयोः स्थाने दण्डाग्रमित्यादौ **'एकः पूर्वपरयोः'** इति वचनात् द्वयोः स्थाने **'अकः सवर्णे दीर्घः'** इति दीर्घस्येव **'मिदेर्गुणः'** इति गुणस्य संभवेऽपि मिदेरिति षष्ठ्या इगपेक्षयावयवषष्ठीत्वाश्रयणे सकृच्छुताया अर्थद्वयालाभात्स्थानषष्ठीत्वायोगेन तन्मूलकस्य **'अलोऽन्त्यस्य'** इत्यस्यानुपस्थानात् स्थानषष्ठीत्वाश्रयणे तस्या अन्त्ये अल्युपसंहारात् इक इत्यस्य मिदेरित्यनेनावयवावयविभावेन संबन्धाभावादन्त्यस्य चानिक्त्वेनान्त्यस्येत्यनेन सामानाधिकरण्येन संबन्धस्याप्यसंभवात् परिभाषाद्वयस्यैकमत्यासंभवेन 'नाव-

श्यं द्विकार्ययोग एव विप्रतिषेधः । किंतर्हि? असंभवोऽपि' इत्यादिना विप्रितषेध उपन्यस्तः । न च सति संभवे विशेषेण सामान्यस्य बाधनाभावे **'आतोऽनुपसर्गे कः'** इत्यादिभिः **'कर्मण्यण्'** इत्यादीनामबाधप्रसङ्गः, गोदः कम्बलद इत्यादौ प्रत्ययद्वयस्यापि धातोः परत्वेन विधानसंभवात्; न चैकेन परदेशस्यावष्टब्धत्वान्न प्रत्ययद्वयस्य धातोः परत्वेन विधानं संभवतीति युक्तम्, विकरणसार्वधातुकयोरिवोपपत्तेरिति वाच्यम्; **'दिवादिभ्यः श्यन्'** इत्यादिविकरणविधाने सार्वधातुकस्य निमित्तत्वेन सार्वधातुकविधानोत्तरकालं विकरणस्य विधातव्यत्वेन तत्तद्विधानदशायां साक्षादेव धातोः परत्वेनोभयोः प्रतिपत्तिसंभवात्, गोदः कम्बलद इत्यत्र तु **'कर्मण्यण्' 'आतोऽनुपसर्गे कः'** इत्यनयोर्युगपत्प्राप्तौ प्रत्ययद्वयस्यापि साक्षाद्धातोः परत्वेन विधानासंभवात् विशेषेण सामान्यस्य बाधनोपपत्तेः । न च **'दधि ब्राह्मणेभ्ये दीयतां तक्रं कौण्डिन्याय'** इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानस्यादर्शनात् सत्यपि संभवे विशेषेण सामान्यस्य बाधकल्पनं युक्तम्, दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति विधिद्वयश्रवणे तयोः कौण्डिन्ये संभवेऽपि वक्तृतात्पर्यानुरोधेनैव दधिदानाभावस्योपपत्तेः । तथा हि- अन्नप्रदातुः स्वामिनः कौण्डिन्ये प्रीत्यभावग्राहकप्रमाणोपनिपाते दधिदाननिषेधे स्वामितात्पर्यावसायात्तद्भृत्यैः परिवेष्टृभिः कौण्डिन्याय दधि न दीयते । 'यथेष्टं भुङ्क्ष्व मा भैषीस्तक्रं सलवणं पिब । तक्रस्योपरि पानीयं तस्योपरि न किंचन' इत्यादिप्रकारेण भुञ्जाने कौण्डिन्ये स्वामिनः प्रीत्याधिक्यग्राहकप्रमाणोपनिपाते कौण्डिन्यस्य दधिप्रियत्वे च प्रमाणान्तरावगते दध्यपि दत्त्वा तक्रं दीयत इति न तत्र दधिदानाभावनियम इति द्वितीया ।।

'सत्यपि संभवे बाधनं भवति' इत्यवश्यमभ्युपगन्तव्यम्, **'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय'** इति विधिद्वयश्रयणे वक्तृतात्पर्यग्राहकलिङ्गानुपलम्भे उत्सर्गतः कौण्डिन्ये दधिदानस्यादर्शनात्सत्यपि संभवे सामान्यविधेर्विशेषविधिना बाधस्य लोकव्युत्पत्तिसिद्धत्वात्समुच्चयस्य विकल्पस्य वा तत्रादर्शनेनेपि तथैवाङ्गीकर्तव्यत्वात् । अन्यथा अवदिग्ये अवदिग्याते अवदिग्यिरे इत्यत्र नाप्राप्ते **'लिटिधातोरनभ्यासस्य'** इति द्विर्वचने आरभ्यमाणः **'दयतेर्दिगि लिटि'** इति दिग्यादेशस्तस्य बाधको न स्यात् । न च सत्यपि संभवे बाधनमङ्गीकुर्वतस्तवाप्येष दोषः समानः,नाप्राप्ते दयतेद्विर्वचने आरभ्यमाणो दिग्यादेशस्तद्द्विर्वचनस्यैव बाधकःस्यात्;

न तु कृते दिग्यादेशे स्थानिवद्भावात्तस्य यद्द्विर्वचनं प्राप्तं तस्यापि, दिग्यादेशस्य नाप्राप्ते द्विर्वचने दिग्यादेशस्यानारम्भादिति वाच्यम्; विशेषशास्त्रेण सामान्यस्य बाधनं हि न दण्डप्रहारः, किं तु निरवकाशेन विशेषशास्त्रेण सामान्यशास्त्रस्य विशेषविषयातिरिक्तसामान्ये संकोचकल्पनमेव । तथा च दयतेर्लिटि दिग्यादेशविधायकेन शास्त्रेण **'लिटि धातोरनभ्यासस्य'** इति शास्त्रस्य दयतिव्यतिरिक्तधातुविषयत्वकल्पने कृतेऽपि दिग्यादेशे स्थानिवद्भावादपि द्विर्वचनप्राप्त्यभावात् । किं च सत्यपि संभवे बाधनानङ्गीकारे कारयांचकारः, एधांचक्र इत्यादौ **'कास्प्रत्ययादाममन्त्रे लिटि' 'इजादेश्च गुरुमतोऽनृच्छः'** इत्याम्प्रत्ययेन **'लिटि धातोरनभ्यासस्य'** इति द्विर्वचनबाधनं न स्यात् । सामान्यविशेषयोर्विरोध एव बाध्यबाधकभावमभ्युपगच्छतस्तव मते विरोधाभावे तयोः समबलत्वात् चिचीषतीत्यदौ परत्वात् **'अज्झनगमां सनि'** इति दीर्घत्वे पुनः प्रसङ्गविज्ञानाद्द्विर्वचनवदिहापि परत्वाद्द्विर्वचने कृते आम्प्रत्ययविधानवैयर्थ्यप्रसङ्गादवश्याश्रयणीयेन पुनःप्रसङ्गविज्ञानेनाम्प्रत्यय इत्युभयोः समावेश एव स्यात् । गोदः कम्बलद इत्यत्रापि **'आतोऽनुपसर्गे कः'** इत्यनेन **'कर्मण्यण्'** इत्येतस्य बाधनं न स्यात्, उभयोरपि परत्वेन विधानसंभवात् । न च तत्र प्रत्ययद्वयस्यापि युगपत्प्राप्तौ विधानदशायामप्येकेन परदेशस्यावष्टब्धत्वाद्धातोः परत्वेन द्वयोर्विधानासंभवः; 'बाल्यात्परं वार्धकम्' 'पूर्वं मथुरायाः पाटलिपुत्रम्' इत्यादौ व्यवहितेऽपि पूर्वपरशब्दप्रयोगदर्शनात् इहापि **'अचः परस्मिन्पूर्वविधौ'** इत्येवमादौ तथैवाश्रयणात् प्रत्ययविधौ पञ्चमीनिर्देशेऽपि परपरिभाषासत्त्वेनासंदिग्धत्वात् संदेहे नियमार्थाया निर्दिष्टपरिभाषाया **'अचो ञ्णिति'**इत्यादौ स्थानिनिर्देशे इक्परिभाषाया इवानुपस्थानात्, विकरणसार्वधातुकविषयेऽपि दीव्यमान इत्यादिप्रयोगे यकारेण व्यवधानात् **'भूवादयो धातवः' 'उपदेशेऽजनुनासिक इत्'** इति शास्त्रे धातुत्वेन ज्ञातादिद्वश्शब्दात्परत्वेन ताच्छील्यवयोवचनशक्तिषु चानश्प्रत्ययः साधुर्भवतीति साधुत्वस्य प्रतिपत्तुमशक्यत्वात् परिभाषायां व्यवहितपरत्वस्यावश्यमाश्रयणीयत्वात्, व्याकरणेन साधुशब्दानामनुत्पादनेन विधानदशायां विकरणसार्वधातुकयोः साक्षाद्धातोः परत्वं संभवतीति वक्तुमशक्यत्वात् लोकसिद्धानामेव शब्दानां साधुत्वान्वाख्यायकमिदं शास्त्रमिति सिद्धान्तव्यवस्थापनात् । एवं पयांसि यशांसि इत्यत्रापि त्वत्पक्षे **'मिदचोऽन्त्यात्परः'** इत्यनेन स्थानेयोगत्वस्य बाधनं न स्यात् अन्त्यस्थाने भवत एव नुमोऽचोऽन्त्यात्परत्वसंभवात् । न चोक्तरीत्या परिभाषाद्वयस्याप्येक-

वाक्यत्वासंभवाद्बाधनोपपत्तिः, **'षष्ठी स्थानेयोगा'** इति परिभाषायाः पूर्वमेव **'नपुंसकस्य झलचः'** इत्यत्र **'मिदचोऽन्त्यात्परः'** इत्यस्योपस्थाने नियामकाभावात्; यतस्तत्राच इत्येतदपेक्षया नपुंसकस्येत्यस्यावयवषष्ठीत्वविज्ञानात् असंदेहात् **'षष्ठी स्थानेयोगा'** इत्यस्यानुपस्थानं स्यात् । अतस्तत्र द्वयोः समयोरुपस्थाने झलन्तस्य नपुंसकस्यान्त्यस्य स्थाने अन्त्यादचःपरो नुम्भवतीत्येकवाक्यत्वसंभवोऽपि दुर्वारः। न च पयांसि यशांसीत्यत्रान्त्यस्य स्थाने नुम्विधाने **'मिदचोऽन्त्यात्परः'** इति परिभाषोपस्थानवैर्य्थ्यम्, काष्ठतक्षिब्राह्मणकुलानित्यत्रान्त्यस्यान्त्यादचःपरत्वाभावेन नुमो निवृत्तेः प्रयोजनत्वसंभवात् । न च सामान्यविशेषयोःसति संभवे सामान्यविषयेणैव विशेषस्यापि सावकाशत्वात् बाधनमयुक्तमिति वाच्यम्, लोके **'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय'** इति विधिद्वयश्रवणे सत्यपि संभवे कौण्डिन्ये दधिदानस्यादर्शनेन विविक्तविषयाभावमात्रेण बाधकत्वकल्पनात् । स्यादेतत्-सत्यपि संभवे बाधनाङ्गीकारे चिचीषति तुष्टूषति अरार्यते सास्मर्यते जेघ्रीयते देध्मीयते आचख्यौ आपिप्ये पेपीयते शुशाव शोशूयते इत्यादौ नाप्राप्ते **'सन्यङोः'** इति द्विर्वचने **'लिटि धातोरनभ्यासस्य'** इति द्विर्वचने आरभ्यमाणैः **'अज्झनगमां सनि'** **'यङि च'** **'ई घ्राध्मोः'** **'चक्षिङः ख्याञ्'** **'वा लिटि'** **'प्यायःपी-''लिड्यङोश्च'** **'विभाषा श्वेः'** इत्यादिभिर्द्विर्वचनबाधप्रसङ्ग इति; न चात्रोत्सर्गापवादयोः परस्परसंनिधावेन बाध्यबाधकभावः, न प्रकरणभेदेऽपि; अत एव **'दयतेर्दिगि लिटि'** इत्यत्र **'दिग्यादेशेन द्विर्वचनबाध इष्यते'** इति काशिकायामुक्तमिति **'प्यायः पी'** **'लिड्यङोश्च'** इति सूत्रे हरदत्तेनोपन्यस्तः परिहारः संभवति, **'इको झल्'** इति सूत्रे भाष्यकारेण चिचीषतीत्यत्र प्रकरणभेदेन असंनिहितस्यापि **'अज्झनगमां सनि'** इति दीर्घत्वस्य गुणबाधकत्वोपन्यासात् **'दयतेर्दिगि लिटि'** इत्यत्र भाष्ये दिग्यादेशस्य भिन्नप्रकरणपठितस्यापि विविक्तविषयाभावमात्रेण द्विर्वचनबाधकत्वोपन्यासदर्शनाच्च । नापि चिचीषति तुष्टूषति अरार्यते सास्मर्यते जेघ्रीयते देध्मीयते शुशाव शोशूयते इत्यादौ दीर्घत्वगुणेत्वसंप्रसारणानि एकैकस्यान्त्यस्य वर्णस्य; द्विर्वचनं तु धात्ववयवस्याज्झल्समुदायस्य एकाच इति विषयभेदात् न विशेषशास्त्रस्य बाधकत्वमिति युक्तम्, **'शर्पूर्वाः खयः'** इति सूत्रे भाष्यकारेण 'कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात्' इत्यादिग्रन्थेन तिष्ठासतीत्यत्र **'शर्पूर्वाः खयः'**इति खयां शेषो हलादिशेषस्य बाधको न संभवति भिन्नविषयत्वादित्याशङ्क्य, 'इदं तावदयं प्रष्टव्यः- यदीदं नोच्येत किमिह

स्यात्' इति ग्रन्थेन नाप्राप्ते हलादिशेषे आरभ्यमाणस्य **'शर्पूर्वाः खयः'** इत्यस्य भिन्नविषयत्वेऽपि विविक्तविषयाभावमात्रेण बाधकत्वोपन्यासेन समाहितत्वात् । नापि द्विर्वचनस्य बुभूषति बभूवेत्यादाववकाशः; **'अज्झनगमां सनि'** इत्यादिभिर्विधीयमानानां दीर्घत्वादीनां चिचीषतीत्यादौ कृते द्विर्वचनेऽवकाशः; तत्र परत्वादेषु कृतेषु पुनः प्रसङ्गविज्ञानार्द्विवचनमिति **'अज्झनगमां सनि'** इत्यत्र हरदत्तोक्तरीत्या परिहारो युक्तः,सत्यपि संभवे विविक्तविषयाभावमात्रेण बाधकत्वमभ्युपगच्छतस्तव मते समान्यविशेषयोस्तुल्यबलत्वाभावेन विप्रतिषेधस्य पुनःप्रसङ्गविज्ञानस्य चासंभवादिति- मैवम्, **'अज्झनगमां सनि' 'यङि च' 'ई घ्राध्मोः' 'वा लिटि' 'लिड्यङोश्च' 'विभाषा श्वेः'** इत्यादौ विषयसप्तम्याश्रयणाल्लिडाद्युत्पत्तेः पूर्वमेव दीर्घत्वादिविधानाल्लिडाद्युत्पत्त्यनन्तरं प्राप्नुवतो द्विर्वचनस्य विषयाद्विविक्तविषयसद्भावेन दीर्घत्वादीनां द्विर्वचनबाधकत्वानुपपत्तेरिति तृतीया ।।

विरोधे सत्येव सामान्यविशेषयोर्बाध्यबाधकभावः, न विविक्तविषयालाभमात्रेण, **'अष्टाश्रिर्यूपो भवति' 'वजपेयस्य चतुरश्रः ' 'यदाहवनीये जुहोति''पदे जुहोति' 'उत्तरार्धे जुहोति'** इत्यादौ तथैव दर्शनात् । न च **'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' 'व्रीहीनवहन्ति' 'नैवारश्चरुर्नखावपूतानाम्'** इत्यादौ विरोधाभावेऽपि दधिदानस्य अवहननस्य चादर्शनाद्विविक्तविषयाभावमात्रेण बाधकत्वकल्पनं युक्तम्; **'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' 'यदाहवनीये जुहोति' ' उत्तरार्धे जुहोति'** इत्यादौ कौण्डिन्यै दधिदानस्याहवनीय एवोत्तरार्धे होमस्य च दर्शनेन विविक्तविषयाभावमात्रेण बाधकत्वकल्पनानुपपत्तेः, सामान्यविशेषयोर्विरोध इव दृष्टानुसारादेकफलत्वेऽपि बाध्यबाधकभावकल्पनात्। अन्यथा प्रत्ययकृत्कृत्यसंज्ञानां प्रत्ययतद्धिततद्राजसंज्ञानां च समावेशो न स्यात्, विविक्तविषयरहिताभिः कृत्यादिसंज्ञाभिः कृदादिसंज्ञानां बाधप्रसङ्गात् । घुषट्सर्वनामाव्ययसंज्ञानां च धातुप्रातिपदिकसंज्ञाभ्यां समावोशो न स्यात्। विरोधे एकफलत्वे वा सामान्यविशेषयोर्बाध्यबाधकभावः,न च संज्ञानां विरोध एकफलत्वं वास्तीति समावेशप्राप्तौ आकडारसूत्रारम्भ इति भाष्यप्रदीपादिष्वाकडारसूत्रारम्भसमर्थनं चानुपपन्नं स्यात् । **'अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्'** इत्याकडारसूत्रस्थवार्तिकविरोधापत्तिश्च । चिचीषति तुष्टूषतीत्यादौ **'अज्झनगमां सनि'** इति दीर्घत्वेन द्वि-

र्वचनस्यापि बाधः स्यात् । न चात्र सनीति विषयसप्तम्याश्रयणेन सनुत्पत्तेः पूर्वमेत्र दीर्घत्वप्रवृत्त्या विविक्तविषयसद्भावात् न द्विर्वचनबाधकत्वमिति वक्तुं युक्तम्, सनीति विषयसप्तम्याश्रयणे विविक्तविषयलाभाद्द्विर्वचनस्येव **'सार्वधातुकार्धधातुकयोः'** इति गुणस्यापि बाधनानुपपत्त्या **'इको झल्'** इत्यत्र भाष्ये **'दीर्घत्वमत्र बाधकं भविष्यति'** इति गुणबाधकत्वोपन्यासानुपत्तिप्रसङ्गात् । न च विविक्तवियालाभमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावानङ्गीकारे गोदः कम्बलद इत्यत्र **'कर्मण्यण्' 'आतोऽनुपसर्गे कः'** इति प्रत्ययद्वयप्रसङ्गः, उक्तरीत्या व्यवहितेऽपि परशब्दप्रयोगात् अविरोधादेकफलत्वाभावाच्चेति वाच्यम्, **'कर्तरि कृत्'**इति शास्त्रेण कृत्प्रत्ययमात्रस्य कर्तर्यनुशासनादनभिहितसूत्रे भाष्यकारेण 'अनभिहितवचनमनर्थकमन्यत्रापि विहितस्याभावादभिहिते' इति वार्तिकव्याख्यानावसरे अभिहिते विहितमपि न भवतीति व्यवस्थापितत्वात् क प्रत्यये सति तेनैव कर्तृत्वस्योक्तत्वादणा न भवितव्यमिति **'उक्तार्थानामप्रयोगः'** इति लोकन्यायात् आकडारसूत्रेणाकडारसंज्ञानामिव प्रत्ययद्वयस्यापि विरोधात् उभयोरपि कर्तृत्वाभिधानाय प्रयोक्तव्यतयैकफलकत्वाद्वा बाधनोपपत्तेः । एतेन सर्वकैः उच्चकैः इत्यादौ **'अव्ययसर्वनाम्नामकच्प्राक्टेः'** इत्यकचा **'प्रागिवात्कः'** इति कप्रत्ययस्य बाधनं न स्यात्, परपरिभाषायामानन्तर्याश्रयणेऽप्यविरोधादिति निरस्तम्; उक्तरीत्या प्रत्ययद्वयस्याप्येकस्मिन्नज्ञातादावर्थे विधानेन विरोधादेकफलत्वाच्च बाधनोपपत्तेः। न च **'कर्तरि शप्' 'दिवादिभ्यः श्यन्'** इत्यादिविकरणानामेकस्मिन्नर्थे विधानाभावेनोक्तरीत्या विरोधस्यैकफलत्वस्य वा वक्तुमशक्यत्वात्समावेशप्रसङ्ग इति वाच्यम्, **'सर्वादीनि सर्वनामानि'** इत्यत्र **'शबादेशाः श्यन्नादयः करिष्यन्ते'** इति भाष्यकारोक्तरीत्या समावेशाभावोपपत्तेः । किं च **'बाल्यात्परं वार्धकम्' 'पूर्वं मथुरायाः पाटलीपुत्रम्'** इत्यादावन्तरालवर्तिपदार्थानादरेण व्यवहितेऽपि बुदध्यानन्तर्यारोपेणैव प्रयुज्यमानः पूर्वशब्दः परशब्दश्च गौण एव, न तु मुख्यः । न च परिभाषायां मुख्यार्थं परित्यज्य गौणार्थपरिग्रहे कारणमस्ति; अन्यथा पयांसि चुश्च्योतिषति इत्यादौ **'मिदचोऽन्त्यात्परः' 'शर्पूर्वाः खयः'** इत्यत्र गौणस्यापि पूर्वस्य परस्य चाश्रयणादनिष्टप्रसङ्गः । अतो युगपत्प्रत्ययद्वयस्याप्यानन्तर्येणैव परत्वासंभवादपि बाधनोपपत्तिः । अत एव **'न वेति विभाषा'** इत्यत्र भाष्यकारेण 'न चैकस्याः प्रकृतेरनेकस्य प्रत्ययस्य युगपत्परत्वेन संभवोऽस्ति' इत्यसंभव उपन्यस्तः । **'अचः परस्मिन्पूर्वविधौ'** इत्यत्र

लक्ष्यानुरोधाद्व्यपक्षाश्रयणे प्रतिलक्ष्यं लक्षणभेदाश्रयणात्तत्तल्लक्ष्यान्वाख्यानार्थं प्रवृत्ते तत्तल्लक्षणे तत्तल्लक्ष्यानुरोधाद्व्यवहितमपि पूर्वत्वमाश्रयणीयमिति व्यवहितेऽपि क्वचित्पूर्वशब्दोऽङ्गीकृतः;स्वरितत्वप्रतिज्ञानाद्वा,**"स्वरितेनाधिकः कारः अधिकार"**इति व्याख्यानात्; गङ्गायां घोषः कूपे गर्गकुलमित्यादौ गौणस्याप्याधारस्याधिकरणसंज्ञावद्गौणस्य पूर्वस्य विधिं प्रति न स्थानिवद्भाव इति वा न विरोधः । न च विविक्तविषयाभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावानङ्गीकारे **'लिट् च' 'लिङाशिषि'** इत्यार्धधातुकसंज्ञया **'तिङशित्सार्वधातुकम्'** इति सार्वधातुकसंज्ञाबाधनं न स्यादिति वाच्यम्, **'लिट् च' 'लिङाशिषि'** इत्यत्र **'लङः शाकटायनस्यैव'** इत्यत एवकारानुवृत्त्या आर्धधातुकमेव, न सार्वधातुकमित्येवं नियमेन सार्वधातुकसंज्ञानिवृत्त्युपपत्तेः । न च विरोधैकफलत्वयोरभावेऽपि विविक्तविषयाभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावानङ्गीकारे कारयांचकार एधांचक्रे इत्यादौ **'कास्प्रत्ययादाममन्त्रे लिटि' 'इजादेश्च गुरुमतोऽनृच्छः'** इत्याम्प्रत्ययेन **'लिटि धातोरनभ्यासस्य'** इति द्विर्वचनस्य बाधप्रसङ्गः; पयांसि यशांसि इत्यत्रापि झलन्तस्य नपुंसकस्य नुम् भवतीति नुमि **'मिदचोऽन्त्यात्परः'** इति परिभाषायाः स्थानेयोगत्वस्याबाधकत्वप्रसङ्गः; अवदिग्ये अवदिग्याते अवदिग्यिरे इत्यत्रापि दिग्यादेशेन द्विर्वचनबाधनं न स्यादिति वाच्यम्, विरोधैकफलत्वयोरभावेऽपि विविक्तविषयाभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावमङ्गीकुर्वतस्तवापि कर्तव्यमित्यादौ कृत्कृत्यप्रत्ययसंज्ञानां चिचीषतीत्यादौ दीर्घत्वद्विर्वचनयोश्च समावेशाभावप्रसङ्गदोषस्य दुर्वारत्वात् क्वचिद्दोषप्रतिविधानस्योभाभ्यामप्यारम्भणीयत्वेन तुल्यत्वात् **'यदाहवनीये जुहोति' 'उत्तरार्धे जुहोति'** इत्यादौ **'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय'** इत्यादौ वेदलोकयोर्विरोधैकफलत्वयोरभावे बाध्यबाधकभावादर्शनाल्लोकव्युत्पत्तिसिद्धत्वेन अस्मत्पक्षस्यैव ज्यायस्त्वादिति चुतर्थी ।।

निरोधैकफलत्वयोरभावेऽपि विविक्तविषयाभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावोऽवश्यमभ्युपगन्तव्यः, द्वाराद्बहिरुपविष्टेषु ब्राह्मणेषु भोजनप्रकरणाभावे 'दधि ब्राह्मणेभ्यो दीयताम् ' 'कम्बलः कौण्डिन्याय' इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानादर्शनात् भुञ्जानेषु ब्राह्मणेषु ओदनसेचनतात्पर्येण प्रवृतः 'दधि ब्राह्मणेभ्यो दीयताम्' इति विधिः ओदनसेचनस्य कम्बलेन कर्तुमशक्यत्वात्तात्पर्यानुपपत्त्या 'क-

म्बलः कौण्डिन्याय' इति विशेषविधिना क्वचिन्न बाध्यत इति न तत्र दधिदानमुत्सर्गतः कल्प्यमानस्य विविक्तविषयाभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावस्य विघातकम् । **'उत्तरार्धे जुहोति'** इत्यत्रापि कस्योत्तरार्ध इत्याकाङ्क्षायां यस्मिन्प्राप्तो होम इति सामान्यविध्येकवाक्यत्वेनैव लब्धात्मकस्य विशेषशास्त्रस्यानुपपत्त्या न सामान्यबाधकत्वमिति न तेनाप्युत्सर्गतो विविक्तविषयाभावमात्रेण तयोर्बाध्यबाधकभावकल्पनस्य विघातः । यच्चोक्तम्- प्रत्ययकृत्कृत्यसंज्ञानां प्रत्ययतद्धिततद्राजसंज्ञानां च समावेशो न स्यात् । घुषट्सर्वनामाव्ययसंज्ञानां च धातुप्रातिपदिकसंज्ञाभ्यां समावेशो न स्यादिति, तन्न; नाप्राप्तायामार्धधातुकसंज्ञायामारभ्यमाणया **'तिङ्शित्सार्वधातुकम्'** इति सार्वधातुकसंज्ञया बाधनोपपत्तावतिरिच्यमानेन **'आर्धधातुकं शेषः'** इत्यत्र शेषग्रहणेनेह शास्त्रे संज्ञानां समावेशज्ञापनात्। अत एव ज्ञापकादाकडारसंज्ञानामपि समावेशप्राप्तौ मत्पक्षेऽप्याकडारसूत्रारम्भः,'अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्' इति तत्रत्यवार्तिकमपि न विरुध्यते । नापि चिचीषतीत्यादौ दीर्घत्वेन द्विर्वचनबाधप्रसङ्गः, **'अज्झनगमां सनि'** इत्यत्र सनीति विषयसप्तम्याश्रयणेन सनुत्पत्तेः पूर्वं प्रवर्तमानस्य दीर्घत्वस्य विविक्तविषयसद्भावेन बाधकत्वानुपपत्तेः । न च सनीति विषयसप्तम्याश्रयणे विविक्तविषयसद्भावाद्दीर्घत्वस्य द्विर्वचनं प्रतीव गुणं प्रत्यपि बाधकत्वानुपपत्त्या **'इको झल्'** इत्यत्र भाष्ये दीर्घत्वस्य गुणबाधकत्वोपन्यासानुपपत्तिरिति वाच्यम्, गुणे सति दीर्घत्वविधानवैयर्थ्याद्दीर्घारम्भसामर्थ्यादेव दीर्घस्य गुणबाधकत्वोपन्यासेन येननाप्राप्तिन्यायेन तदनुपन्यासादिति मत्पक्षे न क्वापि दोषः; न वा लोकव्युत्पत्तिविरोधः । त्वत्पक्षे तु कारयांचकार एधांचक्रे पयांसि यशांसि अवदिग्ये इत्यादौ दोषो दुष्परिहरः; लोकव्युत्पत्तिविरोधश्चेति पञ्चमी ।।

यदि विविक्तविषयाभावमात्रेण सत्यपि संभवे सामान्यविशेषयोर्बाध्यबाधकभावः; तदा **'इको गुणवृद्धी'** इत्यत्र भाष्ये 'किं पुनरयमलोन्त्यविधिशेषः आहोस्विदलोन्त्यापवादः' इति इक्परिभाषाया अलोन्त्यविधिशेषपक्षोत्थापनानुपपत्तिः, अलोऽन्त्यस्य विधयो भवन्ति गुणवृद्धी त्विक इति नाप्राप्तेऽलोन्त्यनियमे आरभ्यमाणया इक्परिभाषया अलोन्त्यनियमस्य **'आदेः परस्य'** इत्यनेनेव बाधनेनालोन्त्यापवादपक्षादन्यस्योत्थापनानुपपत्तेः । न च गुणवृद्धिविधिषु अङ्गस्येत्यस्य स्थान-

षष्ठीत्वाश्रयणे गुणवृद्धिग्रहणलिङ्गात्स्थानषष्ठीलिङ्गाच्च परिभाषाद्वयोपस्थितौ सार्वधातुकार्धधातुकयोरङ्गान्त्यस्येको गुणो भवतीत्येवमलोन्त्यविधिशेषपक्षसंभवः, **'इको गुणवृद्धी'** इत्यस्योपस्थाने इक इत्यवयवरूपप्रतिसंबन्धिसंनिधानेनाङ्गस्येत्यस्यावयवषष्ठीत्वाश्रयणे **'शास इदङ्हलोः' 'ऊदुपधाया गोहः'** इत्यादाविव **'षष्ठी स्थानेयोगा'** इत्यस्यानुपस्थानात्स्थानषष्ठीरूपलिङ्गाभावात् **'अलोऽन्त्यस्य'** इत्यस्यानुपस्थानात् सार्वधातुकार्धधातुकयोरङ्गस्य गुणो भवतीत्यादिगुणवृद्धिविधानेषु **'षष्ठी स्थानेयोगा'** इत्यस्याः पूर्वमिक्परिभाषोपस्थाने कारणाभावेन स्थानषष्ठीत्वनिश्चयात्पूर्वमवयवषष्ठीत्वनिश्चयानुदयादिक्परिभाषोपस्थानसमकालमेव **'षष्ठी स्थानेयोगा'** इत्यस्यावयवषष्ठीत्वनिश्चयरूपप्रतिबन्धाभावेनोपस्थानात्तन्मूलकस्यालोन्त्यपरिभाषोपस्थानस्याप्यप्रत्यूहत्वात् त्वदुक्तरीत्या तदपवादपक्षोत्थापनानुपपत्तेः । विरोध एव सामान्यविशेषयोर्बाध्यबाधकभाव इत्यङ्गीकारे तु **'सार्वधातुकार्धधातुकयोः' 'सिचि वृद्धिः परस्मैपदेषु '** इत्यादिगुणवृद्धिविधानेषु अन्त्यस्येकः संभवात् **'इको गुणवृद्धी''अलोऽन्त्यस्य'** इति परिभाषयोः सामरस्येनान्त्यस्येक इत्युपस्थानसंभवात्तच्छेषपक्षोत्थापनमुपपद्यते । न च विविक्तविषयभावमात्रेण सामान्यविशेषयोर्बाध्यबाधकभावमुपगच्छतो मम तच्छेषपक्षानुपपत्तिवत् विरोध एव सामान्यविशेषयोर्बाध्यबाधकभावमङ्गीकुर्वतस्तवापि उक्तरीत्या परिभाषाद्वयस्याप्यविरोधात्तदपवादपक्षोत्थापनानुपपत्तिरिति वाच्यम्, चेता स्तोता अचैषीत् अहौषीत् इत्यादौ परिभाषाद्वयस्याप्यविरोधदर्शनात्तच्छेषपक्षस्य मेद्यति मार्ष्टीत्यादौ विरोधदर्शनात्तदपवादपक्षस्य च मत्पक्ष उत्थापनोपपत्तेः। त्वत्पक्षे तु विविक्तविषयाभावमात्रेण विरोधे सत्यसति वा सामान्यविशेषयोर्बाध्यबाधकभावाङ्गीकारे तच्छेषपक्षस्य सर्वथैवोत्थापनानुपपत्तिरिति त्वत्पक्षे कश्चिद्दोषः । किं च विविक्तविषयाभावमात्रेण बाधकत्वाङ्गीकारे लस्य स्थाने तिबादयो भवन्तीति तिबाद्यादेशानाम् **'लुङ्लङ्लृङ्क्ष्वडुदात्तः' 'च्लि लुङि' 'स्यतासी लृलुटोः'** इत्यादिभिर्बाधप्रसङ्गः, नाप्राप्तेषु लादेशेष्वडादीनामारभ्यमाणत्वात् । न च **'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय'** इत्यत्र भिन्नजातीयेन कम्बलेन दध्नो बाधनादर्शनाद्भिन्नजातीयस्याडागमादेर्न बाधकत्वमिति वाच्यम्, भोजनप्रकरणाभावे विजातीयेन कम्बलेनापि दधिबाधदर्शनात् द्विष्प्रयोगरूपद्विर्वचनविजातीयस्य दिग्यादेशस्य च त्वया बाधकत्वाभ्युपगमाच्च नापि लस्य तिबादयः अङ्गस्याडागम इति भिन्नविषयत्वान्न बाध्यबाधकभाव

इति युक्तम्, सत्यपि संभवे येननाप्राप्तिन्यायेन बाधनमङ्गीकुर्वता त्वया भिन्नविषयत्वेऽपि बाधस्याङ्गीकर्तव्यत्वात्; अन्यथा तिष्ठासतीत्यत्र भिन्नविषयेणानादिशेषेणादिशेषस्य बाधनं न स्यात् । न च आदचि गुणः **'वृद्धिरेचि'** इत्यादावपि सामान्यविशेषयोः समानविभक्त्या निर्देश एव सामान्यविशेषविधित्वव्यवहारः; न तु लस्य तिबादयः **'लुङ्लङ्लृङ्क्ष्वडुदात्तः'** इत्यादिभिन्नविभक्तिनिर्देशेऽपि, ब्राह्मणेभ्योऽन्नं दीयतां तत्रासति कौण्डिन्ये गृहान्तरं गच्छेत्यादौ भिन्नविभक्तिर्निर्देशे सामान्यविशेषविधित्वव्यवहाराभावात्कौण्डिन्येऽन्नदानदर्शनाच्चेति वाच्यम्, सत्यपि संभवे बाधनमङ्गीकुर्वता त्वया सामान्यविशेषयोः समानविभक्तिनिर्देशाभावेऽपि **'षष्ठी स्थानेयोगा' 'मिदचोऽन्त्यात्परः'** इत्यादावुत्सर्गापवादभावेन बाध्यबाधकभावाङ्गीकारात्। किं च त्वत्पक्षे शालायां कुमार्यामित्यादौ **'ङेराम्नद्याम्नीभ्यः'** इत्यामादेशेन याडाडोर्बाधप्रसङ्गः । तथा एधिषीष्टेत्यादौ नाप्राप्ते सीयुटि आरभ्यमाणेन **'सुट्तिथोः'** इति सुडागमेनापि यासुटेव सीयुटो बाधप्रसङ्ग इति त्वत्पक्षे बहवो दोषा इति षष्ठी ।।

यदुक्तम्- सत्यपि संभवे सामान्यविशेषयोर्बाध्यबाधकभावाङ्गीकारे गुणवृद्धिविधानेषु क्वचिदन्त्यस्येकः संभवेऽप्यलोन्त्यनियमस्येक्परिभाषया बाधस्यैव न्याय्यत्वात् **'इको गुणवृद्धी'** इत्यत्र भाष्ये तच्छेषपक्षोत्थापनानुपपत्तिस्त्वन्मते दोष इति, तन्न, तुल्यत्वात् विरोधैकफलत्वयोरेव बाध्यभाधकभावमङ्गीकुर्वतस्तवापि गुणवृद्धिविधानेषु क्वचित्कतिदन्त्यस्येकः संभवाद्बाधनाभावेन अन्त्यस्येक इति सामरस्येन परिभाषाद्वयोपस्थितेरेव न्याय्यत्वात्तदपवादपक्षोत्थापनानुपपत्तेः । न च मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु अन्त्यस्यानिक्त्वे परिभाषाद्वयस्य प्रवृत्त्यसंभवात् **'सार्वधातुकार्धधातुकयोः'** इत्यादौ परिभाषाद्वयस्य प्रवृत्तिसंभवाच्च पक्षद्वयोत्थापनं मन्मते उपपन्नमेवेति वाच्यम्, तथा सति मिदिमृजादिषु परिभाषाद्वयप्रवृत्त्यसंभवेन बाधनस्यैव न्याय्यत्वात् तच्छेषपक्षस्य गुणवृद्धिविधानप्रदेशेषु सार्वत्रिकत्वाभिप्रायेण 'वृद्धिगुणावलोऽन्त्यस्येति चेन्मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्विग्ग्रहणम्' **'सर्वादेशप्रसङ्गश्चानिगन्त्यस्य'** इति वार्तिकेन मिदादिषु दोषप्रसञ्जनानुपपत्तिः; तथा जुसि गुणादावन्त्यस्येकः संभवेन बाधनाभावात्परिभाषाद्वयप्रवृत्त्या शेषशेषिभावपक्षस्यैव न्याय्यत्वेन तदपवादपक्षस्य सर्वगुणवृद्धिप्रदेशसाधारण्याभिप्रायेण 'इङ्मात्रस्येति चेज्जुसिसार्वधातुकार्धधातुकह्रस्वाद्योर्गुणेष्वनन्त्यप्रतिषेधः' इति

वार्तिकेन जुसि गुणादौ दोषप्रसञ्जनानुपपत्तिश्च । तस्मात्क्वचिदन्त्यस्येको गुणवृद्धि-विधानसंभवात्तत्र त्वन्मताभिप्रायेण तच्छेषपक्षप्रवृत्तिः, मन्मताभिप्रायेण तदपवाद-पक्षप्रवृत्तिरित्युभाभ्यामप्यङ्गीकरणीयम्; तत्र नैकः पर्यनुयोज्य इति । अत एव हर-दत्तेन सति संभवे बाधनाबाधनपक्षाभ्यामेव तदपवादतच्छेषपक्षौ व्युत्पादितौ। न च सति संभवेऽपि बाधनाङ्गीकारे लस्य तिबादय इति तिबादीनाम् **'लुङ्लङ्लृङ्क्ष्वडुदात्तः'** **'च्लि लुङि'** **'स्यतासी लृलुटोः'** इत्यादिभिर्बाधप्रसङ्गः, लस्य लुङ्लङ्लृङ्क्ष्वति सामान्यविशेषधर्मावष्टम्भप्रवृत्तत्वेन तदुत्सर्गापवादभावाभावात् **'दधि ब्राह्मणेभ्यो दीयतां कौण्डिन्य आयाहि'** इत्यादौ बाधादर्शनेनैकविषयत्व एव तादृशविधिद्वयस्य लोकव्युत्पत्तिसिद्धत्वात्; अन्यथा **'एङः पदान्तादति'** इत्यादेः अग्नेऽस्त्यत्रैत्यादौ **'एचोऽयवायावः'** इति विधिं प्रतीव **'इको यणचि'** इत्यादिकं प्रत्यप्यपवादत्वं स्यात् । भिन्नविषयत्वादेव च न सुटा सीयुटो बाधः । यत्तु- **'शर्पूर्वाः खयः'** इति सूत्रे भाष्यकारेण तिष्ठासतीत्यत्र भिन्नविषयत्वेऽप्यनादिशेषेणादि-शेषस्य बाधनमुपन्यस्तम्; तत् तत्रैवादिशेषानादिशेषयोः संभवेनाबाधकत्वमाशङ्क्य तक्रकौण्डिन्यन्यायोपन्यासपूर्वकं सत्यपि संभवे बाधकत्वव्यवस्थापनादहृदयवचन-मेव, 'त्रयः शिष्टास्तु तावकाः' इत्यादौ शेषशब्दस्य शिष्यमाणेतरसर्वनिवृत्तिमदव-स्थानवाचित्वेन लाकव्युत्पत्तिसिद्धत्वात्तिष्ठासतीत्यत्रादिशेषानादिशेषयोः सकारथका-रोभयविषयत्वेनैकविषयत्वात् विरोधस्य दुरपह्नवत्वात् । अत एव नधातुलोपसूत्रे कैयटेन- **'यङोऽचि च'** इत्यत्र यकाराकारस्यविवक्षाविवक्षाभ्यां यङ्लुगल्लोपयो-र्भिन्नविषयत्वस्य समानविषयत्वस्य च कल्पनया विशेषेण सामान्यस्याबाधो बाध-श्चोपन्यस्तः । हरदत्तेनापि- **'प्रकारवचने जातीयर्'** इत्यत्र किंसर्वनामबाहुभ्यो विधीयमानेन थाल्प्रत्ययेन सुबन्तमात्राद्विधीयमानस्य जातीयर्प्रत्ययस्य प्रकारतद्वतो-रर्थयोर्विषयभेदात् बाधनाभाव उपन्यस्तः । न च सामान्यविशेषधर्मावष्टम्भेन प्रवृत्तविधिद्वयस्य भिन्नविषयस्योत्सर्गापवादभावाभावेन बाधकत्वाभावे कारयांचकार एधांचक्र इत्यादौ **'कास्प्रत्ययादाममन्त्रे लिटि'** **'इजादेश्च गुरुमतोऽनृच्छः'** इत्याम्प्रत्ययविधायकशास्त्रस्य **'लिटि धातोरनभ्यासस्य'** इति धातोर्द्विर्वचनविधाय-कशास्त्रेण समानविषयत्वात्भावाद्बाधकत्वं न स्यादिति वाच्यम्, अपवादत्वाभावेऽपि नित्यत्वादेवाम्प्रत्ययस्य द्विर्वचनबाधकत्वोपपत्तेः उत्सर्गापवादयोर्विरोधैकफलत्व-योरेव बाध्यबाधकभावमभ्युपगच्छता त्वयापि कारयांचकारेत्यादावाम्प्रत्ययस्य

नित्यत्वेनैव द्विर्वचनबाधकत्वस्य वक्तव्यत्वात् । न चैवमपि नुमादेरचोऽन्त्यात्पर-त्वप्रतिपादकस्य **'मिदचोऽन्त्यात्परः'** इति शास्त्रस्य षष्ठ्याः स्थानेयोगत्वप्रतिपादन-द्वारा नुमादेरादेशत्वप्रतिपादकस्य **'षष्ठी स्थानेयोगा'** इत्यस्य ब्राधो न स्यात् भिन्न-विषयत्वादिति वाच्यम्, उभयोरपि नुम्विषयत्वेन समानविषयत्वाद्बाधकत्वोपपत्ते-रिति मत्पक्षे न कोऽपि दोषः । त्वत्पक्षे तु **'द्व्यन्तरुपसर्गेभ्योऽप ईत्'** द्वीपम् अन्तरीपम् इत्यत्र **'आदेः परस्य'** इत्यनेनालोन्त्यविधेर्बाधनं न स्यात्, उभाभ्यामपि सामान्यविशेषशास्त्राभ्यामाद्यन्तयोः स्थान ईकारविधानसंभवात्; तथैव अचैषीत् अहौषीत् इत्यत्र **'सिचि वृद्धिः परस्मैपदेषु'** **'सार्वधातुकार्धधातुकयोः'** इति विधिद्वयेनैकस्यैवान्त्यस्येकः स्थाने गुणवृद्ध्यादेशद्वयप्रसङ्गः । न च परस्मैपदपरे सिचि अनन्तरे विधीयमानाया वृद्धेरार्धधातुकेऽनन्तरे विधीयमानस्य गुणस्य च यौगपद्यायसंभवः, उभयोर्युगपत् आर्धधातुकेन सिचा स्वस्वनिमित्तेनानन्तर्यासंभ-वादिति वाच्यम्, **'तस्मिन्निति निर्दिष्टे पूर्वस्य'** इति परिभाषालब्धस्य निमित्तानन्त-र्यस्य स्वस्थानिविशेषणत्वेनादेशविशेषणत्वाभावात् । तथा भूयात् भूयास्तां भूयासु-रित्यत्र यासुटा सीयुटो बाधनं न स्यात्, सत्यपि यासुटि एधिषीष्टेत्यादौ सुट इव तस्य लिङ्भक्तत्वेन तदादेः सीयुड्विधानसंभवेनाविरोधात् । अटिटिषति अशिशि-षति इत्यत्र द्वितीयैकाज्द्विर्वचनेन प्रथमैकाज्द्विर्वचनस्य बाधनं न स्यात्,अविरोधात्। शाधीत्यत्र च **'शा हौ'** इति शाभावः **'शास इदङ्हलोः'** इति इत्वस्य बाधको न स्यात् । पयांसि यशांसि अवदिग्ये अवदिग्याते इत्यादौ च दोष इति मत्पक्ष एव श्रेयान् । अत एव भगवता भाष्यकारेण **'मिदचोऽन्त्यात्परः'** **'अजादेर्द्वितीयस्य'** **'शर्पूर्वाः खयः'**इत्यादिषु बहुषु स्थलेषु सत्यपि संभवे बाधनं भवतीति मत्पक्ष एव व्यवस्थाप्यत इति सप्तमी ।।

विरोधे एकफलत्वे वा सामान्यविशेषयोर्बाध्यबाधकभावो युक्तः, न तु संभ-वेऽपि । तथा हि- सामान्यविधेः संकोचकल्पनं हि विना विशेषशास्त्रवैयर्थ्यं न यु-ज्यते अबाधेनोपपत्तौ बाधस्यान्याय्यत्वात् एकर्थविधायकत्वेन सामान्यविशेषविधि-त्वव्यवहाररहितस्थलेऽपि 'गामानय बलीवर्दमानय' इत्यादौ उत्तरविधिवैयर्थ्यप्रसङ्ग एव सामान्यशब्दस्य विशेषपरत्वदर्शनाच्च । तच्च वैयर्थ्यं सामान्यविधिविरुद्धार्थोप-स्थापकत्व एव विशेषविधेर्भवति; यथा- गोदः कम्बलद इत्यत्र **'कर्मण्यण्'** इति

सामान्यशास्त्रप्रवृत्तौ प्रत्ययद्वयस्य युगपदेकस्मात्परत्वेन विधानासंभवाद्विशेषशास्त्रवैयर्थ्यम् । सामान्यविशेषविध्योरेकफलत्वेऽपि तद्भवति; यथा- **'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय'** इत्यत्र कौण्डिन्ये दधिदानप्रवृत्तौ विशेषविधिफलस्यौदनोपसेचनस्य दध्नैव सिद्धत्वेन साधनान्तरनैराकाङ्क्ष्याद्विशेषशास्त्रस्य वैयर्थ्यम्। सति तु संभवे भिन्नफलत्वे च चिचीषतितुष्टूषतीत्यादौ द्विर्वचनप्रवृत्तौ**'अज्झनगमां सनि'** इति दीर्घशास्त्रस्य स्वविषये यदाहवनीयशास्त्रप्रवृत्तावपि **'उत्तरार्धे जुहोति'** इत्यादीनामिव न काचिद्वैयर्थ्यशङ्का। अतस्तत्र सामान्यविधेः संकोचकल्पनलक्षणो बाधोऽयुक्तः । यत्तु- द्वाराद्बहिरुपविष्टेषु ब्राह्मणेषु भोजनप्रकरणाभावे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इत्यादिविधिद्वयश्रवणे कौण्डिन्ये दधिदानादर्शनाद्विरोधैकफलत्वयोरभावेऽपि सामान्यविशेषयोर्बाध्यबाधकभावोऽवश्यमभ्युपगन्तव्य इति, तन्न; तत्र दधिदानाभावनियमे मम संप्रतिपत्त्यभावात् क्वचिद्दधिदानाभावस्य वक्तृतात्पर्यग्रहणानुरोधेन संभवात् । सत्यपि संभवे बाधनाङ्गीकारे च अनड्वान्परमानड्वानित्यत्र**'चतुरनडुहोरामुदात्तः'**इत्यामगमस्य **'सावनडुहः'**इति नुमा बाधःस्यात्। हे अनड्वन् इत्यत्र **'अम्संबुद्धौ'** इत्यमागमेन **'सावनडुहः'**इति नुमो बाधः स्यात्। न च वाच्यम्- **'आच्छीनद्योर्नुम्'** इत्यत आदित्यधिकारात् अनडुहोऽन्त्यादवर्णादचः परो नुम्भवतीति विधाने अमामोर्निमित्तत्वेनाश्रयणान्न बाध्यबाधकभावः- इति; अन्त्यादचः परो मिद्भवति, अनडुहो नुमागमस्त्ववर्णात्पूर्वः परो वेति विधानादादीत्यधिकृतेन **'मिदचोऽन्त्यात्परः'** इत्यस्य बाधनादनडुहो नित्यसंनिहितादवर्णात्परत्वेन विधानसंभवात् अमामोर्निमित्तत्वेनानाक्षेपात् । ननु अबाधेनोपपत्तौ बाधो न न्याय्यः । तत्र यद्यप्यमामोरकृतयोरनडुहोऽन्त्योऽच् अवर्णो न संभवति, तथापि कृतयोस्तु तयोः संभवतीति आदित्यधिकृतेन **'मिदचोऽन्त्यात्परः'** इत्यस्याबाधनादनडुहोऽन्त्यादवर्णादचः परो नुम् भवतीति अमामोर्निमित्तत्वेनाक्षेपान्न बाध्यबाधकभाव इति चेत्, हन्तैवममामोरपि अज्रूपत्वेनाचोऽन्त्यात्परत्वेन 'तयोर्नुमश्च विधानसंभवादबाधेनोपपत्तौ बाधो न न्याय्य इति नुममोराम्नुमोरबाधस्य वक्तुं शक्यतया आदित्यधिकारवैयर्थ्यप्रसङ्गात्; **'अबाधेनोपपत्तौ बाधो न न्याय्य'** इति त्वयाप्यङ्गीकारे पयांसि यशांसि अवदिग्ये अवदिग्याते इत्यादौ **'मिदचोऽन्त्यात्परः'** इति परिभाषया स्थानेयोगत्वस्य दिग्यादेशेन द्विर्वचनस्याबाधप्रसङ्गेन त्वन्मतेऽपि तद्रूपासिद्धिप्रसङ्गाच्च, तवापि मत्पक्षप्रवेशापत्तेश्च । किं च एधीत्यत्र त्वन्मते **'श्नसो-**

रल्लोपः' इति क्ङिति सार्वधातुके विधीयमानस्याल्लोपस्य **'ध्वसोरेद्धौ-'** इति हौ विधीयमानमेत्वं बाधकं स्यात् । न चास्तेरेत्वस्य **'सेर्ह्यपिच्च'** **'वा च्छन्दसि'** इत्यत्र च्छन्दसि अङिति हाववकाशः, 'गमहन-' इत्यतोऽनुवर्तमानस्य क्ङिद्ग्रहणस्य 'घ्वसोरेद्धौ-' इत्यत उत्तरत्राप्यनुवर्तनात् । तथैव खट्वायां कुमार्यामित्यत्र **'याडापः'** **'आण्नद्याः'**इति आम्नदीभ्यां ङिद्वचनमात्रे विधीयमानयोर्याडाटोः**'ङेराम्नद्याम्नीभ्यः-'** इति ताभ्यामेव ङिद्विशेषे विधीयमानेनामादेशेन बाधनं स्यात् । न चात्र भोजनप्रकरणे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानदर्शनाद्विजातीयस्याबाधकत्वसंप्रतिपत्तेर्याडाटोरागमयोर्भिन्नजातीयेनामादेशेन बाधनं न स्यादिति वाच्यम्, भोजनप्रकरणाभावे द्वाराद्बहिरुपविष्ठेषु ब्राह्मणेषु 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इति दृष्टान्तप्रदर्शनेन विरोधैकफलत्वयोरभावेऽपि सामान्यविशेषयोर्बाध्यबाधकभावमङ्गीकुर्वता त्वया विजातीयस्यापि बाधकत्वाङ्गीकारात् । **'दयतेर्दिगि लिटि'** इत्यत्र भाष्यकारेण द्विष्प्रयोगरूपद्विर्वचनविजातीयस्य दीग्यादेशस्य तद्बाधकत्वोपन्यासाच्च । न च विरोधैकफलत्वयोरेव सामान्यविशेषयोर्बाध्यबाधकभावकल्पने अवदिग्ये अवदिग्याते शाधि द्वीपम् अन्तरीपं भूयात् भूयास्तां भूयासुः अटिटिषति अशिशिषति इत्यादौ दिग्यादेशादिभिः द्विर्वचनादीनामबाधनात् समावेशप्रसङ्गः, कृतेऽपि सामान्यशास्त्रे विरोधाभावात् **'उत्तरा[...]** **जुहोति'** इत्यादिवत्तत्रैव सावकाशस्य विशेषशास्त्रस्य परत्वात्प्रथमं प्रवृत्तौ कुमा[...] खट्वायां तस्यामित्यादौ नुडागमनिवृत्तेरिव सकृद्गतिन्यायाश्रयणेन सामान्यशास्त्रनिवृत्तेः सुवचत्वात्; अटिटिषतीत्यादौ **'अनभ्यासस्य'** इति निषेधेन द्विर्वचनद्वयस[...] विरोधसत्त्वाच्च । नापि पयांसि यशांसि नन्दन्ति मुञ्चन्ति इत्यादौ **'मिदचोऽन्त्या[...]** **त्परः'** इत्यनेन स्थानेयोगत्वस्याबाधनात् समावेशप्रसङ्गः, **'रुधादिभ्यः श्नम्'** **'अस्तेर्भूः'** इत्यादौ सावकाशयोः **'मिदचोऽन्त्यात्परः'** **'षष्ठी स्थानेयोगा'** इत्[...] नयोः **'इदितो नुम्धातोः'** **'शे मुचादीनाम्'** **' नपुंसकस्य झलचः'** इत्यादावुभयप्र[...] सङ्गे पूर्वविप्रतिषेधेन **'मिदचोऽन्त्यात्परः'** इत्यस्य प्रवृत्तौ सकृद्गतिन्यायाश्रयणादे स्थानेयोगत्वनिवृत्तेः; त्वन्मतेऽपि **'मिदचोऽन्त्यात्परः'** **'षष्ठी स्थानेयोगा'** इत्[...] नयोः सामान्यविशेषधर्माविष्टम्भेन प्रवृत्तत्वाभावात्सामान्यविशेषभावस्य वक्तुमश[...] क्यतया तत्र लोकदृष्टान्तेन सत्यपि संभवे बाधकल्पनानुपपत्तेः **'मिदचोऽन्त्यात्पर[...]** इत्येतद्विषयस्य **'षष्ठी स्थानेयोगा'** **'प्रत्ययः'** **'परश्च'** इत्यनेकविरुद्धशास्त्रावष्टब्[...]

त्वेन निरवकाशत्वात् सामान्यविशेषभावव्यापकेन सावकाशत्वनिरवकाशत्वलक्षणेनोत्सर्गापवादभावेन बाधकत्वे वक्तव्ये तत्रापि बाध्यविशेषापेक्षायाम् **'रुधादिभ्यः श्नम्'**इत्यत्र मित्करणवैयर्थ्यप्रसङ्गात्पुरस्तान्न्यायपरित्यागेन प्रत्ययपरत्वम्, विरुद्धानेकविध्यन्तरावरुद्धविषयकनिरवकाशशास्त्रस्य स्वविषयप्राप्तनिखिलतत्तद्विध्यन्तरबाधकत्वकल्पने गौरवादन्याय्यत्वाच्चावश्यकस्थले क्वचिदेव किंचिद्बाधनीयम् । तच्च किं बाधनीयमिति मुख्यप्रतिपत्त्रपेक्षबाध्यविशेषापेक्षायाम् **'इदितो नुम् धातोः'**इति नुमो मित्करणस्यानवकाशत्वेऽपि कुण्डानि वनानीति विरुद्धविषय एव स्थानेयोगपरिभाषां च बाधित्वा लब्धविषयस्य **'मिदचोऽन्त्यात्परः'** इत्यस्य नन्दन्ति मुञ्चन्तीत्यादौ पूर्वविप्रतिषेधेनैव स्थानेयोगबाधकत्वस्य वक्तव्यत्वादिति मन्मते न क्वापि दोषः । त्वन्मते तु अनड्वान् हे अनड्वन् इत्यादौ दोषो दुष्परिहर इत्यष्टमी ।।

यदि भोजनप्रकरणाभावे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इत्यादौ अनुभवविप्रतिपत्त्या लोकसिद्धव्युत्पत्त्यनादरेण विशेषशास्त्रवैयर्थ्यस्यैव बाधप्रयोजकत्वमभ्युपगम्य विरोधैकफलत्वयोरेव सामान्यविशेषयोर्बाध्यबाधकभावः प्रकल्प्येत; तर्हि विशेषविषये युगपत्प्रसक्तयोः सामान्यविशेषयोरुभयोरपि प्रत्यक्षत्वेन समबलत्वाद्विरोधे विशेषवैयर्थ्यपरिहाराय षोडशिग्रहन्यायेन विकल्प एव भवेत्, उभयानुग्रहरूपत्वात् । न चोभयबाधरूपाद्विकल्पादेकस्य सामान्यस्यैव विशेषविषये बाधकल्पनं ज्यायः, व्यक्तिपदार्थवादिनो व्याडेराचार्यस्य मते प्रतिलक्ष्यं लक्षणभेदाद्विशेषविषयप्रसक्तसामान्यशास्त्रस्यात्यन्तिकबाधप्रसङ्गात् आत्यन्तिकबाधकल्पनादुभयबाधदोषविशिष्टस्याप्युभयानुग्राहकस्य विकल्पस्यैव ज्यायस्त्वात् । न च व्याडेराचार्यस्य मते त्वं ब्राह्मणकुलमित्यत्र युगपत्प्रसक्तयोः कल्प्यलक्षणयोर्लुगम्भावशास्त्रयोर्विप्रतिषेधे परमेवेति पूर्वशास्त्रस्यात्यन्तिकबाधवदिहापि सामान्यशास्त्रस्यात्यन्तिकबाधो न दोषाय कल्प्यलक्षणस्यात्यन्तिकबाधेऽपि कल्पकस्य मूललक्षणस्य तदभावादिति वाच्यम्, तत्र विप्रतिषेधे परमेवेति वचनमूलस्यात्यन्तिकबाधस्य सोढुं शक्यत्वात् इह तु कल्प्यस्यापि सामान्यस्यात्यन्तिकबाधे वचनाभावात् । 'ब्राह्मणाः पाटलीपुत्रं गच्छन्तु' कौण्डिन्यो मथुराम्' इत्यादौ 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इत्यादौ च विशेषविषये सामान्यस्य समुच्चयविकल्पयोरदर्शनेन बाधस्यैव दर्शनात् आगोपालविपालाङ्गनं व्युत्पन्नं सामान्यस्य विशेषविषये बाध इति सामा-

न्यबाधविषये वाजप्यायनमतमेवाश्रयणीयमिति चेत्, तर्हि भोजनप्रकरणाभावे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इत्यादौ विरोधैकफलत्वयोरभावेऽपि विशेषविषये सामान्यबाधस्य सर्वलोकप्रसिद्धत्वान्न तत्त्यागो युक्त इति न मत्पक्षे प्रमाणाभावः । न च त्वत्पक्षे अनड्वान् हे अनड्वन् इत्यत्र दोषः, **'सावनडुहः'** इत्यत्र **'आच्छीनद्योर्नुम्'**इत्यत आदित्यधिकाराभ्युपगमेऽपि अधिकृतेन तेन विशेषेण **'मिदचोऽन्त्यात्परः'** इति सामान्यस्य बाधनेन अमामोर्निमित्तत्वेनानाक्षेपादिति वाच्यम्,आदित्यधिकृतस्य दिक्छब्दापेक्षया पञ्चम्यन्तस्य 'मिदचोऽन्त्यात्परः'इति सामान्यापेक्षत्वेन **'उत्तरार्धे जुहोति'** इत्यादिवत्सामान्यविध्यबाधकत्वात् अनडुहोऽन्त्याद‌वर्णादचःपरो नुम् भवतीति विधाने चामामोर्निमित्तत्वेनापेक्षया तत्समावेशोपपत्तेः। नापि एधीत्यत्र **'ध्वसोरेद्धौ-'** इत्येत्वेन श्नसोरल्लोपस्य बाधप्रसङ्गः, अस्तेरेत्वमकारस्य लोप इति एत्वलोपयोर्भिन्नविषयत्वादेकविषयत्व एव सामान्यविशेषयोरुत्सर्गापवादभावव्यवस्थापनात् । नापि खट्वायां कुमार्यामित्यादौ ङेरामादेशेन याङाटोर्बाधप्रसङ्गः, **'संहितायां'** **'कुमार्यां वयसि'** इत्यादिनिर्देशाल्लिङ्गात्तयोः समावेशोपपत्तेरिति मत्पक्षे न क्वचिद्दोष इति नवमी ।।

यदुक्तम्- भोजनप्रकरणाभावे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानादर्शनाद्विरोधैकफलत्वाभावेऽपि, सामान्यविधिर्विशेषविधिना बाध्यते; न समुच्चीयते नापि विकल्प्यत इति वृद्धव्यवहारादेव कल्प्यत इति, तन्न **'उत्तरार्धे जुहोति'** इत्यादीनामाहवनीयादिशास्त्रबाधकत्वादर्शनेन भोजनप्रकरणे 'दधि ब्राह्मणेभ्यो दीयतां कम्बलः कौण्डिन्याय' इति विधिद्वयश्रवणे कौण्डिन्ये दधिदानदर्शनाच्च तथा कल्पनानुपपत्तेः । सामान्यविध्यबाधनियामकप्रकरणाद्यभावे सति सामान्यविध्यनपेक्षविशेषविधिमात्रस्य सामान्यबाधकत्वमिति चेत्, तर्हि **'ङिच्च'** इति विशेषशास्त्रस्य अनङादाविव तातङादेशेऽपि **'अनेकाल्शित्सर्वस्य'** इति सामान्यशास्त्रबाधकत्वापत्तिः । न च तातङि ङित्करणं नान्त्यादेशत्वार्थम्, किं तु गुणवृद्धिप्रतिषेधार्थम्; अन्यथा **'एरुः'** इत्यनन्तरम् **'तुह्योस्तादाशिष्यन्यतरस्याम्'** इत्येव ब्रूयादिति सामर्थ्यात् ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वेऽवसिते अन्त्यादेशत्वे प्रत्ययस्याङित्त्वान्ङित्करणसामर्थ्यावसितगुणवृद्धिप्रतिषेधार्थत्वानुपपत्तेः सामान्यविध्यबाधनियामकस्य सत्त्वान्न सामान्यबाध इति वाच्यम्,

अन्त्यादेशत्वेऽपि तातङः **'अवयवे कृतं लिङ्गं समुदायविशेषकं भवति'** इति न्यायेन गुणवृद्धिप्रतिषेधार्थत्वोपपत्तेः सामान्यविध्यबाधनियामकस्याभावात् । न च अवयवे कृतं लिङ्गमचिरतार्थमेव समुदायस्य विशेषकं भवति; अन्यथा पणायतीत्यत्र आत्मनेपदप्रसङ्गात् । **'ङिच्च'** इत्यन्त्यस्य विधाने हि अन्त्यविधिनैव ङित्त्वस्य चारितार्थ्यान्न समुदायविशेषकत्वमिति गुणवृद्धिप्रतिषेधार्थत्वानुपपत्तिस्तदवस्थेति वाच्यम्, **'ङिच्च'** इति शास्त्रवशादन्त्यस्य विधानेऽपि पूर्वोक्तसामर्थ्यान्ङित्त्वस्यान्त्यविधिना चारितार्थ्यानुपपत्तेः समुदायविशेषकत्वावश्यंभावात् । न च विराधैकफलत्वयोरेव सामान्यविशेषयोर्बाध्यबाधकभावमभ्युपगच्छतस्तवापि सर्वादेशत्वान्त्यादेशत्वयोर्विरोधात्सामान्यबाधावश्यंभावेन तुल्यो दोष इति वाच्यम्, त्वत्पक्षवन्मत्पक्षस्य केवलदृष्टान्तमूलकत्वाभावेन वैषम्यात् । तथा हि- **'पदे जुहोति'** इत्यादिविशेषशास्त्रं हि आहत्य होमविशेषविषयत्वाद्धोमसामान्यद्वारा तद्विषयेऽपि होमप्राप्तिपर्यवसानात् **'यदाहवनीये जुहोति'** इत्यादिसामान्यशास्त्रात्प्रागेव प्रवर्तत इति शीघ्रप्रवृत्तेनापवादशास्त्रेणापहृतविषयविशेषमाहवनीयशास्त्रं कुत्रचित्कस्मिंस्चिदर्थे केनचित्प्रमाणेन परिच्छिन्ने पुनस्तत्रैव प्रमाणान्तरेण तद्विरुद्धपरिच्छेदान्तराप्रवृत्तेस्तदितरविशेषविषयं व्यवतिष्ठत इत्ययमेव सामान्यस्य विशेषकृतो बाधः । एतदेव च श्रुत्यादेर्लिङ्गादेरिव बलवत्त्वमुत्सर्गादपवादस्य । **'उत्तरार्धे जुहोति'** इति विशेषशास्त्रं तु यद्यप्याहवनीयशास्त्रात्प्रागेव प्रवर्तते,तथापि प्रवृत्तेऽपि तस्मिन्विरोधाभावेन सामान्यशास्त्रेण सामान्यद्वारा तत्रैव विशेषे तदर्थप्रतीतिपर्यवसानस्यानिवारणाद्विरोधाभावेन विशेषेण सामान्यस्याबाधो युक्तः । 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय' इत्यत्र तु प्रथमं कौण्डिन्ये तक्रदानप्रीतौ पुनः सामान्येन विधिना दधिदानकर्तव्यताप्रतीतावप्योदनसेचनतात्पर्येण विधेःप्रवृत्तत्वात् तस्य च प्रथमप्रतीततक्रदानेन सिद्धौ प्रथमोपस्थितपरित्यागे कारणाभावात्तेनैव निराकाङ्क्षत्वाद्दधिदानाभाव इति तत्रापि फलतः निराकाङ्क्षत्वाद्दधिदानाभाव इति तत्रापि फलतः सामान्यविधेर्विशेषविधिना बाध इति विरोधैकफलत्वयोः सामान्यविशेषयोर्बाध्यबाधकभाव इत्युच्यते । एवं व्यवस्थिते **'ङिच्च'** इति विशेषशास्त्रस्यानन्यार्थङित्त्वेष्वनङादिषु **'अनेकाल्शित्सर्वस्य'** इति सामान्यशास्त्रात्प्रथमं प्रवृत्तावपि तातङि ङित्त्वस्य गुणवृद्धिप्रतिषेधरूपप्रयोजनान्तरसंभावनयान्त्यादेशत्वे तत्प्रयोजनविघातशङ्कया च विलम्बेन प्रवृत्तौ सामान्यशास्त्रेण समकालप्रवृत्तिस्तातङि संपन्नेति विशेषशास्त्रस्य श्रुतिलिङ्गादिषु प्रसि-

द्धस्य पूर्वोक्तस्य प्रथमप्रवृत्तिनिमित्तबलवत्त्वस्याभावादुत्सर्गापवादयोरप्यौचित्यावर्जितविप्रतिषेधसंपत्त्या सामान्यस्य परत्वात्तातङः सर्वादेशत्वसिद्धिरिति न मत्पक्षे तत्र दोषः । दधि ब्राह्मणेभ्यो दीयतामित्यादौ क्वचित्साधनान्तरावरोधात्क्वचिद्वक्तृतात्पर्यानुरोधाच्च दधिदानाभावेन, दृष्टान्तमात्रेण सत्यसति च संभवे सर्वत्र विशेषेण सामान्यबाधे लोकव्युत्पत्तिं प्रमाणीकुर्वतस्तव मते तु तातङि उत्सर्गापवादयोः समकालप्रवृत्तावपि त्वदुपन्यस्तलोकव्युत्पत्तिकल्पितेन विशेषशास्त्रबलवत्त्वेन तातङोऽन्त्यादेशत्वप्रसङ्गः । 'तातङो ङित्करणस्य सावकाशत्वाद्विप्रतिषेधात्सर्वादेशः' इति वार्तिककारोपन्यस्तस्य विप्रतिषेधस्य चानुपपत्तिरिति दशमी ।।

यदुक्तम्- विशेषशास्त्रस्याहत्य विषयविशेषविषयत्वात्स्वविषये सामान्यशास्त्रात्प्रथमं प्रवृत्तेस्तन्निमित्तमेव बलवत्त्वं लिङ्गात्छ्रुतेरिव विशेषशास्त्रस्य; तथा च विरोधैकफलत्वयोरेव सामान्यबाधः पर्यवस्यतीति, तन्न; **'ह्वावामश्च'** इति विशेषशास्त्रस्य धान्यमायादावाहत्य विषयविशेषविषयत्वात् **'आतोऽनुपसर्गे कः'** इति सामान्यशास्त्रात्प्रथमं प्रवृत्तावपि गोदः कम्बलद इत्यादौ कर्मत्वधातुत्वधर्मापेक्षयाकारान्तधातुत्वोपसर्गभिन्नकर्मत्वयोर्विलम्बितप्रतीतिकत्वात्तन्निमित्तप्रवृत्तेः**'आतोनुपसर्गे कः'** इति विशेषशास्त्रात्प्रागेन **'कर्मण्यण्'** इति सामान्यशास्त्रप्रवृत्तेर्विशेषशास्त्रबाधप्रसङ्गेन विशेषेण सामान्यबाधे लोकव्युत्पत्तेरेव शरणीकरणीयत्वात्, **'गार्हपत्ये पत्नीसंयाजाञ्जुहोति'** **'तक्रं कौण्डिन्याय देहि'** इत्यादिविशेषशास्त्रविषये च पत्नीसंबन्धित्वकौण्डिन्यत्वादिविसेषधर्मग्रहात्पूर्वं कदाचित् होमत्वब्राह्मणत्वादिसामान्यधर्मग्रहे विशेषधर्मग्रहाधीनप्रवृत्तेर्विशेषशास्त्रात्प्रागेन **'यदाहवनीये जुहोति'** **'ब्राह्मणेभ्यो दधि दीयताम्'** इत्यादिसामान्यशास्त्रप्रवृत्तेर्विशेषेण सामान्यबाधे लोकव्युत्पत्तिं विना निर्वाहाभावात् । तदादरे च सत्यपि संभवे बाधनं दृष्टमिति मत्पक्ष ए प्रामाणिकः । न चैवं लोकव्युत्पत्त्या सामान्यबाधकल्पने तातङोऽन्त्यादेशत्वप्रस इति वाच्यम्, प्रथमप्रवृत्तेर्बाधनियामकत्वनिराकरणे त्वन्मतेऽपि दोषतौल्यादित्येकदशी ।।

यदुक्तम्- विशेषशास्त्रस्य प्रथमप्रवृत्तेर्बाधनियामकत्वायोगेन लोकव्युत्पत्तेरा रणीयत्वात्सत्यपि संभवे बाधनं भवतीति, तन्न; विशेषशास्त्रस्य स्वविषये सामान्

शास्त्रप्रवृत्तौ वैयर्थ्यप्रसङ्गस्यैव सामान्यबाधनियामकत्वात् तत्र च विरोधैकफलत्व-योरेव सामान्यबाधपर्यवसानात् । न च वैयर्थ्यं न सामान्यबाधप्रयोजकं व्याडिमते कल्प्यम्, सामान्यलक्षणस्यात्यन्तिकबाधप्रसङ्गेन विशेषवैयर्थ्यपरिहारार्थमुभयबाध-दुष्टस्याप्युभयानुग्राहकस्य विकल्पस्यैवाश्रयणीयत्वप्रसङ्गादिति वाच्यम्, **'वासरूपो-ऽस्त्रियाम्' 'पृथ्वादिभ्य इमनिज्वा'** इति यथाप्राप्तसामान्यविकल्पार्थेन वाग्रहणेन **'आ च त्वात्'** इत्यपवादसमावेशार्थाद्यत्नाच्च सामान्यबाधस्यैव ज्ञापनात् । नापि म-न्मते तातङोऽन्त्यादेशत्वप्रसङ्गः, अनन्यार्थङित्त्वेष्वनङादिषु सावकाशस्य **'ङिच्च'** इति विशेषशास्त्रस्यान्यार्थङित्त्वे तातङि परत्वात्सामान्यशास्त्रेण बाधनेऽपि वैयर्थ्या-प्रसङ्गेन सामान्यबाधकत्वाभावात् । न च विशेषशास्त्रस्य स्वविषयैकदेशे चारिता-र्थ्यमादाय विषयान्तरे परेणोत्सर्गेण बाधनाङ्गीकारेऽतिप्रसङ्गः, धान्यमायादौ चरिता-र्थस्य **'ह्वावामश्च'** इत्यादिविशेषशास्त्रस्य व्रीहिमाय इत्यादौ परेण **'आतोऽनुपसर्गे कः'** इत्याद्युत्सर्गशास्त्रेण बाधप्रसङ्गादिति वाच्यम्, **'लक्षणं हि नाम ध्वनति भ्रम-ति मुहूर्तमपि नावतिष्ठते'** इति न्यायेनानवयवेनैकप्रसरेण सर्वत्र स्वविषये स्व-कार्यमुपस्थापयति **'ह्वावामश्च'** इत्यादिविशेषशास्त्रे, विसेषशास्त्रवैयर्थ्यपरिहाराय त-द्विषयं परिहृत्य तथैवानवयवेनैकप्रसरेण सर्वत्र स्वविषये **'आतोऽनुपसर्गे कः'** इत्यादिसामान्यशास्त्रं स्वकार्यमुपस्थापयति, सामान्यशास्त्रेणाविशेषात्सर्वमेव विशेष-शास्त्रविषयं परिहृत्य स्वकार्यप्रवर्तनात् । **'ङिच्च'** इति विशेषशास्त्रं तु एकप्रसरेणा-नवयवेन सर्वत्र ङिन्मात्रे स्वकार्यं प्रवर्तयदपि ङित्करणसामर्थ्यावसितगुणवृद्धिप्रति-षेधार्थत्वविघातशङ्कया तातङ्विषयं परिहृत्यैव प्रवर्तयति; **'अनेकाल्शित्सर्वस्य'**इति सामान्यशास्त्रमपि विशेषशास्त्रवैयर्थ्यभिया तद्विषयं सर्वं परिहृत्य प्रवर्तयत् अपवाद-विषयत्वात्तातङ्विषयमपि परिहृत्यैव प्रवर्तयति । ततो द्वितीयप्रसरेण **'ङिच्च'** इति विशेषशास्त्रे तातङि प्रवर्तमाने प्रथमप्रसरलब्धविशेषशास्त्रचारितार्थ्यस्य बुद्धिस्थत्वात् **'अनेकाल्शित्सर्वस्य'** इति सामान्यशास्त्रमपि समकालं प्रवर्तत इति तुल्यबलत्वाद्वि-प्रतिषेधे परत्वादुत्सर्गेणाप्यवादो बाध्यत इति न मत्पक्षे क्वचिदपि दोषः । तदेवं तातङोऽन्त्यादेशत्वप्रसङ्गेन व्यभिचाराच्च लोकव्युत्पत्तेरतिप्रसङ्गात्प्रथमप्रवृत्तेश्च विशे-षबलत्त्वे नियामकत्वायोगाद्विशेषवैयर्थ्यप्रसङ्गस्यैव तत्र नियामकत्वे गोदः कम्बलद इत्यादौ विरोधे बहुपटवः उच्चकैरित्यादावेकफलत्वे सामान्यविशेषयोर्बाध्यबाधक-भावः; न तु तयोरभावे चिचीषति तुष्टूषतीत्यादौ, सामान्यशास्त्रप्रवृत्तावपि विशेष-

शास्त्रवैयर्थ्याभावात् । ये त्वस्मिन्पक्षे दोषा उद्भावितास्ते तत्र तत्र कक्ष्यासु परिहृता एव । **'मिदचोऽन्त्यात्परः'** **'अजादेस्तु द्वितीयस्य'** इत्यादौ तक्रकौण्डिन्यन्याय-प्रदर्शनेन भाष्यकारेण कृतं सत्यपि संभवे बाधनव्यवस्थापनम् **'सरूपाणाम्-'** इत्यत्र भाष्यकारेणैव **'समासएकशेष इति चेत्स्वरसमासान्तेषु दोषः'** इति वार्तिकव्याख्यानावसरे अश्वश्चाश्वश्चेत्यादौ द्वन्द्वे कृते समासान्तोदात्तत्वसरूपैकशेषयो-विरोधाभावाभिप्रायेण परत्वात्समासान्तोदात्तत्वस्य प्रथमप्रवृत्त्युपन्यासदर्शनान्न्याय-व्युत्पादनपरमेव, न तु भगवतस्तत्र तात्पर्यं कल्पनीयमिति द्वादशी ।।

इति

श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यमहाव्रतयाजि श्रीमदप्पयमखिवरविरचितायां पाणिनितन्त्रवादनक्षत्रमालायाम्

।। तक्रकौण्डिन्यन्यायार्थनिरूपणवादः ।।

।। श्रीः ।।

एवं सत्यपि संभवे उत्सर्गस्यापवादेन बाधनं व्यवस्थापितम् । अथैतत्प्रसङ्गात् किं सत्यपि संभवे पूर्वपरशास्त्रयोः **'विप्रतिषेधे परं कार्यम्'** इत्यनेन व्यवस्था भवति? उत विरोध एवेति संशये तन्निर्णायकं कथान्तरं प्रस्तूयते-

तत्र विरोध एव पूर्वपरशास्त्रयोः **'विप्रतिषेधे परं कार्यम्'** इति व्यवस्थेति चरमः पक्षो न्याय्यः, विप्रतिषेधशब्दस्य विरोधार्थकत्वात् । विरोधश्च पूर्वपरशास्त्रयोः शब्दरूपत्वेन स्वरूपेणासंभवादर्थद्वारकः । स च एकस्मिन्प्रयोगे समसमय-प्रसक्ततुल्यबलपरस्परप्रवृत्त्यविषयविषयकत्वरूपसावकाशत्ववच्छास्त्रद्वयप्रसञ्जितकार्यद्वयस्य यौगपद्यासंभवः । यथा इन्द्रवायू इत्यादौ इन्द्रवायुशब्दयोर्द्वन्द्वे **'द्वन्द्वे घि'** **'अजाद्यदन्तम्'** इत्युभयोः प्रसङ्गे एकस्मिन्प्रयोगे वायुशब्दापेक्षया इन्द्रशब्दस्य इन्द्रशब्दापेक्षया वायुशब्दस्य च पूर्वपातासंभवात् **'विप्रतिषेधे परम्-'** इति व्यवस्था । रन्धयतीत्यत्र **'रध हिंसायाम्'** इत्यस्माण्णिचि रन्धनं पाचक इत्यत्र सावकाशयोः **'रधिजभोरचि'** **'अत उपधायाः'** इत्यनयोरुभयोः प्रसङ्गे कदाचिन्नुमः प्रथमं प्रवृत्तौ

अनुपधात्वादतो वृद्ध्यसंभवात्पाक्षिकयौगपद्यासंभवसत्त्वेऽपि नुमो नित्यत्वेनातुल्यबलत्वात् न **'विप्रतिषेधे परम्-'** इति व्यवस्था; किं तु नित्यत्वान्नुमेव । तथा अशिश्रियत् असुस्रुवत् इत्यत्र श्रिस्रुभ्यां लुङि चङि च श्रियौ भेत्तेत्यत्र सावकाशयोरियङ्गुणयोरुभयोः प्रसङ्गे अन्यतरस्य प्रवृत्तौ अन्यतरस्य प्राप्त्यभावेन यौगपद्यासंभवेऽपि इयङुवङोरन्तरङ्गत्वेनातुल्यबलत्वान्न परत्वेन व्यवस्था; किं त्वन्तरङ्गत्वादियङाद्येव भवति । तथा सुग्लः इत्यत्र दाय इत्यत्र सावकाशस्य **'श्याद्व्यध-'** इत्याकारान्तलक्षणणप्रत्ययस्य **'आतश्चोपसर्गे'**इति कप्रत्ययस्य च प्राप्तौ एकस्याःप्रकृतेः परत्वेन प्रत्ययद्वयस्य यौगपद्यासंभवेऽपि उत्सर्गापवादभावेनातुल्यबलत्वान्न परत्वेन व्यवस्था; किं त्वनवकाशः कप्रत्यय एव भवति । तथा जीविकां प्राप्त इति विग्रहे **'द्वितीया श्रितातीत-' 'प्राप्तापन्ने च द्वितीयया'** इति द्वितीयान्तोपसर्जनप्राप्तापन्नोपसर्जनसमासयोरुभयोः प्रसङ्गे एकस्मिन्प्रयोगे प्राप्तापन्नापेक्षया द्वितीयान्तस्य द्वितीयान्तापेक्षया प्राप्तापन्नयोश्च पूर्वनिपातासंभवेन यौगपद्यासंभवेऽपि उभयोरनवकाशत्वाविशेषात्तुल्यबलत्वेऽपि सावकाशत्वाभावात् न परत्वेन व्यवस्था; किं तु निरवकाशत्वादुभयोर्विकल्प एव भवति जीविकाप्राप्तः प्राप्तजीविक इति । विरोधस्तुल्यबलयोरेवेति सूत्राक्षरैरेवायमर्थ आक्षिप्तः । अत एव **'अनुदात्तं पदमेकवर्जम्'** इत्यत्र आमलकीज इत्यत्र **'दीर्घकाशतुषभ्राष्ट्रवटं जे'** दीर्घान्तस्यादिरुदात्तो भवतीति आद्युदात्तत्वस्य शमीजः कुटीज इत्यादौ सावकाशस्य **'अन्त्यात्पूर्वं बह्वचः'**जे बह्वचोऽन्त्यात्पूर्वमुदात्तं भवतीति उपसरज इत्यादौ सावकाशस्योत्तमोदात्तत्वस्य च प्रसङ्गे **'नोदात्तं पदमेकवर्जम्'** इति सूत्रणां विहाय **'अनुदात्तं पदमेकवर्जम्'** इति सूत्रणे स्वतन्त्रविधित्वे चास्याङ्गीक्रियमाणे आद्युदात्तत्वोत्तमोदात्तत्वयोर्यौगपद्यसंभवात् वार्तिककारेण **'अनुदात्ते विप्रतिषेधानुपपत्तिरेकस्मिन्युगपत्संभवात्'** इति विरोधाभावात्परत्वेन व्यवस्थानुपपत्तिरुपन्यस्ता । भाष्यकारेणापि **'अदसो मात्'** इत्यत्र प्रगृह्यसंज्ञाया अयादीनां च अमी अत्रेत्यादौ परत्वेन व्यवस्थानिरूपणे 'प्रगृह्यसंज्ञाभिनिर्वर्तमाना अयादीन्बाधते । अयादयोऽभिनिर्वर्तमानाः प्रगृह्यसंज्ञाया निमित्तं विघ्नन्ति' इति यौगपद्यासंभव उपन्यस्त इति प्रथमा ।।

निरुक्तकार्यद्वययौगपद्यासंभवलक्षणविरोधे सत्यसति वा पूर्वपरशास्त्रयोर्युगपदेकत्र प्रसक्तिमात्रेण **'विप्रतिषेधे परम्-'** इति व्यवस्था भवतीति प्रथमः पक्षो

न्याय्यः; **'विप्रतिषेधे परं कार्यम्'** इति सूत्रे 'द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः' इति वार्तिककारेण विरोधासंस्पर्शनेन एकत्र युगपत्सावकाशशास्त्रद्वयप्रसक्तिमात्रस्य विप्रतिषेधशब्दार्थत्वकथनात्; भाष्यकारेणापि तत्र 'द्वौ प्रसङ्गौ यदान्यार्थौ भवतः, एकस्मिंश्च युगपत्प्राप्नुतः, स विप्रतिषेधः' इति तद्वार्तिकस्य विरोधाप्रवेशनेन व्याख्याततत्वात् । विप्रतिषेधशब्दस्य विरोधार्थकत्वे तत्रैवानुपदमुपन्यस्ते वृक्षेभ्य इत्याद्युदाहरणे **'सुपि च'** इति दीर्घत्वस्य **'बहुवचने झल्येत्'** इत्येत्वस्य च वचनबलेनैकस्यैवाकारस्य स्थाने **'एचोऽयवायावः'** इति वचनादेकस्यैव स्थाने अयादितत्तद्वर्णद्वयविधानवत् आष्टमिकद्विर्वचनवच्च विधानसंभवेन विरोधाभावात्परत्वेन एत्वनियमो न स्यादिति द्वितीया ।।

एकत्र युगपत् परस्परविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्ग एव **'विप्रतिषेधे परं कार्यम्'** इति व्यवस्थेत्यवश्यमभ्युपगन्तव्यम्, विप्रतिपूर्वस्य सिधेः 'इदं विप्रतिषिद्धम्' इत्यादौ विरोधे दृष्टप्रयोगत्वात् इहापि **'तस्य लोपः'** इति सूत्रे **'अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादसिद्धिः'** इति वार्तिके विरोधे विप्रतिषेधशब्दप्रयोगदर्शनाच्च । **'द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः'** इति विप्रतिषेधशब्दार्थकथनपरवार्तिकस्य च **'एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः'** **'तृजादिभिस्तुल्यं पर्यायः प्राप्नोति'** **'अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्'** इत्युत्तरवार्तिके विप्रतिषेधशास्त्रानारम्भे वृक्षेभ्य इत्यादावेत्वादीनां युगपदसंभवात् व्यक्तिपक्षाभिप्रायेण तृजादिवत्पर्यायप्रसङ्गस्य जातिपक्षाभिप्रायेण अप्रतिपत्तिप्रसङ्गस्य चोपन्यासादुत्तरग्रन्थपर्यालोचनेन युगपदेकत्र परस्परविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्गस्यै विप्रतिषेधशब्दार्थत्वकथने तात्पर्यावश्यंभावात् वृक्षेभ्य इत्यत्र यञ्यनन्तं विधीयमानस्य दीर्घत्वस्य झल्यनन्तरे विधीयमानस्य एत्वस्य चोभयोः स्वेन स्वे निमित्तेनानन्तर्यासंभवात् **'विप्रतिषेधे परम्-'** इत्येत्वनियमोपपत्तेः। अत एव**'इक गुणवृद्धी'** इत्यत्र कैयटेन 'दीर्घत्वं यञ्यनन्तरे विधीयते । एत्वं च झल्यनन्तरे न चैकस्मिन् संभवः- यद्द्वयोः स्वेन स्वेन निमित्तेनानन्तर्यं स्यात्' इत्येत्वदीर्घ त्वयोरसंभव उपन्यस्त इति तृतीया ।।

विरोधे सत्यसति वा एकत्र शास्त्रद्वयप्रसङ्गमात्रेण **'विप्रतिषेधे परम्-'** इ परनियमोऽवश्यमभ्युपगन्तव्यः; अन्यथा पपतुः पपुः कुरुतात् इन्द्रवायू इत्या

आकारस्य स्थाने **'अकः सवर्णे दीर्घः'** **'आतो लोप इटि च'** इत्यादिदीर्घवर्णाभावप्रत्ययतदभावपरस्परापेक्षपूर्वनिपातादिरूपविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्गे विरोधेन यौगपद्यासंभवात् व्यक्तिपक्षे पर्यायप्रसङ्गे जातिपक्षे अप्रतिपत्तिप्रसङ्गे विप्रतिषेधे परमेव भवति विप्रतिषेधे परं तावद्भवति इति नियमरूपेण विधिरूपेण वा बाध्यव्यवस्थासिद्धावपि स्तात् शिष्टात् हतादित्यत्र असिशासिहनिभ्यो लोडादेशस्य सिपः **'सेर्ह्यपिच्च'** इति कृतस्य ह्यादेशस्य स्थाने **'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्'** इति तातङादेशस्य, अस्तिशास्तिहन्तीनां च **'ध्वसोरेद्धावभ्यासलोपश्च'** **'शा हौ'** **'हन्तेर्जः'** इति एत्वशाभावजभावानां च तातङादेशाविरुद्धानां प्रसङ्गे अविरोधेन यौगपद्यप्राप्तौ विप्रतिषेधे परमेव न पूर्वमिति तातङादेशव्यवस्था न स्यात् । न च वाच्यम्- पूर्वपरशास्त्रयोर्व्याघाताद्विरोध एव । विरोध एव विप्रतिषेधव्यवस्थामभ्युपगच्छतो मम मतेऽपि एकस्यैव ह्यादेशस्य कार्यित्वनिमित्तत्वयोर्व्याघातात् विरोधेन यौगपद्यासंभवात्पर्यायेण प्रवृत्तिप्रसङ्गे **'विप्रतिषेधे परं कार्यम्'** इत्यनेन व्यवस्थां भविष्यति इति, एतस्य स्वकल्पितपरिभाषामात्रत्वात् तातङादेशं प्रति कार्यित्वस्य शाभावादीन्प्रति निमित्तत्वस्य चाश्रयणेन विषयभेदेन तादृशधर्मद्वयस्यापि पितृत्वपुत्रत्ववदविरुद्धत्वेन यौगपद्यस्य दुर्वारत्वात् । त्वाष्ट्रः जागत इत्यत्र आदिवृद्धेरन्त्योपधावृद्ध्योश्च प्रसङ्गे अविरोधात्परनियमो न स्यात् । एवं वृक्षेभ्य इत्यादौ एकस्यैवाकारस्य स्थाने **'सुपि च'** **'बहुवचने झल्येत्'** इति वचनद्वयबलादेव दीर्घत्वैत्वयोरुक्तन्यायेन यौगपद्यसंभवात्परनियमो न स्यात् । न चात्र 'दीर्घत्वं यञ्यनन्तरे विधीयते, एत्वं च झल्यनन्तरे । न चास्ति संभवः-यद्द्वयोः स्वेन निमित्तेन आनन्तर्यं स्यात्' इति **'इको गुणवृद्धी'** इत्यत्र कैयटेन कृतं विरोधव्युत्पादनं युक्तम्, यञ्झलोरानन्तर्यस्य **'तस्मिन्निति-'** इति परिभाषाबललभ्यत्वेन यञादौ सुपि सति समनन्तरपूर्वस्याकारस्य दीर्घो भवति । झलादौ बहुवचने सुपि सति समनन्तरपूर्वस्याकारस्य स्थाने एकारो भवतीति वाक्यार्थपर्यवसानात् यञ्झलोरानन्तर्यस्य स्थानिविशेषणत्वादादेशविशेषणत्वाभावात् विरोधस्यापि वक्तुमशक्यत्वात् । एतेन जुहुतात् भिन्तादित्यपि व्याख्यातम् । यदुक्तम्- विप्रतिपूर्वस्य सिधेः 'इदं विप्रतिषिद्धम्' इत्यादौ विरोधे दृष्टप्रयोगत्वात् परस्परविरुद्धकार्यद्वयसमर्पकपूर्वपरशास्त्रप्रसङ्ग एव विप्रतिषेधोऽवश्यमभ्युपगन्तव्यः; न त्वेकत्र पूर्वपरशास्त्रद्वयप्रसङ्गमात्रेणेति, तन्नाभिमतम्; अनेकलक्ष्यनिर्वाहान्यथानुपपत्त्या तत्रैव सूत्रे परशब्द-

स्येष्टवाचित्ववत् विप्रतिषेधशब्दस्यापि विरोधावरोधस्थलीयपूर्वपरशास्त्रद्वयप्रसङ्गमात्रोलक्षकत्वस्यावश्यमाश्रयणीयत्वात् । यच्च- **'एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसङ्गः'** **'तृजादिभिस्तुल्यं पर्यायः प्राप्नोति'** **'अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्'** इत्युत्तरवार्तिकैः विप्रतिषेधसूत्रानारम्भे वृक्षेभ्य इत्यादौ पूर्वपरशास्त्रप्रसङ्गपर्यायाप्रतिपत्त्युपन्यासात् उत्तरग्रन्थपर्यालोचनया **'द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः'** इति विप्रतिषेधशब्दार्थकथनपरमपि वार्तिकं युगपदेकत्र परस्परविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्गाभिप्रायकमवश्यं कल्पनीयमित्युक्तम्, तदपि न; विप्रतिषेधसूत्रानारम्भे इन्द्रवायू इत्यादिविरुद्धशास्त्रद्वयप्रसङ्गस्थलीयपर्यायाप्रतिपत्तिरूपदोषोपन्यासस्य स्तात् शिष्टादित्याद्यविरुद्धशास्त्रद्वयप्रसङ्गस्थलीययौगपद्यदोषस्याप्युपलक्षणत्वेनाविरोधात्, विरोधविप्रतिषेधवादिना त्वयापि एकस्मिन्धर्मिणि विरुद्धकार्यद्वयप्रसङ्गस्यैव विप्रतिषेधशब्दार्थत्वकथनपरस्य **'द्वौ प्रसङ्गावन्यार्थावेकस्मिन्स विप्रतिषेधः'** इति वार्तिकस्योपलक्षणत्वाङ्गीकारात्, **'अग्नेरीत्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेन'** इत्यादिवार्तिके कार्यिभेदेऽपि विप्रतिषेधोपन्यासदर्शनात्, भाष्यकारेणापि **'इको गुणवृद्धी'** इत्यादिसूत्रेषु तत्र तत्र 'द्विकार्ययोगो हि विप्रतिषेधः न चात्रैको द्विकार्ययुक्तः' इत्याक्षिप्य 'नावश्यं द्विकार्ययोग एव विप्रतिषेधः । किं तर्हि? असंभवोऽपि' इति कार्यिभेदेऽपि विरुद्धकार्यद्वयप्रसङ्गस्यापि विप्रतिषेधाभिप्रायेण स्थानिवत्सूत्रे भाष्यकारेण स्तात् शिष्टादित्यत्र परनियमलब्धसकृद्गतिन्यायाश्रयणादेव शाभावादीनां निवृत्तिरुपन्यस्ता । किं च त्वन्मते खट्वायां कुमार्यामित्यत्र **'ङेराम्नद्याम्नीभ्यः'** इति ङेरामादेशे सति **'याडापः'** **'आण्नद्याः'** इति याडाटोः **'ह्रस्वनद्यापः'** इति नुटा विरोधाभावात् **'विप्रतिषेधे परम्-'** इति नियमाभावे नुट्प्रसङ्गः। **'आमि सर्वनाम्नः सुट्'** इत्यत्र भाष्ये कुमार्यामित्यादौ **'विप्रतिषेधे-'** इति परनियमलब्धसकृद्गतिन्यायाश्रयणेन नुडभावसमर्थनं चानुपपन्नं स्यादिति चतुर्थी ।।

एकत्र युगपत्परस्परविरुद्धकार्यद्वयप्रसञ्जकशास्त्रद्वयप्रसङ्ग एव **'विप्रतिषेधे परम्-'** इति परनियमः, न तु युगपत् शास्त्रद्वयप्रसङ्गमात्रेण; अन्यथा भविता भवितुं भवितव्यमित्यादौ तृजादिविधानानन्तरमिड्गुणयोर्युगपत्प्रसङ्गे **'विप्रतिषेधे परम्-'** इति इटं बाधित्वा गुणप्रवृत्ताविण्न स्यात् । न चात्र पुनः प्रसङ्गविज्ञानादिटः प्रवृत्तिः, परस्परविरुद्धशास्त्रद्वयप्रसङ्गे पर्यायेणोभयप्रतिपत्तिप्रसङ्ग इवाविरुद्धशास्त्रद्वय-

प्रसङ्गे यौगपद्येनोभयप्रतिपत्तिप्रसङ्गेऽपि **'विप्रतिषेधे परम्-'** इत्यस्य **'सिद्धे विधिरारभ्यमाणो नियमाय भवति'** इति न्यायसाम्येन विप्रतिषेधे परमेव न पूर्वमिति नियमरूपेण प्रवृत्तौ सकृद्गतिन्यायस्यैवाश्रयणीयत्वात् विरुद्धशास्त्रद्वयप्रसङ्गे विरोधेन परस्परप्रतिबन्धादुभयाप्रतिपत्तौ कदाचित्प्राप्तायाम् **'विप्रतिषेधे परम्-'** इत्यस्य विप्रतिषेधे परं तावत् भवतीति विधिरूपेण प्रवृत्तावेव पुनः प्रसङ्गविज्ञानस्य विप्रतिषेधसूत्रे भाष्ये व्यवस्थापनात् । न चात्र वलाद्यार्धधातुकमात्रापेक्षत्वेनान्तरङ्गे इटि कर्तव्ये अङ्गार्धधातुकोभयापेक्षत्वेन बहिरङ्गस्य गुणस्यासिद्धत्वात्प्रथममिडागमः,ततो गुण इति न दोष इति वाच्यम्, तन्वन्तीत्यादौ उप्रत्ययस्य यणादेशे कृते प्राप्तस्येडागमस्य निवृत्तये पूर्वस्मादपि विधौ स्थानिवद्भावार्थमङ्गात्परस्यार्धधातुकस्येडागम इत्यस्याश्रयणीयत्वात् इडागमस्य गुणापेक्षयान्तरङ्गभावस्य वक्तुमशक्यत्वात् । एवमदधादित्यत्र दधातेर्लङि अन्तरङ्गत्वादडागमात्पूर्वं लादेशे नित्यत्वादटःपूर्वं विकरणे अन्तरङ्गत्वादटः पूर्वे **'जुहोत्यादिभ्यः श्लुः'** इति श्लौ युगपत्प्राप्तयोरडागमद्विर्वचनयोरुक्तन्यायेन परत्वादटा द्विर्वचनबाधनं स्यात् । अत एव **'अदसो मात्'** इत्यत्र कैयटेनोक्तम्- 'सति संभवे द्विकार्ययोगो न विप्रतिषेधः ; यथा- एकस्य दधातेरडागमद्विर्वचने भवतः- अदधादिति' इति । न च विरुद्धशास्त्रद्वयप्रसङ्ग एव परनियमाभ्युपगमे स्यात् शिष्टात् हतादित्यत्र तातङादेशेन एत्वशाभावजभावानां निवृत्तिर्न स्यात्; त्वाष्टो जागत इत्यादौ चादिवृद्ध्या अन्त्योपधावृद्धिनिवृत्तिर्न स्यात्; वृक्षेभ्य इत्यत्र च एकस्यैवाकारस्य स्थाने आष्टमिकद्विर्वचनवत् एत्वदीर्घत्वयोर्विधानसंभवात्परनियमो न स्यात्; खट्वायां कुमार्यामित्यत्रापि याडाटोर्नुटश्च संभवात्परनियमो न स्यादिति वाच्यम्; स्तात् शिष्टात् हतादित्यत्र स्थानिवत्सूत्रपठितेन **'लोडादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः'** इति शाभावादीनां निवृत्तेः, कुमार्यां खट्वायामित्यादौ **'कुमार्यां वयसि' 'संहितायाम्'** इति निर्देशाल्लिङ्गात् याडाटोश्च परनियमोपपत्तेः, त्वाष्ट्रो जागत इत्यत्रापि अनुशतिकादौ पुष्करसच्छब्दपाठाल्लिङ्गादादिवृद्धेरन्त्योपधावृद्धिबाधकत्वोपपत्तेः। वृक्षेभ्य इत्यादावविरोधात्परनियमो न स्यादिति चेत्, त्वन्मतेऽपि भविता भवितुं भवितव्यम् अदधादित्याद्यविरुद्धस्थलेऽपि परनियमप्रसङ्गदोषस्य सत्त्वेन क्वचिद्दोषप्रतिविधानस्योभाभ्यामप्यारम्भणीयत्वेन तुल्यत्वात् विप्रतिपूर्वस्य सिधेः 'इदं विप्रतिषिद्धम्' इत्यादौ विरोधे दृषटप्रयोगत्वेन मत्पक्षस्यैव ज्यायस्त्वात् । किं च त्वन्मते भूयांसो दोषाः ; तथा हि- न्यविशत व्यक्रीणीतेत्यत्र

विशतेः क्रीणातेश्च लङि अन्तरङ्गत्वाल्लादेशे कृते **'नेर्विशः'** **'परिव्यवेभ्यः क्रियः'** इत्यात्मनेपदनियमे विकरणे अडागमे च प्राप्ते **'वृद्भ्यः स्यसनोः'** इति स्ये परस्मैपदविकल्पविधानज्ञापितेन विकरणेभ्यो नियमस्यैव बलवत्त्वेन विकरणं बाधित्वा प्राप्तनियमात् शब्दान्तरस्य प्राप्नुवतो विधेरिव शब्दान्तरात्प्राप्नुवतो विधेरपि न्यायसाम्येन अनित्यत्वाद्विकरणाच्च पूर्वं परत्वादडागमे कृते विकरणेभ्ये नियमस्य बलीयस्त्वात्पूर्वमात्मनेपदे पश्चाज्विकरण इति **'उपसर्गपूर्वनियमे अड्व्यवाय उपसंख्यानम्'** इति वार्तिकप्रत्याख्यानावसरे **'शदेः शितः'** इति सूत्रे भाष्यकारेण व्यवस्थापितस्यार्थस्यानुपपत्तिः, युगपदविरुद्धानेकशास्त्रप्रसङ्गस्यापि विप्रतिषेधत्वाभ्युपगमे **'विप्रतिषेधे परम्-'** इत्यस्य पर्यायेणोभयप्रतिपत्तिस्थल इव यौगपद्येनोभयप्रतिपत्तावपि न्यायसाम्येन नियमरूपेण प्रवृत्तेः सकृद्गतिन्यायस्यैवाश्रयणीयत्वात् तद्रूपासिद्धिप्रसङ्गाच्च । न च विरोध एव विप्रतिषेधमभ्युपगच्छतस्तवापि न्यविशत व्यक्रीणीतेत्यादौ कार्यत्रयस्यापि परत्वादिहेतुना क्रमव्युत्पादनपरभाष्यवरोधापत्तिः, कार्यत्रयस्याप्यविरोधेन युगपत्प्रवृत्तिः स्यादिति वाच्यम्, कार्यार्थत्वात्संज्ञापरिभाषस्य कार्यकालपक्षस्य न्याय्यत्वेऽपि क्वचिल्लक्ष्यसिद्धये **'ईदूदेद्द्विवचनं प्रगृह्यम्'** इत्यादौ मन्दमध्यमप्रतिपत्त्रपेक्षयथोद्देशपक्षाश्रयणवत् इहापि मन्दमध्यमप्रतिपत्रपेक्षया युगपत्प्रसक्तस्यापि कार्यत्रयस्य क्रमप्रवृत्तौ व्युत्पादनीयायां नित्यत्वान्तरङ्गत्वप्रतिपदविधित्वादिहेत्वन्तराभावे अनियतक्रमेण प्रवृत्तौ रूपासिद्धिशङ्कायां विप्रतिषेधसूत्रप्राप्त्यभावे परत्वहेतूपन्यासस्य बलवत्सजातीयहेतूपन्यासपरत्वात् । तथा बह्वनड्वांहे ब्राह्मणकुलानीत्यत्र जश्शसोः श्यादेशे **'नपुंसकस्य झलचः'** इति **'चतुरनडुहोरामुदात्तः'** इति नुमामोरविरुद्धयोः प्रसङ्गे परत्वादामि सति नुम् न स्यात् । तथा ईजतुरित्यादौ परत्वात्संप्रसारणनियमे द्विर्वचनं न स्यात् । **'सावनडुहः'** इत्यत्र-**'पुनः प्रसङ्गविज्ञानाद्वा सिद्धम् यथा आत्वादिषु द्विर्वचनम्-'** इति वार्तिकेन द्विर्वचनदृष्टान्तेन बह्वनड्वांहि इत्यत्र पुनः प्रसङ्गविज्ञानात् नुम्समर्थनमनुपपन्नं स्यादिति दिक्प्रदर्शनमात्रमेतदुपन्यस्तम् । अपि चैवं पुनः प्रसङ्गविज्ञानकथैव शास्त्रे लुप्येत, अविरुद्धानेकशास्त्रप्रसङ्गे यौगपद्येन उभयप्राप्तौ **'विप्रतिषेधे परम्-'** इत्यस्य नियमरूपेण प्रवृत्त्या पुनः प्रङ्गस्य निवर्तितत्वात् विरुद्धानेकशास्त्रप्रसङ्गे परस्मिन्प्रवृत्ते पूर्वस्य प्राप्त्यभावात् । तस्मात् त्वन्मते बहवो दोषाः । अत एव **'अदसो मात्'** इत्यत्र **'नावश्यं द्विकार्ययोगो विप्रतिषेधः; किं तर्हि? असंभवोऽपि'** इति

भाष्यस्य **'असंभव एव विप्रतिषेधः'** इति कैयटेन व्याख्यानं कृतम् । **'तपरस्तत्कालस्य'** इत्यत्र च **'विप्रतिषेधात्सिद्धम्'**इति वार्तिकव्याख्यानावसरे **'अतो भिस ऐस्'** इत्यादौ तपरस्याणः सवर्णमात्रस्य तत्कालानां च षण्णां पूर्वपरशास्त्रभ्यां संज्ञात्वेन विधाने विरोधाभावात् विप्रतिषेधात्परत्वेन व्यवस्थानुपपत्तिम् **'विरोधो ह्यत्र विद्यते'** इत्यादिग्रन्थेन **'उत्तरा हि संख्या पूर्वां संख्यां बाधते'** इति न्यायाभिप्रायेण अष्टादशानां संज्ञात्वे न षण्णां संज्ञात्वसंभव इत्युपन्यासेन परिजहार कैयटः । **'अचः परस्मिन्पूर्वविधौ'** इत्यत्रापि पञ्च्या मृद्व्या इत्यत्र पूर्वपरयणादेशविषये 'एकस्यैव कार्यित्वनिमित्तत्वयोर्विरोधात्परत्वेन व्यवस्था' इति विरोध उपन्यस्तः । **'विप्रतिषेधे परम्-'** इत्यत्रापि आचार्यवचनानां सर्वेषां प्रामाण्याभ्युपगमाद्विरोधासंभवमाशङ्क्य, अन्यत्र सावकाशयोःक्वचिद्विरुद्धार्थसमर्पणादस्त्येव विरोध इत्याक्षेपसमाधानाभ्यां विप्रतिषेधशब्दस्य विरोधार्थकत्वं तेनैव व्यवस्थापितम् । एवं च काशिकायाम् **'विरोधो विप्रतिषेधः'** इति विप्रतिषेधशब्दार्थ उक्त इति पञ्चमी।।

विरोधे सत्यसति वा युगपदेकत्र शास्त्रद्वयप्रसङ्गमात्रे **'विप्रतिषेधे परम्-'**इति परनियमः ; अन्यथा स्तात् शिष्टात् हतात् इत्यत्र उक्तदोषापरिहारात् । स्थानिवत्सूत्रे पठितेन **'लोडादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः'** इति वार्तिकेन शाभावादीनां निवृत्तिर्न संभवति, तत्रैव भाष्यकारेण सकृद्गतिन्यायाश्रयणेन तद्वार्तिकस्य प्रत्याख्यातत्वात् तद्भाष्यविरोधापत्तेः । तथा खट्वायां कुमार्यां तस्यामित्यादौ याडाट्स्याटां नुटश्च समावेशापत्तिः । न च **'संहितायाम्'** **'कुमार्यां वयसि'** **'तदस्यां प्रहरणम्-'** इत्यादिनिर्देशात्समावेशपरिहारः, **'संहितायाम्'** इत्यादिनिर्देशस्य **'सर्वनामानि'** इतिवत् उपात्तरूपमात्रसाधुत्वप्रत्यायनसमर्थस्य खट्वायां गौर्यां तस्यामित्यादावन्यत्रापि याडाट्स्याटां नुटश्च समावेशप्राप्तौ विरोधाभावेऽपि परनियमप्रतिपादनसामर्थ्याभावात् । तथा त्वाष्ट्र इत्यादावपि आदिवृद्ध्या अन्त्यवृद्धिबाधनं न स्यात् । न च अनुशतिकादौ पुष्करसच्छब्दपाठात् ज्ञापकात् अन्त्यवृद्ध्यभावः प्रतिपत्तुं शक्यः,आदिवृद्धिविषये वृद्ध्यन्तरं न भवतीति सामान्यतो ज्ञापके आश्रीयमाणे गङ्गौघस्येदं गाङ्गौघमित्यादौ विभज्यान्वाख्यानपक्षे वृद्ध्यन्तरमपि न स्यात् । अथ विशेषतो ज्ञापकमाश्रीयेत, तर्हि उपधालक्षणवृद्धिरेव आदिवृद्धिविषये न भवतीति ज्ञाप्येत; न त्वादिवृद्धिविषये अन्त्योपधालक्षणवृद्धिर्न भवतीति ज्ञापने किंचि-

त्प्रमाणमस्ति । ततश्च **'अचो ञ्णिति'** इति वृद्धिरादिवृद्धिविषये न निवार्येत । अथापि सामान्यतो ज्ञापकमाश्रीयेत, एवमपि व्यसोर्भावो वैयसवं व्यापदि भवं वैयापदमित्यत्र अन्त्योपधालक्षणवृद्धेरैजागमस्य चाविरोधात्परनियमो न स्यात्। किं च युगपदेकत्र प्रसक्तशास्त्रद्वयस्य किं युगपत्प्रवृत्त्यसंभवो विरोधः, किं वा क्रमेण प्रवृत्त्यसंभवः? आद्ये त्रपूणामित्यत्र त्रपुशब्दादामि विहिते **'ह्रस्वनद्यापो नुट्'** इति नुडागमस्य **'इकोऽचि विभक्तौ'** इति नुमागमस्य च परस्परनिमित्तव्याघातात्क्रमेण प्रवृत्त्यसंभवेऽपि युगपत्प्रवृत्तिसंभवात् विप्रितषेधो न स्यात्; ततश्च नियमाभावेन युगपदुभयप्रवृत्तौ नलोपे तस्य सुब्विधौ असिद्धत्वात् **'नामि'** इति दीर्घो न स्यात्; त्रपूणामित्यादौ **'नोपधायाः'** इति दीर्घत्वसिद्धावपि रुचीनामित्यादौ **'इन्हन्पापूषार्यम्णां शौ'** इति नियमाद्दीर्घो न स्यात्; **'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'** इति वार्तिकविरोधापत्तिश्च । तथा वृक्षेभ्य इत्यादौ एत्वदीर्घत्वयोः परस्परनिमित्तव्याघातात्क्रमेण प्रवृत्त्यसंभवेऽपि उक्तप्रकारेण युगपत्प्रवृत्तिसंभवेनाविरोधात्परनियमो न स्यात्; **'अतो दीर्घाद्बहुवचन एत्वं विप्रतिषेधेन'** इति वार्तिकविरोधापत्तिश्च । एवमन्यत्रापि **'गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रितिषेधेन'** इत्यादौ द्रष्टव्यम् । अन्त्ये पटुकल्पतरः पटुकल्पतम इत्यादौ ईषदसमाप्तः प्रकृष्टः पटुरित्यर्थे तरप्तमपोः कल्पबादीनां च प्रसङ्गे एकस्याः प्रकृतेः प्रत्ययस्यानेकस्य परत्वानुपपत्त्या युगपत्प्रवृत्त्यसंभवेऽपि अनन्तरमेकस्मिन्प्रत्यये सति तद्धितान्तत्वेन प्रातिपदिकत्वात् **'ङ्याप्प्रातिपदिकात्'**इति तदन्तात्प्रत्ययान्तरोत्पत्तिसंभवात् क्रमप्रवृत्त्यसंभवाभावेन **'विप्रतिषेधे परम्-'** इति परत्वात्प्रथमं कल्पबादयः, पुनः प्रसङ्गविज्ञानात्पश्चात्तरप्तमपाविति व्यवस्थापितस्यार्थस्यानुपपत्तिः । तथा खट्वायां कुमार्यां तस्यामित्यादौ याडाट्स्याटां नुटश्च प्रसङ्गे एकस्य आमित्यस्य ङिद्वचनस्यावयविनो युगपदाद्यावयवद्वयस्यान्यतरव्यवधानेन विधातुमशक्यत्वात् युगपत्प्रवृत्त्यसंभवेऽपि प्रथममन्यतरप्रवृत्तौ तद्विशिष्टस्य ङिद्ग्रहणेन ग्रहीतुं शक्यतया क्रमप्रवृत्त्यसंभवाभावाद्विप्रतिषेधाभावेन दोषो द्रष्टव्यः । न चाविरुद्धशास्त्रद्वयप्रसङ्गे **'विप्रतिषेधे परम्-'** इति परनियमाभ्युपगमे भविता भवितुं भवितव्यमित्यादौ इड्गुणयोः प्रसङ्गे परत्वाद्गुणे सति इणन स्यादिति वाच्यम्,वलाद्यार्धधातुकमात्रापेक्षेऽन्तरङ्गे इटि कर्तव्ये अङ्गार्धधातुकोभयापेक्षस्य बहिरङ्गस्य गुणस्यासिद्धत्वेन शास्त्रद्वयप्रसङ्गाभावात्परनियमानुपपत्तेः । न च तन्वन्तीत्यादौ पूर्वस्मादपि विधौ स्थानिवद्भावादि-

डभावार्थम् **'आर्धधातुकस्येड्वलादेः'** इत्यत्र अङ्गाधिकारापेक्षणादिटोऽन्तरङ्गत्वाभावः, तन्वन्तीत्यादौ बहिरङ्गस्य यणोऽसिद्धत्वादेव इडभावसिद्धौ तदर्थमिड्विधाने अङ्गाधिकारानपेक्षणात् । नापि अदधादित्यत्र परनियमेन द्विर्वचनबाधप्रसङ्गः, बहिरङ्गस्याडागमस्य असिद्धत्वेन पूर्वं द्विर्वचने पश्चाददड्विधानोपपत्तेः । नापि न्यविशत व्यक्रीणीतेत्यादौ परनियमान्नियमविकरणयोरप्रसङ्गः, उपसर्गपूर्वनिमयस्य उपसर्गरूपभिन्नपदापेक्षत्वेन बहिरङ्गस्य विकरणस्यापि कर्तृत्वादिरूपशब्दबहिर्भूतार्थापेक्षस्य ग्रामणि ब्राह्मणकुलमित्यादौ **'ह्रस्वस्य पिति कृति तुक्'** इति तुगपेक्षया नपुंसकलिङ्गापेक्षस्य **'ह्रस्वो नपुंसके-'** इति ह्रस्वत्वस्येव बहिरङ्गस्यासिद्धत्वात् प्रथममडागमः, पश्चात् विकरणेभ्यो नियमस्य बलवत्त्वात् नियमः, ततो विकरण इति क्रमव्यवस्थोपपत्तेरन्तरङ्गबहिरङ्गयोस्तुल्यबलत्वाभावेन **'विप्रतिषेधे-'** इत्यस्य तत्राप्रसक्तेः । **'शदेः शितः'**इति सूत्रे परत्वहेतूपन्यासस्य च अन्तरङ्गत्वहेतूपलक्षणार्थत्वान्न विरोधः । नापि तन्मते बह्वनड्वांहि ब्राह्मणकुलानीत्यत्र परनियमेन नुमभावप्रसङ्गः, **'चतुरनडुहोः-'** इत्यत्र शब्दस्वरूपोपादानेन प्रवृत्तस्य प्रतिपदविधेः शीघ्रोपस्थितिकतया बलवत्त्वात्प्रथमप्रवृत्तौ परनियमाभावात् । ईजतुरित्यादावपि **'वचिस्वपियजादीनाम्-'** इति संप्रसारणस्य प्रतिपदविधित्वेनैव बलवत्त्वात्प्रथमप्रवृत्तेः । न चैवम् **'सावनडुहः'** इत्यत्र भाष्ये बह्वनड्वांहीत्यत्र **'पुनः प्रसङ्गविज्ञानाद्वा सिद्धम्; यथात्वादिषु द्विर्वचनम्'** इति विप्रतिषेधे पुनःप्रसङ्गविज्ञानान्नुम्समर्थनानुपपत्तिः, तवापि तुल्यत्वात् । न च मन्मते पुनःप्रसङ्गविज्ञानलोपः, ईषदसमाप्तः प्रकृष्टः पटुः पटुकल्पतरइत्यादौ एकस्याः प्रकृतेः परत्वेन युगपत्प्रत्ययद्वयस्य विधातुमशक्यत्वेन प्रथमं परत्वात्कल्पबादौ कृते तदन्तस्य प्रातिपदिकत्वेन पुनस्तरबादिविधानार्थं पुनःप्रसङ्गविज्ञानापेक्षणात् । अत एव **'इको गुणवृद्धी' 'अदसो मात्'** इत्यादौ तत्र तत्र भाष्यकारेण **'नावश्यं द्विकार्ययोग एव विप्रतिषेधः; किं तर्हि? असंभवोऽपि'** इति वृक्षेभ्य इत्यादावेकस्मिन्कार्यिणि विरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्गस्येव आग्निवारुणमित्यादौ कार्यिभेदे अविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्गस्यापि विप्रतिषेधत्वमभिहितम्; 'असंभवोऽपि' इत्यसंभवेन समुच्चीयमानस्य द्विकार्ययोगस्य विरुद्धकार्यद्वयविषयकत्वायोगात् । यत्तु- **'अदसो मात्'** इत्यत्र कैयटेन **'असंभवोऽपि'** इति भाष्यस्थमपिशब्दम् 'असंभव एव विप्रतिषेधः' इत्यवधारणार्थं व्याख्याय 'सति संभवे द्विकार्ययोगो न विप्रतिषेधः ; यथा एकस्य दधा-

तेरडागमद्विर्वचने भवतः- अदधादिति'इत्युदाहृतम्; तत्तुच्छम्,**'नपुंसकस्य झलचः'** इत्यत्र भाष्ये गोमन्ति कृषन्ति ब्राह्मणकुलानीत्यत्र झलन्तलक्षणे नुमि कृते पुनरुगिल्लक्षणस्य नुमः प्रसङ्गे **'विप्रतिषेधात्सिद्धम्'** इति वार्तिकेन सकृद्गतिन्यायाश्रयणात्परेण पूर्वस्य बाधनमुपन्यस्य, अनन्तरं झल्लक्षणोगिल्लक्षणयोर्नुमोः क्रमेणाचोऽन्यात्परत्वेन विधानसंभवात् परेण पूर्वस्य बाधनमनुपपन्नमिति पूर्वोद्भावितशङ्कापरिहारार्थम् 'यदप्युच्यते असति च खल्वपि संभवे बाधनं भवति; अस्ति च संभवो यदुभयं स्यादिति । सत्यपि संभवे बाधनं भवति' इत्यादिग्रन्थेन भाष्यकारेण तक्रकौण्डिन्यन्यायप्रदर्शनेन सत्यपि संभवे **'विप्रतिषेधे परं कार्य'** इति परेण पूर्वस्य बाधनोपन्यासात् । एतद्भाष्यविरोधादेव **'अचः परस्मिन्पूर्वविधौ' 'तपरस्तत्कालस्य'** इत्यादौ परत्वेन व्यवस्थाप्रतिपादनस्थलेषु कैयटेन कृतो विरोधोपन्यासस्त्वनादरणीय एव; अन्यथा स्तात् शिष्टात् हतात् खट्वायां कुमार्यां तस्यां गोमन्ति कृषन्ति इत्यादौ **'स्थानिवदादेशोऽनल्विधौ' 'आमि सर्वनाम्नः सुट्' 'नपुंसकस्य झलचः'** इति सूत्रेषु भाष्यकारस्य परनियमसिद्धसकृद्गतिन्यायाश्रयणात्परेण पूर्वबाधोपन्यासोऽनुपपन्न एव स्यादिति षष्ठी ।।

एकत्र युगपत्परस्परविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्ग एव विप्रतिषेधः; अन्यथा भविता भवितुं भवितव्यमित्यादौ नित्यत्वान्तरङ्गत्वप्रतिपदविधित्वादिना परनियमाप्रसङ्गेऽपि चेतति सेधति श्चोतति क्रोशतीत्यादौ नित्यत्वादिहेत्वन्तराभावे गुणविकरणयोर्युगपत्प्रसङ्गे परनियमेन विकरणो न स्यात् । अथ अभविष्यदित्यादौ लस्य स्थाने तिपि तं निमित्तीकृत्य गुणविकरणाडागमानां युगपत्प्रसङ्गे परत्वाद्गुणनियमे अनन्दिष्यदित्यादौ सावकाशोऽडागमो न स्यात् । तथा तत्रैव नन्दिष्यतीत्यादौ सावकाशो विकरणोऽनन्दिष्यदित्यादौ अड्विकरणयोर्युगपत्प्रसङ्गे परत्वादडागमनियमे न स्यात् । न चात्र अडागमस्य **'शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः'** इत्यनित्यत्वात्प्रथमं विकरणः, पश्चादडागम इति युगपत्प्रसङ्गाभावान्न दोष इति वाच्यम्, कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वस्योभयोस्तुल्यत्वात्। अकृते विकरणे यस्य धातुमात्रस्याडागमः, कृते विकरणे न तस्य प्राप्नोति; किं तु विकरणान्ताङ्गस्येति कृताकृतप्रसङ्गित्वाभावः; तदेवोच्यते- शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इतीति चेत्, तर्ह्यकृते अडागमे निरट्काद्धातोः परो विकरणः प्राप्तः, कृते अडागमे न तस्मादेव

प्राप्तः, किं तु साट्कादिति तुल्यमड्विकरणयोरनित्यत्वम् । अत एव **'शदेःशितः'** इति सूत्रे भाष्यकारेण **'यत्र तु खलु उभयं नित्यम्, तत्र परत्वादडागमो भवति'** इति अड्विकरणयोः कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वं प्रदर्शितम् । अथापि शब्दान्तरस्यैव प्राप्नुवन्विधिरनित्यः, न तु शब्दान्तरात्; एवमपि त्वत्पक्षे दोष एव, अनन्दिप्यदित्यादौ विकरणाडागमयोर्नित्यानित्ययोस्तुल्यबलत्वाभावेऽपि शास्त्रद्वयप्रसङ्गसत्त्वेन **'विप्रतिषेधे परम्-'** इति परनियमस्यानिर्वायत्वात्; स्योनः स्योना जरसे जरस इत्यादौ च अन्तरङ्गे यणादौ बहिरङ्गस्य गुणादेरसिद्धत्वेन प्रतिपदविधौ जरसादौ शीघ्रोपस्थिते **'याडापः'** इत्यादिसामान्यविधेर्विलम्बितोपस्थितिकत्वेन अन्तरङ्गबहिरङ्गयोः प्रतिपदविधिसामान्यविध्योश्च युगपदेकत्र प्रसङ्गाभावेऽपि प्रबलदुर्बलयोरपि नित्यानित्ययोर्युगपदेकत्र प्रसङ्गमात्रस्य दुर्वारत्वात् । युगपदेकत्र विरुद्धानेकशास्त्रप्रसङ्गे विप्रतिषेधमभ्युपगच्छतो मम मते उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गप्रतिपदसामान्यविधिषु तुल्यबलत्वाभावेन विरोधाभावादपवादादीनां प्रवृत्तिकाले उत्सर्गादीनां प्राप्त्यभावात् युगपत्क्वचिच्छास्त्रद्वयप्रसङ्गाभावेन परव्यवस्था न भवतीति न दोषः । एवं त्रपुणी जतुनी तुम्बुरुणी इत्यादिषु त्रप्वादिभ्य औत्प्रत्यये**'नपुंसकाच्च'** इति शीभावे **'इकोऽचि विभक्तौ'** इति नुमि च परनियमेन शीभावो न स्यात् । इमौ इमे इत्यत्र 'दश्च' इति मत्वे त्यदाद्यत्वं न स्यादिति दिक्प्रदर्शनमात्रमेतत्कृतमित्यविरुद्धानेकशास्त्रप्रसङ्गे नित्यतवादिहेत्वन्तराभावे परनियमेन पूर्वपरयोः समावेशो न स्यादिति तत्र तत्र बहवो दोषा द्रष्टव्याः । किं च त्वन्मते न्यविशत व्यक्रीणीतेत्यादावुदाहरणे प्रथममडागमप्रतिपत्तौ परत्वहेतूपन्यासस्य**'शदेः शितः'** इत्यत्र कृतस्य अन्तरङ्गत्वहेतूपलक्षणार्थत्वे सर्वथैव पारार्थ्यापत्तिः । मन्मते तु मन्दमध्यमप्रतिपत्त्रपेक्षक्रमप्रवृत्तौ युगपत्प्रसक्तानेकशास्त्रणामनियतक्रमे प्रवृत्तौ रूपासिद्धिशङ्कायामन्तरङ्गत्वादिहेत्वन्तराभावे परत्वहेतूपन्यासस्य बलवत्त्वप्रयोजकसजातीयधर्मोपन्यासपरत्वादित्युक्तमेव । न चैकत्र युगपत्प्रसक्तानेकशास्त्राणां युगपत्प्रवृत्त्यसंभवे क्रमप्रवृत्तिसंभवे च दोषस्योक्तत्वादसंभवो विप्रतिषेध इत्यपि न युक्तमिति वाच्यम्, **'ईदूदेद्द्विवचनं प्रगृह्यम्'** इत्यस्य अप्रगृह्यस्येति प्लुतस्यानुनासिकनिषेधे कर्तव्ये यथोद्देशपक्षाश्रयणवत् **'तस्मिन्निति निर्दिष्टे पूर्वस्य'** इत्यादीनाम् **'झलो झलि'** इत्याद्यसिद्धविषये कार्यकालपक्षाश्रयणवच्च इष्टसिद्धये वृक्षेभ्यः त्रपूणामित्यादौ क्वचिन्मन्दमध्यमप्रतिपत्त्रपेक्षक्रमप्रवृत्त्याश्रयणात्तदसंभवात् **'विप्रति-**

षेधे परम्-' इति परनियमस्य पटुकल्पतरः कुमार्यामित्यादौ क्वचिन्मुख्यप्रतिपत्त्रपेक्षयुगपत्प्रवृत्त्याश्रयणेन तदसंभवात् 'विप्रतिषेधे परम्-' इति परविधिपरनियमयोश्चोपपत्तेः । न च स्तात् शिष्टात् हतात् त्वाष्ट्रं वैयसवं वैयापदमित्यादौ परनियमालाभात् विरुद्धानेकशास्त्रप्रसङ्ग एव विप्रतिषेध इति न युक्तमाश्रयितुमिति वाच्यम्, त्वन्मतेऽपि अभविष्यत् अनन्दिष्यत् त्रपुणी जतुनी इमौ इमे इत्यादिषु बहुषु स्थलेषु दोषसद्भावात् विप्रतिषेधशब्दस्य मुख्यार्थापरित्यागाच्च मत्पक्षस्यैव ज्यायस्त्वात् । न च भाष्ये अविरुद्धानेकशास्त्रप्रसङ्गेऽपि इदमिह संप्रधार्यम्- इदं क्रियतामिदमिति । परत्वादिदमिति बहुषु स्थलेषु परत्वहेतूपन्यासदर्शनाद्विरुद्धानेकशास्त्रप्रसङ्ग एव विप्रतिषेध इत्ययुक्तमिति वाच्यम्, अविरुद्धानेकशास्त्रप्रसङ्गे विप्रतिषेधमभ्युपगच्छतस्तवापि तत्र परत्वहेतूपन्यासस्थले परनियमप्रवृत्तौ पूर्वपरसमावेशाभावप्रसङ्गदोषाणां दुष्परिहरत्वात् । न च **'नावश्यं द्विकार्ययोगो विप्रतिषेधः । किं तर्हि? असंभवोऽपि'** इति भाष्यवाक्ये अपिशब्दस्य असंभव एव विप्रतिषेध इति कैयटकृतं व्याख्यानमनुपपन्नम् **'नपुंसकस्य झलचः'** इत्यत्र भाष्यकारेणैव गोमन्ति कृषन्तीत्यत्र झलन्तलक्षणोगिल्लक्षणयोः पूर्वपरनुमागमयोः क्रमेण प्रवृत्तिसंभवात् **'विप्रतिषेधे परम्-'** इति परेण बाधनानुपपत्तिमाशङ्क्य तक्रकौण्डिन्यन्यायप्रदर्शनेन सत्यपि संभवे झलन्तलक्षणउगिल्लक्षणं बाधिष्यत इति सत्यपि संभवे विप्रतिषेधसूत्रेण परेण पूर्वस्य बाधनोपन्यासादिति वाच्यम्, तत्रैव भाष्यकारेण अविरुद्धानेकशास्त्रप्रसङ्गे विप्रतिषेधस्य बहुदोषदुष्टत्वाभिप्रायेण तत्पक्षं परित्यज्य 'अथ वास्तु अत्रोगिल्लक्षणोऽपि' इत्यादिग्रन्थेन परिहारान्तराश्रयणात् । गोमन्ति कृषन्ति श्रेयांसीत्यादौ **'मिदचोऽन्त्यात्परः'** इति शास्त्रेण झलन्तलक्षणोगिल्लक्षणयोर्युगपत्प्रवृत्त्यसंभवसत्त्वेन **'विप्रतिषेधात्सिद्धम्'** इति तत्रत्यवार्तिकोपपत्तेश्चेति सप्तमी ।।

विरोधे सत्यसति वा शास्त्रद्वयप्रसङ्गमात्रे **'विप्रतिषेधे परम्-'** इति पर नियमः ; अन्यथा जुहुतात् भिन्तादित्यत्र आशिषि लोडादेशस्य सिपः स्थाने कृतस्य ह्यादेशस्य स्थाने **'तुह्योस्तातङ्-'** इति तातङः **'हुझल्भ्यो हेर्धिः'** इति धित्वस्य च युगपत्प्रसङ्गे परत्वात्तातङा नियमो न स्यात्, एकस्यैव हेः स्थाने वचनद्वयबले धित्वस्य तातङश्च विधातुं शक्यत्वेन युगपत्प्रवृत्त्यसंभवाभावात् अन्यतरस्मिन्प्रवृ तस्य स्थानिवद्भावात्पुनरन्यस्य प्रवृत्तिसंभवेन क्रमप्रवृत्त्यसंभवस्याप्यभावात् । तथ

तिसृणामित्यत्र त्रिशब्दादामि विहिते **'त्रेस्त्रयः' 'त्रिचतुरोः स्त्रियां तिसृचतसृ'** इत्युभयोः प्रसङ्गे परनियमो न स्यात्, पूर्वोक्तरीत्या युगपत्प्रवृत्त्यसंभवस्य क्रमप्रवृत्त्यसंभवस्याप्यभावात् । स्तात् शिष्टात् हतादित्यत्र त्वदुपन्यस्तस्य उभयविधस्याप्यसंभवस्याभावात् परनियमालाभदोषस्तु असमाहित एव । इह च घानिषीष्ट घानिषीयास्तां घानिषीरन्निति हन्तेर्भावकर्मणोर्लिङि सीयुटि चिण्वद्भावस्य वधादेशस्य च प्रसङ्गे द्विविधस्याप्यसंभवस्याभावात्परनियमो न स्यात् । यश्च **'इको गुणवृद्धी भवतो विप्रतिषेधेन'** इति क्रोष्ट्रीयमतोपन्यासावसरे मेद्यतीत्युदाहरणे इक्परिभाषाया अलोन्त्यपरिभाषायाश्च विप्रतिषेधोपन्यासः; सोऽपि न संगच्छेत, 'मिदेर्गुणः' इत्यत्र स्थानषष्ठीगुणग्रहणलिङ्गाभ्यां परिभाषाद्वयस्यापि युगपत्क्रमेण वोपस्थाने विरोधाभावात् परिभाषायाः स्वयं लक्ष्यसंस्कारकत्वाभावेन विधिप्रदेशे उपस्थानमात्रस्य परिभाषाकृत्यत्वात् तत्र च विरोधाभावात् । न च **'मिदेर्गुणः'** इत्यत्र परिभाषाद्वयोपस्थानसंभवेऽपि मेद्यति मेद्यतः मेद्यन्तीत्यत्र 'द्वौ स्थानिनौ, एक आदेशः ; न चास्ति संभवः- यद्द्वयोः स्थानिनोरेक आदेशः स्यात्' इति ग्रन्थेन **'इको गुणवृद्धी'** इति सूत्रे परिभाषाद्वयस्यापि कार्यद्वारा विरोधो भाष्यकारोपन्यस्तः संभवति, **'एकः पूर्वपरयोः'** इत्यत्र एकग्रहणप्रत्याख्यानावसरे भाष्यकारेणैव एकवाक्यभावादेव लोके द्वयोरेकस्याभिर्निर्वृत्तिर्भवति' इत्यादिग्रन्थेन एकग्रहणमन्तरेणापि आत् अचि पूर्वपरयोर्गुणो भवतीत्येकेन वाक्येन गुणविधानाद्द्वयोः स्थाने एकस्यादेशस्य व्यवस्थापनादिहापि **'मिदेर्गुणः'** इत्यत्र परिभाषाद्वयोपस्थाने मिदेरन्त्यस्येकश्च गुणो भवतीत्येकवाक्यभावाद्द्वयोः स्थाने एकस्य गुणस्य विधाने विरोधाभावात् । नापि 'मिदेरित्येका षष्ठी; सा यद्यवयवसंबन्धे' तदा इकारस्य गुणेन भाव्यम्; अथ स्थानषष्ठी, तदा **'अलोऽन्त्यस्य'** इति वचनात् दकारस्येति नास्ति संभवः यद्युगपदुभयोर्गुण इत्यर्थः' इति तत्रैव कैयटकृतं विरोधव्युत्पादनं युक्तम्, **'षष्ठी स्थानेयोगा'**इति परिभाषालब्धया मिदेरिति स्थानषष्ठ्या गुणग्रहणेन च परिभाषाद्वयोपस्थितौ **'राज्ञः क च'** इत्यत्र स्थानषष्ठ्या अलोन्त्यपरिभाषोपस्थित्यनन्तरं राजेत्यस्य को भवतीत्यवयवषष्ठीत्वसंपत्तिवदिहापि मिदेरिति स्थानषष्ठ्याः परिभाषाद्वयोपस्थानानन्तरं मिदेरन्त्यस्येकश्च गुणो भवतीत्यवयवषष्ठीत्वसंपत्त्या द्वयोः स्थाने गुणस्य विधिसंभवेन विरोधाभावात् । किं च **'अदसो मात्'** इत्यत्र भाष्ये **'विप्रतिषेधाद्वा'** इति वार्तिकव्याख्यानोपक्रमे अमी अत्र अमी आसते अमू अत्र अमू आसाते इत्यत्र

भाष्यकारोपन्यस्तस्य प्रगृह्यसंज्ञाया अयादीनां च विप्रतिषेधस्य अनुपपत्तिः, अमी अत्रेत्यादौ क्रमेण प्रवृत्तस्य कार्यद्वस्य **यौगपद्यसंभवात्** । न च 'प्रगृह्यसंज्ञाभिनिर्वर्तमानायादीन्बाधते; अयादयोऽभिनिर्वर्तमानाः प्रगृह्यसंज्ञानिमित्तं विघ्नन्ति, इति तत्रैव भाष्यकारोपन्यस्तोऽसंभवः संभवति, अमी अमू अत्रेत्यत्र प्रगृह्यसंज्ञाप्रवृत्तावपि प्रगृह्यसंज्ञासंज्ञिनोरेवेत्वोत्वयोरसिद्धत्वादयादिप्रवृत्त्यव्याघातेन पुनरीत्वोत्वायोगात्प्रगृह्यसंज्ञायां च युगपत्पूर्वपरशास्त्रद्वयप्रसञ्जितकार्यद्वयसंभवात् । न च - अमी अत्रेत्यादौ **'अदसो मात्'** इतीत्वोत्वयोः प्रगृह्यसंज्ञाविधानस्य न तावत्तयोर्यणादिसंधिनिवृत्तिः प्रयोजनम्, तयोरसिद्धत्वादेव तन्निवृत्तेः; नापि अप्रगृह्यस्य' इत्यनुनासिकनिषेधः प्रयोजनम्, तावन्मात्रस्य **'अणोऽप्रगृह्यस्यानुनासिकः' 'अदसो न'** इति सूत्रणेन सिद्धेःप्रकरणात्पृथक्संज्ञाविधानवैयर्थ्यात्; अतोऽत्र प्रगृह्यसंज्ञाप्रकरणे अमी अत्रेत्यादावीत्वोत्वयोः **'अदसो मात्'** इति प्रगृह्यसंज्ञारम्भस्य सर्वप्रगृह्यकार्यार्थत्वेन विज्ञातस्य ईत्वोत्वयोः स्थानिनि अयादिनिवृत्तिः प्रयोजनमिति वक्तव्यम्; तच्च ईत्वोत्वयोः प्रगृह्यसंज्ञायामयादावसिद्धत्वाभावमन्तरेण नोपपद्यत इति सामर्थ्यात्प्रगृह्यसंज्ञाप्रवृत्तावसिद्धत्वबाधादयादीनामप्रसङ्गेन कार्यद्वययौगपद्यासंभवः- इति वाच्यम्, **'सर्वतो बलवती ह्यन्यथानुपपत्तिः'** इति न्यायेन विप्रतिषेधहेतोः संज्ञाविधानसामर्थ्यादेवायादिनिवृत्तेः सुवचत्वेन परत्वात्प्रगृग्यसंज्ञाप्रवृत्तौ सकृद्गतिन्यायेनायाद्यभावोपपादनार्थं विप्रतिषेधोपन्यासवैयर्थ्यात् **'तद्धेतोरेवास्तु तद्धेतुत्वं मध्ये किं तेन'** इति न्यायात् । तथा तत्रैव तद्वार्तिकव्याख्यानोपसंहारे भाष्यकारेणोपन्यस्तस्य ईत्वादीनामयादीनां च विप्रतिषेधस्यानुपपत्तिः, तयोरपि कार्ययोर्यौगपद्यसंभवादित्यष्टमी ।।

एकत्र एककार्यिविषयत्वाभावेऽपि युगपत्परस्परविरुद्धकार्यद्वयसमर्पकशास्त्रद्वयप्रसङ्ग एव विप्रतिषेधः, तत्रैव **'विप्रतिषेधे परम्-'** इति परत्वव्यवस्था । न चैवम् **'विप्रतिषेधे परम्-'** इत्यत्र भाष्यकारेणोपन्यस्ते वृक्षेभ्य इत्युदाहरण एवं एकस्यैवाकारस्य स्थाने युगपत्प्रसक्तशास्त्रद्वयेन एत्वदीर्घत्वयोर्विधातुं शक्यत्वेन शास्त्रद्वयस्य विरोधाभावात्परत्वेन व्यवस्थानुपपत्तिः, एकत्र युगपत्प्रसक्तानामपि शास्त्राणां क्रमप्रवृत्तेरेव प्रामाणिकत्वात्तत्र चानयोरेत्वदीर्घत्वशास्त्रयोः त्रपूणामित्यत्र नुम्नुट्छास्त्रयोरिव परस्परनिमित्तव्याघातेन विरोधात् **'विप्रतिषेधे परम्-'** इति पर-

व्यवस्थोपपत्तेः । न चात्र युगपत्प्रसक्तशास्त्राणां क्रमप्रवृत्तौ प्रमाणाभावः अविलम्बेन युगपदेकत्र प्रवृत्त्यौचित्यादिति वाच्यम्, **'अदस औ सुलोपश्च'** इति सुलोपारम्भस्यैव तत्र प्रमाणत्वात्; अन्यथा हि अदस् सु इत्यत्र सावौत्वस्य **'हल्ङ्याब्भ्यः-'** इति हलः सुलोपस्य च युगपदेव प्रवृत्तेः सुलोपवचनानर्थक्यप्रसङ्गात् तस्यैव च युगपत्प्रसक्तानामपि शास्त्राणां क्रमप्रवृत्तिज्ञापकत्वात्; क्रमप्रवृत्तौ हि **'हल्ङ्याब्भ्यः-'** इति सुलोपात्पूर्वं कदाचिदौत्वप्रवृत्तावहलन्तत्वात्सुलोपाप्राप्तौ सुलोपवचनमर्थवद्भवति । न च युगुपत्प्रसक्तशास्त्राणां युगपत्प्रवृत्तावपि न लोपवचनानर्थक्यम्, सर्वत्र युगपत्प्रवृत्तावपि प्रकृते नित्यत्वाददस औत्वस्य बलवत्त्वेन **'हल्ङ्याब्भ्यः-'** इति सुलोपं प्रतिबध्य प्रथमं प्रवृत्तौ पुनः सुलोपाप्राप्तेरिति वाच्यम्, जामात्रर्थं श्रपितस्य सूपस्याल्पीयस्त्व इव बहुत्वेऽप्यतिथिभ्यः पूर्वं जामात्रे परिवेषणादर्शनेन नित्यानित्यकर्मद्वयकर्तव्यतायामल्पद्वादश्यादिवद्द्वादशीबहुत्वेऽपि नित्यस्य प्रथममनुष्ठानादर्शनाच्च विरोध एव नित्यानित्ययोर्नित्यस्य प्रथमप्रवृत्तेरौत्वसुलोपयोश्च युगपत्प्रवृत्तौ विरोधगन्धस्याप्यभावात् युगपत्प्रवृत्तौ कृताकृतप्रसङ्गित्वतदभावरूपनित्यत्वानित्यत्वविभागाभावाच्च । ज्ञापनप्रयोजनं च द्यौरित्यत्र औत्वसुलोपयोर्युगपत्प्रवृत्त्यभावात्सुलोपाभावः । किं च वृक्षेभ्य इत्यादौ यत्र यत्र पूर्वपरशास्त्राभ्यामेकस्य स्थाने आदेशद्वयप्रसङ्गः, तत्र अतो यञि दीर्घः अतो झल्येत्वमिति पूर्वपरशास्त्रयोरुभयोरपि प्रसङ्गाभिधायकषष्ठीश्रवणात् यञि पूर्वस्यातः प्रसङ्गे दीर्घ इत्याद्यन्यतरशास्त्रप्रवृत्तौ दीर्घत्वादिना निवर्तितस्याकारादेः प्रसङ्गाभावेन प्रसङ्गाभिधायकद्वितीयषष्ठ्यर्थासंभवेन तदितरशास्त्रप्रवृत्त्यसंभवात् यौगपद्यासंभवः । आष्टमिकद्विर्वचने तु **'परेर्वर्जने'** इत्येकस्या एव षष्ठ्याः श्रवणादेकस्य परेर्द्वे रूपे आदेशावित्यविरोधः । किं च अतो यञि दीर्घः, अतो झल्येत्वमिति अतः स्थाने भिन्नवाक्यप्रतिपन्नयोरेत्वदीर्घत्वयोः **'व्रीहिभिर्यजेत' 'यवैर्यजेत'** इति यागसाधनत्वेन परस्परनैराकाङ्क्ष्येण भिन्नवाक्यप्रतिपन्नयोर्व्रीहियवयोरिव विकल्पावश्यंभावादपि यौगपद्यासंभवः। भिन्तात् दुहुतादित्यत्र यद्यपि पूर्वपरशास्त्रयोः स्थानिवद्भावात्क्रमेण प्रवृत्तिसंभवेन त्रपूणामित्यत्रेव परस्परप्रतिबन्धाभावादिह विरोधाभावः; तथापि तातङादेशस्य प्रथमं प्रवृत्तौ तस्य स्थानिवद्भावात् धित्वप्रवृत्तौ आशिषि भिन्द्धीति साधुः, भिन्तादित्यसाधुः; धित्वस्य प्रथमं प्रवृत्तौ पूर्ववत्पुनस्तातङि आशिषि भिन्तादिति साधुः, भिन्द्धीत्यसाधुरिति साधुत्वांशे पूर्वपरशास्त्रयोः परस्परविरुद्धार्थोपस्थापकत्वेन कार्यद्वारा

विरोधात्पर्यायप्रसङ्गे परनियमोपपत्तिः । एवं तिसृणां खट्वायां कुमार्यां सर्वस्यां पटुकल्पतर इत्यादौ शास्त्रद्वयप्रवृत्तौ विरोधाभावेऽपि साधुत्वद्वारा पूर्वपरशास्त्रद्वयस्य विरुद्धार्थसमर्पणद्विरोधे परनियमप्रसङ्गश्च द्रष्टव्यः । एवं न्यविशत व्यक्रीणीतेत्यादौ विकरणाडागमयोर्यदि पूर्वं विकरणः, तदा विकरणान्तभक्तेनाडागमेन व्यवधानात् उपसर्गपूर्वनियमाप्रवृत्तौ न्यविशदिति परस्मैपदं साधु, यदि पूर्वमडागमः, तदा अडागमस्य धातुभक्तत्वात् कृतेऽपि विकरणे उपसर्गपूर्वनियमप्रवृत्तौ परस्मैपदमसाध्वित्येवं कार्यद्वारा विरोधात् **'शदेः शितः'**इति सूत्रे भाष्ये अडागमे परत्वहेतूपन्यासः। एवं च यत्र पूर्वपरशास्त्रयोः क्रमेण स्वस्वकार्यप्रवर्तने स्वस्वकार्यप्रवर्तनानन्तरमपि साधुशब्दस्वरूपसमर्पणे च विरोधाभावः- सेधति क्रोशति अभविष्यत् अनन्दिष्यत् त्रपुणी जतुनी इत्यादौ, तत्र **'विप्रतिषेधे परम्-'** इत्यस्य प्रवृत्त्यसंभवात्परनियमाप्रसङ्गात् यथेष्टं क्रमेण पूर्वपरयोः प्रवृत्तिः। अथ वा सेधतीत्यादावपिपूर्वपर शास्त्रयोः **'अदस औ सुलोपश्च'** इति सुलोपारम्भाज्ज्ञापकात् स्वस्वकार्ये क्रमेण प्रवर्तनीये प्रथमप्रवृत्तौ कलहायमानयोः शास्त्रयोर्जातिपक्षे परस्परं प्रतिबन्धादप्रतिपत्तौ **'विप्रतिषेधे परं कार्यम्'** इत्यस्य विधिरूपेण प्रवृत्त्या पुनः प्रसङ्गविज्ञानात्पूर्वस्यापि प्रवृत्तिः । अत एव ईजतुः ईजुः बह्वनड्वांहि ब्राह्मणकुलानीत्यादौ पूर्वपरशास्त्रयोः स्वस्वकार्यप्रवर्तने साधुशब्दस्वरूपप्रतिपादने च विरोधाभावेऽपि 'सावनडुहः' इत्यादौ भाष्ये 'पुनः प्रसङ्गविज्ञानाद्वा सिद्धम्, यथात्वादिषु द्विर्वचनम्' इति पुनः प्रसङ्गविज्ञानोपपत्तिः । अत एव स्तात् शिष्टात् हतात् त्वाष्ट्रो जागतो वैयसवं वैयापदमित्यादौ पूर्वपरशास्त्रयोः स्वस्वकार्यप्रवर्तने साधुशब्दप्रतिपादने च विरोधाभावेऽपि तुल्यबलयोः स्वस्वकार्यस्य प्रथमं प्रवर्तने कलहायमानयोर्विधेर्व्यक्तिपक्षे पर्यायेणोभयोः प्रथमप्रसङ्गे **'विप्रतिषेधे परम्'** इत्यस्य नियमरूपेण प्रवृत्त्या सकृद्गतिन्यायाश्रयणस्य चोपपत्तिः । एवं चात्र पक्षे पूर्वपरशास्त्रयोर्युगपदेकत्र प्रसङ्गमात्रेण विप्रतिषेधो न भवतीति लक्ष्यानुरोधात् क्वचित्पुनःप्रसङ्गविज्ञानम्, क्वचित्सकृद्गतिन्यायाश्रयणमिति न क्वापि दोषः । एवं च **'अदसो मात्'** इत्यत्र यदुक्तं कैयचेन- ' सति संभवे द्विकार्ययोगो न विप्रतिषेधः-यथैकस्य दधातेरडागमद्विर्वचने अदधादिति' इति; तदुपपन्नम्, अदधादित्यत्र द्विकार्ययोगस्य विप्रतिषेधत्वं निराकृत्य त्रपूणामित्यादौ कार्यद्वयप्रवृत्त्यसंभवमेव विप्रतिषेधं साधयता कैयटेन स्थानिवत्सूत्रे स्तात् शिष्टात् हतादित्यत्र सकृद्गतिन्यायाश्रयणेन शाभावादीनां निवृत्त्युपन्यासस्थले प्रकारान्तरेण

विप्रतिषेधस्यानिरूपणात् । यत्तु- 'नियमादिको गुणवृद्धी भवतो विप्रतिषेदेन' इति विप्रतिषेधोपन्यासो न संगच्छत इति; सत्यम्, उत्तरत्रोत्सर्गापवादभावोपन्यासेन अतुल्यबलत्वाद्विप्रतिषेधायोगेन क्रोष्ट्रीयमतस्य निराकरणात्परिभाषाद्वयस्य विरोधाभावो नादृतः ।।

इति
श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यमहाव्रतयाजि
श्रीमदप्पयदीक्षितस्य कृतौ पाणिनितन्त्रवादनक्षत्रमालायाम्
विप्रतिषेधार्थनिरूपणवादः समाप्तः ।।

।। श्रीः ।।

अथ यदि अलोन्त्यपरिभाषाया इक्परिभाषायाश्च उत्सर्गापवादभावेना तुल्यबलत्वादेव क्रोष्ट्रीयमतं निराक्रियते, न विरोधाभावेन; तर्हि अपवादत्वादेव इक्परिभाषया गुणवृद्धिविधानेषु अलोन्त्यपरिभाषाबाधनात् भाष्यसमर्थितस्य अलोन्त्यविधिशेषपक्षस्य इक्पदोपस्थानपक्षस्य चानुपपत्तिः, पक्षद्वयेऽपि अलोन्त्यपरिभाषासंस्पर्शनात् । अथ सामान्यविशेषयोर्विरोध एव विशेषेण सामान्यस्य बाधः, न तु संभवेऽपि; ततश्च अन्त्यस्येको गुणवृद्धिविधानसंभवात् इक्परिभाषया अलोन्त्यपरिभाषाबाधनाभावादलोन्त्यविधिशेषपक्षस्य इक्पदोपस्थानपक्षस्य च नानुपपत्तिरिति यदि, तर्हि क्रोष्ट्रीयमतनिराकरणमप्यनुपपन्नम्, परिभाषाद्वयस्यापि विरोधाभावात् बाध्यबाधकभावाभावेन तुल्यबलत्वात् चिचीषतीत्यादौ दीर्घत्वद्विर्वचनयोरिव विप्रतिषेधोपपत्तेरिति तत्प्रसङ्गात् **'इको गुणवृद्धी'** इति सूत्रे भाष्यकारेण उपन्यस्तेषु तच्छेषतदपवादक्रोष्ट्रीयविप्रतिषेधेक्पदोपस्थानपक्षेषु कतमः पक्षः श्रेयानिति निर्णयार्थं कथान्तरं प्रस्तूयते-

तत्र **'मिदेर्गुणः'** इत्यादिषु गुणवृद्धिप्रकरणेषु सर्वेष्वपि गुणवृद्धिप्रकरणस्य ऐकरूप्येण सुखप्रतिपत्तये गुणवृद्धिग्रहणलिङ्गोपस्थापितमिक्पदं विशेषणविशेष्यभावे कामचारादङ्गस्येत्यनेन वैयधिकरण्येन यदि विशेष्यते- अङ्गस्यावयवो य इकि तस्य

गुण इति; तदा **'ऊदुपधाया गोहः'** **'शास इदङ्हलोः'** इत्यादाविव अवयवसंबन्धनिश्चयेन संदेहे नियमार्थत्वात् **'षष्ठी स्थानेयोगा'** इति परिभाषाया अनुपस्थानात्तन्मूलकस्यालोन्त्यनियमस्यानुपस्थितिरिति इक्परिभाषाया अलोन्त्यपरिभाषायाश्च क्वचिदप्येकवाक्यत्वाभावः । इक्परिभाषोपस्थाननिमित्तत्वाच्च गुणवृद्धिप्रकरणेषु अलोन्त्यपरिभाषानिवृत्तेः इक्परिभाषा अलोन्त्यापवाद इत्युच्यत इति सोऽयमिक्परिभाषाया अलोन्त्यापवादत्वपक्षः । अथ यदि सर्वेष्वपि गुणवृद्धिप्रकरणेषु ऐकरूप्येण सुखप्रतिपत्तये गुणवृद्धिग्रहणालिङ्गोपस्थापितेन इग्ग्रहणेन अङ्गं विशेष्यते, तदा विशेषणेन तदन्तविधौ इगन्तस्याङ्गस्य गुणे कृते अङ्गस्येति षष्ठ्याः संबन्धविशेषानिश्चयात् **'षष्ठी स्थानेयोगा'** इति परिभाषोपस्थाने तन्मूलकस्यालोन्त्यनियमस्यापि उपस्थानात् इगन्तस्याङ्गस्यान्त्यस्य गुणो भवतीति लभ्यते। अथ वा सर्वत्र गुणवृद्धिग्रहणलिङ्गोपस्थापितमिक्पदं यदा अङ्गस्येत्यनेन वैयधिकरण्येन विशेष्यते, तदा अङ्गस्येति षष्ठ्याः संबन्धानिश्चयात् स्थानेयोगत्वेन अलोन्त्यनियमोपस्थाने अङ्गस्येति षष्ठ्या अन्त्येऽलि उपसंहारात् इका चान्त्यस्य विशेषणे अङ्गान्त्यस्येको गुणो भवतीति विशेषणविशेष्यभावेन परिभाषाद्वयस्य सर्वेषु गुणवृद्धिप्रकरणेषु एकवाक्यत्वं भवतीति इक्परिभाषाया अलोन्त्यविधिशेषत्वपक्षः । इक्परिभाषाया अलोन्त्यपरिभाषायाश्च सत्यप्युत्सर्गापवादभावे विरोधाभावात् बाध्यबाधकभावाभावेन तुल्यबलत्वात् 'विप्रतिषेधे परम्-' इत्यनेन सर्वत्र इक्परिभाषैव भवतीति क्रोष्ट्रीयपक्षः । गुणवृद्धिग्रहणलिङ्गोपस्थापितमिक्पदं च सर्वत्र एकरूपेण अङ्गस्येत्यनेन न विशेष्यते, नाप्येकरूपेण सर्वत्र अङ्गान्त्यं विशेष्यम्; किं तु मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु अङ्गस्येत्यनेन वैयधिकरण्येन विशेष्यते- मिदादीनामङ्गानां य इगिति। जुसिसार्वधातुकह्रस्वाद्योर्गुणेषु तु अङ्गान्त्यमङ्गं वा विशिनष्टिजुसि अङ्गान्त्यस्येको गुणः, इगन्तस्याङ्गस्य गुण इतीत्ययमिक्पदोपस्थानपक्षः । तत्र तच्छेषपक्षः, पदोपस्थानपक्षश्च न्याय्यः ; नतु तदपवादपक्षः, क्रोष्ट्रीयविप्रतिषेधपक्षश्च; तथा हि- तदपवादपक्षे तावत्सर्वेष्वपि गुणवृद्धिप्रकरणेषु अलोन्त्यपरिभाषानुपस्थानात् अङ्गावयवस्येको गुण इति वाक्यार्थः । क्रोष्ट्रीयविप्रतिषेधपक्षेऽपि सर्वत्र गुणवृद्धिप्रकरणे अलोन्त्यपरिभाषां बाधित्वा पूर्वविप्रतिषेधेन इक्परिभाषोपस्थानादङ्गस्य स्थाने प्राप्तस्य गुणस्य अङ्गावयवे इकि अवतारात् स एव वाक्यार्थः । तदेवं पक्षद्वयेऽपि मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु दोषाभावेऽपि जुसिसार्वधातु-

कार्धधातुकह्रस्वाद्योर्गुणेषु दोषः । जुसि सर्वस्याङ्गस्येकः स्थाने गुणो भवतीति अजुहवुः अबिभरुरित्यत्र यथा भवति, तथा अनेनिजुः पर्यवेविषुरित्यत्रापि स्यात् । सार्वधातुकार्धधातुकयोरङ्गस्येको गुणो भवतीति कर्ता हर्तेत्यत्र यथा भवति, एवमिहापि स्यात्- ईहिता उम्भिता । लघूपधस्याङ्गस्येको गुणो भवतीति छेत्ता भेत्ता इत्यत्र यथा भवति, एवमिहापि स्यात्- छिनत्ति भिनत्ति । संबुद्धौ अङ्गस्य ह्रस्वस्य इको गुणो भवतीति हे हरे वायो इत्यत्र यथा भवति, एवमिहापि स्यात्- हे अग्निचित् सोमसुत् । अथ ह्रस्वेनाङ्गं विशेष्यते, अङ्गेन इक्; ह्रस्वान्तस्याङ्गस्य संबुद्धौ तदवयवस्येको गुण इति चेत्, हे पिचव्य हे बुद्धे इत्यत्रापि स्यात् । अङ्गस्य जसि ह्रस्वस्येको गुणो भवतीति अग्नयो वायव इत्यत्र यथा भवति, एवमिहापि स्यात्- अग्निचितः सोमसुत इति । अत्रापि ह्रस्वान्तस्याङ्गस्येको गुण इति चेत्, एवमपि पिचव्याः बुद्धय इत्यत्रापि स्यात् । ङिसर्वनामस्थानयोरङ्गस्य ऋत इको गुणो भवतीति कर्तरि कर्तारौ कर्तार इत्यत्र यथा भवति, एवमिहापि स्यात्- सुकृति सुकृतौ सुकृत इति । अथ ऋता अङ्गं यदि विशेष्यते- ऋदन्तस्याङ्गस्येको गुणो भवतीति, एवमपि पितरि पितरौ पितर इत्यत्रापि स्यात् । घेरङ्गस्येको ङिति गुणो भवतीति अग्नये वायवे इत्यत्र यथा भवति, एवमिहापि स्यात्- शुचये चित्रगवे । भस्याङ्गस्योर्वर्णस्येको गुणो भवतीति बाभ्रव्यो माण्डव्य इत्यत्र यथा भवति, एवमिहापि स्यात्- सौश्रुत इति । यदाप्युवर्णान्तस्य भस्येको गुण उच्यते, एवमपि पिचव्य इत्यत्रापि स्यात् । अथ भेत्तुं भेत्तेत्यादौ सार्वधातुकार्धधातुकयोरङ्गस्येको गुणो भवतीत्येव गुणसिद्धेर्लघ्व्या उपधाया गुणविधानं नियमार्थम्- **'सार्वधातुकार्धधातुकयोः'** इति अङ्गस्येकोऽनन्त्यस्य गुणो भवन् लघोरुपधाया एव, नान्यस्येति, तथा च ईहिता उम्भिता छिनत्ति भिनत्तीत्यादावलघुत्वादनुपधात्वाच्च गुणाभावः । ह्रस्वादिगुणेषु च ह्रस्वादिभिरङ्गस्य विशेषणात् ह्रस्वान्तस्याङ्गस्येको गुणो भवन् हे अग्निचित् हे सोमसुत् अग्निचितः सोमसुतः सुकृति सुकृतौ सुकृतः अग्निचिते सोमसुते सौश्रुत इत्यादौ न भविष्यतीति चेत्, एवमपि हे बुद्धे हे पिचव्य बुद्धयः पिचव्याः पितरि पितरौ पितरः शुचये चित्रगवे पिचव्यः अनेनिजुः पर्यवेविषुरित्यादौ गुणप्रसङ्गो दुर्वार एव । न च इक्परिभाषाया अलोन्त्याविधिशेषत्वपक्षेऽपि सर्वेष्वपि गुणवृद्धिप्रकरणेषु एकरूपेण इगन्तस्याङ्गस्यान्त्यस्य अङ्गान्त्यस्येक इति वा सामानाधिकरण्येनान्वितयोरिकोऽन्त्यस्येत्यनयोः **'मिदेर्गुणः'** **'मृजेर्वृद्धिः'** **'पुगन्त-**

लघूपधस्य च' **'ऋच्छेर्लिटि गुणः'** **'ऋदृशोऽङि गुणः'** क्षिप्रक्षुद्रयोर्यणादिपरं पूर्वस्य च गुण इत्येतेषु मिदादीनामिगन्तत्वाभावेन तेनैव रूपेणान्वयासंभवादन्यतरस्य परित्यागे नियामकाभावेनाविशेषादुभयोः परित्यागे गुणवृद्ध्योः सर्वादेशत्वे अतिप्रसङ्ग इति वाच्यम्, **'मिदेर्गुणः'** इत्यत्र विरोधादुभयपरित्यागेऽपि मिदः इः मिदिः तस्य मिदेरिति स्थानिनिर्देशाश्रयणात्सर्वादेशत्वाप्रसक्तेः । **'मृजेर्वृद्धिः'** इत्यत्रापि **'मृजेर्वृद्धिरचः'** इति योगविभागान्न सर्वादेशः । न चैवं न्यमार्ट् इत्यादावटोऽपि वृद्धिप्रसङ्ग इति वाच्यम्, **'अनन्त्यविकारेऽन्त्यसदेशस्य कार्यम्'** इति परिभाषया तन्निवृत्तेः । नन्वेवमनिग्लक्षणत्वाद्वृद्धेर्मृष्टो मृष्टवानित्यादौ 'क्ङिति च' इति प्रतिषेधो न स्यादिति चेत्, न; परिमृजन्ति परिमार्जन्तीत्यादौ वृद्धिविकल्पार्थमारभ्यमाणे'; इति क्ङिति वा' इति सूत्रे अचि क्ङितीति योगविभागाश्रयणेन मृजेः क्ङिति अजादावेवेति नियमाश्रयणान्मृष्टो मृष्टवानित्यत्र वृद्धिप्रतिषेधसिद्धेः । **'पुगन्तलघूपधस्य च'** इत्यत्रापि अङ्गस्य पुकि अन्तस्य लघोरुपधायाश्च गुणविधानेन सर्वादेशत्वाप्रसक्तिः न चैवं लघूपधगुणस्यानिग्लक्षणत्वात् भिन्नमित्यादौ **'क्ङिति च'** इति निषेधाप्रसङ्गः, क्नुसनोः कित्करणाज्ज्ञापकादनिग्लक्षणस्यापि लघूपधगुणस्य प्रतिषेधसिद्धेः । ऋच्छतेरपि 'ऋच्छत्यॄताम्' इत्यत्र ऋच्छनति ऋ ॠ ॠतामिति प्रश्लिष्यनिर्देशात् ऋकारस्य गुणविधानेन सर्वादेशाप्रसङ्गः । दृशेरपि **'ऋदृशोऽङि गुणः'** इत्यत्र **'उरङि गुणः'** **'दृशेः'** इति योगविभागं कृत्वा **'दृशः'** इत्यत्र उरित्यनुवर्तनान्न सर्वादेशत्वप्रसङ्गः । क्षिप्रक्षुद्रयोरपि **'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परम्'** **'पूर्वस्य च गुणः'** इति योगविभागमाश्रित्य 'पूर्वस्य च गुणः' इत्युत्तरसूत्रे क्षिप्रक्षुद्रयोरेवानुवृत्तिं यण आदिर्यणादिरिति पञ्चमीसमासं चाश्रित्य क्षिप्रक्षुद्रयोर्यणादेः पकारात् दकाराच्च परस्य रेफादेर्लोपः पूर्वस्य चेकारस्योकारस्य गुण इति विधानान्न सर्वादेशप्रसङ्गः । स्थूलादीनां तु यणादिलोपे **'ओर्गुणः'** इत्येव गुणसिद्धिः । **'असिद्धवदत्रा भात्'** इत्यसिद्धत्वस्य **'श्नसोरल्लोपः'** इति तपरकरणेन ज्ञापकेनानित्यत्वावसायात् ओर्गुणे कर्तव्ये यणादिपरलोपस्य चासिद्धत्वाभाव इति तच्छेषपक्षे न क्वापि दोषः । किं च सर्वेष्वपि गुणवृद्धिप्रकरणेषु अङ्गस्य गुणो वृद्धिरिति षष्ठीग्रहणात् गुणवृद्धिग्रहणाच्च लिङ्गात्परिभाषाद्वयोपस्थाने अङ्गस्येकोऽन्त्यस्य गुणो वृद्धिरिति द्वयोरप्येकवाक्यत्वावश्यंभावेन इक्परिभाषाया अलोन्त्यपरिभाषाभिन्नवाक्यत्वरूपस्य अलोन्त्यापवादत्वपक्षस्य स्वरूपासंभव एव । न च गुण-

वृद्धिग्रहणलिङ्गोपस्थापितस्य इक इत्यस्य अङ्गस्येत्यनेन वैयधिकरण्येन विशेषणादवयवसंबन्धनिश्चये स्थानेयोगपरिभाषाया अनुपस्थानात्तन्मूलकस्यालोन्त्यनियमस्याप्यनुपस्थाने सति भिन्नवाक्यत्वात्तदपवादपक्षोत्थानोपपत्तिः, **'षष्ठी स्थानेयोगा'** इति परिभाषोपस्थानात्प्राक् इक्परिभाषोपस्थाने कारणाभावेन उभयोः समकालोपस्थितौ तन्मूलकस्य अलोन्त्यनियमस्याप्यनुपदमेवोपस्थितेरुभयोरेकवाक्यत्वावश्यंभावेन परिभाषाद्वयोपस्थानानन्तरं स्वाभिमतविशेषणविशेष्यभावकल्पनया स्थानषष्ठ्या अवयवषष्ठीत्वसंपत्तावपि **'इद्गोण्याः'** इत्यादौ प्रथमतः स्थानषष्ठीत्वनिश्चयादलोन्त्यनियमप्रवृत्तौ पश्चात् गोण्या अन्त्यस्य इत् भवतीत्यत्र वाक्ये संपन्नाया अवयवषष्ठ्या इव प्रथमप्रवृत्तौ अलोन्त्यपरिभाषाभाधकत्वाभावात् । न च अलोन्त्यपरिभाषया अन्त्ये अलि कार्यस्यानुसंहारः; अत एव एषा यावद्वाक्यार्थप्रतीतिपर्यवसानं प्रतीक्षते, अन्यथा **'आर्धधातुकस्येड्वलादेः'** इत्यादौ **'आद्यन्तो टकितौ'** इति परिभाषयापि उक्तरीत्या अलोन्त्यपरिभाषाया अबाधप्रसङ्गात्; अतोऽत्र अङ्गस्येत्यनेन इक इत्यस्य विशेषणे स्थानषष्ठ्या वाक्यार्थपर्यवसानाभावेन अलोन्त्यपरिभाषाया अनुपस्थानेन एतदपवादत्वपक्षसंभव इति वाच्यम्, आद्यन्तपरिभाषायाः स्थानेयोगत्वोपमर्दकत्वेनापवादत्वात् अपवादसमकालमुत्सर्गप्रवृत्त्ययोगेन अन्त्येऽलि अनुसंहाराप्रसक्तेः । इक्परिभाषायास्तु स्थानषष्ठ्याः सत्या एव इक्यनुसंहारादलोन्त्यपरिभाषोपस्थानेन एकवाक्यत्वं दुर्वारमिति प्रथमा ।।

यदुक्तम् - इगपेक्षया अङ्गस्येत्यवयवषष्ठ्याश्रयणे स्थानषष्ठ्यभावात्तन्मूलकस्यालोन्त्यनियमस्यानुपस्थाने भिन्नवाक्यत्वमिक्परिभाषाया इति वक्तुं नोपपद्यते, इक्परिभाषोपस्थानानन्तरभाव्यवयवषष्ठीत्वनिश्चयात्पूर्वमिक्परिभाषोपस्थानसमकालमेव स्थानेयोगपरिभाषायास्तन्मूलकालोन्त्यपरिभाषायाश्चोपस्थानेन एकवाक्यत्वावश्यंभावात्तदपवादपक्षोत्थापनानुपपत्तिरिति, सत्यम्; न वयं कै................त्तन्मूलकनियमानुपस्थानात्तदपवादपक्षं समर्थयामः, त्वया तदनुपपत्तेरुक्तत्वात्; किं तु अङ्गस्येति स्थानषष्ठ्या अङ्गस्य स्थाने................ परिभाषया नाप्राप्तो अन्त्ये अल्यनुसंहारे इक्परिभाषाया इक्परानुसंहाराभावात् अलान्त्यपरिभाषां बा................ष्वपि गुणवृद्धिप्रकरणेषु इक्परिभाषाया अलोन्त्यनियमेनैकवाक्यत्वाभावात् गुणवृद्धिप्रकरणेषु ....संभवे अपवादेनोत्सर्गस्य बाधदर्शनात् तदपवादपक्षः

समर्थ्यते । यस्य तु विरोध एव उत्सर्गा................क्षः, तस्य परिभाषाद्वयस्य विरोधाभावेन तुल्यबलत्वाद्विप्रतिषेधसत्त्वादुक्तरीत्या केनचिद्विरोधेन विप्रति ....येऽपि जुसिसार्वधातुकह्रस्वाद्योर्गुणेषु अनन्त्यस्येको गुणो न भवतीत्येतदर्थज्ञापकत्वाश्रयणात् । न च सत्यपि संभवे .... भाववादिमते तदपवादपक्षोत्थानेऽपि विरोध एव सामान्यविशेषयोर्बाध्यबाधकभाव इति वादिमतेन क्रोष्ट्राय .... पदोपस्थानपक्षावपि स्वीकार्यौ, तयोरपि निर्दिष्टत्वादिति वाच्यम्, अलोन्त्यविधिशेषपक्षे तावज्जुसिसार्व................क इति शेषशेषिभावेन परिभाषोपस्थानम्, मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेषु उभयोरप्यभाव इति सर्वेष्व................प्याभावात् । अतो मिदादिषु स्थानिप्रश्लिष्टनिर्देशे योगविभागे च प्रतिपत्तिगौरवप्रसङ्गश्च । इक्पदोपस्थानपक्षेऽपि जुसादि................क्परिभाषामात्रस्येति वैरूप्यम् । किं च इक्पदोपस्थानपक्षस्यैवासंभवः, मिदादिष्वपि षष्ठी................ षाद्वयोपस्थानावश्यंभावात् । न च अङ्गस्येति इगपेक्षया अवयवषष्ठ्याश्रयणात् अलोन्त्यपरिभाषानुप................पोपस्थानानन्तरभाविवाक्यार्थप्रतीतिपर्यवसान पर्यन्तमलोन्त्यपरिभाषायाः प्रतीक्षणाभावसयोक्त................ दिष्वनन्वयात् परित्यागः । अविशेषादुभयोः परित्यागे तच्छेषपक्षाविशेषप्रसङ्गः । मिदादिषु स्थानिनिर्देशस्य इक्परिभा................द्वितीया ।।

यदुक्तम्-- इक्पदोपस्थानपक्षत्वरूपस्यैवासंभवः, मिदादिष्वपि लिङ्गद्वयसत्त्वेन परिभाषाद्वयोप................बाधनाभावपक्षे यदा विधिप्रदेशविशेषपर्यालोचनया अन्त्यस्येकः संभवमात्रेण बाधनाभावात् परिभाषा................ष्यभावेन एकवाक्यत्वं प्राप्तस्य सर्वेष्वपि गुणवृद्धिप्रकरणेषु लिङ्गद्वयसत्त्वेनोपस्थानम्, तदा जुलादिषु अङ्गान्त्य................दिषु अन्त्यस्येक इति विशेषणविशेष्यभावेनैकवाक्यत्वं प्राप्तस्य परिभाषाद्वयस्यान्वयसंभवादविशेषादुभयोः प................देश इति अलोन्त्यविधिशेषपक्षसंभवः । यदा विधिप्रदेशविशेषेषु विरोधाविरोधपर्यालोचनया परि................रोधात् परिभाषा

* * * * * * * * *



।। श्री शिवमस्तु ।।

।। मानसोल्लासस्तुतिः सटीका ।।

शिवं चिदंबरानन्दगुरुं वन्दे यदाश्रयात् ।
सुलब्धमानसोल्लासश्शिवानन्दयतिस्सदा ।।

अर्थः ।। शिवं स्वयंप्रकाशं परमानन्दरूपं चिदंबरानन्दगुरुं चिदंबरस्थाने आनन्द एव घनीभूत्वा अभिनयेन स्वात्मस्फुरणसुखाभिव्यंजकेन मुमुक्षूनुत्तारयती तथोक्तम् । वन्दे मनोवाक्कायैर्नतोऽस्मि अहमिति शेषः । अहं कीदृक्भूत इत्यत आह । शिवानन्दयतिः शिवानन्दाय मोक्षसुखायैव यतते यत्नं करोतीति तथोक्तः । किंच - यदाश्रयात् गुरुत्वेन यस्याश्रयणात् सेवनात् सुलब्धमानसोल्लासोऽस्मि । सुखेन संलब्धः मानसस्य उल्लासः विषयसुखेभ्यः ऊर्ध्वं लासो नर्तनं येन सः तथोक्तः । अन्वयः यदाश्रयात् सदासुलब्धमानसोल्लासश्शिवानन्द यतिरभूत् तं चिदंबरानन्दगुरुं शिवं वंदे इत्यर्थः । अनेनार्थात् श्रीमद्दीक्षितशिवाद्वैताचार्यकृतस्तवेषु चतुरधिकशतप्रबन्धेषु मानसोल्लासाभिधशिवस्तुतिप्रधानं निबंधनं दैवात् लब्धमिति सूचितम् । अथवा "चंद्रमा मनसो जात" इति "हृदयन्निरभिद्यत हृदयान् मनः मनसश्चन्द्रमा" इति च श्रुतेः । वैश्वानरस्य मनसो जातत्वात् मानसश्च चन्द्रः तस्योचैर्लासो विलासः कलापूर्णतया विभ्राजमानः मया सुखेन लब्धः इति तथोक्तः। ततः कामादितस्करेभ्यो न बिङेमीति भावः । एतदास्ताम् । श्रीमद्दीक्षित शिवाद्वैताचार्यकृता सा स्तुतिष्षोडशपद्यपरिमिता कीदृक् इत्यत आह ।।

अयि भ्रातश्चेतः परममुपदेशं शृणु मम
स्मरारेरर्चायां पटुषु करणेषु स्मर फलम् ।
तवैषां प्रेष्याणामुपरतिकृतिश्रांतिमहति
त्वयैकेन श्वासप्रशमसमये किन्नु सुकरम् ।।१।।

अयीति नीचसंबोधनम् । भ्रातृवत् सुखदुःखादिसर्वानुभुकालेषु सहैवस्थितेश्चेतसः भ्रातृत्वं विहितमेव । यत्र यत्र मनो याति तत्र जीवोऽपि गच्छति हि । तत्र

प्रत्यक्षदृष्टार्थस्य न मानांतरं गवेषणीयं। एवंविशेषणविशिष्टं चेतः । चेतयति जीवात्मानं इति चेतः । यदा चेतो विलीयते वृत्तिं विहायांतःकरणे तदा जीवश्शिव इव भवति तत्त्वाप्रतिभानमेव जीवस्य; नान्यथा भानमस्ति । श्रूयते हि ।श्रु।। स्वप्रस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः। बीजनिद्रायुतः प्राज्ञ स्सा चतुर्थे न विद्यत इति। एवं च चित्तस्य वृत्त्युपरमे शिव एव भवेत् । मलयाचलखंटेः चित्तमेव प्रपंचाख्यं चित्तमेव शिवं स्वयमिति वचनात् । चित्तस्य हितोपदेशेन सर्वात्मसुखावाप्तिं चिन्तयन्नाह । तव ज्येष्ठभ्रातृस्थानयस्य मम परममुत्कृष्टमुपदेशं सप्रेम वचनं श्रृणु । यच्छ्रवणेन मदधीनो भूत्वा सुखं कलयसि । पटुषु करणेषु सत्सु स्मरारेरर्चायां फलं मोक्षसुखं स्मर पर्यालोचय । करणं साधकतम-मित्यमरकोशः । सर्वकार्यनिर्वाहकेषु करणेषु इन्द्रियेषु वागादिषु चक्षुरादिषु च पाटवेषु सत्सु । स्मरारेः यूनोयुवतीश्च मिथः स्मारयतीति स्मरः । तस्यारिःशत्रुर्हरः तस्यार्चायां तदर्चनविषये यत् फलं अर्चायाः फलमिति व्रा । एवं करणोपरमे तु स्मृत्वाप्यर्चयित्वापि विफलमेव। प्रत्युत करणवैकल्ये पूजावैकल्यात् अपराध्येव भवतीति भावः । कुत एतदित्यत आह । तवैषां प्रेष्याणां प्रेषयितुं योग्यानां विधेयानां उपरतिकृति उपरतिं समाप्तिं कुर्वति अत एव श्रान्तिमहति श्रमाधिक्यवति श्वास-प्रशमसमये चरमश्वासे । एकेन त्वया। कथमेकत्वमस्येति चेत् सन्तु दारासुतादयः शतशो धन-भूषण-भटदूता वा। अंततस्स्वयमेक एवावशिष्यते । तथा च महदुक्तिः- सर्वे व्यर्थस्मरणसमये सांब एकस्सहाय इति। ततश्च तत्समये तव किन्नु सुकरं न किमपीत्यर्थः। अत्र स्मरारिपूजाग्रहणं वैदिकप्राधान्य-दर्शनार्थं नित्य-काम्योभयार्थं च । उच्यते हि जाबालैः ।। शिवलिङ्गं त्रिसंध्य-मुहरह-रभ्यर्चयेत् ध्यात्वा सांबं मामेवेत्यादिना । ननु-यद्द्वारे मत्तमातंगा-वायुवेगास्तुरंगमाः । पूर्णेन्दुवदना नार्यश्शिवपूजाविधेः फलमिति काम्यफलमेव दृश्यते । ईश्वरात् ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात् इति स्मृतेर्मोक्षप्रदो हरिरेव पूजनीय इति चेत् । नेति को वदेत् । वैदिकब्राह्मणानां वेदोदितलिङ्गपूजनमेव मुख्यम् । तदधिकारसिद्धये विष्ण्वादिपूजाऽपि कार्यैव । उक्तं च श्रीसूतेन ।। ओंकारस्य प्रसादेन विष्णोश्चैव प्रसादतः । रुद्राराधनवाञ्छा स्यात्तदाराधनतः पुनः। ज्ञानमानन्दमद्वैतं परं ब्रह्माधिगच्छति । प्रसादादेव रुद्रस्य ज्ञानं मोक्षैकसाधनमिति । प्राक् श्रद्धाभक्तिसमनुष्ठितनानादेवतार्तनं शिवार्तनाकारणमेव । यथा लौकिकस्तंत्र मनुवर्तते । तांत्रिको वा स्मृतिपथम् । सोऽपि वेदमार्गं क्षेमायानुवर्तते । तथा

वैदिकस्य अन्यपूजा अनावश्यकी । अत एव श्रीभगवत्पादाश्च- वेदो नित्यमधीयतां तदुतितं कर्म स्वनुष्ठीयतां तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यता मित्यनेन वैतिकानां वेदोक्तलिङ्गमेव पूजनीयम् ।। ततश्च यद्द्वारे मत्तमातंगा इति कामिनां पूजा फलमुक्तमपि मुखतो मोक्षदमेव । शिवार्चनस्य नित्यकाम्य-नैमित्तिकत्व-प्रसिद्धेः। मोक्षमिच्छेदितीच्छापदेन मुमुक्षुत्वोदय एव उक्तः। तदनंतरं ज्ञानं तु ईश्वरादेवाधिगच्छेदिति स्पष्टमेवेति भावः ।।१।।

अवतारः ।। ननु शिवार्चनफलं कृतधियां मोक्ष एवेत्युक्तप्रायमेव । तन्नेदानीमुचितम् । कौमार-यौवनावस्थासु सुखं विषयान् भुक्त्वा अंततो भजाम इति चेन्नेत्याह।।

अतिस्थेमस्फीतानपि शिखरिणः पश्य चलितान्
कियन्तं वा कालं किसलयमृदु स्थास्यति वपुः ।
असारेऽस्मिन् पूजामपि हृदय शंभोर्न कुरुषे
कदेदृक् ते लभ्यं कथय जट तंत्रोपकरणम् ।।२।।

अतीति । स्थेम स्थिरभावः स्थैर्यमित्यर्थः । अत्यंतं स्थेमतरा अतिस्थेमरूपाश्च ते स्फीताश्च अतिस्थेम-स्फीताः ।। स्फातिवृद्धौ प्रथा ख्यातावित्यमरः । स्फातिस्फीतमेकार्थकम् । अत्यंतस्थिरस्थूलान् शिखरिणः कनकाचलमुखान् तैस्तेर्हेतुभिः चलितान् पश्य । विंध्यः कुंभसंभवेन । वीरशरभेश्वरेण मेरुरपि । गुहेन क्रौञ्चः । वज्रपाणिनाऽन्ये गिरयश्च क्षुण्णा दृश्यन्ते पक्षच्छिन्नगृध्रवृद्धवत् पतितान् पश्य । योगशिखोपनिषदि - आपदः क्षणमायान्ति क्षणमायान्ति संपदः । क्षणं जन्माथ मरणं सर्वं नश्वरमेव हि । यः स्तनः पूर्वपीतस्तन्निपीड्य मुदमश्नुते ।। यस्माज्जातो भगात् पूर्वं तस्मिन्नेव भगे रमन् । एवं संसारचक्रेऽयं कूपचक्रे घटा इवेति ।। महोपनिषदि ।। "कालोऽयं सर्वसंहारी तेनाक्रान्तं जगत्त्रयम् । शैलाअपि विशीर्यन्ते शीर्यन्ते तारका अपि ।। शुष्यन्त्यपि समुद्राश्च ध्रुवोऽप्यध्रुवजीवन" इति। सत्येवं ते किसलयमृदु वपुः किंचित् चलतीति किसलयम् । षलगतौ । किसलयवत् मृदु इदं मानुष्यं वपुः कियंतं कालं वा स्थास्यति । क्षणमपि न स्थास्यतीति भावः । रे हृदय 'हृद्ययं शरीराभिमानी जीवो मनो वा वर्तत इति हृदयम् । तन्निष्ठ-

स्तद्वाचकः । असारेऽस्मिन् संसारे शंभोः पूजान्न कुरुषे । संसारक्लेशात् पुनः क्लेशाप्तये च विस्मृतवानसीत्यर्थः। "हविषा कृष्ण-वर्त्मेव भूय एवाभि- वर्द्धते इति। न जातु कामः कामानामुपभोगेन शाम्यती"ति पुनः पुनर्भोगानेव भुक्त्वा काकवच्चरसीति भावः । भवत्वस्मिन् जन्मनि भोगानेव भुञ्जामि । पश्चाज्जन्मसु सर्वोपकरणानि शिवाराधनं उपयोक्ष्ये इति मतिश्चेत् हे जट ते कदा वा ईदृक् तंत्रोपकरणं लभ्यमन्यशरीरग्रहणे । विचारय मनसा । त्वं वा कथय । अत्र जटत्वकथनस्यायमर्थः । शाद्वल-प्रदेशे तूर्ष्णी रोमन्थकृदनड्वानिवास्से इति भावः। मानवादन्यदेहेषु एतावत् करणानां उपकृतिर्नभवेदित्यभिप्रायः पत्रपुष्पाहरणगंधघर्षणश्रीरुद्रपठनशिवध्यानादेरन्यदेहेषु अनुपयोगात् इदानीमेव स्वतंत्रकरणपौष्कल्यात् शंभुं समर्चयेति भावः ।।२।।

अवतारः ।। सुखेप्सया विस्मृत्य बान्धवानेवाश्रित्य हतोस्मीत्यह ।

इदानीमत्यल्पेष्वयि हृदय कार्येष्वतिमहान्
इयान्व्यासंगस्ते न कलयसि येन स्मररिपुम् ।
अतिक्रंदद् बंधुव्यसनजलधावार्तिसमये
कियानागंता ते शिव शिव हतोस्म्येव भवता ।।३।।

इदानीमिति । अयि हृदय अद्याऽत्यल्पेषु कार्येषु अशन-शयन-व्यवादिषु तुच्छेषु कार्येषु । ते अतिमहान् कन्याविवाह-देवोत्सव-ब्रह्मसाक्षात्कारादिसमयवत् कृषीवलबीजावापकलमलावनवच्च कच्छकेशोपवीतविस्रंसनमपि विस्मृत्य धावं धावं दारसुतादिपोषणकार्येषु इयान् प्रत्यक्षदृष्ट एतावान् व्यासंगः । विशेषेण जन्मारभ्य आमरणं संगस्सक्तिः व्यासंगः आस्ते । अनया वृत्त्या का हानिरित्यत आह । येन बंधुनिष्ठव्यासंगेन स्मररिपुंत्रिलोकविजयिनोऽपि स्मरस्य रिपुं जेतारं मनसि भीत्यावापि किंचिदपि न कलयसि न ध्यायसीत्यर्थः । ननु इमे बान्धवाः मेऽत्यंतसहायिनः ततस्तेषु स्निह्यामीति चेत् न । अरे चेतः श्रुणु । अतिक्रंदद्बंधु-व्यसनजलधौ अत्यंतं क्रंदंतो बंधवः । तेषां व्यसनमेव जलधिरिव जलधिर्यस्मिन् सः तस्मिन् । आर्तिसमये अत्यंतमनःपीडाकुलसमये ते क्रियानागंता । त्वदादृतेषु त्वत्पालितेषु कियान् कीदृक् भूतो जनः आगंता आगमिष्यति । न कोपीत्यर्थः । अरे

हृदय अन्तस्तस्करेणेव स्थितेन भवता हतोरम्येव । मदंतकालेऽपि त्वदानुकूल्याभावे हतोस्म्येवेत्युक्तं युक्तमेव । अवसानकाल-संभवन्मृत्युबाधादिभीत्या शिवशिवेत्युक्तम् । तथा च वार्तिकाचार्याः "लोकेऽपि महतीं भीत्मापन्नाः शिवशासनाः। तूर्णं शिव-शिवेत्युच्चैः स्मरन्ति भयहारिण"मिति । नदीतितीर्षया मूर्खो नक्रान्विश्वस्य पोतधीः । अवगाह्य समाश्लिष्य स सद्यः पंचतां गत इति न्यायेन दारधनादिबंधूंनेव शिवंकरत्वेन विश्वसन् आमरणं तद्धितार्तं मनोवाक्शरीराणि वृथा जरयन्नेव भवता हतोस्मीति भावः । विषमालंकारः ।।३।।

अवतारः ।। तेव शास्त्रेषु कौशलदानेन क्रमान्मोक्षयिष्ये मा भीरिति वदसि चेत् पुनः पुनर्दुःखमेव दिशसीत्याह-

अये चेतश्शास्त्राण्यधिकमवगाढान्यपि मुधा
न यद्यसज्जेथाः पशुपतिपदांभोजभजने ।
तदित्थं भोक्तव्यं खलु पुनरपि प्रेत्यभुवने
महद्दुःखं वर्णग्रहणसमयोपक्रममिदम् ।।४।।

अये चेत इति । रे मनः अधिकमवगूढानि सूक्ष्मत्वेनागधह्रदनिष्ठशुक्तिकाचशकलानीव स्थितानि शास्त्राणि वात्स्यायनादिवेदान्तपर्यन्तानि मुधा सज्जेथाःवृथा रज्यसीत्यर्थः । ननु शास्त्रज्ञानाभावे शिवज्ञानाभाव इत्यभ्युपगंतव्यम् । कुतः।।श्रु।। नावेतविन्मनुते तं बृहंतमिति । शास्त्रयोनित्वाच्छिवस्य विद्यातीर्थत्वाच्च शास्त्रसाकल्यमप्यध्येतव्यमिति चेन्न । शास्त्रस्य निरवधिकत्वात् मानुषायुषां अत्यल्पत्वात् परमेश्वरमीशानं विना सर्वज्ञत्वस्य अन्यत्रादर्शनाच्च सर्वशास्त्राभ्यासप्रयासो वृथैवेत्यर्थः । "यत्सारभूतं तदुपासितव्यमिति प्राचीनोक्तेश्च । मुक्तिकोपनिषति" माडूंक्यमेकमेवालं मुमुक्षूणां विमुक्तये । तत्राप्यसिद्धं चेत् ज्ञानं दशोपनिषदः पठ । तत्राप्यसिद्धं चेत् ज्ञानं द्वात्रिंशोपनिषदः पठे"ति श्रवणात् यावज्जीवं शास्त्राभ्यासोऽनर्थकर एव । ततो मुधेत्युक्तर्युक्ततरा । एवं सदा शास्त्राण्येव आसज्जेथा यदि "तदा तेन पशुपतिपदांभोजभजने नासज्जेथाश्च यदि" देहत्यागानन्तरं पशुपति-भजन-वैमुख्यात् पुनरपि प्रेत्य मुहुर्मुहुः प्रेतो भूत्वा नरकदुःखमनुभूय भुवमभ्येत्य पूर्ववासनया विद्याहेतुक-वर्णग्रहणस्याक्षरावबोधस्य समये उपक्रमो यस्य तत् । इदं महद्दुःख-

मित्थंभूत पूर्वजन्मवदेव भोक्तव्यं खलु । श्रु।। "तमेवैकं जानथात्मानमन्यावाचो विमुंचथ अमृतस्यैष सेतु"रिति "नानुद्ध्यायात् बहून् शब्दान्वाचोविग्लापनं हि त" दिति "वृथा कंठक्षोभं वहसि तरसा तर्कवचसा पदांभोजं शंबोर्भज परमसौख्यं व्रज सुधीः "न हि न रक्षति डुकृञ् करणे" इति भगवत्पादाः। अतस्सर्वतो विरज्य सदा पशुपतिपदांभोजभजने एव रमस्वेति भावः । ननु वस्तुज्ञानं विना भजनस्याऽनव-काशात् चित्तमृगस्य बंधनार्थं पशुपतिस्वरूपस्य विज्ञेयत्वात् के पशवः कः पशुः कः पतिरिति चेदुच्यते ।श्रु।। "एषामीशो पशुपतिः पशूनां चतुष्पदामृत द्विपदामि" ति श्रुत्या चतुष्पदां गोगवयाश्वमुख्यानां 'उत च अपि च' द्विपदां चकारात् बहु-पादानामपादानां च एषां परिदृश्यमानानां सर्वेषां पशूनां पशुपतिरीश ईष्ट इति पशुपतिः । पशूनां पतिरिति वा यथा दोहन वहन कर्षणाति तत्तत्कर्मसूपयुक्तान् विविधान् पशून् पाशेन बध्यमानान् स्ववशान् कृत्वा तृणचणककुलुत्थयवाग्वादि-दानेन कश्चित् पाति तथाऽयमपि देवदेवः हरिविधिसुरनरादिसर्वान् पशूनपि स्वस्व कर्मसु प्रवर्तयित्वा पशुधनसुतस्वर्गादि भोगान् दत्वा तेषु पतिपाशपशुत्वविचारव-चक्षणान् ज्ञानदानेन पातीति पशुपतिः । श्रुत्यन्तरं च "कथं जीवास्सर्वे पशवस्स कथं तत्पतिरिति । तमुवाच यथा तृणाशिनो विवेकहीनाः परप्रेष्याः कृष्यादिकर्मसु विनियुक्ताः पुनरतिदुःखभराः स्वस्वामिबद्ध्यमाना गवादयस्तथेमे । सर्वज्ञ ईश्वर-स्तेषां पतिः पशुपति "रित्युक्त-त्वात् । भारते कर्णपर्वणि" पतित्वं चैवेमे लोका-स्सर्वे कल्प्यन्तु पीडिताः । पशूनांच पतिश्चाहं भविष्यामि सुरोत्तमाः । इति देवा वचस्श्रुत्वा देवदेवस्य शूलिनः ।। विषादमगमन् सर्वे पशुत्वं प्रति शंकिता " इति। शिवपुराणे ।। "ब्रह्माद्याःस्थावरान्ताश्च देवदेवस्य शूलननः। तेषां पतित्वाद्देवे-शश्शिवः । पशुपतिःस्मृतः ।। मलमायादिभिः पाशैस्स बध्नाति पशून्पतिः । स एव मोचकस्तेषां भक्त्या सम्यगुपासितः इति ।। तद्भजनश्रद्धामेव मम संपादयेति भावः।।४।।

अवतारः ।। ननु अद्यैव वैराग्यसंपादने सति अतिस्निग्धदारपुत्रादिसुखविषया दुर्लभा स्युरिति कृत्वा 'तदनुभवानन्तरं शिं भजाम इति चेत् प्रतिशरीर-मनुभूतार्थविषयेष्वेव स्निह्यन्विस्मृत्य परमेश्वरं अधःपतितो भवसीत्याह ।।

कियन्तो ना भूवन् हृदय परमप्रेमविषयाः
पुराजन्मस्वद्य क्व गतमिति जानासि किमु तान् ।
वृथा मोहं बंधुष्वहितपरिणामं त्यज सखे
यदासेवादोषात् स्मरसि न कदाऽपि स्मररिपुम् ।।५।।

कियंत इति । अयि हृदय सखे । स्वसमाना ख्यातिर्यस्य स सखा भवति । सखेति पुराजन्मसु सुर-नर-वानर-सूकरादि परिग्रहेषु निवधिककल्पेषु परमप्रेम-विषयाः रमणीमणिभूषणादिरूपाः कियंतः कति वा नाभूवन् । बहवो विषयाः अनुभूता एवेति भावः । तान् प्रेमविषयान् अद्य जानासि किमु । तत्सर्वं क्व गत-मिति पश्य परिचारय । उक्तं हि- "स्थाल्यां विपच्यमानानां यवादीनां यथैव हि। सुराणां च नराणां च तथोद्वाधः प्रवर्तन"मितिव्यासस्मरणादधरोत्तरं चक्रमिक्रमेण जन्मवतां तत्रतत्र नव-नवमिव प्रेमविषयाः मूढानां भवेयुरेव । सखे यदासेवादोषात् येषां बंधूनां आसेवादोषात् आङ् अत्यंतं सेवादोषात् स्मररिपुं कदापि न स्मरसि । अहितपरिणामं परिणां अंततोऽहितफलमेव यस्य भवति तं वृथा मोहं त्यज । सखेति संबोधनेन विनयस्सूचितः । ननु कथमावयोः सख्यं भवेत्; त्वं सर्वं त्य-क्त्वा तूष्णीं भूतस्सन्नास्से । तथा मुह्यं चो-पदिशसि । अहं तु सदागतिरिव सर्वत-स्संचरिष्णु मानावमाने विहाय बहिरेव वर्ते । अपि च सर्वोऽपि स्वभावं न वि-मोक्तुं क्षमते । यदि मते स्वयमेव नश्येदिति चेन्न । लाके दधिविषे ज्वरमरणकार-णेअपि गारुडमंत्र-द्दढसंयुते जडद्रव्ये अपि हितकरे यथा भवेतां तथा अभिज्ञस्त्वं निरपेक्षस्सखेति संबुध्यनुनय-मात्रेण हितकरं भवसीत्युक्तमित्यभिप्रायः।।५।।
अवतारः ।। सख्युश्चेतसः जाड्यमनूद्य पुनर्बोधयति ।

अमी चेत्पुत्राद्यास्तव भृशतरं प्रेमविषया
भविष्यंतो न स्युः किमु जड तथा भाविजनने ।
सदैव त्वय्येवं समुपजनिताक्षत्रयहते
कदा संभोश्रिता भवति भवभीतिप्रशमनी ।।६।।

अमी इति । हे! हृदय अमी अनुभूयमानाः पुत्राद्याः दारसोदरमुखाः तव भृशतरं अधिकं प्रेमविषयाश्चेत् तथैव भाविजननेऽपि ते भविष्यन्तो न स्युः न

भवेयुः किमु । तेऽपि त्वत्समानाः फशव एव ततश्च तेऽपि श्व-सूकरादि योनिष्वनारतं आगमिष्यन्ति मरिष्यन्ति च। एवं सदा प्रतिजननं समुपजनिताक्षत्रयहते पुनः पुनस्संजातानां अक्षाणां वाङ्मनःकायादीनां इन्द्रियाणां त्रयेण त्वयि निहते मारिते सति दुर्मार्गप्ररणेन व्यथिते सति । कदा वा भवभीति-प्रशमनी भवाज्जननात् भीतिर्भवभीतिः । तस्या अपि प्रशमनी शंभोश्चिंता भवति । सर्वकारणशंभुध्यानमेव हि भवभयनिर्मूलनक्षममिति श्रूयते । श्रुतिः-सर्वैश्वर्यसंपन्नस्सर्वेश्वरश्शंभूराकाशमध्येध्रुवं स्तब्ध्वाधिकं क्षणमेकं क्रतुशतस्याऽपि चतुस्सप्तत्या यत्फलं तदवाप्नोति इत्यादिना शिवध्यानमेव भवभयापहमिति विदित्वा पुत्रादिविषयस्नेहं त्यजेति भावः।।६।।

अवतारः । अये हृदय ! पुत्रादि विषमविषयाशनवसनशयनादिषु आसज्य पुनःपुनः दुःखमेवाधिकमाप्नोषि । ततस्तेषु विषयेष्वद्यैव स्नेहं संत्यजेत्याह ।

अनापृच्छ्य ज्ञातीनवशरुदितोच्छूनयनान्
गतिः का नस्तातेत्यति- करुणमग्रे विलुठितान् ।
अवश्यं गंतव्यं खलु तदहितानामपि पुर-
स्तदद्यैव स्नेहं त्यज हृदय तेष्वर्च गिरिशम् ।।७।।

अनापृच्छ्येति । हृदय श्रुण्विदम् । अवशरुदितोच्छूननयनान् अवशेन यद्रुदितं रोदनं तेन उच्छूनानि स्थूलानि नयनानि येषां तान् अनिर्गलं रोदनपरवशानित्यर्थः । हे तात नः का गतिरितः परमिति अतिकरुणं सदैन्यं यथा भवति तथा अग्रे पुरोभागे विलुठितान् ज्ञातीन् भ्रातृसुतादीन् एवंभूतानपि अनापृच्छ्यैव अननुज्ञाप्यैवेत्यर्थः। अहितानां शत्रूणां च पश्यतां सतां अवश्यं पारवश्येन गन्तव्यं खलु। कुत्रेति चेत् तत् केनापि न विज्ञाप्यते हि । शास्त्रेणैवमवगम्यते "तद्य इह रमणीयचरणा" इति श्रुतेः । स्वाचारसंपन्नाः किंचित् स्वर्गादिसुखमनुभूय सुरनरादिषु जायन्ते । दुराचारास्तु नरकदुःमनुभूय स्वसूकरस्थावरादिषु जायंत इति श्रूयते । तस्मात् बंधुषु स्नेहं त्यज । शिवार्चनादिसदाचारसंपन्नानां सत्कुलेषु सुरनरादिषु "विस्मृतशिवाराधनानां अशिवानां श्वसूकरादियोनिषु स्थावरेषु वा पुनः पुनर्जनिर्भवेत्" योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणु मन्येन संयंति यथाकर्म यथा श्रुत"मिति ङ्तेः । सुखलेश-दुःखोत्तरं चानुभूय स जंतुर्जायते म्रियते च।

तस्मादिदानीं कर्तव्यांशं ब्रुवे । तच्छृणु । बंधुषु बध्नंत्यात्मानमिति बंधवः तेषु स्नेहं त्यज । गिरिशमर्च । गिरौ कैलासे शेते वसतीति गिरिशस्तम् । यद्वा । गिरि भक्तानां वाचि सकलविद्याप्रवचननिग्रहानुग्रहसामर्थ्य-प्रदानेन वसतीति तथोक्तम् । अर्च पूजयेत्यर्थः । तत्पूजनं अतिसौकर्यतया दृश्यते वायुसंहितायाम् "पाद्यादि-मुखवासांतं अर्ध्यातं वापि संकटे । पुष्पविक्षेपमात्रं वा कुर्यात् भक्त्या दिनेदिने" इति । पूजानन्तरमेवांबुपानादि कर्तव्यत्वादवश्यं पूजनीयमेवेत्यर्थः । अनेन गिरि-शार्चनेन जनिमृतिभयपरिहारोपाय उपदिष्टः । अर्थात् शौच-स्नानभूत्यक्षधारण संध्याग्निहोत्राद्यंगानि चोपदिष्ठानि भवन्तीति भावः ।।७।।
अवतारः ।। गिरिशमर्चयेदित्युक्तं ; तदनर्चनात् किं फलं लभ्यत इत्यत आह

इदं सज्जीभूतं कृतमिदमिदं कार्यमधुने
त्ययं व्यर्थारंभस्तव बत मनश्शाम्यतु कदा ।
स खल्वागंता ते शिवभजनहीनस्य समय-
स्समुद्यन्निर्घोषज्वलदशनिपातप्रतिभयः ।।८।।

रे मनः ! इदं दारुशिलेष्टकादि गृगनिर्माणसाधनं सर्व सज्जीभूतं सर्वसन्नाहः कृतप्राय एव। इदं मणिभूषणादिकं कृतं पर्याप्तम् । इदं वेदशास्त्राभ्यासादिकं क्रमेण कार्यम् । एवमेतत्कृतप्रायम् । अधुना अयं परीक्ष्य कर्तव्यः इति यद्यत्त्वया संक-ल्प्यते स संकल्पस्सर्वेऽपि व्यर्थारंभ एव । न फलवान् । एवं संकल्पितवतः तव मनः कदा वा शाम्यतु । भवत्वेवमेव । शुभकांक्षीस्यामिति चेत् सदाशिवं भज । आहोस्वित् । शिवभजनहीनस्य तव समुद्यतो निर्घोषाश्च ज्वसंतश्च अशनयश्च ते तथोक्ताः- तेषां अशनीनां पातवत् प्रतिभयं यस्य स प्रसिद्धः समयः काल आगंता आगमिष्यति । "जातस्य हि ध्रुवोमृत्यु ध्रुवं जन्म मृतस्य चे" ति गीता "सस्यमिव मर्त्यः पच्यते सस्यमिवा जायते पुन"रिति श्रुतेश्च । सर्वानुभवसिद्धश्चाय-मर्थः । एवंभूतस्स समयः कालः मृत्युः शतमृत्युभिस्सह आगंता खलु । तस्मादिमं व्यर्था-रंभं संत्यज्य शंभ्वर्चनमेव कार्यमित्यर्थे महाफलं च श्रूयते स्कांदे।। "असारे चात्र संसारे सारं देववरार्चनम् । एवं प्रलपतोत्युच्चैर्येन शृण्वन्ति मे वचः। संधुक्ष्यन्ते कृतान्तेन तदर्थं नरकाग्नयः । महादेवस्य पूजायाः पश्चात् भुक्तिविधिस्तथा । यदि

पापेन भुंजीत स्वैरं तस्य न निष्कृतिः । त्वरितं जीवितं याति त्वरितं याति यौवनम् । त्वरितं व्याधिरभ्येति तस्मात्पूज्यस्सदाशिवः" इत्यादि । "ब्रह्मणस्सृष्टिकर्तृत्वं विष्णोर्दानवमर्दनम् । स्वर्गाधिपत्यं इन्द्रस्य शिवपूजाविधेः फलम् ।। आश्श्रीकांतिसौन्दर्यं बलं शौर्यं प्रवक्तृता । धर्ममोक्षश्च कामश्च सर्वं सिद्ध्येच्छिवार्चनात्" इति वचनैः शंभुमेवार्चयेति भावः ।।८।।

अवतारः ।। एवं मदुपदिष्टार्थग्रहणे तत्करणे च हेत्वन्तरमप्यस्तीति तद्विशदयति-

त्वया गर्भे मातुर्यदिह चरितं चिंतितमभू-
त्तदालोच्य स्वान्ते व्रज शिवमकार्ये त्यज रुचिम् ।
गतो दूरं मूर्खः क इव खलु वित्तार्जनधिया
चरेस्स्वैरं त्यक्त्वा प्रभुवरमृणादानरसिकः ।।९।।

रे मूढ त्वया मातुर्गर्भे माति परिमिनोति सुतं गर्भे इति माता तस्याः गर्भे जठरे । इह जन्मभूमौ आचरितुं अनुष्ठातुं योग्यं प्राक् जन्मसु कृतं वा चरितं पुरा चिंतितमभूत् । जननीजठरे मल-मूत्र-कफ-पित्त-रक्तादिपंकिले औदरानलज्वालावलीढे रक्त-मासजकृमितोदे मातृभुक्तान्नकटु-तिक्त-कषाय-दूषिते पार्श्वास्थि-क्रकचपाते स्वकृतफलभूते एकान्तनरक-वासे जरायुपट-भस्त्रिकाबंधने सुचिर-दुःखानुभवसमये आर्तेन त्वया यद्यत् चिन्तितमभूत् । किमनेन चिंतितमित्यत आह । गर्भोपनिषदुक्तार्थः ज्ञान-योगखंडे । "नाना योनिसहस्राणि पुरा प्राप्तानि वै मया । आहारा विविधा भुक्ताः पीताश्च विविधा स्तनाः । जातश्चैव मृतश्चैव जन्म चैव पुनः पुनः । अहो दुःखोदधौ मग्नौ न पश्यामि प्रतिक्रियाम् । यदि योन्याः प्रमुंचामि सांख्ययोगं समाश्रये ।। अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम् । यदि योन्याः प्रमुंचामि तं प्रपद्ये महेश्वरम् । अद्ध्येष्येऽहं सदावेदान् सांगान् शुश्रूषया गुरोः । यज्ञैर्दग्धमलो भूत्वा ज्ञात्वा संसारहेयताम् । वैराग्यातिशयेनैव मोक्षकामनया पुनः । निरस्य सर्वकर्माणि शांतो भूत्वा जितेन्द्रियः । विरजानलजं भस्म गृहीत्वा वाग्निहोत्रजम् । अग्निरित्यादिभिष्षड्भिर्मंत्रैराथर्वणैः क्रमात् । विमृज्यागांनि मूर्धादिचरणांतानि सादरम् । समुद्धूल्य सदाचार्यं प्रणिपत्य आत्मविद्यया ।संसारसागरं घोरं लंघयाम्यहमात्मनः । इत्थं गर्भगतस्मृत्वा योनियंत्रप्रपीडना"दिति चिंतितं यदभूत् तत्तदालोच्य

स्वान्ते हृदयकाशमध्ये शिवं स्वप्रकाशं व्रज शरणं याहीत्यर्थः ।श्रु।। "यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः । अथ मर्त्यो मृतो भवत्यत्र ब्रह्म समश्रुत" इति श्रुत्या सर्वकामनिरासपूर्वकत्वात् अमृतत्वस्य शिवप्राप्तिफलस्य ततो धनदारादि कामविषये रुचिं वांताशन इव त्यज दूरीकुर्वित्यर्थः । रे जड वित्तार्जनधिया सन्निहितं प्रभुवरं त्यक्त्वा ऋणादानरसिकः दूरंगतो मूर्खः क इव स्वैरं चरेः । येन हृदयस्थितं परमप्रेमास्पदं वांछाधिकप्रदं आत्मेश्वरं अपहाय दुःखजालमूलमतिभीकरं धनदारमुखदुर्विषयमेव प्रियं मत्वा धावं धावमामरणं दैन्यमेव भजसे । तन्मौर्व्यालंबन फलं हि । उक्तमालंकारकैः । "त्वयसि सति शिव दातर्यस्मतभ्यर्थितानां इतरमनुसंरतो दर्शयंतोर्थिमुद्राम् । चरमचरणघातैर्दुर्ग्रहं दोग्धुकामाः करभमनुसरामः कामधेनौ" स्थितायां इति न्यायेन। "महान् प्रभुर्वै पुरुषस्स त्वस्यैष प्रवर्तकः । सुनिर्मलामिमां शांतिमीशानो ज्योतिरव्यय इति ।। निवर्तेः सर्वदुःखानामीशानः प्रभुरव्ययः इति । मनोमयः प्राणशरीरनेता प्रतिष्ठितोन्नेहृदयं सन्निधाये"ति श्रुतिभिः । आत्मेश्वरस्य महाप्रभुत्वं सत्वप्रवर्तकत्वं सर्वविद्यास्वीशानत्वं शान्तिदत्वं त्वत्सान्निद्ध्यत्वादि सकलकल्याणगुणोपेतत्वं चास्ते। सत्येवं त्वं शुनकवत् वृथा बहिश्चरसि । आत्मेश्वरमेव शरणं व्रजेत्यर्थः ।।९।।

अवतारः ।। रे मनः पुनस्ते बुद्धिं वदामीत्याह ।।

अपथ्यादाहारादपि तव कियन्मानस भयं
मुहूर्तावस्थायि-ज्वर-जठर-भारादिकरणात्।
अमुष्मादश्रांतप्रविततभवव्याधिजननात्
महेशे वैमुख्यात् किमिति न भयं किंचिदपि ते ।।१०।।

रे मानस मुहूर्तावस्थायि-ज्वर जठरभारादिकरणात् मुहूर्तं अत्यल्पकालं अवस्थायिनः शीतोष्णचातुर्थिकादि भेदभिन्ना द्वराः मुहूर्तावस्थायिज्वराः तैस्समुत्पन्नो जठरभारः जायते जंतुजनिरत्रेति जठरः तस्मिन् जठरे। मृत्पिण्डप्रक्षेपवत् घनीभवत् गुम्म-पाण्डु-शेफारूपभारादिं करोतीति तस्मात् आदिशब्देन पित्तरोगादिर्गृह्यते। सर्वनाडीनां संधिर्नाभिजढरयोरिति रोगोत्पत्तिस्थानमिति भावः । अपथ्यादाहारात् पंथा न भवतीत्यपथम् । अपथे भवतीत्यपथ्यम् । तथा हि । पथ्यापथ्यलक्षण

धन्वंतरिशास्त्रगुणपाठे।। "सर्वाणि तिक्तानि समीरणानि मधूनि सर्वाणि कफप्रदानि। अम्लानि सर्वाणि सपैत्यकानि पटोलमध्वाऽऽमलकं विना स्युः" "पटोलपत्रं पित्तघ्नं तन्मूलं वातनाशनम् । तल्लता च त्रिदोषघ्नी तत्फलं श्लेष्मनाशन"मिति । "कटूवम्लतिक्तलवणोष्णहरीतशाकसौवीरतैलतिलसर्षपमद्यमत्स्याः । आजावि-मांस-दधि-तक्रकुलुत्थकोलपिण्याकहिंगुल-शुनाद्यमपथ्य माहुरि"ति आदिनाथरचितहठप्रदीपिकायाम् । यच्चिकित्सा-शास्त्र-योगशास्त्रविहितमेवाशनभक्षणादिकं पथ्यं तद्विपरीतमपथ्यमित्यर्थः । आहरण-माहारः । आङ्पूर्वोहृञ्हरणे इति धातुर्भोजने। एवंभूतादाहारात् कियद्भयं तवास्ते । बहुभयमस्त्येव । एवंभूतस्यापि तव अमुष्मात् इदम निर्देशतस्सर्वानुभवसिद्धिः सूच्यते । अश्रांतप्रविततभवव्याधिजननात् । महेशे वैमुख्यात् । ईशत इतीशानारायणादयः तेषामपि महानीशो यस्स-महेशः । अत एवेक्तं "हरिर्यथैकः पुरुषोत्तमस्मृतो महेश्वरस्त्र्यंबक एव नापरः । तथा विदुर्मा मुनयश्शतक्रतुं द्वितीयगामीन किलैषशब्दः इति । तादृशे महेशे । श्रीमहेशध्यान-पूजादि-विषये । वैमुख्यात् किंचितपि भयं किमिति नोदेतीत्यर्थः । अयं भावः मुहूर्तावस्थायिज्वरजठरभारादि रोगकरणात् अपथ्याहारादपि नितरां बिभेषि भाविदुःखात् । तादृशस्य तव अविरतभवमृतिसंसरणहेतोः शिवाराधन-वैमुख्यात् किंचिदपि भयं कुतः कारणान्न भवतीति भावः । विशेषोक्तिरलंकारः ।।१०।।

अवतारः ।। अरे अवशांतःकरण एवं बहुधा प्रलपति मयि किंचिदपि न गृहीतवानसि स्वैरं संचर । तन्मध्ये नित्यं सकृद्वा देवमुपास्तेवेत्याह ।

इयंतं कालं ते नियतसहवासेनजनिता
किमीषन्नास्त्यंतः करण मयि सौहार्दकणिका ।
यथेच्छं भ्रांतत्वं विहरविषयारण्यकुहरे
भज श्रीपादाब्जं सकृदपि पुरारेरनुदिनम् ।।११।।

हे अन्तःकरण! इयंतं कालं एतावत्कालं नियतसहवासेन जनिता समुत्पादिता ते सौहार्दकणिका मयि मद्विषये ईशदपि नास्त्येव किम् । रे पापांतःकरण त्वयि चिरकृतस्नेहः परदेशद्विजकेरळीस्नेहवदद्य विफल एवासीत् । प्रसिद्धेयं हि लोकोक्तिः। केरळीमंदिरे विप्रो दह्यमानेपि विज्वरः निर्याति भस्त्रीमादाय कृततांबूल-

भक्षण इति । अस्यायमर्थः । कश्चित् परदेशीयो द्विजः प्राक् प्रतिज्ञया केरल्याः कुचेलदानमात्रेण कौमारहरो भूत्वा सुचिरं तामनुभूयांते वयसि चलिते सदने चाऽनलेन दह्यमाने स्वयं तांबूलं चर्यवन् तत् भस्त्रीमादाय मूर्खः कृतघ्नो वा यथा शपथादिकं विस्मृत्ये सुखे निर्गच्छेत् तथा पापस्य तव विस्रंभोपि विफल एवासीत्। आपन्नेपि मयि अत्यंतंचीर्णे चिरसंभृतस्य सौहार्दस्य कणिका ईषदपि नास्ति किम्। भवत्वेवमेतत् । त्वमुक्तप्रकारेण भ्रांतस्सन् विषयारण्यकुहरे यथेच्छं विहर । तदपि तन्मध्ये प्रतिदिनं पुरारेः श्रीपादाब्जं सकृदपि भज । सकृत्भजनेनापि पापक्षय-सत्संग-मोक्षेच्छा-देशिकलाभादिक्रमान्मुक्तो भवेयं । जीवसुखं मनोधीनमिति ब्रह्मविद्वचनं प्रसिद्धम्। "मन एव मनुष्याणां कारणं बंध-मोक्षयो"रिति।" आत्मैवाह्यात्मनो बंधुरात्मैव रिपु-रात्मनः । बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः" ।। श्रु ।। मनोवशे सर्वमिदं बभूवे"ति वचनात् । त्वत् प्रसाद एव प्रार्थ्यते इति भावः ।।११।।

अवतारः ।। रे मनस्तवत् प्रसादमुद्दिश्य चिरं प्रतीक्षन्नपि शिवाराधनविमुख एवासम्। एवं स्वाराधके मयि कृतज्ञतया पुनरपि प्रसीदेत्याह ।।

स्थितोस्मि त्वां पश्यन् चिरमहित एवं तव कृते
मदर्थासुस्थाणोर्हदयपरिचर्यासु विमुखः ।
इदानीन्निर्विण्णोस्म्यलमुपगतस्तेऽद्य समयो
यदात्मन्यप्यास्थां जहति सुहृदर्थे कृतविदः ।।१२।।

रे हृदय! एवं तव कृते त्वद्धितोपदेशनिमित्तं मद्वशीकरणार्थे च त्वामेव पश्यन् त्वत्समयं प्रतीक्षन् मदर्थासु मत्प्रयोजनप्रधानासु स्थाणोः परिचर्यासु । शिवस्य स्थाणुशब्दप्रवृत्तौ हेतुरेवं विज्ञायते । श्रु।। 'वृक्ष इव स्तब्धो दिवि ति त्येकस्तेनेदं पूर्णं पुरुषेण सर्वमि"ति परिपूर्णत्वमचंचलत्वं च द्योतयति । त भूतस्य ब्रह्मललाटादाविर्भूतस्य नील-लोहित-रुद्रस्य विधेः सृष्टिबोदार्थं स्वयं रीतिं दर्शयित्वा तूष्णीं स्थाणुवत्तिष्ठतीति स्थाणुनामासीत् । तादृशस्य स्थाणो तरस्य वा परिचर्याप्युपासनमिति । नि । विविधासूपासनासु । अत्र बहुव ध्यान-पूजा-नमस्कारादिरवगम्यते । तथा च भगवत्पादाः । "किंचित्कालमुमा

भवतः पादारविन्दार्चनैः किंचित् ध्यान-समाधिभिश्च नुतिभिः किंचित्कथाकर्णनैः । किंचित्किंचिदवेक्षणैश्च नतिभिः किचिद्दिनेष्वद्दशो यः प्राप्नोति मुदं त्वदर्पितभरो जीवन् स मुक्तः खलु" इति । एवंभूतसपर्यासु विमुखः अत एव अहितः । हितं शिवानन्दसुखमस्य न भवतीत्यहितः । अहिते दुःखसंसारे इति वा स्थितोस्मि तिष्ठामीत्यर्थः । यथा पश्वादिस्स्वात्महितं विस्मृत्याऽऽशरीरपातं परकार्यमेव कुरुते तथाऽऽसम् । उक्तं चानुभूतिप्रकाशे । "स्वस्य तत्त्वमविज्ञाय यागहोमादिकर्मभिः । स्वतोन्य देवताःपातिह्यनड्वान्वणिजं यथे"ति वेदोतित कर्मनिष्ठा अपि परिहास्यंते शास्त्रेण । किमुतेतर इत्यर्थः । अहं तु लौकिके एव त्वया नियुक्त आकृष्टः अतश्चेदानीं निर्विण्णोऽस्मि निर्वेदं प्राप्तोऽस्मि । पाशितपक्षी सर्वतोप्युद्यम्य बंधस्तंभवत् पुनःपुनस्सर्वविषयेषु प्रवृत्ति-कुंठनेन करणवैकल्येन चालमतीव निर्विण्णोऽस्मि यत्कृते एवं कालो मया नीतस्तस्य ते कृतज्ञस्य अद्य समयः प्रत्युपकारकालः समुपागतः । ननु त्वत्सहायप्रवृत्तस्य प्रसन्नस्य मम स्वभावभूतस्य दुश्चरितस्योच्छेदे स्वात्महानिरेवाऽऽपतेदिति चेदस्तु नाम । पुराकृतविदः कृतज्ञा अळर्क-शिबि-जटायु-सौमित्रि मुखाः परार्थे क्लेशमनुभवंतोपि स्वात्मन्यास्थां जहुः । पुनरपकर्तर्यपि सुरसंघे महापाशुपतः श्रीमान् दधीचिमहर्षिः वृत्रवधार्थं स्वदेहं त्यक्त्वपि उपकृवान्न किम् । तस्मात् सुचिरसमाराधितः कृतज्ञस्त्वं मह्यं प्रसीदेति भावः ।।१२।।

अवतारः कथं विषयसन्निधावुपशान्तिं आयांत्विंद्रियाणीति चेदुपायं ते वक्ष्यामीत्याह।।

अलभ्येष्वप्यर्थेष्वधिकचपलानक्षपृथुका-
नतृप्तानत्यर्थे सुचिरमनुवृत्तानपि तथा ।
अशक्यं ते शंभोर्भजन मनुरुध्यैवमशुची-
नुपेक्षैवोपायस्तवहृदय तेषा- मुपशमे ।।१३।।

अलभ्येष्विति । लब्धुमुपयोग्येषु राजमहिष्यप्सरस्संभोगिकुबेरधनादिषु अर्थेष्वपि । बालस्य चन्द्रबिंबमनोतवत् अधिकचपलान् अत्यन्तं लोलमानसान् । नवनवमिव लब्ध्वाप्यतृप्तान् । अत्यर्थं सुचिरमनुवृत्तानप्यशुचीन् अमंगलस्वभवान् । अक्षपृथुकान् । अक्षोव्याप्तावात्मनिचेत्यमरः । अक्ष्णोतीत्यक्षः । पृथुकः पृथुत्वात् पृथुकायतीति च पृथुकः । पृथुकौ चपिटार्भकाव्त्यमरः । अक्षा एव पृथुका ।

अक्षपृथुकास्तान् । एवं अनुरुध्य अनुसृत्य ते शंभोर्भजनं कर्तुमशकयम् । अपि च शिवभजनं तावत् दैवोपहतचित्तानां सुदुर्लभमिति दृश्यते - "बहुजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते । अनुग्रहात्तेन शंभोस्सुदृढो जायते नरः । ततो भीताः पलायंते विघ्नं हित्वा सुरेश्वराः । दोग्ध्री धेनुर्यथा नीता दुःखदा गृहमेधीनाम् । तथैव ज्ञानवान् विप्रो देवानां दुःखदो भवेत् । त्रिदशास्तेन विघ्नंति प्रविष्टा हृदयं नृणाम् । ततो न जायते भक्तिः शिवे कस्यापि देहिन" इति ।श्रुतिश्च ।। "यथा ह वै बहवः पशवो मनुष्यं भुज्यरेवमेकैकशः पुरुषो देवान् भुनक्ति । एकैकस्मिन्नेव पशावादीयमानेऽप्रियं भवति । किं बहुषु । तस्मादेषां तन्नप्रियं यदेतन्मनुष्या विद्युरिति । तत एवंविधविरोधिशतसंकुले करणसमाधाने । शिवभजनं करणवृत्त्युपेक्षणं चेति द्वयमेवोपाय इत्यर्थः ।।१६।।

अवतारः ।। पुनस्तदुपायमेव दर्शयति

उपायं ते चेतः परमुपदिशामि स्मररिपोः
पदांभोजद्वंद्वे परवशतयारज्यसियतः ।
अवश्यं भोक्तव्यामनुदिनमतर्क्योपगमनां
दशामंत्यामंतस्सपदि गणयोपस्थिततराम् ।।१४।।

इत्थं विविधहितोपदेशेन मानसे मनागिवाभिमुखे सति प्रकारान्तरेण पुनरुपदिशति - रे चेतः परमन्यमुपायमुपदिशामि । यतः स्मररिपोः पदां-भोज-द्वंद्वे परवशतया अस्वातंत्र्येण अरज्यसि न स्निह्यसि । यतःउपायात् रज्यसि, रक्तो भवसि तादृशमुपायमुपदिशामीति अर्थः साधीयानिति प्रतिभाति । तिङन्तेन नञ्समासः न खलु दृश्यते । तत एवमवश्यं भोक्तव्यां दुःखानुभवात्मिकाम् । अनुदिनमहरहः अतर्क्योपगमनां तर्कितं योग्यं तर्क्यं न तर्क्यमतर्क्यं क्रियाविशेषणं तथाभूतमुपगमनं यस्यास्सा ताम् । उपस्थिततरां अतिसमीपदेशस्थिताम् । अन्त्यां बाल्य-कौमारतारुण्य-वार्द्धक्यपङ्क्त्यां पञ्चमावस्थारूपां दशाम् । अंतर्हृदये । सपदि शीघ्रं गणय चिन्तय । निश्चिन्वित्यर्थः ।।१४।।

अवतारः ।। एवं गाढमुपदेशैः स्ववशीभूतं सखिवत् वत्सलं चेतः परमसुखसमृद्धिदं किंचिद्वह्वर्थं प्राप्त्याशया रहसि कथयति ।

चिरात् कश्चिद्व्याधः शिव इति वसत्यद्रिशिखरे
स मे मायी भूत्वा मतिमहरदद्धा सुखनिधिम् ।
सलग्नश्चेद्दैवात् क्वचन पथिपाशैः स्मृतिमयै-
स्सखे तं बध्नीयाः हृदय निभृतं दास्यति धनम् ।।१५।।

शिव इति शब्दात्तत् करोतीति ण्यंतादच्प्रत्यये णेरनिटीति णिलोपे च सति शिवानामनिष्पत्तिर्द्रष्टव्या । अस्य शब्दस्य सर्वपावनत्वं श्रूयते । श्रुतिः।। "अपि वा यश्चंडालश्शिव इति वाचं वदेत् तेन सह भुंजीत तेन सह संभाषेत ते सह संवासेत" । शांत शिवमद्वैतं चतुर्थ मन्यंते" इति साक्षात् ब्रह्मवाचकत्वम् । "नसन्नचासच्छिव एव केवल इति पारिशेष्यत्वम् । "तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिव" इति । "पाशबद्धो यदा जीवः पाशमुक्तस्सदाशिव" इत्यादिश्रुतिशतैः प्रशस्यते । भारते कर्णपर्वणि सर्वसमत्वादेव शिवत्वं प्रख्यापयति । "समा भवंति ते सर्वे दानवाश्चामराश्च ये । शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे स्मृत"मिति । शिवेच्छूनां सर्वोपक्रमशिवं करोतीति । "समेधयति यन्नित्यं सर्वार्थानामुपक्रमम् । शिवमिच्छन् मनुष्याणां तस्मादेष शिवस्मृत" इति । वायुसंहितायां शिव-शब्दस्य शिवशक्तिवाचकत्वं दृश्यते । "शं सुखं परमानन्दमिकारः पुरुषः स्मतः । वकारश्शक्तिरमृतं शिव इत्युच्यते बुधैरिति । सर्वदाऽयं शब्दोऽत्यंत शोभनपदार्थेषु प्रवर्तत इति नैघंटुकाः । स्वक्षेयसं शिवं भद्रं कल्याणं मंगलं शुभम् । शिवं मोक्षे च भद्रे च सलिले च शिवो हरे । शिवो बोधेऽपरोगे च हारे कीरे शिवं दले । शिवं भद्रं शिवःशंभुः शिवा गैरी शिवाहये" इति श्रु ।। "शिवा ऋतवस्सन्तु" शिवा ओषधयस्सन्तु शिवा वनस्पतयस्सन्तु अहोरात्रे शिवे स्याताम् । स्वस्ति शिवं कर्मास्त्विति । आपस्तंबधर्मे ।। उत्तरतः "शुचौ देशे रुद्राय निनयेत् एवं वास्तु शिवं भवती"ति । स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवती" ति। " न कुसृत्या ग्रामं प्रविशेत् नमो रुद्रायवास्तोष्पतय इतीमां ऋचं जपेदन्यां वा रौद्रींवास्तु शिवं भवती"ति मंगलद्यर्थे शिवाचकत्वमुक्तम् । एवं पुराणान्तरेष्वपि शतशस्सन्ति। एवं शिनवामलक्ष्यभूतः जगतीश्वर इति कश्चिद्व्याधः कश्चिदित्यनेन अनिर्वचनीय इत्यर्थः । व्यधयति जंतूनिति व्याधः । सर्वप्रलये तमोगुणग्रहणेन रोदयितृत्वाद्रुद्रस्य व्याधत्वमुचितम् । शिवत्वं तु सार्वकालिकमेव । मनाङ्मनः क्लेशकर्तवमपि तमो-

गुणग्रहणस्य प्राणिनां सुचिरसुषुप्तिसुखदानायेति एतच्छिवपुराणे दृष्टान्ते-नोच्यते । यथा- "निदानज्ञस्य भि।जोरुगणे हिंसां प्रयुञ्जतः । न किंचिदपि नैर्घृण्यं घृणैवात्र प्रयोजिके"ति । सतु अद्रिशिखरे । जंतूनुपजीवनीयत्वात् अद्यते इत्याद्रीः । तस्य शिखरं श्रीशैलशिकरं तत्र वसति । मेरुमंदरकैलासाद्रिशिखरं वा ब्रह्मरंध्रं वा । किमतः । स मायावी विविधमायावान् भूत्वा सुखनिधिं सर्वाणि सुखान्यत्र निधीयंत इति ताम् । मतिं स्वात्मानुषक्तयाऽहरत् । अचूचुरत् । अद्धा सत्यम्। सखे दैवात् ईश्वरेच्छया क्वचन पथि क्रियोपासनयोग-ध्यानमार्गेषु कस्मिन्चिन्मार्गे । स लग्नश्चेत्। त्वद्दृष्टि-गोचरतां लब्धश्चेत् । स्मृतिमयैः पाशैः स्मृतिर्ध्यानां पाश्यंत इति पाशाः तैस्तं बध्नीयाः । अयि हृदय तत् बंधनेन तव किं फलमिति चेत् उच्यते । स पुनर्निभृतं यथेष्ठं धनं सर्वैश्वर्यं तुभ्यं दास्यति । अद्रिशिखरमित्यस्य प्रमाणम् । ज्ञानयोगखण्डे । "श्रीपर्वतशिकरस्थाने केदारं तु ललाटके । वारणासी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे" इत्युक्तवान् ब्रह्मरंध्रमद्रिशिखरमित्यर्थः । तस्मात्तदन्वेण प्रयत्न एव जागरूको भवेति भावः ।।१५।।

अवतारः ।। ननु स्मृतिपाशैस्तं बंधयेत्युक्तं सा स्मृतिस्संसारे एव पतति न हि शिवे; शिवाधीनकरणे क उपाय इत्यत आह ।

बहिस्त्वं वैय्यग्र्यं प्रकटय परं लौकिककृति-
ष्ववर्ज्यासु स्थैर्यं भज पशुपतेः पादभजने ।
विटेषु स्निह्यंतीमिव बहिरसारैरभिनयै-
र्धने बद्धासंगां गणय धिषणे वारवनिताम् ।।१६।।

बहिरिति । अयि धिषणे बुद्धे । त्वं बहिः अवर्ज्यासु त्यक्तुमयोग्यासु अवश्यं कर्तव्यासु लौकिककृतिषु पशुपुत्रधनादिपोषणरूपासु स्यालसंबंधि-मुखसस्नेह-सजग्धिक्रियासु वा, परं अधिकं वैयग्र्यं व्यग्रभावं श्रद्धाधिक्यमित्यर्थः । प्रकटय प्रकाशय । स्वार्थनिर्वहणाय वैपरीत्यमंगीकार्यमिति भगवताप्युक्तं हि । "न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् । जोषयेत् सर्वकर्माणि विद्वान्युक्तस्समाचरेदि"ति । अपि च । पसुपतेः पाजभजने अतः स्थैर्यं भज । कथमिवेत्यत आह-असारैः शृंगार-रसविहीनैः अभिनयैः हस्तापांगगद्गदादिचिह्नैः विटेषु कामुकेषु बहिः स्निह्यंतीव स्थितासु । इवकारेण वस्तुतःस्नेहाभावोवगम्यते। पुनस्तस्याः कुत्र स्नेह इत्यत्र

आह । धने बहुवित्तार्जने बद्धासंगां बद्धः आसंगः स्नेहः यया ताम् । वारवनितां वारो जनसमूहस्तस्य वनिता साधारणीतां गणय स्मर तद्धृदयतात्पर्यं बहिःकृत्यं च पर्यालोचयेत्यर्थः ।।१६।।

अवतारः ।। एवं उक्तरीत्या षोडशपद्यैः प्रथमादितिथ्यात्मककलामयैर्मानसमेवाऽनुनयेन समाधाय तस्मै विनीताय मानसाय चिरकांक्षित सकल श्रुतिसारसिद्ध मोक्षप्रधानसाधन महादेवध्यानानुकूल्यं कुर्वीत; तदर्थं धिषणां नमस्करोति ।

महादेवध्यानान्मम शरणमन्यन्न कलये
भवग्राहग्रासोल्लसितभववेगोदधिभुवि ।
प्रसीद प्रागल्भ्यं तदिह परिगृग्याद्य महता
भयात्त्तात्रायस्वैनं भगवति नमस्तेऽस्तु धिषणे ।।१७।।

महादेव इति । भवग्राहग्रासोल्लसित-भववेगात् भव एव ग्राहो भवग्राहः तस्य ग्रासः कबलं भवग्राहग्रासः । उल्लसितश्चासौ भवस्य संसारस्य वेगः उल्लसितभववेगः । भवग्राहग्रासः उल्लसितभववेगः यस्य तत् । महेदेव-ध्यानात् । महांश्चासौ देवश्च महादेव इति महच्छब्दस्य वस्तुनः पूर्णत्वं प्रकाशते । श्रु ।। अथ कस्मादुच्यते महादेवः यस्सर्वान् भावान् परित्यज्य आत्मज्ञानयोगैश्वर्येति महति महीयते तस्मादुच्यते महादेव इति । दिशं भित्वा सर्वान् लोकान् व्याप्नोति व्यापयतीति व्यापनाद्यापि महादेव इति च । शिवधर्मोपपुराणे । "धातुर्महेति पूजायां महादेव इति स्मृत" इति । देवेष्वस्यैव महत्त्वात् एवंभूतस्य महादेवस्य ध्यानात् ध्यैचिंतयामिति धातोः । "तत्र प्रत्यैकतानता ध्यानमि"ति सूत्राच्च । विजातीयप्रत्ययानंतरित सजातीयप्रत्ययप्रवाहीकरणं ध्यानमित्युच्यते । ज्ञानयोगखंडे ।। ध्यानार्थं ध्येयस्वरूपमुपदिशति । "आकाशे निर्मले शुद्धे भासमानं सुशीतपम् । सोममण्डलमापूर्णमचलं दृष्टिगोचरम् । ध्यात्वा मध्ये महादेवं परमानन्दविग्रहम् । उमार्द्धदेहं वरदमुत्पत्यादि विवर्जितमि"त्यादि । यज्ञवैभव खण्डं ध्यानविधिरुच्यते। "परात्परतरं तत्त्वं ध्येयं मूर्त्यात्मनैव तु । न स्वरूपेण साक्षित्वादात्मत्वाद्विषयित्वतः । भेदाभावाच्च भेदस्य भ्रमत्वादेव वस्तुतः । उमार्धविग्रहा शुक्ला" चंद्रार्द्धकृतशेखरा । नीलग्रीवा त्रिणेत्रा च प्रसन्नवदना शुभा । वरदाभयहस्ता च विचित्रमकुटोज्वला। ध्येयाद्यन्तविनिर्मुक्ता या मूर्तिः श्रुतिदर्शिते"ति। एवमथर्वशिखायाम्।। ब्रह्मविष्णुरुद्रादीनां

पञ्चमहाभूतानामिन्द्रियाणां च शिवादुत्पत्तिं शिवस्यैव कारणत्वं चाभिधाय दहराकाशे सर्वैश्वर्यसंपन्नश्शिव एकोध्येश्शिवंकरस्सर्वमन्यत्परित्यजेत्युक्तत्वात् शिवध्यानमेव शरणं मनसि कलये । ननु सर्वज्ञस्य दीक्षितचरणस्य परिमलशिवतत्त्वविवेकादिबहुग्रंथकर्तुश्शिवज्ञानिनः ज्ञानापेक्षां विना कथं ध्यानप्रवृत्तिरुदेतीति चेत् सैव ज्ञानस्य मूलमिति लोकोपकारार्थं ध्यानमेव पुरुषप्रयत्नसाध्यम् । ज्ञानं तु प्रसादेनैव फलतीत्युक्तम् । तथा च पराशरः ।। "सांबमूर्तिस्त्रिनेत्रा या सा परस्यपरात्मनः । साक्षान्मूर्तिरिरिति ज्ञानं नाल्पस्य तपसः फलम् । वाक्यानुग्राहकन्यायपरिशीलनलक्षणात् । मनननाञ्च तथैकाग्र्यान्निदिध्यासनसंज्ञितात् । भावनेद्वे निवृत्ते ते निवृत्यैव तयानघ । ज्ञानस्य प्रतिबंधश्च स्वयमेव विनश्यति । वाक्यलक्षणसामग्री प्रवृत्तिप्रभवस्य तु । वृत्तिज्ञानस्य शुद्धस्य चिदभिव्यक्तियोग्यता । योग्यता लक्षणे साक्षात् प्रसादे शांभवे शुभे । तीव्रे तीव्रतरे मंदे संजाते सति देहिनाम् । वृत्तेस्साक्षितया वृत्तिप्रागभावस्य च स्थितः । बुभुत्सायां तथाज्ञोस्मीत्याभाताऽज्ञानवस्तुनः । अस्तायलंबनत्वेन सत्यस्सर्वजडस्य तु । साधकत्वेन चिद्रूपस्सदा प्रेमास्पदत्वतः । आनंदरूपस्सर्वार्थ साधकत्वेन हेतुना । सर्वसंबंधवत्वेन संपूर्णशिवसंज्ञितः । स्वानुभूतिप्रसिद्धस्तु वृत्तौ सत्यां घृणानिधिः । बभूत्सोरात्मनः साक्षादभिव्यक्तो भवेत्स्वयमि"मि । मुक्तिखंडे ।। "आत्मनः परमा मुक्तिः ज्ञानादेव न कर्मणा । ज्ञानं वेदान्तवाक्यानां महातात्पर्यनिर्णयात् । उत्पन्नायां मनोवृत्तौ महत्यामंबुजेक्षण । अभिव्यक्तं भवेदेतत् ब्रह्मैवात्र विचारितम् । अनेनैवात्नो ज्ञानमात्मन्येव विलीयते इति । उत्पन्नायां मनोवृत्तावित्यत्र मूर्तामूर्तशिवतत्त्वध्यान संस्कारादेव मनोवृत्तेर्महत्वसंभवात् । ज्ञानं प्राप्य स्वकण्ठाभरणवत् । एवंभूतमहादेवध्यानात् । मम अन्यच्छरणं गतिरस्तीति अधिभुवि भूम्यां न कदापि कलये न कुर्वे इति परिसंख्याविधि) । एकस्यानेकत्र प्राप्तस्यान्यतो निवृत्यर्थमेकत्र पुनर्वचनं परिसंख्याविधिरिति लणात् । ननु चेतो- हृदय-मानसादिवात्यंमतःकरणं जडमात्मनः उपकरणं तक्ष्णो वास्यादिवत् भवति । तस्यैतस्यादेशोपदेशादिविधिना विभीषिकासमाधानवचनेन हितोपदेशः कथं । तस्य निग्रह एव कार्य इति चेन्न । आत्मांतःकरणयोर्न्नात्यंत भोदस्ति । तथा श्रुतिश्च। "स एषोंतर्हृदय आकाशः तस्मिन्नयं पुरुषो मनोमय" इति । "मनोमयप्राणशरीरनेता प्रतिष्ठितोन्ने हृदयं सन्निधाये"ति च आत्ममनसारकाधिकरणवत्तित्वात् यावत्यात्मनः शक्तिः तावत्यन्तःकरणस्याप्यस्ति ।

तथाप्यधीरस्य राज्ञस्सचिवसेनाधिपवत् असमाहितांतरंगस्य पुंसश्चित्ताधीनत्वं प्रसिद्धं हि । श्रु ।। "भगवन्नेतस्मिन् पुरुषे कानिस्वपन्ति कान्यस्मिन् जाग्रति कतर एष देवः स्वप्नात् पश्यति कस्यैतत् सुखं भवति कस्मिन्नु सर्वे संप्रतिष्ठिता भवंती"ति प्रश्नपंचकमुत्थाप्य रविमण्डलमरीचिवत् परे देवे मनस्येकीभवति । तेन तर्ह्येषपुरुषो न श्रुणोतीत्यादि स्वापलक्षणमुदीर्य अथ प्राणाग्निहोत्रं च रूपकेनोदाहृत्य "मनो ह वाव यजमान इष्टफ्रलमेवोदानस्स एनं यजमानमहरहर्ब्रह्मगमयती"ति तस्यैव ब्रह्माप्तिं चोचे। ततस्समाहितमनस एव विष्णोरपि परमपदस्य शिवस्वरूपस्यावाप्तिः श्रूयते। काठके ।। "परांचि खानि व्यतृणत् स्वयंभूः । कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्त-चक्षुः । नसैवेदमाप्तव्यमन्नेहनानास्ति ।। विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सो-ऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । अस्याः श्रुते-रर्थश्च ब्रह्मणा स्वगीतायां प्रकाशितः । "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । पदं परममद्वैतं स शिवस्सांभविग्रहः । रुद्रविष्णुप्रजेशानां अन्येषामपि देहिनाम् । ऋते सांबं महादेवं किं भवेत् परमं पदमि"ति वचनैः सुचिरमांत्मांतःकरणयोरन्योन्यधर्माध्यासेनात्म-तत्त्वविस्मरणाल्लौकिकस्य शास्त्रज्ञस्यापि वा मनसश्चास्वातंत्र्यात् प्रथमं मनोवशी-करणमेवांतरंगसाधनमित्येतावल्लोकोपकाराय तां धियमभ्यर्थ्ययन् धिषणान्नमस्करोति च । हे भगवति सर्वज्ञे धिषणे धृष्णुवंति प्रगल्भं ते पुरुषा अनयेति तथोक्ता साभिप्रायविशेषणम् । इह मदाबदुद्धारणी विषये प्रागल्भ्यं महद्धैर्यं परिगृह्य एनं मां महतस्संसारभयात्त्रायस्य रक्ष । तदर्थमिदन्नमस्तेऽस्तु ।। एतावत् पर्यन्तं शिखरिणी वृत्तम् । "रसैरुद्रै श्छिन्ना यमनसफलागश्शिखरिणी"ति लक्षणात् ।।

बुद्धे सुखैकरसिकासि विवेकयुक्ता
संचिन्तयस्यहह किं विषयानभिज्ञा ।
किं प्राप्तवत्यसि सुखं विषयानुषङ्गा-
द्दुःखं विना तदलमीश्वरमाश्रय त्वम् ।।१८।।

।। श्रीशिवमस्तु ।।

मन्दशिवानन्दभिक्षुर्मानसोल्लासदीपभृत् ।
काश्यां किञ्चिद्विलिप्यैवमास्ते तं मृगयन् शिवम् ।।

श्रीशिवाभ्यां नमः

।। अथ श्रीमद्दीक्षितेन्द्रविरचितशिवध्यानपद्धतिः ।।

श्रीगुरुभ्यो नमः ।

मध्येहृदयपाथोजं महादेवासनोचितम् ।
महिताकारशोभाढ्यं मण्टपं परिचिन्तयेत् ।।१।।

अतिचिन्तामणिप्रख्यैरतिकौस्तुभकान्तिभिः ।
रत्नैरप्राकृतैर्लोकं रञ्जयन्तं समन्ततः ।।२।।

दक्षिणद्वारपार्श्वस्थं संस्मरेन्नन्दिकेश्वरम् ।
अनेकरुद्रप्रमथभूतसङ्घैर्निषेवितम् ।।३।।

शिवधर्ममहाध्यक्षं शिवान्तःपुरपालकम् ।
चामीकराचलप्रख्यं सर्वाभरणभूषितम् ।।४।।

बालेन्दुमुकुटं सौम्यं चतुर्बाहुं त्रिलोचनम् ।
चन्द्रबिम्बाभवदनं हरिवक्त्रमथापि वा ।।५।।

उत्तरद्वारपार्श्वे तु तत्पत्नीं मरुतस्सुताम् ।
सुयशां सुव्रतामम्बापादमण्डनतत्पराम् ।।६।

सहितां रुद्रकन्याभिः सखीभिश्चाप्यनेकशः ।
मध्ये च मण्डपस्यास्य वेदिकां विपुलप्रभाम् ।।७।।

चतुस्तम्भयुतां ध्यायेत् चतुरश्रां मनोहराम् ।
तस्यां शक्त्यादिशक्त्यन्तं तन्वीत परमासनम् ।।८।।

आधारशक्तिं श्यामाङ्गीमादौ धृतवराभयाम् ।
तस्याःपरस्तादुत्कण्ठमनन्तं कुण्डलाकृतिम् ।।९।।

तस्योपरि शुभं ध्यायेत् सिंहासनमुमापतेः ।
धर्मो ज्ञानं च वैराग्यमैश्वर्यं च तदङ्घ्रयः ।।१०।।

आग्नेय्यादिस्थिताः श्वेतपीतरक्तहरित्प्रभाः ।
सिंहाकाराः सिंहकोट्या प्रत्येकं परिवारिताः ।।११।।

अधर्मादीनि पूर्वादिफलकानि समन्ततः ।
राजावर्तप्रकाशानि नराकारधराणि च ।।१२।।

मध्यमं फलकं तस्य सूक्ष्माल्लक्ष्मीपतिः स्वयम् ।
तस्मिन् प्रागादिमध्यस्थं प्रणवादिस्वराष्टकम् ।।१३।।

योगासनं विभोर्ध्यायेत् कूर्माकृत्यनलप्रभम् ।
तस्योर्ध्वच्छदनं पद्ममासनं विमलं स्मरेत् ।।१४।।

शिवधर्ममहाकन्दं शिवज्ञानैकनालकम् ।
अष्टैश्वर्यदलोपेतं पूर्वादिहरितःक्रमात् ।।१५।।

अष्टावामादिशक्त्यन्तरुद्रकल्पितकेसरम् ।
वैराग्यकर्णिकाश्वभ्रं वामादिनवबीजकम् ।।१६।।

वामा ज्येष्ठा च रौद्री च काली विकरणी तथा ।
बलापूर्वा विकरिणी बलप्रमथिनी तथा ।।१७।।

अष्टावेताः सर्वभूतदमन्या सह शक्तयः ।
केसरेषु स्थिता ध्येया रक्ताभा धृतचामराः ।।१८।।

कलाधरकरद्योतकर्णिकायां मनोन्मनी ।
स्मर्तव्येशानदिग्भागे पाशाङ्कुशवराभयैः ।।१९।

पद्मासनस्थितं ध्यायेद्देवस्य विमलासनम् ।
गणाम्बिका महादेवी तन्नो देवी प्रचोदयात् ।।२०।।

क्रान्तं शक्तिभिरेताभिः सौम्यादिविमलासनम् ।
तस्योपरि गुणानां च मण्डलानां च साधकः ।।२१।।

तत्त्वानामपि मूर्तीनां त्रितयानि विभावयेत् ।
सर्वासनोपरिचितं विचित्रकुसुमास्तरम् ।।२२।।

परं व्योमावकाशाख्यमासनं कल्पयेत् प्रभोः ।
तस्मिन् सदाशिवं ध्यायेत् बद्धपद्मासनस्थितम् ।।२३।।

शुद्धस्फटिकसंकाशं प्रसन्नं शीतलद्युतिम् ।
विद्युद्वलयविद्योतिजटामुकुटमण्डितम् ।।२४।।

शार्दूलचर्मवसनं मन्दस्मितमुखाम्बुजम् ।
रक्तपद्मदलप्रख्यपाणिपादतलाधरम् ।।२५।।

द्वात्रिंशल्लक्षणोपेतं सर्वाभरणभूषितम् ।
दिव्यगन्धानुलिप्ताङ्गं दिव्यमाल्यैरलङ्कृतम् ।।२६।।

पञ्चवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनम् ।
दक्षिणे शूलवज्रासिपरश्वभयमुद्रिकाः ।।२७।।

वामे च दधतं नागपाशघण्टानलाङ्कुशान् ।
अस्योर्ध्ववक्त्रं विलसद्बाल्यमिन्दुकलाधरम् ।।२८।।

ध्यानस्थमूर्ध्वाभिमुखं गगनच्छाययासितम् ।
पूर्ववक्त्रं महेन्द्रस्य छायया कनकप्रभम् ।।२९।।

बालेन्दुशेखरं सौम्यं सम्प्राप्तनवयौवनम् ।
दक्षिणं वदनं कालछायासक्तचाञ्जनप्रभम् ।।३०।।

भ्रुकुटीकुटिलं घोरं रक्तवृत्तेक्षणत्रयम् ।
दंष्ट्राकरालदुर्धर्षं स्फुरिताधरपल्लवम् ।।३१।।

चन्द्रापीडं ज्वलत्केशं किञ्चिच्चलितयौवनम् ।
उत्तरं यक्षराजस्य छायया विद्रुमप्रभम् ।।३२।।

ललाटतिलकोपेतं नीलालकविभूषितम् ।
सविलासं त्रिणयनं चन्द्राभरणभास्वरम् ।।३३।।

अङ्गनाकृतिबिम्बोष्ठं सलीलभ्रूलताञ्चितम् ।
पश्चिमं पाशहस्तस्य छायया चन्द्रसंनिभम् ।।३४।।

चन्द्रोत्तंसं नृपाकारं कृतभस्मावगुण्ठनम् ।
इति ध्यात्वा पुनरपि ध्यायेदेवं सदाशिवम् ।।३५।।

इच्छाज्ञानक्रियारूपविलसल्लोचनत्रयम् ।
ज्ञानचन्द्रकलाचूडदशदिग्बाहुमण्डलम् ।।३६।।

त्रैगुण्यादिमयैर्भान्तं दिव्यैर्दशभिरायुधैः ।
सर्वज्ञानादिसंसिद्धहृदयादिषडङ्गकम् ।।३७।।

पञ्चब्रह्माख्यवदनं पञ्चसादाख्यवक्त्रकम् ।
श्रीमत्पञ्चाक्षरमयं प्रणवाकारमेव वा ।।३८।।

समस्ततन्त्ररूपञ्च वर्णब्रह्मकलामयम् ।
निवृत्त्या जानुपर्यन्तमानाभेश्च प्रतिष्ठया ।।३९।।

आकण्ठं विद्यया सिद्धमाललाटं तु शान्तया ।
तदूर्ध्वं शान्त्यतीताख्यकलया परिकल्पितम् ।।४०।।

एवं पञ्चकलारूपमेकं सादाशिवं वपुः ।
चतुर्मुखी तटिद्वर्णा निवृत्तिर्वज्रधारिणी ।।४१।।

एकवक्त्रा शशाङ्काभा प्रतिष्ठा पद्मधारिणी ।
अग्निवर्णा त्रिवदना विद्या शक्तिलसत्करा ।।४२।।

कृष्णवर्णा चतुर्वक्त्रा शान्तिर्ध्वजविधारिणी ।
पाशभृत्पञ्चवदना शान्त्यतीता शशिप्रभा ।।४३।।

सर्वाःपद्माक्षमालाभ्यामभयेन विराजिताः ।
चतुर्भुजास्त्रिणेत्राश्च पीनोन्नतपयोधराः ।।४४।।

आसां पञ्चाध्वगर्भत्वात् षडध्वात्मा सदाशिवः ।
मन्त्राध्वा च पदाध्वा च वर्णाध्वा भुवनाध्वकः ।।४५।।

तत्वाध्वा च कलाध्वा च षडध्वान इमे मताः ।
चतुर्विंशत्युत्तरं यद्भुवनानां शतद्वयम् ।।४६।।

भुवनाध्वा स संचिन्त्यो रोमबृन्दात्मना विभोः ।
पञ्चाशद्रुद्ररूपैस्तु वर्णैर्वर्णाध्वकल्पना।।४७।।

असौ त्वगात्मना चिन्त्यो देवदेवस्य शूलिनः ।
सप्तकोट्या महामन्त्रैर्मूलविद्यासमुद्भवैः ।।४८।।

मन्त्राध्वा रुधिरात्मासौ संचिन्त्यः पार्वतीपतेः ।
अनेकभेदसंभिन्नमन्त्राणां पदसंहतिः।।४९।।

पदाध्वासौ पशुपतेः सिरामांसात्मना मतः ।
पृथिव्यादीनि षट्त्रिंशत्तत्वान्यागमवेदिभिः ।।५०।।

उक्तान्यमीभिस्तत्त्वाध्वा शुक्लमज्जास्थिरूपधृक् ।
नास्यदेहेऽस्ति रुधिरं न मांसं नास्ति किञ्चन ।।५१।।

प्रतिबिम्बमिवादर्शे शक्रचापमिवाम्बरे ।
ज्योतिर्मयतया सिद्धमिदं सादाशिवं वपुः ।।५२।।

तथापि कल्पनामात्रं कलाव्याप्याध्वनामिदम् ।
ब्रह्मस्वीशेनमूर्धानः पुरुषेण चतुर्मुखी ।।५३।।

हृदयादीन्यघोरेण गुह्यादीनि च वामतः ।
सद्योजातेन मन्त्रेण पादादीनि जगत्पतेः ।।५४।।

पञ्चमन्त्रतनुः शम्भुरेवं कल्पनया भवेत् ।
ओंकारबीजप्रभवः कलापञ्चकसंयुतः ।।५५।।

शुद्धस्फटिकसंकाशः शुभमेधाविवर्धनः ।
सदाशिवात्मा व्योमस्थ ईशानःपरिकीर्तितः ।।५६।।

गायत्रीप्रभवो मन्त्रः स्वर्णवर्णश्चतुष्कलः ।
वश्यकृद्गन्धवाहस्थः ईश्वरः पुरुषःस्मृतः ।।५७।।

अथर्वप्रभवो मन्त्रः कलाष्टकविभूषितः ।
आभिचारकरोऽत्यर्थमञ्जनाद्रिसमप्रभः ।।५८।।

अशेषाघहरःपुंसामघोरो रुद्रविग्रहः ।
सामवेदोद्भवो मन्त्रस्त्रयोदशकलान्वितः ।।५९।।

वामदेवःप्रवालाभो वारितत्त्वस्थितो हरिः ।
यजुर्वेदोद्भवो मन्त्रः कलाष्टकयुतः सितः ।।६०।।

शान्तिकृत् पृथिवीसंस्थःसद्योजातः पितामहः ।
पञ्चवक्त्राः स्मृताः सर्वे दशदोर्दण्डभूषिताः ।।६१।।

खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ।
वराभयोपेतकराः शूलपङ्कजपाणयः ।।६२।।

अघोरो घोर एतेषु तदन्ये सौम्यविग्रहाः ।
एवं ध्यात्वा सदेशस्य पञ्चब्रह्मात्मतां विभोः ।।६३।।

तत्तद्ब्रह्मकलाभेदैर्विविच्याङ्गादि कल्पयेत् ।
ईशानस्सर्वविद्यानामित्येषा शङ्खपाण्डरा ।।६४।।

धूर्जटेरूर्ध्वमूर्धासौ शशिन्या सहिता कला ।
ईश्वरः सर्वभूतानामित्येषा कुन्दसन्निभा ।६५।।

शर्वस्य पूर्वमूर्धासौ शक्त्या युक्ताङ्गदाख्यया ।
ब्रह्माधिपतिरित्यग्रे ब्रह्मणोऽधिपतिस्ततः ।।६६।।

ब्रह्मेत्येषा शशाङ्काभा सैषा मूर्धास्य दक्षिणः ।
शिवो मे अस्त्विति कला शुद्धस्फटिकभास्वरा ।।६७।।

महेशस्योत्तरो मूर्धा मरीचिरसवीचिका ।
सदाशिवोमिति कला गोक्षीरधवलाकृतिः ।।६८।।

शिवस्य पश्चिमो मूर्धा नलिनीमेलनोज्वला ।
कला तत्पुरुषायेति पूर्वा विद्मह इत्यसौ ।।६९।।

शान्तियुक्ता जपावर्णा पूर्ववक्त्रं पुरद्विषः ।
महादेवाय पूर्वा या धीमहीति कला श्रुता ।।७०।।

सा विद्या सहिता कृष्णा दक्षिणं वक्त्रमीशितुः ।
कला प्रतिष्ठा सहिता तत्रोरुद्र इति श्रुता ।।७१।।

वक्त्रमुत्तरमीशस्य वर्णेन स्फटिकोपमा ।
प्रचोदयादिति कला प्रतप्तकनकोपमा ।।७२।।

शिवस्य पश्चिमं वक्त्रं निवृत्या नित्यसंहिता ।
अघोरेभ्यः कला नीला हृदयन्तमया युता ।।७३।।

अथ घोरेभ्य इत्येषा रक्ता मोहा सखीगलः ।
पीता घोरकला स्कन्धो दक्षिणःक्षयया युता ।।७४।।

वामो निद्रायुता घोरतरेभ्य इति कीरभा ।
कुक्षिःसर्वेभ्य इत्येषा शुभ्राभा मायया युता ।।७५।।

नीला मृत्युयुता नाभिः सर्वेभ्यः शर्वरूपिणी ।
नमस्ते अस्तु रुद्रेति पृष्ठं रत्नाभया युता ।।७६।।

पक्षे रूपेभ्य इत्येषा सजरा काञ्चनप्रभा ।
वामदेवाय नम इत्येषा सिन्दूरसुन्दरी ।।७७।।

जरया सहिता याति मूलाधारा धरात्मताम् ।
लिङ्गं रक्षायुता पीता ज्येष्ठाय नम इत्यसौ ।।७८।।

सव्योरुस्सरतिर्नीला स्यद्रुद्राय नमःकला ।
पीता सबल्या वामोरूः कालाय नम इत्यसौ ।।७९।।

शुक्लाकला कला वामासहिता जानु दक्षिणम् ।
वामं विकरणायाऽथ नमःश्यामा ससंयमा ।।८०।।

सक्रिया दक्षिणा जङ्घा नीला बलकला विभोः ।
वामा विकरणायाऽथ नमो बुद्धियुतारुणा ।।८१।।

विद्युद्वर्णा बलकला सव्यस्फिक्कार्ययायुता ।
वामः प्रमथनायाऽथ नमो धात्रीयुतासिता ।।८२।।

बालार्काभा सर्वभूतदमनाय नमःकला ।
भ्रामण्या धृतलावण्या कटिःकन्दर्पविद्विषः ।।८३।।

सव्यपार्श्वे मनकला नीलाभा मोहिनीयुता ।
उल्लसत्कीरपक्षाभा ह्युन्मनाय नमःकला ।।८४।।

मनोन्मनीयुतं ध्यायेत् वामपार्श्वे पिनाकिनः ।
सद्योजातं प्रपद्यामीत्येषा बालार्कसन्निभा ।।८५।।

कला सिद्धिसमायुक्ता धूर्जटेर्दक्षिणं पदम् ।
सद्योजाताय वै पूर्वा नम इत्यसिता कला ।।८६।।

ऋद्धिशक्तेः सहचरी वामं गौरीपतेः पदम् ।
नीला भवेकलाद्युक्ता सहिता दक्षिणःकरः ।।८७।।

नीला भवेकलाऽन्या तु वामो लक्ष्मीयुता करः ।
मेधा सहचरी नासा पीता नातिभवेकला ।।८८।।

भजस्व मामितिकला सकान्तिररुणा शिरः ।
नीला भवकला बाहुः दक्षिणः स्वधया युता ।।८९।।

उद्यदर्ककराभासामुद्भवाय नमःकलाम् ।
धृतिशक्तियुतां ध्यायेद्वामाबाहुं जगत्पतेः ।।९०।।

अष्टत्रिंशत्कलादेवाः त्रिणेत्राश्च चतुर्भुजाः ।
वराभयपरश्वेणविलसत्करपल्लवाः ।।९१।।

तत्तद्ब्रह्मसमाकारवर्णायुधभृतोऽथ वा ।
एतेषां वामभागेषु विचिन्त्याःशक्तयस्त्विमाः ।।९२।।

पाशाङ्कुशाभयवरद्योतमानकराम्बुजाः ।
श्रीकण्ठप्रमुखान् रुद्रान् वर्णरूपान् सशक्तिकान् ।९३।।।

प्रभोरवयवान् ध्यायेद्वायूक्तान् न्यासवर्त्मना ।
स्मरेत् सशक्तिकान् रुद्रान् अर्धनारीश्वराकृतीन् ।।९४।।

सिन्दूरकाञ्चनप्रख्यवामदक्षिणपार्श्वकान् ।
पाशाङ्कुशाक्षवलयवरमुद्राविराजितान् ।।९५।।

प्रसन्नवक्त्रकमलान् विश्ववाञ्छितदायकान् ।
कामिकं पादकमलं योगजं गुल्फयोर्युगम् ।।९६।।

चिन्त्यं पदाङ्गुलीरूपं कारणं प्रसृतिद्वयम् ।
अजितं जानुनो युग्मं दीप्तमूरुद्वयं विभोः ।।९७।।

गुह्यं बीजात्मकं सूक्ष्मं सहस्त्रं तु कटीतटम् ।
पृष्ठभागोंशुमानस्य नाभिःश्रीसुप्रभेदकम् ।।९८।।

विजयं जठरं बाहुः निश्वासं हृदयात्मकम् ।
स्वायम्भुवं स्तनद्वन्द्वमनलं लोचनत्रयम् ।।९९।।

वीरागमःकण्ठदेशः रौरवं श्रवणद्वयम् ।
मुकुटं मुकुटं तन्त्रं बाहवो विमलागमः ।।१००।।

चन्द्रज्ञानमुरः शम्भोर्बिम्बं वदनपङ्कजम् ।
जिह्वा प्रोद्गीतमीशस्य ललितं गण्डयोर्युगम् ।।१०१।।

सिद्धं ललाटफलकं सन्तानं कुण्डलद्वयम् ।
यज्ञोपवीतं सर्वोक्तं हारस्त्रक् पारमेश्वरम् ।।१०२।।

किरणं रत्नभूषास्य वातुलं वसनात्मकम् ।
एवं तन्त्रात्मकं रूपमीश्वरस्य विचिन्तयेत् ।।१०३।।

शिवज्ञानप्रदं पुंसां शिवधर्मप्रवर्तकम् ।
प्रणवस्य च मात्राभिः वर्णैःपञ्चाक्षरस्य च ।।१०४।।

वदनांसोरुयुगलं कल्पयेदम्बिकापतेः ।
विशुद्धं शिवसादाख्यं विद्युद्वृन्दमिवाम्बरे ।।१०५।।

विश्वतः स्फुरितं ज्योतिर्विद्यादूर्ध्वमुखं विभोः ।
अमूर्तमथ सादाख्यं मूलस्तम्भ इति श्रुतम् ।।१०६।।

ज्योतिस्तम्भमयं लिङ्गं स्मरेदस्योत्तरं मुखम् ।
ज्योतिर्लिङ्गैकभागोत्थमेकवक्त्रं त्रिलोचनम् ।।१०७।।

मूर्तं सादाख्यमित्युक्तं ध्यायेत् पश्चिममाननम् ।
शूलं च परशुं वज्रमभीतिं दक्षिणैःकरैः ।।१०८।।

पाशं वह्निं च घण्टां च वरं वामैःकरैरपि ।
दधानं कर्तृसादाख्यं चतुर्वक्त्राम्बुजोज्ज्वलम् ।।१०९।।

लिङ्गमध्ये समुद्भूतं स्मरेद्दक्षिणमाननम् ।
पञ्चवक्त्रं दशभुजं पीठलिङ्गे समुद्गतम् ।।११०।।

प्रसिद्धं कर्मसादाख्यं पुरारेःपूर्वमाननम् ।
पञ्चब्रह्माण्यूर्ध्वपूर्वदक्षिणोत्तरपश्चिमान् ।।१११।।

वक्त्रपद्मान् विभोर्ध्यायेदीशानप्रभृति प्रभोः ।११२।।

सर्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ।।११३।।

हृदयं हृदये शुभ्रं शिरःशिरसि पिङ्गलम् ।
शिखां शिखां पदे रक्तां कवचं पार्श्वयोः स्थितम् ।।११४।।

नेत्रेषु श्यामलं नेत्रं करेऽस्त्रमसितं स्मरेत् ।
चतुर्भुजास्त्रिणेत्राश्च जटामकुटमण्डिताः ।।११५।।

वराभये कपालं च शूलं च दधतः करैः ।
अङ्गदेवाः स्मृताः सौम्या नेत्रास्तेऽत्युग्रविग्रहे ।।११६।।

त्रिशूलं त्रिगुणं प्राहुः परशुः सत्यनिष्ठता ।
खड्गःप्रतापो वज्रं तु शम्भोः शक्तिरभेद्यता ।।११७।।

वह्निःसंहारिणी शक्तिः शक्तिर्नागोऽप्रधृष्यता ।
मलमायाकर्मपाशो घण्टा नादस्वरूपिणी ।।११८।।

अभयं पालिनीशक्तिर्विवर्णं त्वङ्कुशं विदुः ।
एवं दशभुजश्चिन्त्यो दिव्यैर्दशभिरायुधैः ।।११९।।

जपकाले तु मन्त्रस्य ध्येयो देवश्चतुर्भुजः ।
वराभयपरश्वेणलसत्करसरोरुहः ।।१२०।।

वक्त्रेष्वीशानवक्त्रं यदूर्ध्वाशाभिमुखं सदा ।
पूजाकालेषु तत्पूजा द्वाराभिमुखतां व्रजेत् ।।१२१।।

द्वारभेदात्र भिद्यन्ते स्वस्वस्थानव्यवस्थया ।
अथवा मण्डपद्वारदिगादिपरितः क्रमात् ।।१२२।।

चत्वार्येतानि वक्त्राणि प्रादक्षिण्येन कल्पयेत् ।
एवं सदाशिवं ध्यात्वा निश्चलेनान्तरात्मना ।।१२३।।

मन्त्रन्यासादिकं चैवं कृत्वा स्वस्यां तनौ यथा ।
मूर्तित्वेनैव संकल्प्य शिवस्य परमात्मनः ।।१२४।।

अभ्यर्च्य गन्धपुष्पाद्यैर्मनसैवोपपादितैः ।
तस्यां मूर्तौ मूर्तिमन्तं शिवं सदसतःपरम् ।।१२५।।

प्राणस्थानं सदेशस्य चिन्तयेदम्बया सह ।
ब्रह्मा विष्णुश्च रुद्रश्च तथान्ये च सुरासुराः ।।१२६।।

तपोभिरुग्रैरद्यापि यस्य दर्शनकाङ्क्षिणः ।
यस्मात्सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।।१२७।।

सहभूतेन्द्रियैःसर्वैः प्रथमं संप्रसूयते ।
कारणानां च यो धाता ध्याता परमकारणम् ।।१२८।।

न संप्रसूयतेऽन्यस्मात् कुतश्चन कदाचन ।
सर्वैश्वर्येण सम्पन्नः नाम्ना सर्वेश्वरःस्वयम् ।१२९।।।

सर्वैर्मुमुक्षुभिर्ध्येयः शम्भुराकाशमध्यगः ।
सर्वोपरिकृतावासः सर्ववासश्च शाश्वतः ।।१३०।।

षड्विधाध्वमयस्यास्य सर्वस्य जगतः पतिः ।
उत्तरोत्तरभूतानामुत्तरश्च निरुत्तरः ।।१३१।।

अनन्तमहिमाम्भोधिरपरिच्छिन्नवैभवः ।
अशेषविषयामोघशुद्धबुद्धिविजृम्भणः ।।१३२।।

आत्मशक्त्यमृतास्वादप्रमोदरसलालसः ।
अनन्तानन्दसन्दोहमकरन्दमधुव्रतः ।।१३३।।

अखण्डजगदण्डानां पिण्डीकरणपण्डितः ।
औदार्यवीर्यगाम्भीर्यमाधुर्यमकरालयः ।।१३४।।

अतुलःसर्वभूतानां राजराजो महेश्वरः ।
अप्राकृतशरीरं तमतिमन्मथरूपिणम् ।।१३५।।

घृतरीतिघनीभूतसच्चिदानन्दविग्रहम् ।
सर्वलक्षणसम्पन्नं सर्वावयवशोभनम् ।१३६।।।

सर्वातिशयसंयुक्तं सर्वाभरणभूषणम् ।
रक्तास्यपाणिचरणं कुन्दमन्दस्मितानानम् ।।१३७।।

शुद्धस्फटिकसंकाशं फुल्लपद्मत्रिलोचनम् ।
चतुर्भुजमुदाराङ्गं चारुचन्द्रकलाधरम् ।।१३८।।

वरदाभयहस्तं च मृगटङ्कधरं हरम् ।
सर्वकल्याणनिलयं चारुनीलगलान्तरम् ।।१३९।।

सर्वोपमानरहितं सर्वात्मानं विचिन्तयेत् ।
ततः संचिन्तयेत्तस्य वामभागे महेश्वरीम् ।।१४०।।

उत्फुल्लोत्पलपत्राभविस्तीर्णायतलोचनाम् ।
पूर्णचन्द्राभवदनां नीलकुञ्चितमूर्धजाम् ।।१४१।।

नीलोत्पलदलप्रख्यां चन्द्रार्धकृतशेखराम् ।
अतिवृत्तघनोत्तुङ्गस्निग्धपीनपयोधराम् ।।१४२।।

तनुमध्यां पृथुश्रोणीं पीनसूक्ष्मोत्तराम्बराम् ।
सर्वाभरणसम्पन्नां ललाटतिलकोज्ज्वलाम् ।।१४३।।

विचित्रपुष्पसंकीर्णकेशपाशोपशोभिताम् ।
सर्वातीतगुणाकारां किञ्चिल्लज्ज्ञानताननाम् ।।१४४।।

काव्याकारस्फुरद्दिव्यनासामुक्ताफलाञ्चिताम् ।
हेमारविन्दं विलसद्दधानां दक्षिणे करे ।।१४५।।

दण्डवच्चापरं हस्तं न्यस्यासीनां सुखासने ।
पापविच्छेदिकां साक्षात् सच्चिदानन्दरूपिणीम् ।।१४६।।

सदाशिवेश्वरहरश्रीशद्रुहिणमातरम् ।
समस्तगौरीवाण्यादिलक्ष्म्यादिपरिसेविताम् ।।१४७।।

एवं देवं च देवीं च ध्यात्वा तरुणविग्रहौ ।
सर्वोपचारवद्भक्त्या भावपुष्पैः समर्चयेत् ।।१४८।।

एवं ध्यात्वा क्षणमहो अग्निष्टोमायुतात् फलम् ।
उमासहायं विश्वेशं ध्यात्वा प्राप्नोति मानवः ।।१४९।।

इत्याकलय्य शैवानि शास्त्राणि सकलान्यपि ।
उद्धृत्य तेभ्यः सारांशः संगृहीतो यथामति ।।१५०।।

श्रीपतिध्येयपादाब्जश्रीशिवध्यानपद्धतिः ।
अनुसन्धीयतां प्राज्ञैरनुसन्ध्यमियं मुदा ।।१५१।।

।। श्री साम्बशिवाय नमः।।

।। श्रीमदप्पय्यदीक्षितेन्द्रविरचिता श्रीशिवध्यानपद्धतिः सम्पूर्णा ।।

।। शिवाभ्यां नमः ।।



।। श्री शिवाभ्यां नमः ।।

श्रीमदप्पय्यदीक्षितविरचितम्

।। आर्याशतकम् ।।

दयया यदीयया वाङ् नवरसरुचिरा सुधाधिकोदेति ।
शरणागतचिन्तितदं तं शिवचिन्तामणिं वन्दे ।।१।।

शिरसि सितांशुकलाढ्यं करुणापीयूषपूरितं नयने ।
स्मितदुग्धमुग्धवदनं ललनाकलितं महः कलये ।।२।।

अन्ते चिन्तयते यत्तत्तामेतीति च त्वया गदितम् ।
शिव तव चरणद्वन्द्वध्यानान्निर्द्वन्द्वता चित्रम् ।।३।।

द्रुतमुद्धर हर संहर संहर भववैरिणं त्वतित्वरया ।
भव भवतोऽपि भवोऽयं रिपुरेतन्निन्दितं जगति ।।४।।

चेतसि चिन्तय वामां वा मां वा न द्विधा स्थितस्याहम् ।
इति यदि वदसि दयाब्धे वामार्धे सा तवाप्यस्ति ।।५।।

मित्रकलत्रसुतादीन् ध्यायस्यनिशं न मां क्षणं जातु ।
यदि कुप्यसि मयि दीने तुलयामि त्वां कथं सह तैः ।।६।।

मत्कृतदुष्कृतशान्तिर्विषवह्निजलादियातनया ।
यदि निश्चयस्तवायं प्रेषय गरलाग्निगङ्गौघान् ।।७।।

भोगं विहाय योगं साधय दास्ये तवापि परभागम् ।
मम किं न वावकाशस्त्वद्भूषाभोगिनां मध्ये ।।८।।

ललनालोलविलोकनजितमित्यवमन्यसे कथं मां त्वम् ।
त्वयि जायार्धशरीरे शिव शिव नाऽऽलोकनानुभवः ।।९।।

स्मरणादनुपदमीदृग्विस्मृतिशीलो न वल्लभोऽसि मम ।
उत्पाद्याशां भङ्क्तुर्लग्ना वृत्तिस्तवैवेयम् ।।१०।।

पुत्रः पितृवत्पुत्री मातृवदित्थं ममात्र को दोषः ।
अहमपि भोगासक्तः प्रकृतिर्जाता विषादवती ।।११।।

वपुरर्धं वामार्धं शिरसि शशी सोऽपि भूषणं तेऽर्धम् ।
मामपि तवार्धभक्तं शिव शिव देहे न धारयसि ।।१२।।

स्तनपं शिशुं त्वदीयं पालय साम्ब द्रुतं न पासि यदि ।
जगतः पितेति गीतं यातं नामेति जानीहि ।।१३।।

मातरि हित्वा बालं कार्याकुलधीः पिता बहिर्याति ।
शिव बत शक्नोषि कथं स्वाङ्गान्मन्मातरं मोक्तुम् ।।१४।।

गुणहीनतां तनूजे मयि दृष्ट्वा किं परित्यजस्येवम् ।
उचितं गुणिनस्त्वेतन्निर्गुणरूपस्य तेऽनुचितम् ।।१५।।

कामक्रोधकटाभ्यां मदजलधारां निरङ्कुशे स्रवति ।
मत्कृतदुष्कृतकरिणि प्रकटा पञ्चास्यता तेऽस्तु ।।१६।।

त्वद्धीनं मां दीनं दृष्ट्वा विषयातिरागसम्बद्धम् ।
धावत्यकीर्तिरेषा नाथः शक्तोऽप्युदासीनः ।।१७।।

अरिभिर्जितैरशक्तैर्विज्ञाप्यं सेवकैः प्रभोर्नीतिः ।
विषयैर्जितोऽस्मि शम्भो तव यच्छ्लाघ्यं तदारचय ।।१८।।

संरक्ष्यते स्वदासैर्यद्यद्वस्तु प्रभोरभीष्टतरम् ।
दासस्तवेष्टकामः कान्तां कनकं कथं त्यजेयमहम् ।।१९।।

पापी पापं सुकृती सुकृतं भुंक्ते ममात्र किं न गतम् ।
इत्यौदास्यमयुक्तं भृत्याकीर्तिः प्रभोरेव ।।२०।।

विकलेऽतिदीनचित्ते विषयाशामात्रधारिणि नितान्तम् ।
मयि रोषतः कियत् ते वद वद शम्भो यशो भावि ।।२१।।

स्वगृहे भुवनत्रितये योगक्षेमे मुखानि चत्वारि ।
मत्प्रतिवचनं हि विना पञ्चमवदनस्य कुत्र गतिः ।।२२।।

तव कोऽहं त्वं मम कः पञ्चस्वेवं विचारयस्वेति ।
ब्रूषे दीनदयाब्धे पञ्चमुखत्वं त्वयि व्यक्तम् ।।२३।।

याचस्वान्यं धनिनं भविता तव को दिगम्बराल्लाभः ।
मां मा प्रतारयैवं ख्यातः श्रीकण्ठनामासि ।।२४।।

वसनाशनप्रदातरि मयि जीवति किं समाकुलस्त्वमिति ।
दोहाय मोच्यमानो वत्सः किं न त्वरामयते ।।२५।।

पातकराशिरितीदं त्वयाभिधानं श्रुतं न तद् दृष्टम् ।
तद्दर्शनकुतुकं यदि मां द्रष्टुं किं विलम्बसे देव ।।२६।।

पातकराशिरसि त्वं पश्याम्यत एव नाहमिति वदसि ।
पातकरूपाज्ञाने शिव तव सर्वज्ञताभङ्गः ।।२७।।

पापं पापमितीदं करोषि शिव किं मुधा बुधान् भ्रान्तान् ।
तत्सत्यं चेन्न कथं त्वयानुभूतं न दृष्टं वा ।।२८।।

पापे लोकानुभवः स एव मानं ममाप्यननुभूते ।
न हि परकीयानुभवः ज्ञातुं शक्यः परेणापि ।।२९।।

लोकाभिन्नः सोऽहं वक्तुं वाक्यं ह्युपक्रमस्तव चेत् ।
सिद्धा मनोरथा मे त्वत्तः कस्यापि लोकस्य ।।३०।।

अतिवल्गनं ममैतन्मूढत्वं यद्यपि प्रभोः पुरतः ।
दीनः करोमि किं वा मद्विषये को निवेदयति ।।३१।।

लघुरसि किं त्वयि दयया मा मा मंस्थाः शिवेति सहसा त्वम् ।
भारो भुवोऽस्मि धृत्वा स्वकरे तुलयाशु मां शम्भो ।।३२।।

सस्ये तृणे च वृष्टिं तुल्यां देवः सदैव विदधाति ।
देवो महान् बत त्वं गुरुलघुवार्तां कथं कुरुषे ।।३३।।

दिष्टोद्दिष्टं दास्याम्यन्यन्नेष्टं यदि स्फुटं वाक्यम् ।
दत्ता कथं त्वयासावजरामरता मृकण्डुजनेः ।।३४।।

नादत्तं प्राप्नोतीत्येतद्वाक्यं प्रतारणामात्रम् ।
उपमन्युना कदा वा कस्मै दुग्धोदधिर्दत्तः ।।३५।।

प्रबलतरोन्मादाढ्यं त्वामप्यगणय्य धावमानं च ।
मच्चेतोऽपस्मारं नियमय शम्भो पदाभ्यां ते ।।३६।।

आशापिशाचिका मां भ्रमयति परितो दशस्वपि दिशासु ।
स्वीये पिशाचवर्गे सेवायै किं न योजयसि ।।३७।।

यक्षाधीनां रक्षां त्र्यक्ष निधीनां कुतो नु वा कुरुषे ।
साक्षान्मनुष्यधर्माऽप्यहह कथं नु विस्मृतिर्मम ते ।।३८।।

धनदे सखित्वमेतत् तव यत् तत्रास्ति विस्मयः क इव ।
मयि निर्धने तदास्तां त्रिजगति चित्रं कियद्भावि ।।३९।।

सखितारूपनिधानं वित्तनिधानं द्विधा धनं तव यत् ।
नैककरे नृपनीतिस्तत्रान्यतरन्निधेहि मयि ।।४०।।

पालय वा मां मा वा मत्तनुभूता तु पञ्चभूततति: ।
पोष्यावश्यं भवता भविता नो चेन्न भूतपतिः ।४१।।

अतिकोमलं मनस्ते मुनिभिर्गीतं कुतोऽधुना कठिनम् ।
मन्ये विषाशनार्थं कठिनं चेतस्त्वया विहितम् ।।४२।।

मां द्रष्टुमष्टमूर्ते करुणा तेऽद्यापि किं न वोल्लसति ।
भिक्षाप्रसङ्गतो वा कियतां नो यासि सदनानि ।।४३।।

वित्ताधिपः सखा ते भार्या देहे तवान्नपूर्णाख्या ।
ऊरीकृतं न दूरीकुरुषे भिक्षाटनमपीश ।।४४।।

नाङ्गीकृतो मया त्वं तत एव न दर्शनं मम तवास्ति ।
इति नोत्तरं प्रदेयं शिव शिव विश्वेशनामासि ।।४५।।

यदि देहगेहरूपं ददासि देशाधिकारकार्यं मे ।
रसनाख्यलेखपत्रे सुदृढां कुरु नाममुद्रां ते ।।४६।।

रसनोक्तं कुरु सर्वं शिव तव नामाधिमुद्रितास्तीयम् ।
गणयसि मुद्रां न हि चेत् प्रभुतोच्छिन्ना तवैव स्यात् ।।४७।।

अत्याटिनं करालं भिक्षायुक्तं कपालशूलकरम् ।
मद्दारिद्र्यं भैरवरूपं कुरु चार्धचन्द्रयुतम् ।।४८।।

दारिद्र्यचण्डरश्मौ प्रतपति केदारवञ्च मयि शुष्के ।
जलधरतायां सत्यां त्वयि शिव नाद्यापि समुपैषि ।।४९।।

दारिद्र्याख्यमनोभूः क्लीबं चेतोऽपि मोहयत्यनिशम् ।
एनं लीनं कर्तुं धन्यः कोऽन्यस्त्वदन्योऽस्ति ।।५०।।

भालानलाक्षियुक्तस्त्रिजगति नान्यो मदन्य इति ।
गर्वं मा वह यावद्दारिद्र्याग्निः कपाले मे ।।५१।।

चेतः कुरु मा कलहं तव वैक्लव्येऽपि शम्भुना प्रभुणा ।
न वदति यद्यपि भर्ता तवोपकर्ता स एवास्ति ।।५२।।

अयि चित्त वित्तलेशो सहजप्रेम्णा कियन्नु लुब्धमसि ।
न तथापि तद्वियोगः केवलमास्ते शिवेनापि ।।५३।।

चेतःकीर विहारं परिहर परितः स्वयं प्रयत्नेन ।
अत्तुं कालबिडालो धावति शिवपञ्जरं प्रविश ।।५४।।

चेतः सदागते त्वं प्रत्याशावात्ययानुगतमूर्तिः ।
मा वह विषयारण्ये लीनो भव सच्चिदाकाशे ।।५५।।

चेतः शृणु मद्वचनं मा कुरु रचनं मनोरथानां त्वम् ।
शरणं प्रयाहि शर्वं सर्वं सकृदेव सोऽर्पयिता ।।५६।।

भ्रातः शृणु मच्चेतो मा नय कालं त्वितस्ततो भ्रमणात् ।
कालक्षेपेच्छा चेदवलम्बय कालकालं त्वम् ।।५७।।

अयि चेतोविहग त्वं विषयारण्ये भ्रमन्नसि श्रान्तः ।
विश्रामकामना चेच्छिवकल्परुहे चिरं तिष्ठ ।।५८।।

चेतोमधुकर दूरं दूरं कमलाशया कुतो यासि ।
ध्यानादनुपदमेतच्छिवपदकमलं तवायाति ।।५९।।

चेतश्चकोर तापं भूपं संसेव्य किं वृथा यासि ।
यदि चन्द्रिकाभिलाषो निकषा भव चन्द्रचूडस्य ।।६०।।

चेतःकुरङ्ग गीते रक्तं चेतस्तवास्त्वनवगीते ।
भगवद्गीतागीते नगजाकलिते तदारचय ।।६१।।

रसने निन्दाव्यसने पैशुन्ये वा न वाग्मितां याहि ।
त्रिपुरारिनाममालां जितकालां शीलयाशु त्वम् ।।६२।।

रसने रसान् समस्तान् रसयित्वा तद्विवेचने कुशला ।
असि तद्वदाशु पश्येः शिवनाम्नः को रसोऽयमिति ।।६३।।

शिवनामसल्लतां त्वं रसनापल्लव कदापि न विहातुम् ।
यदि वाञ्छसे तदा मा कोमलतां सर्वथा जहिहि ।।६४।।

हालाहलस्य तापः शशिना गङ्गाम्बुना न यदि याति ।
शिव मा गृहाण भुजगान् मद्रसनापल्लवे स्वपिहि ।।६५।।

लोचन कोऽभूल्लाभः सर्वानेव द्विलोचनान् वीक्ष्य ।
दृष्टस्त्रिलोचनश्चेत् सफलं जन्मैव ते भावि ।।६६।।

नालोकते यदि त्वां मन्नेत्रं कृष्णमस्तु मुखमस्य ।
स्वां त्र्यक्ष दक्षतां मे दर्शय नयनावलोकस्य ।।६७।।

त्वं लोचनान्धकारे द्रष्टुं वस्त्वन्धकारभिन्नं किम् ।
वाच्छस्यनेन सङ्गेऽदृश्यमपीदं त्वया दृश्यम् ।।६८।।

श्रवण सखे श्रृणु मे त्वं यद्यपि जातो बहुश्रुतोऽस्ति भवान् ।
शब्दातीतं श्रोतुं शिवमन्त्रात् कोऽपरो मन्त्रः ।।६९।।

घ्राण प्राणसखो मे भवसि भवान् पार्थिवोऽस्ति किमु वान्यत् ।
शिवपदकमलामोदे मोदं गन्तासि यदि शीघ्रम् ।।७०।।

रामास्पर्शसुखे ते नितरां भो विग्रहाग्रहोऽस्ति यदि ।
आलिङ्ग्यार्धरामं रामाऽभिन्नः स्वयं भवसि ।।७१।।

विग्रह विग्रहमेव त्वं कुरु देवेन नाऽमुना सख्यम् ।
रुचिरप्यस्मिन् शम्भौ जनयत्यरुचिं स्वदेहेऽपि ।।७२।।

संमीलयाशु रामां त्वद्वामाङ्गान्मया समं शम्भो ।
जातं ममापि यस्माद् दुःखेनार्धं शरीरमिदम् ।।७३।।

अपराधकारिणं मां मत्वा शम्भो यदि त्यजस्येवम् ।
व्याधः शिरसि पदं ते दत्वा न जगाम किं मुक्तिम् ।।७४।।

पार्थः कलहं धनुषा ताडनमपि मूर्ध्नि ते न किं कृतवान् ।
तत्रापि ते प्रसन्नं चेतः सन्ने मयि कुतो न ।।७५।।

त्वयि तुष्टे रुष्टे वा शिव का चिन्ता स्वदुःखभङ्गे मे ।
उष्णं वानुष्णं वा शमयति सलिलं सदैवाग्निम् ।।७६।।

दोषाकरे द्विजिह्वे रतिमतिशयितां करोषि यदि शम्भो ।
अहमस्मि तथा वितथा कुरुषे मां दृक्पथातीतम् ।।७७।।

चेतो मदीयमेतत्सेवाचौर्ये यदि प्रसक्तं ते ।
दण्डय नितरां शम्भो सर्वस्वं लुण्ठयैतस्य ।।७८।।

सदनं प्रत्यागमनं कुशलप्रश्नोक्तिरस्तु दूरतरे ।
आलोकनेऽपि शम्भो यदि सन्देहः कथं जीवे ।।७९।।

आवाहितः स्वभक्तैस्त्वरयैवायासि सर्वपाषाणे ।
चित्तोपले मदीये हे शिव वस्तुं कुतोऽस्यलसः ।।८०।।

वृषभे पशौ दया ते कियती शम्भो पशुप्रियोऽसि यदि ।
विषयविषाशनतोऽहं पशुरेवास्मीति मां पाहि ।।८१।।

त्वयि दृष्ट्वौदासीन्यं तत्स्पर्धातो विवर्धते दैन्यम् ।
मयि तज्जेतुं त्वरया प्रेषय निकटेऽस्ति यत् सैन्यम् ।।८२।।

परिपालयाम्यहं त्वां निकटेन मया किमस्ति ते कार्यम् ।
मैवं दूरे रमणे सुभृताऽपि न मोदते साध्वी ।।८३।।

कतिकतिवारं जननं तव नो जातं न मत्स्मृतिः क्वापि ।
इति कुपितोऽसि यदि त्वत्पदयोर्निदधामि मूर्धानम् ।।८४।।

शिव शङ्कर स्मरारे किञ्चित्प्रष्टव्यमस्ति तत्कथय ।
वञ्चनमेव करिष्यसि किं वा कालान्तरे प्रीतिम् ।।८५।।

यो यन्न वेत्ति दुःखं कर्म स तस्मिन्नियोजयतु शम्भो ।
भिक्षादुःखं जानंस्तत्र कथं मां नियोजयसि ।।८६।।

काकूक्तिर्मुखदैन्यं शिव मे बाष्पस्तथाश्रुसम्पातः ।
त्वय्येकस्मिन् पुरुषे सर्वमिदं निष्फलं भवति ।।८७।।

शिव देहि मे स्वभक्तिं तृष्णा स्वयमेव यास्यति ततो मे ।
पतिमन्यत्र विषक्तं दृष्ट्वा कान्ता न किं त्यजति ।।८८।।

गुणहीनोऽपि शिवाहं त्वत्करमुक्तोऽपि तत् पदं यास्ये ।
भ्रष्टोऽपि भूपहस्ताद्गुणतोऽपि शरो यथा लक्ष्यम् ।।८९।।

भक्तजनेष्वनुरक्तं धरणीधरकन्यया परिष्वक्तम् ।
प्रख्यातनामधेयं जयतितरां भागधेयं मे ।।९०।।

फणिकुण्डलं वहन्ती श्रवणे ताटङ्कमप्यपरभागे ।
सितशोणकान्तियुक्ता काचिन्मद्वासना जयति ।।९१।।

आलिङ्गितोऽपि सव्ये शम्पातत्या शिवः प्रकृतितोऽयम् ।
करुणाम्बुपूर्णगर्भः कश्चिद्धाराधरो जयति ।।९२।।

जटिलं शिरःप्रदेशे निटिले कुटिलं गले तथा नीलम् ।
हृदयीकृताद्रिबालं विलसति कालं जयत् तेजः ।।९३।।

धनुरेकत्र पिनाकं सशरं बिभ्रत् तथाऽपरत्राऽपि ।
शरमैक्षवं च चापं किञ्चित् तत् प्रेम मे जयति ।।९४।।

वाञ्छितवितरणशीलं विचित्रलीलं निरालवालं च ।
ललनालतैकतानं कलये शिवकल्पभूमिरुहम् ।।९५।।

परिहृतदुर्जन तिमिरं नगजानन्दैकसिन्धुवृद्धिकरम् ।
नन्दितभक्तचकोरं वन्दे चन्द्रोदयं कञ्चित् ।।९६।।

निखिलनिगमैगदुग्धां दानविदग्धां शुकादिमुनिदुग्धाम् ।
वपुषा सदैव मुग्धां कलये शिवकामधेनुमहम् ।।९७।।

नित्यप्रभाभिरामं विदलितकामं सदार्धधृतभामम् ।
हृदि कोमलं निकामं श्रीशिवचिन्तामणिं वन्दे ।।९८।।

निर्व्याधि मे शरीरं निराधि चेतः सदा समाधिपरम् ।
कुरु शर्व सर्वदा त्वं नान्यं कामं वृणे कञ्चित् ।।९९।।

आर्यापतेः पदाब्जे निहितं शतपद्यपत्रमयपुष्पम् ।
आर्याशतं सुकृतिनां हृदयामोदं सदा वहतु ।।१००।।

आर्याशतकं समाप्तम् ।

श्रीमदप्पय्यदीक्षितविरचितम्

।। श्री गङ्गाधराष्टकम् ।।

क्षीराम्भोनिधिमन्थनोद्भवविषात्सन्दह्यमानान् सुरान्
ब्रह्मादीनवलोक्य यः करुणया हालाहलाख्यं विषम् ।
निश्शङ्कं निजलीलया कबळयन्लोकान् रक्षादरा
दार्तत्राणपरायणः स भगवान्गङ्गाधरो मे गतिः ।।१।।

क्षीरं स्वादु निपीय मातुलगृहे गतवा स्वकीयं गृहं
क्षीरालाभवशेन खिन्नमनसे घोरं तपः कुर्वते ।
कारुण्यादुपमन्यवे निरवधिं क्षीराम्बुधिं दत्तवा
नार्तत्राणपरायणस्स भगवान्गङ्गाधरो मे गतिः ।।२।।

मृत्युं वक्षसि ताडयन्निजपदध्यानैकभक्तं मुनिं
मार्कण्डेयमपालयत्करुणया लिङ्गाद्विनिर्गत्य यः ।
नेत्राम्भोजसमर्पणेन हरयेऽभीष्टं रथाङ्गन्ददावा
र्तत्राणपरायणस्स भगवान्गङ्गाधरो मे गतिः ।।३।।

सोढुं द्रोणजयद्रथादिरथिकैस्सैन्यं महत्कौरवं
दृष्ट्वा कृष्णसहायवन्तमपि तं भीतं प्रपन्नार्तिहा ।
पार्थं रक्षितवानमोघविषयं दिव्यास्त्रमुद्बोधय
न्नार्तत्राणपरायणः स भगवान्गङ्गाधरो मे गतिः ।।४।।

बालं शैवकुलोद्भवं परिहसत्स्वज्ञातिपक्षाकुलं
खिद्यन्तं तव मूर्ध्नि पुष्पनिचयं धातुं समुद्यत्करम् ।
दृष्ट्वानम्यविरिञ्चिरम्यनगरे पूजां त्वदीयाम्भज
न्नार्तत्राणपरायणः स भगवान्गङ्गाधरो मे गतिः ।।५।।

सन्त्रस्तेषु पुरा सुरासुरभयादिन्द्रादिबृन्दारके
ष्वारूढो धरणीरथं श्रुतिहयं कृत्वा मुरारिं शरम् ।
रक्षन्यः कृपया समस्तविबुधान् जित्वा पुरारीन् क्षणा
दार्तत्राणपरायणः स भगवान्गाङ्गाधरो मे गतिः ।।६।।

श्रौतस्मार्तपथो पराङ्मुखमपि प्रोद्यन्महापातकं
विश्वाधीशमपत्यमेव गतिरित्यालापवन्तं सकृत् ।
रक्षन्यः करुणापयोनिधिरिति प्राप्तप्रसिद्धिः पुरा
ह्यार्तत्राणपरायणः स भगवान्गाङ्गाधरो मे गतिः ।।७।।

गाङ्गं वेगमवाप्य मान्यविबुधैस्सोढुं पुरा या चितो
दृष्ट्वा भक्तभगीरथेन विनतो रुद्रो जटामण्डले ।
कारुण्यादवनीतले सुरनदीमापूरयन्पावनी
मार्तत्राणपरायणः स भगवान्गाङ्गाधरो मे गतिः ।।८।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीगङ्गाधराष्टकम् ।।

श्रीमदप्पय्यदीक्षितविरचितम्

।। निग्रहाष्टकम् ।।

मार्गे सहायं भगवन्तमेव विश्वस्य विश्वाधिक निर्गतोऽस्मि ।
शास्त्रं प्रमाणं यदि सा विपत्स्यात् तस्यैव मन्दो मयि यां चिकीर्षेत् ।।१।।

कान्तारे प्रान्तरे वा मदकुशलकृतं सान्तरं सान्तरङ्गं
महयं द्रुह्यन्तमन्तं गमयतु भगवानन्तकस्यान्तकारी ।
क्षिप्रं विप्राधमस्य क्षिपतु च तदुरस्येव मायाविवर्ता
नार्तान् बन्धूनबन्धूनिव मम शिशिराभ्यन्तरान् सन्तनोतु ।।२।।

सहस्रं वर्तन्तां पथि पथि परे साहसकृतः
प्रवर्तन्तां बाधां मयि विविधमप्यारचयितुम् ।
न लक्ष्यीकुर्वेऽहं नलिनजलिपिप्राप्तमपि त-
न्मम स्वामी चामीकरशिखरचापोऽस्ति पुरतः ।।३।।

संकलय स्याणुशास्त्रप्रचरणविहतिः स्वेन कार्या भुवीति
श्मश्रूणि स्वैरमश्रूण्यपि दृशि महतां स्पर्धया वर्धयन्तः ।
क्षुद्रं विद्रावयेयुर्झटिति वृषपतिक्रोधनिश्वासलेशाः
शास्त्रं शैलादिभृत्यास्तनुयुरखिलभूमण्डलव्याप्तमेतत् ।।४।।

क्वचिदवयवे कांश्चिद्दग्धुं बलादनुचिन्तयन्
निरसनमितो देशात् कर्तुं महेश्वरमाश्रितान् ।
प्रमथपरिषद्रोषैर्दग्धाखिलावयवः स्वयम्
निरसनमितो लोकादेव क्षणेन समश्नुताम् ।।५।।

कालप्रतीक्षा नहि तस्य कार्या
पुलस्त्यपुत्रादिवदन्तकारे ।
त्वदाश्रितद्रोहकृतोद्यमानां
सद्यः पतेदेव हि मूर्ध्नि दण्डः ।।६।।

कण्ठे रुद्राक्षमालं भसितमतिसितं फालदेशे न पश्यन्
नश्यन्येव क्रुधा यः तदपहतिमतिं सत्सु कुर्वीत गुर्वीम् ।
तत्फालात्तूर्णमायुर्लिखितमसुगणं चापि तत्कण्ठदेशात्
क्रुद्धास्ते ह्युद्धरेयुर्निजपदकमलाङ्गुष्ठलीलाविलासात् ।।७।।

सकलभुवनकर्ताः साम्बमूर्तिः श्शिवश्चेत्
सकलमपि पुराणं सागमं चेत्प्रमाणम् ।
यदिभवनि महत्वं भस्मरुद्राक्षभाजां
किमिति न मृतिरस्मद्द्रोहिणस्स्यादकाण्डे ।।८।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीनिग्रहाष्टकम् ।।

श्रीमदप्पय्यदीक्षितविरचितम्

।। श्रीमार्गबन्धु पञ्चरत्नमाला ।।

नित्यं चिदानन्दरूपं निन्हुताशेषलोकेशवैरिप्रतापं ।
कार्तस्वरागेन्द्रचापं कृत्तिवासं भजे दिव्यसन्मार्गबन्धुम् ।।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।१।।

अङ्गे विराजद्भुजङ्गं अभ्रगङ्गातरङ्गाभिरामोत्तमाङ्गम् ।
ह्रींङ्कारवाटीकुरङ्गं शुद्धसंसेविताङ्घ्रिं भजे मार्गबन्धुम् ।।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।२।।

मन्दारभूतेरुदारं मन्दरागेन्द्रसारं महागौर्यदूरं ।
सिन्दूरगौरप्रचारं सिन्धु राजाधितीरं भजे मार्गबन्धुम् ।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।३।।

कन्दर्पदर्पघ्नमीशं कालकण्ठं महेशं महाव्योमकेशम् ।
कुन्दाभदन्तं सुरेशं कोटिसूर्यप्रकाशं भजे मार्गबन्धुम् ।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।४।।

फालप्रदीच्यत्किरीटं फालनेत्रार्चिषा दग्धपुष्पेषुकीटम् ।
शूलाहताऱातिकूटं शुद्धमर्धेन्दुचूडं भजे मार्गबन्धुम् ।।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।५।।

अप्पय्यमखिवर्यरचितं पञ्चरत्नस्तवं मार्गबन्धोरुदारं ।
नित्यं पठेद्यस्तु भक्त्या तस्य मुक्तिः करस्यैव सायुज्यरूपम् ।।
शम्भो महादेव देव, शम्भो महादेव देवेशशम्भो ।।६।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीमार्गबन्धुपञ्चरत्नमाला ।।

श्रीमदप्पय्यदीक्षितविरचितम्
।। श्री मार्गसहायलिङ्गस्तुतिः ।।

पयोनदीतीरनिवासलिङ्गं बालार्ककोटिप्रतिमं त्रिनेत्रम् ।
पद्मासनेनार्चितदिव्यलिङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।१।।

गङ्गातरङ्गोल्लसदुत्तमाङ्गं गजेन्द्रचर्माम्बरभूषिताङ्गम् ।
गौरीमुखाम्भोजविलोलभृङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।२।।

सुकङ्कणीभूतमहाभुजङ्गं संज्ञानसम्पूर्णनिजान्तरङ्गम् ।
सूर्येन्दु बिम्बानलभूषिताङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।३।।

भक्तिप्रियं भावविलोलभृङ्गं भक्तानुकूलामलभूषिताङ्गम् ।
भावैकलोकांन्तरमादिलिङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।४।।

सामप्रियं सौम्यमहेशलिङ्गं सामप्रदं सौम्यकटाक्षलिङ्गम् ।
वामाङ्गसौन्दर्य विलोलिताङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।५।।

पञ्चाक्षरीभूत सहस्रलिङ्गं पञ्चामृतस्नान परायणाङ्गम् ।
पञ्चामृताम्भोजविलोलभृङ्गं वन्दामहे मार्गसहायलिङ्गम् ।।६।।

वन्दे सुराराधितपादपद्मं श्रीश्यामवल्लीरमणं महेशम् ।
वन्दे महामेरुशरासनं शिवं वन्दे सदा मार्गसहायदेवम् ।।७।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीमार्गसहायलिङ्गस्तुतिः ।।

श्रीमदप्पय्यदीक्षितविरचितम्

।। अपीतकुचाम्बास्तवः।।

आनन्दसिन्धुलहरीममृतांशुमौलेः
आसेविनाममृतनिर्मितवर्तिमक्ष्णोः ।
आनन्दवल्लिविततेरमृतार्द्रगुच्छं
अम्ब स्मराम्यहमपीतकुचे वपुस्ते ।।१।।

निर्निद्रकोकनदकोमलकान्तमम्ब
नित्यं सुधानिकरवर्षि पदं त्वदीयं ।
मूर्छाकरज्वररुजा मम तापितस्य
मूर्ध्नि क्षणं सकृदपीतकुचे निधेहि ।।२।।

शीतांशुकोटिसुषुमाशिशिरैः कटाक्षैः
अव्याजभूतकरुणारसपूरपूर्णैः ।
कर्पूरधूलिमिव दिक्षु समाकिरद्भिः
अम्ब क्षणं स्नपय मामरुणाद्रिमान्ये ।।३।।

आविर्भव क्षणमपीतकुचे पुरस्तात्
अम्ब ज्वरेण महता मम तापितस्य ।
येन त्वदङ्घ्रिरुचिजालसुधाप्रवाहे
मग्नस्तदैव तनुतापममुं त्यजेयम् ।।४।।

नानाविधैर्नलिनजातलिप्रक्लृप्तैः
आनीतमूर्छमधिकं क्षुभितैः ज्वराद्यैः ।
आश्वासय क्षणमपीतकुचे कराग्र-
क्रीडाकनत्कनकहल्लकसौरभेण ।।५।।

कण्ठे विषं विषमुचो भुजगाः कपर्दे
पार्श्वेच भूतपतयः प्रमथाश्च भीमाः
शोणाचलेशमुपसृत्य भजेत को वा
नस्यात्तवाम्ब सविधे यदि सन्निधानम् ।।६।।

शक्तिर्जगज्जनन पालन भञ्जनेषु
भोगेषु दिव्यमहिषी तरुणेन्दुमौलेः ।
सिद्धिः करप्रणयिनी तव सन्निधानं
यन्नासि तस्य तदपीतकुचे न जाने ।।७।।

त्वं साक्षिणी प्रलयभैरवताण्डवानां
त्वं शोषिणी सहरिधातृचराचराणाम् ।
त्वं मोचिनी सकलसंसृतिजालकानाम्
त्वां ब्रह्मसंविदमपीतकुचे नमामि ।।८।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीअपीतकुचाम्बास्तवः ।।

श्रीमदप्पय्यदीक्षितविरचितम्

।। श्री हरिहराभेदस्तुतिः ।।

मारमणमुमारमणं फणधरतल्पं फणाधराकल्पं ।
मुरमथनं पुरमथनं वन्दे बाणारिमसमबाणारिम् ।।१।।

गोनयनमिलानयनं रविशशिनेत्रं रवीन्दुवह्न्यक्षम् ।
स्मरतनयं गुहतनयं वन्दे वैकुण्ठमुडुपतिचूडम् ।।२।।

कृष्णतनुमुमार्धतनुं श्वशुरगृहस्थं सुमेरुशृङ्गस्थम् ।
दशवपुषं वसुवपुषं वन्दे भूजानिमचलभूजानिम् ।।३।।

कुध्र धरमुदग्निधरं जलधिसुताकान्तमगजाकान्तम् ।
गरुडरथं वृषभरथं वन्दे पञ्चास्त्रमखिलदिग्वस्त्रम् ।।४।।

ब्रह्मसुतमृगादिनुतं गजगिरिवासं गजेन्द्रचर्माङ्गम् ।
सुरशरणं हरिशरणं वन्दे भूदारमखिलभूदारम् ।।५।।

पार्थसखमपास्तमखं जलधरकान्तिं जलन्धरारातिम् ।
विधिविनुतं हरिविनुतं वन्दे नीलेशमखिलभूतेशम् ।।६।।

पीतपटमरुणजटं परिमलदेहं पवित्रभस्माङ्गम् ।
जलजकरं डमरुकरं वन्दे गोपालमखिलगोनाथम् ।।७।।

चक्रकरमभयकरं मणिमयभूषं फणामणीभूषम् ।
धृतधनुषं गिरिधनुषं वन्दे गोविन्दमनघगोवाहम् ।।८।।

निद्रातु वा नृत्यतु वाधिरङ्गं गरुत्मता यातु ककुद्मता वा ।
न वस्तुभेदप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दुशेखरे ।।९।।

मोमारमणस्तवनं पठन्ति भक्त्या हरीशयोः कृपया ।
भुक्त्वेह सकल भोगानन्ते गच्छन्त्यनुत्तमं धान ।।१०।।

।। इति श्रीमदप्पय्यदीक्षितविरचितं श्रीहरिहरभेदस्तुतिः ।।

राष्ट्रिय संस्कृत संस्थान
ग्रन्थालय
जयपुर

J.